मानवसंसाधनविकासमन्त्रालयसाहाय्येन न्यायवैशेषिकविभागद्वारा समायोजिता

न्यायशास्त्रसदः-परिचर्चा

(शक्तिवादः)

प्रधानसम्पादकः

प्रो.वाचस्पति उपाध्यायः

कुलपतिः



सम्पादकः

प्रो.पीयूषकान्तदीक्षितः

न्यायवैशेषिकविभागाध्यक्षः

This book is exclusively published on Bharatavani Portal (www.bharatavani.in) with permission.

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठग्रन्थमालायाः सप्तषष्टितमं पुष्पम्

मानवसंसाधनविकासमन्त्रालयसाहाय्येन न्यायवैशेषिकविभागद्वारा समायोजिता

न्यायशास्त्रसदः-परिचर्चा

(शक्तिवादः)

BVP-192
भारतवाणी परियोजना / BHARATAVANI
भारतीय भाषा संस्थान
CENTRAL INSTITUTE OF INDIAN LANGUAGES
मैसूरु / MYSURU - 570 006

प्रधानसम्पादकः
प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकः
प्रो० पीयूषकान्तदीक्षितः
न्यायवैशेषिकविभागाध्यक्षः

सहसम्पादकौ

डॉ. महानन्दझा
वरिष्ठव्याख्याता-न्यायवैशेषिकविभागे

डॉ. रामचन्द्रशर्मा
व्याख्याता-न्यायवैशेषिकविभागे

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-११००१६

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालय:)
कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-११००१६

© प्रकाशक:

आइ.एस.बी.एन : ८१-८७९८७-२३-५

संस्करणम् २००९

प्रकाशकस्य लिखितपूर्वानुमतिं विना ग्रन्थस्यास्य कोऽप्यंश:
अनुवादरूपेण प्रकारान्तरेण वाऽनुकर्त्तुमुपयोक्तुञ्च सर्वथा वर्जितमास्ते।

मूल्यम् : ३५०-००

मुद्रक:
अमरप्रिंटिंगप्रैस:
विजयनगरम्, देहली-११०००९
९८७१६९९५६५, ९८९१७०९२१७

Shri Lal Bahudur Shastri Rashtriya Sanskrit Vidyapeetha Book Series-67

Nyāyaśāstrasadaḥ-Paricarcā

(Śaktivādaḥ)

Organised by the Nyāya Vaiśeṣika department with the assistance of Ministry of Human Resource Development, Govt.of India.

Chief Editor
Prof. Vachaspati Upadhyay
Vice-Chancellor

Editor
Prof. Piyushkant Dixit
Head of the Nyāya Vaiśeṣika Department

Co-editors
Dr. Mahananda Jha
Senior Lecturer-Nyāya Vaiśeṣika

Dr. Ramachandra Sharma
Lecturer-Nyāya Vaiśeṣika

SHRI LAL BAHADUR SHASTRI RASHTRIYA
SANSKRIT VIDYAPEETHA
DEEMED UNIVERSITY
NEW DELHI

Publisher :
Shri Lal Bahudur Shastri Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Qutab Institutional Area,
New Delhi-110016
www.slbsrsv.ac.in

© Publisher

ISBN : 81-87967-23-5

Edition :- 2009

Transtion or reproduction by any means or use of any part of this book without prior written permission of the publishor is strictly prohibited

Price : Rs. 350-00

Printed at :-
Amar Printing Press
Vijay Nagar, Delhi - 110009,
9871699565, 9891709217

विषयानुक्रमः

द्वितीयः परिचर्चाखण्डः

तृतीयः शक्तिवादग्रन्थखण्डः

सामान्यकाण्डः

विशेषकाण्डः

परिशिष्टकाण्ड:

प्रो. वाचस्पति उपाध्याय
कुलपति
Prof. Vachaspati Upadhyaya
Vice-Chancellor

श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ
(मानित विश्वविद्यालय)
कुतुब इन्स्टीट्यूशनल एरिया, नई दिल्ली—११००१६
Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeta
[Deemed University]
Qutub Institutional Area, New Delhi-110016

नैवेद्यम्

वादकथाया भारतीयदर्शनेषु विद्यत अनितरसाधारणं महत्त्वम्, अत एव गीतायां परमयोगिना श्रीकृष्णेन प्रोक्तम्— "वाद: प्रवदतामहम्"। इयं वादकथा तत्त्वबुभुत्सया गुरुशिष्ययोर्मध्ये सतीर्थ्ययोर्मध्ये वा अहमहमिकया प्रवर्तते।

न्यायदर्शने विविधानां विषयाणां तात्त्विकज्ञानं कारयितुं श्रीमद्भिर्गदाधरभट्टाचार्यैश्चतु:षष्टि—संख्याका वादा विरचिता इति श्रूयते। एतेषु शक्तिवाद—व्युत्पत्तिवाद—विषयतावाद—न्यूनतावादादयस्तावदिदानीमपि अध्ययनाध्यापनपरम्परायां सुलभा:। बहवो वादाश्च गदाधरविरचिता इदानीन्दुर्लभा इति विदन्त्येव विद्वांस:। मन्ये ये वादग्रन्था गदाधररचिता विलुप्तास्तत्र कारणं तेषां ग्रन्थानामध्ययनाध्यापनाभाव एव। साम्प्रतं दार्शनिकजगति बाहुल्येन व्युत्पत्तिवादस्य केचनांशा एवाऽध्ययनाध्यापनपरम्परायां विराजन्ते, एवमेव शक्तिवादोऽपि पदपदार्थयो—र्मध्ये विद्यमानां शक्तिं समीक्षितुं श्रीमता गदाधरेण विरचित: कथञ्चिदध्ययनाध्यापनपरम्परायां तिष्ठतीति वयं जानीम:। प्रायो न्यायशास्त्रसम्बद्धा विद्वांस एव सर्वशास्त्रोपकारकस्यास्य ग्रन्थस्याऽध्ययने रुचिशीला: सन्तीति विभाव्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य न्यायवैशेषिकविभागेन मानवसंसाधनविकास—मन्त्रालयादार्थिकं साहाय्यं समवाप्यैकाऽखिलभारतीया शास्त्रसंसत् मार्चमासस्य सप्तविंशदिनाङ्कादारभ्यैकोनविंशदिनाङ्कं यावदष्टोत्तरद्विसहस्रतमे खिस्टाब्दे समायोजिता । अत्र संसदि देशस्य लब्धप्रतिष्ठा विद्वांस आचार्या: पं०श्रीरामयत्नशुक्ला व्याकरणशास्त्रमर्मवेत्तारो विषयविशेषज्ञत्वेन समवेता:। न्यायशास्त्रमर्मज्ञा विद्वांस आचार्या: पं०श्रीसुधाकरदीक्षिता अप्यत्र शक्तिवादरहस्यं स्फोरयितुं समुपस्थिता आसन्। बहवो विद्वांसो न्याय—व्याकरण—मीमांसा—वेदान्तादिनिष्णाता: न्यायशास्त्रसंसदि वाक्यार्थं विधातुं सोत्साहं समुपस्थिता आसन्। अस्यां संसदि शक्तिवादस्य निगूढं रहस्यं साधु विवेचितमिति महत: प्रमोदस्य विषय:।

न्यायशास्त्रसंसदि प्रस्तुतानां निबन्धानां विचाराणां प्रकाशनं, विवृतिटीकासहितगदाधररचितस्य दुर्लभस्य शक्तिवादग्रन्थस्य च प्रकाशनं न्यायविभागेन विधीयत इति विज्ञाय नितरां प्रसीदति मे चेत:।

शक्तिवादनामकोऽयं ग्रन्थश्शब्दखण्डसम्बद्धो विद्यार्थिनां सुधियां च कृते अतितरामुपादेय इति विदितमेव विपश्चिताम्। वैयाकरणा: पदपदार्थयोर्मध्ये बोधकतारूपां शक्तिमभ्युपयन्ति। मीमांसका: पदपदार्थयो—र्मध्ये विद्यमानामिमां शक्तिं पदार्थान्तरभूतां स्वीकुर्वन्ति। नैयायिकास्तु ईश्वरेच्छारूपामिच्छारूपां वा पदपदार्थयो—

र्मध्ये विद्यमानां शक्तिमङ्गीकुर्वन्ति। अत्र त्रिषु मतेषु किं तावत् तात्त्विकं मतमिति निर्णेतुं तार्किकचूडामणय: श्रीगदाधरभट्टाचार्याश्शक्तिवादनामकं ग्रन्थं विरचितवन्त इति नितान्तं प्रसिद्धं तथ्यम्। ग्रन्थोऽयं त्रिषु काण्डेषु विभक्तो राराजते। तत्राऽऽदिमे सामान्यकाण्डे यावत्पदगताऽनुगता शक्ति: परमतनिरासपूर्वकमाचार्यैर्निरूपिता। द्वितीये विशेषकाण्डे विवादास्पदशक्तिकानां कतिपयपदविशेषाणां शक्ति: कुत्रास्तीति भट्टाचार्यैस्साधु संस्थापितम्, अन्तिमे च परिशिष्टकाण्डे भट्टपादश्रीकरमण्डनमिश्रगुरुप्रभाकराणां मीमांसकवरेण्यानां शक्तिविषयका विचारा: श्रीमद्भिर्गदाधरभट्टाचार्यैर्निबद्धास्सन्ति।

एतादृशस्य विशिष्टस्य ग्रन्थस्य साधु सम्पादनं विधाय दर्शनसङ्कायान्तर्गतन्यायवैशेषिकविभागेन रमणीयं प्रकाशनं क्रियते, सहैव न्यायशास्त्रसंसदि प्रस्तुतानां शोधप्रवणानां निबन्धानामपि प्रकाशनं विधीयत इति तोषविशेषस्य विषय:। एतदर्थमहं विभागस्य सर्वान् सदस्यान् स्वाशिषा संयोजयामि। एतादृशे कर्मणि विभागसुधियां रुचिरनुदिनं प्रवर्धेतेति विश्वेशचरणयो: प्रार्थयमानो विरमामीति शम्।

प्रो. वाचस्पति उपाध्याय:
कुलपति:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली–११००१६

PREFACE

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये। जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ।।

Recently I had attended a public meeting, where the convener was talking about the rich Indian culture. Addressing the people he compared the Indian culture to a river like the Ganga. Continuing his comparison, he clarified that just like a river is well protected by her strong banks; Indian culture is also thoroughly protected by two strong traditions namely Vaidika and Shraman. At last concluding his view, the Convener said that "if we minutely examine the facts, then it becomes very clear that there is no difference between the Vaidika and Shramana traditions."

The concluding statement was really shocking to me. I started to think if it is possible that two banks of any large river can ever meet. Suppose, in any way if it is possible, then what will be happen to the river - or Indian culture, in case of oneness of Vaidika and Shraman traditions?

In this context, all of a sudden, verses of the great religious book - the Manusmriti struck my mind, in which Manu the author of Manusmriti clarifies that you should die in your religion but never accept others' religion because it is the cause of much fear.[1]

Here, what is fear? The answer is the destruction of different types of religions and social principles. It is a well decided practice in our rich Shastric tradition that we honour every tradition of our society though they may harbour viewpoints opposite to our own tradition, but we should live and die only according to our own religious faith and tradition. Only then can we achieve our life's aim properly.

In India we live in a democratic political system which consists of parties and individuals opposing each other. Although opponents honour each other, it doesn't mean that both are same. However, we can say that the main aim of both is to save the country.

Similarly we can say that the Vaidika and Shraman and other traditions are having same aim - that is to save our great Indian culture. However, we should never try to create an unwanted confusion in our society by equating such divergent traditions.

१. स्वधर्मे निधनं श्रेय: परधर्मो भयावह: —मनुस्मृति ;

In this background if we start to think about 'Shabda-Shakti' or 'Power of the word' only then can we understand the real meaning of the words as described by the Navya-Nyaya philosophy.

We all know that the Navya-Nyaya philosophy's genesis lies in the Nyaya-Darshan, written by the great Indian seer and logician Gautam. Nowadays some people are trying to establish that because Navya-Nyaya is based on Vaisheshika view so Navya-Vaisheshika is the appropriate word instead of Navya-Nyaya for Gangesh Upadhya's Nyaya exposition. In my view such thinking is totally baseless because Shri Gangesha himself clarifies in the very starting of the Pramanyavada Prakarana of Tatva-Chintamani that "Maharshi Gautama has written the Anvikshikee or Nyaya-Shastra to liberate the whole world from deep sorrow. In this process he has written in the first Sutra that the true knowledge of sixteen elements of Nyaya Shastra is the means of Moksha or liberation. Because the true knowledge of sixteen elements is based on the knowledge of Pramana or means of knowledge, so the means of knowledge is discussed first of all in this Pramanya-vada Prakarana."[1]

In this way, according to Gangesha, the author of Navya-Nyaya book Tatva-Chintamani it becomes clear that the Chintamani is firmly based on Gautama's Nyaya-Sutra - so it would not in any way be called Navya-Vaisheshika instead of Navya-Nyaya.

Just like Pramana or means of knowledge, Shakti or power of the words accepted as a relation between word and meaning is also thoroughly explored in the Navya-Nyaya tradition - mainly by Acharya Gadadhara Bhattacharya in the Shakti-Vada and by Acharya Jagadish Tarkalankar in the Shabda Shakti Prakashika.

Basically Shakti was discussed for the first time in the Nyaya-Sutra of Gautama in the form of the Sutra - "Na Samayikatvacchhabdarthasampratyayasya"[2]. In this Sutra, Gautama clarifies that the knowledge of a particular meaning from a particular word is due to the knowledge of Shakti which is accepted as a specific relation between word and meaning. According to the Nyaya-Sutra, through this Shakti relation we can not establish Vyapti or necessary concommitance between word and meaning in any way because to establish Vyapti between any two elements, we need 'Vritti-Niyamaka Sambandha'[3] or a rule based relation. However, Shakti is not a Vritti-Niyamaka Sambandha or relation.

१. अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्रादौ प्रेक्षावत्प्रवृत्यर्थं प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यादावसूत्रयत् तेष्वपि प्रमाणधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते —चिन्तामणिः, प्रामाण्यवादप्रकरणम्।

२. अ०२, आ० १, सू० ५५, पृ० ५४३

3. In Nyaya tradition only few relations are accepted as 'Vritti-Niyamaka" - like Samyoga, Samavaya, Swaroop etc. because through these relations we can say that anything exists on any locus. For example, we can say that 'Pot is on the earth' and this type of use occurs among the scholars due to Vritti-Niyamaka relation that is Samyoga.

In the same way in the Vaisheshika Sutra written by Maharshi Kanada, the relation between word and meaning has been discussed in detail. In the Vaisheshika Sutra "Nishkriyatvat"[1], the question is being raised that between word and meaning the relation- - Samyoga is impossible because word or Shabda is Guna or quality and in Guna, Kriya or action never sustains and without action, in word, the relation to the meaning may not be possible.

It is very right that in the word- 'Pot', action the cause of contact or Samyog is impossible. However, in a pot which is a substance or Dravya, action or Kriya is possible. So we can say that due to action in substance or Dravya, the connection or Samyoga between word 'Pot' and meaning of the Pot i.e. a receptacle made from soil, may be possible. But due to two reasons this is also not acceptable. The first reason is that between substance and quality there is only Samavaya relation - not Samyoga, and the second reason is lack of proper experience. When we use the sentence - 'Pot is on the earth', then we know the meaning of this sentence, but here no one feels any action in the pot - so because of this experience we can decide that due to the hypothesis of the existence of action in substance, we cannot establish contact or Samyoga between the pot-word and the meaning 'pot'. To prove the same fact, we can analyse one more example - when we use "There is no pot on the earth" then here too no one can relate the word-pot to it's meaning which does not exist.[2] We all know very well that to relate any two objects, the existence of both object is a must. Finally Maharshi Kanada decides that between word which is able to express meaning and meaning which is capable to be known by word there is no Samyoga relation.[3] Similarly between word and meaning there is no Samavaya relation too because Samavaya relation is acceptable only between those two substances in which one, if not yet destroyed definitely exists in another part. For example we can take a 'pot' - in 'pot' there are two things, one is a "pot" and one is the part of 'pot' means 'Kapala' (the hemispherical half of a pot). Between the two, the 'pot', if not yet become destroyed regularly exists in the Kapala only. So we can say that between pot and its part-Kapala, there is special relation whose name is Samavaya according to the Nyaya-Vaisheshika tradition.

Regarding word and meaning, the above condition does not apply and so it is decided that between word and meaning there is no Samavaya relation.[4]

---

१. वै०सू०वृ०; अ०७, आ०२,सू०१६,पृ०१०४

२. असति नास्तीति च प्रयोगात् – वै०सू०वृ०; अ० ७, आ० २, सू०१७, पृ० १०४

३. शब्दार्थावसम्बद्धौ – वै०सू०वृ०; अ० ७, आ० २, स०१८, पृ० १०४

४. संयोगिनो दण्डात् समवायिनो विशेषाच्च – वै०सू०वृ०; अ० ७, आ० २, स०१९, पृ० १०४

If between word and meaning there is no Samyoga or Samavaya then how after listening to a word do we understand its specific meaning? Answering this question, Maharshi Kanada also replies just like Maharshi Gautama - "Samayikah Shabdartha-Sampratyayah". According to this Vaisheshika Sutra, between word and meaning the relation is named Samay, Sanketa, Shakti or desire. The form of desire is - "After uttering of this word this particular meaning should be understood." After the knowledge of this type of desire, the meanings of words are known. This type of desire is accepted as a relation between word and meaning according to Maharshi Kanada. This desire may be very old or recent.

The only difference between the Vaisheshika and Nyaya schools is that the Vaisheshika school, with the help of desire or Shakti accepts inference[1] of the meaning after listening to the word whereas the Nyaya followers prove the word (Shabda) as a separate means of knowledge and deny strongly the merger of word as a means of knowledge with inference. Though the Naiyaikas also accept the 'word' as 'means of knowledge' or Pramana, they further clarify that it means only cause or Hetu and not any thing more.[2] Rejecting the view of Vaisheshikas, Naiyaiykas prove their point by indicating towards those words whose meaning could never have been known by any individual in the world - e.g. Heaven or Swarga or heavenly ladies or Apsaras etc. These words' meanings could not be known through the word as Vaisheshika followers would like to accept as part of inferential knowledge. To know these meanings, the word 'heaven' or 'Swarga' has to be uttered by 'Apta'[3] or speaker of truth (Yathartha Vakta) i.e. Rishi

---

१. एतेन शाब्दं व्याख्यातम्
एतेन अनुमाननिरूपणेन, शाब्दं शब्दप्रभवं ज्ञानं व्याख्यातम् अनुमितिरूपं दर्शितं भवतीत्यर्थ:। शब्दोऽपि अनुमानमेव न तु पृथक् प्रमाणमिति भाव:। चैत्र: पचतीति द्वे पदे उच्चार्येते ताभ्यां द्वौ अर्थौ बोध्येते। तयोर्मिथ: संसर्गस्य तु बोधकं किमपि नास्ति। अत: स अनुमानगोचर इति। – वै०सू०वृ०; अ० ९, आ० २, सू० ३, पृ० १२१

२. हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम्।
वह्निमान् धूमादित्यत्र धूमो हेतुरुच्यते। लिङ्गमिति च। कस्मात्। अर्थान्तरप्रमितिहेतुत्वात्। स एव अपदेश उच्यते। उक्तवि–धहेतुतया निर्दिश्यमानत्वात्। अर्थान्तरप्रमितिरत्र अनुमितिरूपा विवक्षिता। एवं विशेषविवक्षां विना सामान्यत: प्रमितिकारणत्वाभिप्रायेण धूम एव प्रमाणमित्युच्यते। प्रमितिगम्यां कृत्वा केवलं करणमित्यपि। एवमेते शब्दा: एकार्थवाचका भवन्ति। तत्र पदार्थसंसर्गविषयाम् अनुमितिरूपां प्रमां जनयन् शब्द: तत्र प्रमाणं भवति हेतुश्च। अतोऽनुमानात्मक एवायम्। न तु ततोऽतिरिक्तं प्रमाणम्। शब्द: प्रमाणमित्यत्र न विमति:। लिङ्गविधया प्रमाणमिति त्वातिष्ठामहे, इति भाव:। वै०सू०वृ०; अ०९,आ०२,सू०४,पृ०१२२

३. आप्तोपदेशसामर्थ्याच्छब्दादर्थसम्प्रत्यय:। न्या०द०; अ० २, आ० १, सू० ५२, वा०ता०टी० पृ०५३६
स्वर्ग:, अप्सरस:, उत्तरा:, कुरव:, सप्त द्वीपा:, समुद्रो लोकसन्निवेश इत्येवमादेरप्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्यय:, किं तर्हि? आप्तैरयमुक्त: शब्द इत्यत: सम्प्रत्यय:, विपर्ययेण सम्प्रत्ययाभावात्; न त्वेवमनुमानमिति। न्या०द०; अ० २, आ० १, सू० ५२,भा० पृ०५३६

(seer), Arya (noble) and including Mlechchha (those who belong to entirely foreign cultures) besides God.

According to Nyaya-Darshan, between a word and meaning, two type of relations are possible, - one is Vachya-Vachaka-Bhava (i.e. 'This meaning is known by this word') and second is Prapti or Samyoga ('Contact'). The first relation is accepted, but the second one is totally rejected in the Nyaya tradition.

Some scholars accepted this second relation as a natural relation (Swabhavika Sambandha) between word and meaning. But according to Nyaya philosophy it is not so natural like in the water filled pot, where between water and pot there is very natural contact which is called as Samyoga relation. Clarifying the view, it is mentioned that only those two objects' relation is called Samyoga or natural conjunction when both are cognised by a single Indriya or sense-organ. In the above example, water and pot are both cognised by a single sense organ i.e. eye - thus, between water and pot there is Swbhavika or natural relation. The relation between air and plant is not natural because both are not known by same sense organ of perception. Air is known by the sense of touch whereas the plant is seen by the eyes. In the same way, between words and meaning there is no natural relation because word is heard by the ear and the meaning of the word is known by another sense organ. Besides, there are many meanings like 'heaven' or 'time' which no one is able to cognise by a sense organ in any way. So eventually, it is decided that the relation between word and meaning is not natural - many words and meanings are not the

---

न ह्ययं शब्दमात्रात् स्वर्गादीन् प्रतिपद्यते। किन्तु पुरुषविशेषाभिहितत्वेन प्रमाणत्वं प्रतिपद्य तथाभूताच्छब्दात् स्वर्गादीन् प्रतिपद्यते। न चैवमनुमाने, तस्मान्नानुमानं शब्द इति। न्या०द०; अ० २, आ० १, सू० ५२, वा० पृ०५३६
यो ह्यत्यन्तादृष्टपूर्वः स्वर्गापूर्वदेवतादिः स वाक्यार्थरूपः। तथाहि –"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्।" इति। स्वर्गो वाक्यार्थः। एवमपूर्वमपि; तत् खलु स्वर्गनरकादिहेतुः पुरुषविशेषगुणः कालान्तरस्थायी स्वकार्यविरोधीति वाक्यार्थ एव। एवं देवतापि। साऽपि हि सूक्तहतिर्भागिनी सहस्राक्षाद्युपेतदेहादिमती वाक्यार्थ एव। नैवैष शब्दादृते अस्मदादिप्रत्यक्षादिगोचरः। न चागृहीतं लिङ्गमस्मिन् प्रवर्त्तितुमर्हति। न चागृहीते सम्बन्धिनि शक्यग्रहः समबन्धः। पदं तु यद्यपि पदार्थसङ्गतिसम्वेदनमपेक्षते यद्यपि पदार्थ एव पदार्थान्तरविशिष्टो वाक्यार्थः। येऽपि वाक्यार्थे स्वर्गादौ पदार्थस्मरणद्वारेण प्रवर्तमानं सङ्गतिग्रहानपेक्षमेव स्वर्गरूपवाक्यार्थं कुर्वन्ति, स्वलोकसिद्धं सुखजातीयमुद्दिश्य लोके सिद्धैरेव दुःखाद्यसम्भेदैर्विशिष्टं स्वर्गपदवाच्यं प्रतिपादयन्ति, नापदार्थं वाक्यार्थं कुर्वन्ति वाक्यार्थे च पदवचनं स्वर्ग इति यथा श्रोत्रियश्छन्दोऽधीत इति यथा चक्षुरादयो रूपादिष्वगृहीतसङ्गतयः प्रवर्तन्ते एवं पदार्थसङ्गतिग्रहापेक्षाण्यपि पदानि वाक्यार्थबोधने न सङ्गतिग्रहमपेक्षन्ते, कार्यव्यङ्ग्यत्वात् प्रमाणभावस्य सङ्गतिग्रहापेक्षेभ्योऽपि च पदेभ्यो वाक्यार्थावबोधकार्यदर्शनात्। तस्मान्न पदं तदर्थो वा वाक्यार्थावबोधे लिङ्गं तत्र सम्बन्धग्रंहानपेक्षत्वाद् रूपादिबोधे चक्षुरादिवत्। न्या०द०; अ० २, आ० १, सू० ५२, वा०ता०टी० पृ०५३६

subject of sense organs - so there relation i.e. Samyoga or Prapti[1] is also not the subject of perception.[2]

Though there is no Prapti or Samyoga relation between word and meaning how can we accept a Vyapti relation between word and meaning? Responding to this question, Maharshi Gautam tells in the Nyaya-Sutra - "Poorana-Pradaha-Patananupalabdheshcha Sambandhabhavah" - that we can not accept Vyapti between word and meaning because after pronouncing the word Agni or fire, the meaning of the word 'fire' never exists[3] in mouth due to Vyapti relation just like because of Vyapti relation between smoke and fire - if smoke exists then undoubtedly fire must also be there. After uttering the word 'fire' no one feels the existence of fire in his/her mouth. Thus we can decide that 'Vyapti' also may not be acceptable as the relation between word and meaning.

Here one more aspect can be added. It is that word is like candle light - that illuminates the user as well as others around at the same time. However, inference is to only facilitate the individual who cognises and not others.[4] That is why we cannot merge the word (aural cognition) with inference.

Candle light only illuminates those objects which are related (in proximity) to the candle-light. In the same way, in the present context the word also only explores those meanings which are well related (proximate) to it.[5] This relation is only Samaya, Sanketa, Shakti or desire.

---

१. अप्राप्तयोस्तु या प्राप्ति: सैव संयोग ईरित: —कारिकावली

२. प्राप्तिलक्षणस्तु शब्दार्थयो: सम्बन्ध: प्रतिषिद्ध:। कस्मात्? प्रमाणतोऽनुपलब्धे: — प्रत्यक्षतस्तावच्छब्दार्थप्राप्तेर्नोप-लब्धिरतीन्द्रियत्वात्। येनेन्द्रियेण गृह्यते शब्दस्तस्य विषयभावमतिवृत्तोऽर्थो न गृह्यते। अस्ति चातीन्द्रियविषयभूतोऽप्यर्थ: समानेन चेन्द्रियेण गृह्यमाणयो: प्राप्तिर्गृह्यत इति। न्या०द०; अ० २, आ० १, सू० ५२, भा० पृ०५३९
एकेन्द्रियग्राह्येभ्यो हि प्राप्ति: प्रत्यक्षा यथाङ्गुल्यो: न तु शब्दार्थयोरेकेन्द्रियग्राह्यता तस्मान्नानयो: प्राप्ति: प्रत्यक्षगम्या वायुवनस्पतयोरिवेत्यर्थ:। न्या०द०; अ० २, आ० १, सू० ५२, भा० पृ०५३९

३. यदि शब्दस्यार्थेन व्याप्ति: स्यात् तदा अन्नाग्न्यसिशब्दैर्मुखपूरण—मुखदाह—मुखपाटनानि स्यु: शब्दस्य व्याप्यस्य सत्त्वेनान्नादेरर्थस्यापि सत्त्वात्। न्या०द०; अ० २, आ० १, सू० ५३, वृ० पृ०५४१

४. न चानुमानं शब्द: स्वपरात्मप्रत्यायकत्वात्। यत् स्वपरात्मप्रत्यायकं तदनुमानं न भवति यथा प्रदीप:— प्रदीपो येनापि क्रियते तस्याप्युपलब्धिसाधनं भवति अन्यस्यापि। शब्दोऽप्येवं तस्मान्नानुमानमिति। न्या०द०; अ० २, आ० १, सू० ५४, वा० पृ०५४२

५. शब्द: सम्बद्धोऽर्थं प्रतिपादयति प्रत्ययनियमहेतुत्वात् प्रदीपवत्— य: प्रत्ययनियमहेतु स सम्बद्धोऽर्थप्रत्यायको दृष्ट: यथा प्रदीप:, शब्दश्चैवंधर्मा वस्तुप्रत्ययो भवतीति नियमात् कुण्डलीति प्रत्ययवदिति। न्या०द०; अ० २, आ० १, सू० ५४, वा० पृ०५४२

Now we will see that how this desire or Shakti which is established as the relation between word and meaning is known in the common and technical senses. In the very beginning of the world God himself indicated all the useful words like 'Gau' (Cow) etc. as the meaning of cow etc. These indications or Samketas of God traditionally passes on to us from one generation to another generation. When the younger generation who are not aware about the Shakti or power of word, closely watch the uses of different type of sentences of the older generation, then they are able to know the actual meanings of the different type of words due to the various actions and expressions of the older generation. An attempt to choose any thing, an attempt to leave out any thing, fear, sorrow, happiness are observed and subsequent generations very scientifically understand that a particular word is used for a meaning.[1] If through this process, the specific meanings of different words are not naturally known then the Vyakarana or Sanskrit grammar comes[2] to decide the correct and incorrect usages of words. In this way it is now decided that the knowledge of samaya, Shakti or desire is possible only through Sanskrit grammar[3] and observation of everyday usages of the older generation.

The relation accepted between word and meaning is not natural or swabhavika because due to natural relation only one meaning would be known, however, many words convey different meanings depending on the context and usage. For example in Sanskrit language there is very famous word 'Yava' which has different meanings. In this context three principal usages are mentioned in the Vatsyayan Bhashya. They are 'Rishi' 'Arya' and 'Mlechchha'. According to 'Arya' usages, the word 'Yava' is used for 'Deergha-Shook' (Barley). In the 'Mlechchha' usage, the word 'Yava' is used for for 'Priyangu' (a fruit bearing

---

१. परमेश्वरेण हि यः सृष्ट्यादौ गवादिशब्दानामर्थे सङ्केतः कृतः, सोऽधुना वृद्धव्यवहारे प्रयुज्यमानानां शब्दानामविदितसङ्गतिभिरपि बालैः शक्यो ग्रहीतुम्। तथा हि वृद्धवचनानन्तरं तच्छ्राविणो वृद्धान्तरस्य प्रवृत्तिनिवृत्तिभयशोकहर्षादिप्रतिपत्तेस्तद्धेतुं प्रत्ययमनुमिमीते बालः। तस्य च सत्स्वप्यन्येष्वर्थेषु भूतस्य अभूतस्य वा श्रवणसमनन्तरं च भवतो वाक्यश्रवणहेतुतामवगच्छति तदवयवानां च पदानामावापोद्वापभेदेन तदर्थप्रत्ययोपजनापायदर्शनात्तेषु तेष्वर्थेषु तेषां तेषां पदानां वाचकत्वं कल्पयति। एवं पदावयवेषु प्रकृतादिष्वपि द्रष्टव्यम्। सोऽयं वृद्धव्यवहारः साम्प्रतिकानां सङ्केतग्रहोपायः, सर्गादिभुवां तु महर्षिदेवतादीनां परमेश्वरानुग्रहाद्धर्मज्ञानवैराग्यैश्वर्यातिशयसम्पन्नानां परमेश्वरेण सुकर एव सङ्केतः कर्तुम्। तद्व्यवहारादस्मदादीनामपि सुग्रहः सङ्केतः। सङ्केतग्रहो न सम्बन्धस्मृतिमपेक्षते आप्तपरम्परात एव ततो निःशङ्कव्यवहारोपपत्तेः। न्या०द०; अ० २, आ० १, सू० ५५, वा०ता०टी० पृ०५४४

२. पदं ज्ञायते व्युत्पाद्यते अनेनेति व्युत्पत्त्या व्याकरणादित्यर्थः। ननु सर्वेषां शब्दानामविदितसङ्गतिः कथं व्याकरणादपि शब्दमात्रात् समयं प्रतिपद्यते इत्यत आह – लोकतश्चेति। वृद्धव्यवहारावधृतसमयो व्याकरणात् साध्वसाधुविभागं च प्रतिपद्यत इत्यर्थः। न्या०द०; अ० २, आ० १, सू० ५५, वा०ता०टी० पृ०५४५

३. स पुनः समयः कुतः प्रत्येतव्यः? पदज्ञानाल्लोकतश्चेति। तदिदं समयशास्त्रं शब्दस्याविलोपार्थं प्रणीतम्। लोकतश्च समयो बोद्धव्यः मात्रादींस्तेषु तेष्वर्थेषु तांस्तान् शब्दान् प्रयुञ्जानानुपलभ्य सोऽपि तथैव शिक्षितस्तांस्तानेव शब्दांस्तेषु तेष्वर्थेषु प्रयुङ्क्ते न पुनरेनं लिपिमिव कश्चित् शिक्षयतीति। न्या०द०; अ० २, आ० १, सू० ५५, वा० पृ०५४५

plant). Another word is 'Trivrit' which is used by 'Rishis' for 'Stotriya-Navaka' and this same word is frequently used by 'Arya' for 'Lata' or creeper.

I am not entirely confident which community is referred to as 'Mlechchha'. For the time being suppose that some tribe/community foreign to India (the land of the Arya's[1] – as understood in the Shastric context) is depicted by the word "Mlechchha". Thus, a member of the foreign community is expected to use the word 'Yava' to mean 'Priyangu' in his country. However, if the same 'Mlechchha' resides in the land of the Aryas, due to the effect of the dominant usage, the Mlechchha uses the word 'Yava' to mean Barley. This example it becomes more clear that between word and meaning there is no fixed or Swabhavika relation like Vyapti but this relation is Shakti which is very liberal so its meaning may temporally change according to personal[2] desire.

According to Nyaya Darshan or Nyaya Sutra, the definition of word or Pada is "Te Vibhaktyantah Padam".[3] Normally people think that according to this Nyaya-Sutra there is no difference between word or Pada definition of Naiyayikas and Vaiyakaranas because according to grammarians, the Pada definition is 'Suptigantam Padam'. But it is not true because in Nyaya-Sutra the word 'Vibhakti' is used for 'Vritti' and "Anta" word is used for Sambandha or relation - so the meaning of Sutra becomes "Vrittimatvam Padam".

Through this example also it is being proved that we should not merge two disciplines with each other as each has its own specific terminology.

When Maharshi Gautam started to define word or Shabda, then, while explaining the 'Aptopadeshah Shabdah'[4] Sutra, he declared that the special person is "Apta" who

---

१. नन्वार्यदेशवर्त्तिनां म्लेच्छानामार्यव्यवहारनिश्चितसङ्केतानां नानियम इत्यत आह—वार्त्तिककार: जातिविशेषशब्देनेति। न्या०द०; अ० २, आ० १, सू० ५६, वा०ता०टी०पृ०५४६

२. सोऽयमनियम: सामयिकत्वे उपपद्यते पुरुषेच्छाधीनत्वात् तस्याश्चानियमात्। न्या०द०; अ० २, आ० १, सू० ५६, वा०ता०टी० पृ०५४६

३. ते विभक्त्यन्ता: पदम्। न्या०द०; अ० २, आ० २, सू० ५८, पृ०५५४
अथवा 'विभक्ति:' वृत्ति: 'अन्त:' सम्बन्ध:, तेन वृत्तिमत्त्वं पदत्वमिति। इत्थञ्च पदं निरूप्य तदर्थनिरूपणं सङ्गच्छते। न्या०द०; अ० २, आ० २, सू० ५८, वृ० पृ०६५९

४. आप्तोपदेश: शब्द:। न्या०द०; अ० १, आ० १, सू० ७, पृ०३६५
आप्त: खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्याप्ति:, तया प्रवर्तत इत्याप्त:। ऋष्यार्यम्लेच्छानां समानं लक्षणम्। तथा च सर्वेषां व्यवहारा: प्रवर्तन्त इति। एवमेभि: प्रमाणैर्देवमनुष्यतिरश्चां व्यवहारा: प्रकल्पन्ते, नातोऽन्यथेति। न्या०द०; अ० १, आ० १, सू० ७, भा० पृ०३६५
आप्त: खलु साक्षात्कृतधर्मा। सुदढेन प्रमाणेनावधारिता: साक्षात्कृतधर्मा: पदार्था हिताहितप्राप्तिपरिहारप्रयोजना येन स तथोक्त:। तथापि तत्त्वं विद्वान् अकारुणिकतया वा अलसतया वा अनुपदिशन्, मत्सरितया वा विपरीतमुपदिशन् नाप्त:

had seen heaven (Swarga) sin or 'Adharma' and opposite of sin or 'Dharma' and different type of Gods and Goddesses. From such unique or Apta persons, Upadesha[1] or utterances is accepted as Shabda-Pramana or authorities of aural cognition.

Here, Rishi Gautam very honestly drew the separation line between both streams - Vaidika and Shramana. While indicating that Rishi Arya and Mlechchha[2] are 'Apta' persons, he implicitly declares that Buddha, Rishabha etc. are 'Anapta' - because they approve of philosophies like Kshanika-Vada (momentariness), Sarva-Dharma-Vada (acceptance of all traditions), Nairatmya-Vada[3] (denying the soul) etc. which are against the Vaidic principle.

In this way, Vaidic thinkers or philosophers have very broad views about every aspect of life in all over the world. All thinkers related to the Vedas start their thinking process based on reality to liberate from sorrow the entire human community. Particularly the Nyaya-Vaisheshika philosophers discuss only those subjects which are beneficial to all human beings.

Among the various subjects discussed, every element is very important for mankind, but among these elements, Word (and through it aural cognition) is very important to establish understanding through proper communication all over the World.

The great grammarian Bhartrihari tells in his famous book Vakyapadeeyam about the importance of the word.[4] The renowned poet Dandi expressing his views about word

स्यादित्यत आह—यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्तः। यथादृष्टस्येति मत्सरितया विपरीतोपदेश निवारितः। चिख्यापयिषयेति अकृपास्वार्थकामत्वे निराकृते। प्रयुक्तः उत्पादितप्रयत्नः इत्यलसत्वम्। तथापि स्थानकरणपाटवाभावेन वर्णनिष्पादनासामर्थ्येनाप्तः प्रसज्येत, इत्यत आह— उपदेष्टा। स्थानकरणपाटववानित्यर्थः। न्या०द०; अ० १, आ० १, सू० ७, वा०ता०टी० पृ०३६८ द्वारभंगतः प्रकाशिता।

१. स्वर्गापूर्वदेवतादिषूपदेशो न प्राप्नोति अतीन्द्रियत्वात्। यदि साक्षात्करणमर्थस्याप्तिः, स्वर्गापूर्वदेवतादीन् न कश्चित् पश्यतीति तत् प्रतिपादको व्यवहारो न स्यात्। तस्मात् आप्तश्चासावुपदेशश्चेति युक्तम्, आप्तस्योपदेश इति । नैष दोषः। न ब्रूमोऽस्मदादीनां प्रत्यक्षा स्वर्गादय इति। अपि च यस्य प्रत्यक्षा तस्योपदेश इति। न्या०द०; अ० १, आ० १, सू० ७, वा० पृ०३६५ द्वारभंगतः प्रकाशिता।

नायं सूत्रार्थः आप्तोपदेशः शब्द इति, अपि त्विन्द्रियसम्बद्धासम्बद्धेषु या शब्दोल्लेखेन प्रतिपत्तिः सा आगमस्यार्थः। न्या०द०; अ० १, आ० १, सू० ७, वा० पृ०३६७ द्वारभंगतः प्रकाशिता।

२. आप्तलक्षणस्य व्यापकत्वमाह—ऋषीति। दर्शनात् ऋषिः। करतलामलकवत् साक्षात्कृतत्रैकाल्यवर्तिप्रमेयमात्रः, आराद् यतः पातकेभ्यः इत्यार्यो मध्यमो लोकः, म्लेच्छः प्रसिद्धः। म्लेच्छा अपि हि परिपथमवस्थिताः पान्थानामपहृतसर्वस्वानां मार्गाख्याने हेतुदर्शनशून्या भवन्त्याप्ता इति। न्या०द०; अ० १, आ० १, सू० ७, वा० पृ०३६८ द्वारभंगतः प्रकाशिता।

३. आप्तानां ऋष्यार्यम्लेच्छानामुपदेशः शब्दो न त्वनाप्तानां मायामोहनिर्मितानां बुद्धर्षभादीनां प्रमाणविरुद्धक्षणिक—सर्वधर्मनैरात्म्यवादिनामिति। न्या०द०; अ० १, आ० १, सू० ७, वा०ता०टी० पृ०३६८

४. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।। वाक्यपदीय, ब्र०कां०का०१

and aural cognition tells that - if in this World there were no Word usage then there would have been deep darkness[1] every where.

In the same way, the great philosopher Shri Jagadeesh Tarkalankar, who is the author of Shabda-Shakti-Prakashika tells about word usage at very starting of his book that - if any person of the world uses words appropriately and is able to know the meaning without any prejudice, it is due to the blessing of Goddess Saraswati than of any other Goddess or God.[2]

We can say that if any thinker thinks about those objects which are concerned to every human being in the World, then it is sure that his views will be very broad without any confusion or prejudice. It is very fortunate for India and its thinkers have a comprehensive vision and that is why all over the world it is a recognised fact that Indian thinkers are great. Really Indian thinkers are great because they never hesitate to say harsh or politically atopical realities to save society and to enrich tradition.

It is our present duty that we should propagate those views all over the world through seminars, group-discussions or different modes of communications which are available to us.

It's our great pleasure that with the special effort of our renowned Vice-chancellor, Professor Vachaspati Upadhyaya we got this unique opportunity to organise an all India Nyaya-Vakyartha-Sadas in the Nyaya-Vaisheshika department of Shri Lal Bahadur Shastri Rashtriya Sanskrit University. Upon his directions, we decided to discuss the Shaktivada in this Vakyartha-Sadas. It was also decided in the very starting that we would publish all the proceedings with articles and the main text of the Shaktivada. In my view our Vice-chancellor is great visionary too. It is our fortune that his visions become true. This publication is also the result of his vision. I express my deep gratitude to him and hope that through his inspiring guidance we will be able to achieve greater heights in the coming future.

Without the assistance of our Darshan faculty members, this function and publication was impossible. Either as a member or as a leader of different committees, many faculty members and officials performed their duty very affectively. I thank all of them for their appreciable co-operation and convey my best wishes for success in their life.

---

१. इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। का. आ. १.४.

२. अनुभवहेतुः सकले सद्यः समुपासिते मनुजे। साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी।। शब्द०श०प्र०, का०२, पृ०२६५

In our tradition any group discussion or seminar is not possible without the guidance of experienced scholars.[1] We invited two word famous scholars of two different streams - Vyakaran and Nyaya. Pt. Sh. Ramyatna Shukla and Pt. Sh. Sudhakar Dixit respectively were invited to lead and traditionally moderate this Vakyartha-Sadas. Really we are much obliged by the prescence of both in this scholarly meet. All discussions in the Shastra-Sadas were well guided with their clear and firm view based on Shastric and traditional perspectives. I am sure that to understand the text-book Shakti-Vada, which is published hereto as the third part, Achrya Shri Shukla's and Achrya Shri Dixit's articles which are being published here in first part named Nibandha-Khanda, will be helpful to the learned readers. I convey my heartful gratitude to them.

For success in such a venture, just as experienced scholars are needed, the presence of young scholars is also very much needed. In this Vakyarth-Sadas more then forty young scholars were present and participated actively in the lively discussions. Articles of young scholars are also being published in the Nibandha Khand. All these articles will be able to throw proper light on different aspects of the Shaktivad. I express my heartiest thanks to my young friends for their co-operation and hope that their assistance will be available in the future too when ever it is required to promote the Shastras.

I am very grateful of Human Resource Development Ministry of India and Rashtriya Sanskrit Sansthan because without their financial assistance this event would not have been possible.

I convey my thanks with best wishes to my colleagues Dr. Mahanand Jha and Dr. Ramchandra Sharma and would like to acknowledge that they assisted me in proof reading and other related works.

I am very thankful to our University's research and publication department for their assistance in publishing this volume. Specifically I want to mention the name of Dr. Jnandhar Pathaka who provided his services untiringly.

I got immense co-operation of our dear students not only to organise this Vakyartha-Sadas but also for effective proof reading. My blessings are with them. I pray to Goddess Saraswati for their bright future. Among these students I want to name Advocate Sh. Krishnan Venkatraman who always was ready to assist me when ever it was required. Studying in the Acharya class of the Nyaya-Vaisheshika department my dear student Siddh Raj Vyas was also ever ready to assist me during this Shastra-Sadas. I wish success for their life too.

---

१. न सा सभा यत्र न सन्ति वृद्धाः।

I take this opportunity to express my sincere thanks to the Registrar Sh. Bijaya Kumar Mohapatra and his team for their Valuable support, without whose moral and material assistance it would have been most difficult — if at all possible — to prepare the present work.

This beautiful publication consisting of three chapters - Nibandha-Khanda, Paricharcha-Khanda and Shaktivada Grantha-Khand is the gift of Amar Printing press. This publication agency is serving the cause of Sanskrit dedicatedly for a very long span of time. I hope that this dedication towards Sanskrit will grow in the future. I thank to owner of this publication agency, Sh. Hiralal ji and pray to Vagdevi for his successful life.

(Piyushkant Dixit)
(Editor)

न्यायशास्त्रसदसः प्रतिवेदनम्

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम्।
अस्मादाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥

मानवसंसाधनविकासमन्त्रालयद्वारा प्राप्तानुदानेन श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे २००८ तमे ख्रीस्ताब्दे मार्चमासस्य सप्तविंशदिनाङ्कतः एकोनविंशदिनाङ्कं यावत् दिनत्रयव्यापकः न्यायशास्त्रसदो नामा महोत्सवः अनुष्ठितः। तत्र देशस्य विभिन्नेभ्यः स्थानेभ्यः समागतैः दिनत्रयं यावत् भाषमाणैः विद्वद्भिः सर्वेषामेव प्राच्यानां दर्शनानां विशेषतः न्यायादर्शनस्य महामहोपाध्यायगदाधरभट्टाचार्य-विरचितशक्तिवादनामकस्य ग्रन्थस्य सुविस्तृतं व्याख्यानं कृतम्।

यद्धि सर्वेषां श्रोतृणां बहुरुचिकरमभूत् संस्कृतच्छात्राणाञ्चातीव शिक्षाप्रदम् अन्येषाञ्च दर्शनविषयजिज्ञासूनां समुपयोगीति समामनत्सु सभासदस्येषु प्रशंसत्सु अन्यतमः आचार्यो व्याकरणाचार्यः प्रो. जयकान्त सिंहशर्ममहोदयः न्यायशास्त्रसदसः भूरि-भूरि प्रशंसां विहितवान्।

तत्र प्रथमे दिवसे समारम्भसत्रे डॉ. के अनन्त, डॉ. ए. एस. आरावमुदन् महोदययोः मङ्गलपाठेन, डॉ. रामचन्द्रमहोदयस्य पौराणिकमङ्गलाचरणेन च समारब्धे सर्वगुणसम्पन्ने न्यायशास्त्रसदसि काशीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य न्यायविभागतः लब्धावकाशनां विद्वन्मूर्धन्यानां परमविदुषामाचार्यश्रीसुधाकरदीक्षितमहोदयानामुपक्रमभाषणानन्तरं सामूहिकमङ्गलपाठेन मम धन्यवादज्ञापनेन च अस्य प्रथमसत्रस्य सम्पन्नता जाता। पुनश्च मध्यावकाशानन्तरं तस्मिन्नेव दिवसे द्वितीये सत्रे द्विवादनतः सार्धपञ्चवादनं यावत् आचार्यश्रीसुधाकरदीक्षितमहोदयानामाध्यक्ष्ये न्यायाचार्याणां शक्तिवादविषयकं व्याख्यानं प्रारब्धम्। तत्र संयोजकरूपेण आचार्यपीयूषकान्तदीक्षितमहोदयाः समीक्षकरूपेण च डॉ. विष्णुपदमहापात्रमहोदयाः आसन्। द्वितीये दिवसे तृतीये सत्रे (२८ मार्च २००८) शुक्रवासरे प्रातः सार्धनववादनतः एकवादनं यावत् आचार्याणां श्रीरामयत्नशुक्लमहोदयानामध्यक्ष्ये डॉ. विष्णुपदमहापात्रस्य संयोजकत्वे मम समीक्षकत्वे च न्यायव्याकरणविदुषां शक्तिवादविषयोपस्थापनं विमर्शश्च समारब्धः। अस्मिन् सत्रे षड्विदुषां पत्रवाचनं सञ्जातम्। तस्मिन्नेव दिवसे चतुर्थसत्रे आचार्यश्रीरामयत्नशुक्लमहाशयानामाध्यक्ष्ये मम संयोजकत्वे डॉ. विष्णुपदमहापात्रस्य समीक्षकत्वे व्याकरणविदुषां शक्तिवादविषयकं व्याख्यानं प्रारब्धम्, तत्र सप्त वैयाकरणानां पत्रवाचनं सञ्जातम्। पञ्चमे सत्रे आचार्यश्रीसुधाकरदीक्षितमहोदयानामाध्यक्ष्ये, डॉ. रामचन्द्रशर्ममहोदयस्य संजोकत्वे मम समीक्षकत्वे च शक्तिवादविषयको विमर्शः समारब्धः। अस्मिन्नेव चिन्तनप्रवाहप्रसङ्गे सहजतया शक्तिमधिकृत्य, भारते विशेषतः काश्यां प्रचलितायाः शास्त्रार्थकलायाः अपि मनोहरि परिदृश्यं

समुपस्थितम्। वस्तुतः इयं शास्त्रार्थपरिचर्चा एव भारतं विश्वगुरुत्वेन जगतीतले प्रतिष्ठापयितुं मूलं निदानमिति सुविदितमेव विदुषाम्। शनिवासरे (२९ मार्च २००८) द्विवादनतः सम्पूर्तिसत्रस्य आयोजनं सञ्जातम्। तत्र अध्यक्षाः आसन् आचार्यश्रीरामयत्नशुक्लमहोदयाः मुख्यातिथयश्चासन् प्रकाण्डपण्डिताः आचार्यश्रीसुधाकरदीक्षितमहाशयाः संयोजकश्चाहमेवासम्।

वैदिकपौराणिकमङ्गलाचारणेन समारब्धेऽस्मिन् सत्रे स्वागतभाषणं विदधता आचार्येण शुद्धाननदपाठकमहोदयेन सर्वेषां समागतानां विदुषां वाचिकं स्वागताभिनन्दनं विहितम्। तेन प्रोक्तं दर्शनसङ्कायस्य अयं संकल्पः संस्कृतविदुषां कृते विश्वविख्याताखिलदर्शनपरिषदनुरूपं महत्त्वपूर्णं कार्यं विदधाति। अयं हि संकल्पः तदा सत्यो भवेत् यदोत्तरोत्तरमहमहमिकया एवं विधः सङ्कल्पःविद्वद्भिर्विद्यासंस्थानैश्च धृतः स्यात्। एतदनन्तरमवसरः आसीत् शास्त्रसदोपलब्धिप्रकाशनस्य। काशीहिन्दूविश्वविद्यालयादत्र सम्प्राप्तेन आचार्यकमलेशझामहोदयेन उदीरितं यत् ऋत्विग्भिर्यज्ञ इवायं दर्शनसङ्कायसदस्यायमभिक्रमो विद्वद्भिर्विभावितो विद्यापीठेन भवतां पुरस्तादुपस्थापितः। महतो दर्शनतत्त्वाभिनयस्य पूर्वरङ्ग इवायं स्वीक्रियताम्। एवमेव बहुभिः विद्वद्भिः स्वविचाराः समुपस्थापिताः।

विशिष्टव्याख्यानं कुर्वद्भिः आचार्यैः श्रीसुधाकरदीक्षितमहोदयैः प्रोक्तं यत् महामहोपाध्याय-गदाधारभट्टाचार्यप्रणीतमिदं शक्तिवादशास्त्रं न केवलं शुष्कव्यवहारशास्त्रमपितु अन्यतममुत्कृष्टदर्शनम्। उत्कृष्टा च भारतीया संस्कृतिरस्ति यन्मानवजीवने सर्वथा व्याप्य तिष्ठति। एवं विधैः दर्शनैरिदानीन्तनं मानवजीवनमापूर्यते, सामूहिक्यश्च जटिलाः समस्याः समाधीयन्ते। ऐतषां सर्वेषां ज्ञानमद्य अपेक्ष्यत एव।

सर्वेभ्यः प्रमाणपत्रसमर्पणमध्यक्षेणाचार्यरामयत्नशुक्लमहोदयेन विहितम्। कृतवेदितामावेदयता दर्शनसङ्कायाध्यक्षेण प्रो. पीयूषकान्तदीक्षितेन प्रोक्तं यत् अस्मिन् कार्यक्रमे प्रायः चत्वारिंशदधिक-निबन्धानां पाठः सञ्जातः। यात्रादिक्लेशं सोढ्वापि आन्ध्रप्रदेश-मध्यप्रदेश-गुर्जर-उत्तरप्रदेशादिभ्यः समागत्य शास्त्रचर्चायां तावदहमहमिकया प्रतिभागिता महते प्रोत्साहनाय कल्पते। आयत्यामेवमेव विदुषामनुदिनं सारस्वतसाहाय्यमवाप्य दर्शनसङ्कायः विद्यापीठञ्चेदं सोत्साहं नूनं तावदधीतिबोधाचरप्रचारणैः शास्त्रसम्वर्धनदिशि प्रयत्नविशेषं विधास्यतीति। शान्तिमङ्गलपाठेन राष्ट्रगीतेन च पर्यवसाने इदं शास्त्रसदस् सम्पूर्तिमगात्–

अज्ञातेन च संतृप्तिः अल्पज्ञानेन दृप्तता।
नूत्नज्ञानेन वैमुख्यं न ममास्तु कदाचन॥

महानन्द झा

(डॉ. महानन्द झा)
(सहसंयोजकः)

प्रथमः
निबन्ध-खण्डः

अनुभवहेतुः सकले सद्यः समुपासिता मनुजे।
साकाङ्क्षाऽऽसन्ना च स्वार्थे योग्या सरस्वती देवी॥

शक्तिस्वरूपपर्यालोचनम्

रामयत्नशुक्लः

तत्रैवं दृश्यते जनानां श्रुतैरपि पदैर्न शाब्दबोधो जायते, किन्तु कैश्चिदेवेति अतः तद्विषयकं शाब्दबोधम्प्रति तत्पदजन्योपस्थितिः कारणमिति कार्यकारणभावोऽभ्युपेयते, अत एव पूर्वोक्तदोषो नास्ति, अत एव च घटपदात्पटबोधो न जायते, किन्तु एवं सत्यपि घटपदात् एकसम्बन्धिज्ञानमुद्रया आकाशोपस्थितिसद्भावात् आकाशबोधापत्तिरतस्तद्वारणाय तत्पदजन्यतद्विषयकशाब्दबोधम्प्रति तत्पदनिष्ठ-वृत्तिज्ञानाधीनतद्विषयकोपस्थितिः कारणमिति कार्यकारणभावः स्वीक्रियते, तथा सति घटपदादाकाशोपस्थिते-र्घटपदनिष्ठवृत्तिज्ञानाधीनत्वाभावेन नोक्तदोषः। कोशादिप्रमाणेन घटपदस्य घटार्थे वृत्तिस्वीकारः न त्वाकाशार्थे। घटितबुद्धौ घटकस्य ज्ञानं कारणमिति नियमेन उक्तकार्यकारणभावे घटकतया प्रविष्टा वृत्तिः केति जिज्ञासायां श्रीगदाधरभट्टाचार्यः, वृत्तिपदार्थं लक्षयति सङ्केतो लक्षणा चार्थे वृत्तिरिति। अर्थे इति सप्तम्यर्थो निरूपितत्वम् पदस्य वृत्तिः पदवृत्तिः षष्ठ्यर्थो निष्ठत्वम्। तथा च अर्थनिरूपिता पदनिष्ठा या वृत्तिः सा सङ्केतो लक्षणा चेत्यर्थः। तत्र घटादिनिरूपिता घटादिपदनिष्ठा वृत्तिः सङ्केतरूपा, तीरादिनिरूपिता गङ्गादिपदनिष्ठा या वृत्तिः सा लक्षणारूपेति विवेकः।

शक्तिर्लक्षणा चार्थे पदवृत्तिः इत्युक्ते शक्तेरीश्वरसङ्केतरूपत्वेन पित्रादिकृतानामाधुनिकसङ्केतानां सङ्ग्रहो न स्यादिति तदुभयग्रहणार्थं सङ्केत इत्युक्तम् तेनोभयोरपि सङ्केतत्वेन ग्रहणम्। केचित् अयं ग्रन्थो न विभागपरः वृत्तित्वसामान्यधर्मस्य पूर्वमकथनेन तद्विशेषजिज्ञासानुदयात् इत्याहुः।

तन्न शोभनं, शाब्दबोधौपायिकसम्बन्धत्वरूपसामान्यधर्मस्य मनसैव सुग्रहात्। वृत्तित्वं ज्ञानविषयत्वे सति शाब्दबोधानुकूलपदपदार्थसम्बन्धत्वम्। ज्ञायमानस्यैव वृत्तित्वमिति बोधनाय ज्ञानविषयत्वे सतीति। घटादिपदस्य आकाशार्थेन सम्बन्धे समवायेतिव्याप्तिवारणायाह शाब्दबोधानूकूलेति।

तथा शाब्दबोधौपयिकः सम्बन्धो वृत्तिरित्युक्तौ, अर्थप्रतियोगिकः पदानुयोगिकः अर्थानुयोगिकः पदप्रतियोगिको वा तादृशः सम्बन्धः सङ्केतो वा लक्षणा वेति फलति। यद्वा वृत्तिपदव्यवहार्य एवार्थः वृत्तिपदस्य। अन्यथा अर्थनिरूपितत्वमेव वृत्तित्वमिति। लक्षणे वृत्तिज्ञानार्थमर्थज्ञानापेक्षा अर्थत्वञ्च वृत्या

प्रतिपाद्यत्वमित्यर्थपदार्थज्ञानार्थं वृत्ति पदार्थज्ञानापेक्षेति परस्पराश्रयो दोषः स्यात्, वृत्तिपदस्य वृत्तिपदव्यवहार्यत्वपरत्वे च नायं दोषः। तथा च सङ्केतं लक्षणां चोद्दिश्य वृत्तिपदव्यवहार्यत्वमत्र विधीयते।

सङ्केतो लक्षणा चार्थे इति लक्षणे अर्थ इत्यनुक्तौ शाब्दबोधानुकूलज्ञानविषयीभूतसम्बन्धत्वमिति एवोक्तं स्यात्, तथा सति तत् सङ्केतादाविव आकाङ्क्षादिज्ञानविषये तत्तत्पदाव्यवहितोत्तरत्वरूपसम्बन्धादावप्याप्तिः, अतस्तद्वारणाय, अर्थ इत्युक्तं, तथा चाव्यवहितोत्तरत्वादेः अर्थप्रतियोगिकत्वाभावेन न तदापत्तिः। पचतीत्यादौ योग्यताज्ञानविषये पाकादिप्रतियोगिकानुकूलत्वादौ पदानुयोगिकत्वाभावान्न दोषः।

उक्त लक्षणे अर्थेति यदुक्तम् सोऽर्थो यद्यभिधेयपरः स्यात् तदा अन्योन्याश्रयदोषः स्यात्तथाहि तत्पदाभिधेयत्वज्ञानार्थमर्थनिरूपितत्वरूपवृत्तिपदार्थज्ञानापेक्षा वृत्तिपदार्थज्ञाने निरूपकतया अभिधेयज्ञानापेक्षेति। अत आह शक्तिवादे–वृत्त्या प्रतिपाद्य एव पदार्थ इत्यमिधीयते। वृत्तिश्च वृत्तिपदव्यवहार्यत्वरूपेति नान्योन्याश्रयः।

अथ वृत्त्या इति तृतीयायाः प्रयोज्यत्वमर्थः, पदेन प्रतिपाद्यः पदप्रतिपाद्यः तृतीयार्थो जन्यत्वम्, ज्ञायमानपदस्य बोधम्प्रति कारणत्वमिति पक्षे। पदज्ञानस्य कारणत्वपक्षे तु प्रयोज्यत्वम् तृतीयार्थः इति ध्येयम्, प्रतिपाद्यः प्रतीतिविषयः, विषयत्वञ्च कर्मप्रत्ययार्थः, तथा च वृत्तिपदजन्यप्रतीतिविषयः पदार्थः इति, प्रतीतिश्च शाब्दबोधरूपा।

तत्र वृत्त्या इति नोच्यते तदा नीलो पदजन्यशाब्दबोधविषयः पदार्थः इत्येवोक्तं स्यात् तदा नीलो घटः इत्यत्र अभेदसम्बन्धावच्छिन्ननीलत्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताकः शाब्दबोधो भवति, एतादृशबोधोऽपि उक्तपदजन्यः तादृशबोधविषयत्वं यथा घटस्यास्ति तथैव नीलस्यास्त्येवेति नीलस्यापि घटपदार्थत्वं स्यादिति तद्व्यावृत्तये वृत्त्या इत्युक्तम्, तथा चात्र नीलस्य घटपदजन्यशाब्दबोधविषयत्वेऽपि नीले घटपदवृत्तिर्नास्ति इति नीलनिरूपितघटपदनिष्ठवृत्तिप्रयोज्यघटपदप्रयोज्यशाब्दबोधविषयत्वं नास्तीति न नीलस्य घटपदार्थत्वापत्तिः। नन्वेवमपि यत्र घटो घटपदशक्यः नीलश्च घटसम्बन्धी इत्याकारा समूहालम्बनोपस्थितिर्भवेत्, तत्र घटपदनिष्ठवृत्तिप्रयोज्योपस्थितिविषयत्वम् यथा घटस्यास्ति तथा नीलस्यापि अस्ति घटनीलयोरुभयोरपि एकोपस्थितिविषयत्वादिति नीलस्यापि घटपदार्थत्वापत्तिस्तदवस्थैवेति चेन्न, स्वनिष्ठवृत्तिज्ञानविषयकज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयतावत्त्वं पदार्थत्वम् इति वक्तव्यम् अत्र स्वं घटपदं तन्निष्ठा या वृत्तिः ज्ञानत्वावच्छिन्नं ज्ञानं घटो पदशक्यः इत्याकारकं ज्ञानम् तादृशज्ञाननिष्ठा या जनकता (उपस्थिति जनकता) तादृशजनकतानिरूपितमुपस्थितिनिष्ठं जन्यत्वम् तादृशजन्यतावच्छेदकीभूता या विषयता तादृशविषयतावत्त्वम्

पदार्थत्वमित्यन्वयः। अत्रोपस्थितौ जन्यताप्यस्ति निरूपकत्वसम्बन्धेन विषयताप्यस्तीति विषयता जन्यतावच्छेदिका जाता सा च विषयता निष्ठत्वसम्बन्धेन घटेऽस्ति घटपदजन्योपस्थितिनिरूपित-तादृशविषयतावत्त्वं चोक्तस्थले घटस्यैव भवति न नीलस्येति न नीलस्य घटपदार्थत्वापत्तिरिति।

न्यायमते इदं पदमिमर्थं बोधयतु इति, अस्मात्पदादयमर्थो बोद्धव्य इति वेच्छा संङ्केतरूपा वृत्तिः संङ्केतस्येच्छारूपत्वेन प्रथमान्ततया पदविशेष्यकं सङ्केतमाह इदमिति। पदपदस्य प्रथमान्तत्वेन पदविशेष्यकत्वम्, प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारात्। सविषयकार्थधातुसमधिव्याहारे कर्मप्रत्ययार्थो विषयतेति नियमेन। अर्थमिति द्वितीयाया विषयत्वमर्थः, तस्यां गोत्वावच्छिन्नार्थस्य निष्ठत्वसम्बन्धेनान्वयः विषयताया निरूपकत्वसम्बन्धेन बोधेऽन्वयः, बोधस्य णिजर्थजनकत्वेऽन्वयः, जनकत्वस्यस्वरूपसम्बन्धेन पदेऽन्वयस्तथा च गोत्वाद्यवच्छिन्नार्थनिष्ठविषयतानिरूपकबोधजनकताश्रयो गवादिपदमिति फलति।

द्वितीयसङ्केतो हि अर्थविशेष्यकः। अर्थशब्दस्य प्रथमान्तत्वम् प्रथमान्तार्थमुख्यविशेष्य-कबोधस्वीकारादित्युक्तनियमात्। तव्यदर्थो विषयता तस्याश्च स्वरूपसम्बन्धेन अर्थेऽन्वयः। पदादिति पञ्चम्यर्थो जन्यत्वम् तस्य बोधेऽन्वयः स्वरूपेण, विशेषणविभक्तरभेदोर्थः। तथा च इदमभिन्नग-वाद्यभिन्नपदजन्यबोधनिरूपितविषयतावदभिन्नो गवाद्यर्थः इति फलति। पूर्वसङ्केते गोत्वाद्यवच्छिन्नविषयता-निरूपकत्वं बोधे तादृशबोधनिष्ठजन्यतानिरूपितजनकत्वं पदे च प्रतीयते। द्वितीयसङ्केतः फलतः गवादिपदात् गवादिपदार्थो बोद्धव्य इति पर्यवस्यति तथा च गवादिपदजन्यबोधविषयताश्रयो गवादिरिति फलति। स च सङ्केतो द्विधा, आधुनिकः सङ्केतः जीवकृतः सा परिभाषा तया चार्थबोधकं पारिभाषिकमुच्यते।

यथा यूस्त्र्याख्यौ नदीति सूत्रेण भगवता पाणिनिना नित्यस्त्रीलिङ्गानाम् ईकारान्तानामुकारान्तानाम् च शब्दानाम् नदी संज्ञा कृतेति, तादृशशब्देषु नदीपदं पारिभाषिकम् एवमेव वृद्धिरादैच् इत्यनेन आदैचोः वृद्धिपदं पारिभाषिकम्। ईश्वरसङ्केतः शक्तिः लोकप्रसिद्धार्थे शक्तिरेव, तस्याः स्वरूपद्वयम् उक्तमेव शक्त्या वाचकम् पदम् वाचकम्। सोर्थः मुख्यः। चैत्रादिषु चैत्रपदशक्तिरेव, पित्रादिसङ्केतितचैत्रादिपदं पुरुषादिव्यक्तौ शक्तमेव द्वादशेह्नि पिता नाम कुर्यात् इत्याकारकं श्रुत्यनुमितेश्वरेच्छाविषयत्वात्।

अत्र यद्यपि इच्छायाः विषयत्वलक्षणः सम्बन्धः पदे अर्थे बोधे जन्यजनकभावे च वर्तते, तथा सति इच्छाविषयत्वस्य चतुर्ष्वपि सत्वात् वाच्यवाचकवैषम्यं न स्यादतश्च बोधजनकत्वेन इच्छाविषयो वाचकः बोधविषयत्वेन इच्छाविषयो वाच्य इति नातिप्रसङ्ग इति बोध्यम्।

अत्र मीमांसकाः उक्तेच्छारूपस्य सङ्केतत्वस्वीकारे गगरीत्यादौ लौकिकगगरी शब्दादपि शक्तिभ्रमेण घटाद्यर्थबोधो जायते, तत्र सन्मात्रविषयाभगवदिच्छापि अस्ति। तथा च तस्यापभ्रंशस्यापि बोधकत्वेन

रूपेण सङ्केतविषयत्वात् वाचकत्वं साधुत्वञ्च प्राप्नोति। न च नैयायिकैरपभ्रंशस्य वाचकत्वं साधुत्वं च स्वीक्रियते।

दोषान्तरमपि अस्मिन् मतेऽस्ति–तथाहि बोधकत्वेन भगवत्संकेतविषयत्वं वाचकत्वमिति, भगवत्सङ्केतश्च सन्मात्रविषय: गंगापदेन तीरादिबोधकत्वेन भगवत्सङ्केतविषयत्वं प्राप्तमिति गंगादिलक्षकपदस्यापि वाचकत्वापत्तिः, न चैतत् भवतामिष्टम्।

अत्र नैयायिकाः–मम मते बोधकत्वेन सङ्केतविषयत्वं वाचकत्वं न मन्यते किन्तु तादृशेच्छया बोधकत्वेच्छया इदं पदमिममर्थं बोधयतु, इत्याकारकेच्छया भगवदुच्चरितत्वमेव वाचकत्वम्। अपभ्रंशशब्दाश्च नार्थप्रत्यायनाय भगवदुच्चारिता अतस्तेषां वाचकत्वापत्तिर्नास्ति।

एवं सति अस्मदाद्युच्चरितपदेष्वव्याप्तिः स्यात्। तथाहि नैयायिकनये पदानामनित्यत्वेनास्मदाद्युच्चरितघटादिपदानां भगवदुच्चरित्वाभावेन वाचकत्वं न स्यादित्यव्याप्तिः।

यदि तेषां भगवदुच्चरितत्वाभावेऽपि भगवदुच्चारितसजातीयत्वमस्तीति न दोषः। भगवदुच्चरित्वम्, घटेति शब्दस्य तदानुपूर्वीसाजात्यम् अस्मदाद्युच्चरिते घटादौ अस्त्येवेति अस्मदाद्युच्चरितघटपटादौ भगवदुच्चरितसजातीयत्वं वाचकत्वमस्त्येवेति भावः।

एवं सति द्वादशेह्नि पिता नाम कुर्यात् वेदस्थनामपदस्य देवदत्तादिपरत्वेऽपि देवदत्तेत्यादि स्वरूपाणां भगवदनुच्चरितत्वादव्याप्तिः स्यादेव।

किञ्च ईश्वरानङ्गीकर्तृमते ईश्वरसङ्केतस्य शक्तित्वे ततो बोधानापत्तिः स्यात्, किञ्च ईश्वरोच्चारितसजातीयत्वस्य वाचकत्वे ईश्वरोच्चारिते साजात्याभावात्तत्राव्याप्तिरपि स्यात्, अत्रोच्यते ईश्वरसङ्केतस्य शक्तित्वे पूर्वोक्ताः दोषाः, अतः शाब्दबोधोपयोगितायामीश्वरत्वं न दीयते किन्तु सङ्केत एव शक्तिरित्युच्यते। सङ्केतश्चेच्छा। एवञ्चेश्वरानङ्गीकर्तृमते शाब्दबोधानुपपत्तिर्नास्ति, शक्तिस्वरूपे ईश्वरनिवेशाभावात्। तथा सति आधुनिकसङ्केतज्ञानादपि शाब्दबोधः।

अत्रोच्यते। शाब्दबोधोपयोगितायामीश्वरीयत्वानुपादानेन उक्तदोषाभावेऽपि सङ्केतस्य शब्दसम्बन्धात्वासम्भवः सङ्केतस्य निष्प्रतियोगिकस्य, सम्बन्धत्वासम्भवात् अयमस्य पिता अयमस्य पुत्र इत्येवं रूपेण यत्र प्रतीतिर्भवति तत्रैव जन्यजनकभावादेः सम्बन्धत्वं भवति। अत्र च अर्थवत्पदमिति प्रतीति सत्वेऽपि पदवानयमिति प्रतीत्यभावान्न सङ्केतस्य पदपदार्थसम्बन्धत्वम्। सम्बन्धत्वाभावात् पदार्थोपस्थापकत्वाभावः प्राप्तः पदार्थानुपस्थापकस्य वृत्तित्वं नेष्टमित्यर्थः।

ननु यथा भूतलवान् घट इति प्रतीत्यभावेऽपि घटवत् भूतलमिति प्रतीतिमात्रेण भूतलघटयोः संयोगस्य सम्बन्धत्वं भवति तथैव पदवान् अर्थ इति प्रतीत्यभावेऽपि अर्थवत्पदमिति प्रतीतिमात्रेण सङ्केतस्य पदपदार्थसम्बन्धत्वं स्यादित्यत आह सङ्केतस्य शब्दसम्बन्धत्वे मानाभावः, निष्प्रतियोगिकत्वेन च तदसम्भवः एवं यः निरूपकांशे नित्यसांकाङ्क्षः तस्यैव सम्बन्धत्वेन वृत्तित्वौचित्यम् संयोगस्य तु तथा प्रतीत्यभावेऽपि प्रतियोग्यंशे नित्यसाकाङ्क्षत्वेन संम्बन्धत्वस्वीकारे अनुभवस्यैव प्रमाणत्वम्।

यतः संयोग इत्युक्तौ कस्येति नियताकांक्षाया दर्शनात्। सङ्केतस्तु इच्छा प्रतियोग्यंशे नित्यसाकाङ्क्षा न भवति, तथा च निष्प्रतियोगिकतया इच्छायाः सम्बन्धत्वानुपपत्तिः। सम्बन्धत्वाभावेऽपि पदार्थोपस्थापकत्वाभावेन वृत्तित्वाभावः नैयायिकमतेऽपि पदपदार्थयोः सम्बन्धो भवितुं शक्नोति इति उच्यते--स्वजन्यज्ञानविषयत्वप्रकारकेच्छाविशेष्यत्वमर्थे पदसम्बन्धः। तथाहि, उक्तायामर्थविशेष्यकेच्छायाम् अस्मात्पदादयमर्थो बोद्धव्य इत्याकारिकायां पदजन्यबोधविषयत्वं प्रकारतया प्रतीयते, अतः सा इच्छा पदजन्यबोधविषयत्वप्रकारिका तादृशेच्छायां विशेष्यता अर्थे इति समन्वयः।

द्वितीयेच्छा, इदंपदमिमर्थं बोधयत्वित्याकरिका, अर्थस्य विषयतया बोधेन्वयः बोधस्य णिजर्थजनकत्वेन्वयः जनकत्वस्य पदेऽन्वयः, तथा च अर्थविषयकबोधजनकत्ववदिदं पदं भवत्वितीच्छास्वरूपे बोधजनकत्वे प्रकारता पदे विशेष्यता, तथा च--अर्थविषयकबोधजनकत्वप्रकारकेच्छाविशेष्यत्वमर्थे, तथाचानया रीत्या अर्थस्य पदेन सम्बन्धः। तथा चोक्तसम्बन्धायां पदविशिष्टोऽर्थः, अर्थविशिष्टं पदमिति सम्बन्धज्ञानेन पदेन पदार्थोपस्थितिर्भविष्यतीति तादृशोपस्थित्यन्यथानुपपत्या उक्तसम्बन्धद्वयं कल्प्यते, सिद्धे च सम्बन्धे एव सम्बन्धिज्ञानमुद्रया पदज्ञानादर्थोपस्थितिर्भवति। अपभ्रंशादिस्थले तादृशसम्बन्धावगाहि ज्ञानं प्रमात्मकं न जायते भ्रमात्मकमेवेति अपभ्रशानां वाचकत्वापत्तिर्नास्तीति मतस्य खण्डनाय शक्तिवादे उक्तम् तदेतत्तुच्छमित्यादिना। स्वजन्यबोधविषयत्वेनेत्याद्युक्तस्य सम्बन्धस्य अपूर्वतया कल्पनम् त्वया क्रियते, सच सम्बन्धः समीचीनो नास्ति, विनिगमनाविरहेण तादृशज्ञानविषयत्वस्यापि सम्बन्धत्वस्वीकारापत्तिः। पदजन्यबोधनिरूपितार्थनिष्ठविषयत्वनिष्ठप्रकारतानिरूपितभगवज्ज्ञानीयविशेष्यत्वस्यापि संबन्धत्वं स्यात्, पदपदार्थयोर्भगवज्ज्ञानीयविशेष्यत्वस्यापि सम्भवात्। तथा च स्वसमानकालीनज्ञानविषयत्वस्यापि सम्बन्धत्वं स्यादेव। अर्थकालिकं यद् भगवज्ज्ञानं तद्विषयत्वस्य पदे पदसमानकालिकभगवज्ज्ञानविषयत्वं चार्थे स्यात्। तस्मात्तार्किकोक्तसम्बन्धानुपपत्तिरेव स्यात्, तस्मात्पदपदार्थयोः वाच्यवाचकभावः सम्बन्धः स्वीकार्यः। इदञ्च मतं वैयाकरणस्य, तदग्रे विवेचयिष्यते।

केचिन्मीमांसका ज्ञाने पदानां शक्तिमभ्युपगच्छन्ति। तथाहि पदानां ज्ञाने शक्तिः नत्वर्थे, तेषाममिप्रायः, जन्यनिरूपिता शक्तिर्जनके भवति, यथा वह्नौ वह्निजन्यदाहादिनिरूपिता शक्तिः। एवमेव पदज्ञानेन अर्थज्ञानमेव जन्यते, नत्वर्थः, तस्य पूर्वमेव सिद्धत्वात्। तस्मात्पदानां पदार्थज्ञाने शक्तिरिति।

एतन्मते वाचकत्वम् तज्ज्ञानशक्तत्वम्। तज्ज्ञानशक्तत्वं नाम घटादिपदार्थविषयकाबोधोत्पादकशक्तिमत्वम्।

ननु यदि तदविषयकज्ञानोत्पादशक्तिमत्वं वाचकत्वं स्वीक्रियते तदा धूमस्यापि वह्निवाचकत्वं स्यात् धूमज्ञानेन वह्निज्ञानस्य जायमानत्वेन वह्निज्ञानोत्पादकशक्तिमत्त्वस्य धूमे सत्त्वम्, तथाहि घटविषयकबोधजनकता घटपदेऽस्ति तत्र तादृशशाब्दबोधानुकूला शक्तिरप्यस्तीति सा शक्तिस्तादृशशाब्द-बोधजनकताया अवच्छेदिका जातेति तादृशशब्दबोधजनकतावच्छेदकशक्तिरूपो यो धर्मस्तद्वत्त्वं पदेस्तीति तदेव तद्वाचकत्वम्। धूमे च न वह्निविषयकशाब्दबोधजनकत्वमपितु अनुमितिजनकत्वमेव, अतो न धूमस्य वह्निवाचकत्वापत्तिः। तथा च तद्विषयकशाब्दबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकशक्तिमत्त्वं तद्वाचकत्वम्, स च धर्मो वह्न्यादिनिष्ठदाहानुकूलशक्तिवत् पदार्थान्तरमेव, मीमांसकैः शक्तेः पदार्थान्तरत्वस्वीकारात्।

नन्वेवं लाक्षाणिकस्य गंगादिपदस्यापि तीरादिवाचकत्वं स्यात् तीरादिविषयकशाब्दबोधजनकत्वात्, एतद्दोषवारणाय शक्तिवादे उक्तम्—लाक्षणिकञ्च नानुभावकमिति।

अत्र श्रीसुदर्शनाचार्यः (शक्तिवादटीकायां), लाक्षणिकपदस्य लक्ष्यार्थविषयकशाब्दबोधजनकत्वमेव नास्तीति न गंगादिपदस्य तीरादिवाचकत्वापत्तिरिति वदति।

ननु यदि लाक्षणिकपदस्य अनुभावकत्वं नास्ति तदा गंगायां घोष इत्यत्र लक्षणया तीरानुपस्थितौ अन्वयानुपत्तिपरिहारानुपपत्तिरित्यत्र वैयाकरणलघुमञ्जूषाटीकाकुञ्जिका लक्षणानिरूपणे द्रष्टव्या। तादृशसम्बन्धज्ञानजन्या। तदुपस्थितिरेव लक्षणेति मूलप्रतीकमादाय तत्र टीकायामुक्तम् मीमांसकमतमादायोक्तम् तादृशेति—शक्यादशक्योपस्थितिर्लक्षणेति तत्सिद्धान्तात्। गंगापदेन प्रवाहस्मरणम् तदेव बोधहेतुः अत एव गंगापदस्य तीरोपस्थापकत्वाभावात् लाक्षणिकं नानुभावकमिति प्रवादः।

ननु तीरोपस्थितेः पदजन्यत्वाभावात्कथं शाब्दबोधविषयतेति चेन्न शक्यार्थबोध एव तथा नियमेन लक्ष्यार्थबोधे पदार्थोपस्थितेरेवनियामकत्वात्। इदं तथैव मञ्जूषाटीका कुञ्जिकायामुक्तम् अत्र पक्षे उपस्थितिरेवानुभाविका, पदन्तु अनुभवम्प्रति अन्यथासिद्धमिति।

अत्र कलाटीकापि द्रष्टव्या तत्रैव मूलस्थपौनरुक्त्यमिति प्रतीकमादायोक्तम्, शक्यादशक्यो-पस्थितिर्लक्षणेति मते तु लाक्षणिकं नानुभावकमिति प्रवादः। तार्किकाणामयं प्रवादः कथमितिचेत् उद्देश्यविधेयभावेन लाक्षणिकं नानुभाविकमिति तदर्थः, अतएव न विधौ परः शब्दार्थः इति प्रवादः। गंगायां घोष इत्यत्र गंगापदेन तीरमुपस्थाप्यते तदेव लक्ष्यम् किन्तु तीरमुद्दिश्य घोषो न विधीयते, अतः तादृशानुभावकत्वाभावमादायोच्यते नानुभावकमिति प्रतिभाति। परेतु कुमतिः पशुरित्यादौ सर्वलाक्षणिकेऽन्वयदर्शनात् लाक्षणिकं नानुभाविकमिति प्रवादोऽसङ्गत एवेति। शक्तिवादे ज्ञाननिष्ठशक्तिवादस्य

खण्डनाय उक्तम्—न चासौ विचारसहः इति। तस्यायमभिप्रायः, ज्ञाने शक्तिस्वीकारे लाक्षणिकेपि वाचकत्वापत्तिः, तन्निवारणाय मीमांसकैरुच्यते लाक्षणिकम् नानुभाविकमिति। तन्नोचितम्, लाक्षणिकस्य अननुभावकत्वानुपपत्तेः। पदार्थोपस्थितिद्वारा शक्यार्थानुभवे शक्तस्येव लक्ष्यार्थबोधः तत्र पदस्याहेतुतेति तदा पदार्थोपस्थित्या बोधस्वीकारे शक्तस्यापि तथात्वापत्तिः।

उक्तयुक्त्या नैयायिकादिमते दोषोद्भावेन वैयाकरणमतमितो विविच्यते, सति प्रत्ययहेतुत्वं सम्बन्धे उपपद्यते। अतस्तदर्थैः शब्दानां सम्बन्धोस्तीति गम्यते इति हरिकारिकया शब्दार्थसंबन्धोस्तीति प्रतीयते, अतः यस्य पदस्य येनार्थेन सम्बन्धस्तेन पदेन तस्य बोधो जायते, नासम्बद्धस्यान्यस्येति सः सम्बन्धः क इत्याकाङ्क्षायाम्, एतद्विषये पूर्वमुक्तम् वैयाकरणैरन्यमतखण्डनाय यदुक्तं तद्रीतिमवलम्ब्य किञ्चित् उच्यते, तथाहि=शक्तिग्रहः व्याकरणव्यवहारादिना भवतीति सिद्धान्तः। व्यवहारस्तु शक्तिग्राहकेषु शिरोमणितया स्वीक्रियते इत्यविवादमेव। प्रयोजकवृद्धेन घटामानयेत्युक्तम्, तदनन्तरं प्रयोज्यवृद्धो घटमानयति। घटमानयन्तं प्रयोज्यवृद्धं व्युत्पित्सुर्बालः पश्यति, ततश्च बालः प्रत्येति यदस्य वृद्धस्य या घटानयनप्रवृत्तिरवश्यमेव ज्ञानपूर्विकेति धिया अनुमिनोति, प्रयोज्यस्य घटानयनप्रवृत्तिः ज्ञानजन्या प्रवृत्तित्वात् मदीयप्रवृत्तिवद् इत्यनुमानानन्तरं पुनरपि अनुमिनोति, प्रयोज्यप्रवृत्तिजनकं ज्ञानम् वाक्यजन्यम् तदनन्तरभावित्वात्, यत् यदनन्तरभावि तत् तज्जन्यमिति नियमात्। अतः वाक्ये बोधजनकता ततश्च आवापोद्वापाभ्यामन्वयव्यतिरेकेण पदादिषु पदार्थबोधकत्वं निर्धार्यते। तथा च पदे वाक्ये च बोधजनकत्वं बोधकारणीभूतपदवाक्ययोरर्थेन सम्बन्धेन विना नोपपद्यते। विषयेण सम्बद्धानामेव प्रमाणानां चक्षुरादीनां ज्ञानोत्पाददर्शनात्। नहि घटेन सह सम्बन्धं विनैव चक्षुरादिर्ज्ञानं जनयति। तथा च प्रकृते कार्यकारणभावसिद्धये कारणतान्यथानुपपत्त्या कल्प्यमानः शक्तिरूपः सम्बन्धः कारणतावच्छेदकतया स्वीकार्यः। शब्दज्ञानयोः सम्बन्धः कार्यकरणयोः शब्दज्ञानयोः सामानाधिकरण्याय मन्यते, ज्ञानञ्च विषयतया अर्थे वर्तते शब्दश्च, शक्तिसम्बन्धेनातः कारणतावच्छेदकसम्बन्धः शक्तिरूपः, सा च शक्तिः उक्तरीत्या जनकत्वघटिता, जनकत्वघटितः शक्तिरूपः सम्बन्धः। ज्ञानोत्पत्तेः पूर्वं तस्य ज्ञातुमशक्यत्वेन शब्दनिष्ठबोधजनकत्वसिद्धये कल्प्यमानस्य शक्तिरूपस्य जनकत्वघटितस्य जनकतावच्छेदकतया गृहीतुमशक्यत्वात् आत्माश्रयदोषसत्त्वात्, जनकताया जनकत्वघटितशक्तिसम्बन्धस्य तत्त्वे आत्माश्रयदोषस्य स्वयमनुभूयमानत्वात्। स्वस्यैव स्वावच्छेदकत्वानौचित्यात्।

केचित् जनकतायाः स्वरूपयोग्यत्वफलोपधायकत्वेत्युभयरूपेण, अवच्छेदकावच्छेद्ययोः किञ्चिद्भेदकल्पनया आत्माश्रयदोषं वारयन्तीत्यतः इच्छायाः सम्बन्धत्वमुपस्थापयन्ति। तत्र दोषान्तरमुच्यते—तथाहि जानाति इच्छति यतते इति क्रमदर्शनेन ज्ञानस्यैव शक्तित्वमुचितमित्य आह—इच्छायाः शक्तित्वे इच्छार्थे लिङितिसूत्रमेव प्रमाणम् तत्र लिङ्पदम् स्वार्थमात्रबोधकमितिभावः, किञ्च आधुनिकसङ्केतस्य

इच्छारूपत्वेन तस्या एव शक्तित्वमिति चेद् इच्छाया: शक्तित्वे, इच्छाविषय एव वाच्य: वाचको वेति चेत् तदा इच्छाविषये बोधे जनके अर्थे च विषयत्वसम्बन्धेन वर्तते, अत: सर्वेषामपि वाच्यत्वं वाचकत्वं स्यादिति दोष:। अथोच्यते बोधजनकत्वेनेच्छाविषयो वाचक: बोधविषयत्वेन इच्छाविषयो वाच्य इति नास्त्यतिप्रसङ्ग: इतीच्छाया: शक्तित्वेन न कोपि दोष: इतिस्थितौ दोषान्तरमपि तद् यथा–इच्छाया: शक्तित्वे इदमस्माद् भवतु इतीच्छाविषयत्वमेव जनकत्वं स्यादिति बहूपप्लव: स्यात्, अन्यत्रापि इच्छातिरिक्तलोकप्रसिद्धस्य कारणत्वरूपधर्मस्य विलयापत्ति:। तस्मादीश्वरेच्छा कारणत्वस्य नियामिकैव नतु तदवच्छेदिका। ननु दण्डादौ शक्ति: स्वरूपसती कार्योत्पादनियामिका शब्दनिष्ठा तु ज्ञातैवेति वैलक्षण्यदर्शात्तत्रातिरिक्तशक्तिस्वीकारे बाधकाभाव: इत्यरुचेरुच्यते, प्रमाणानां जनकत्वतद्घटितातिरिक्तसम्बन्धेनैव प्रमेयसंबद्धानां ज्ञानजनकत्वदर्शनम् इह तयो: सम्बन्धत्वानौचित्यम्।

अयंभाव:–यथा प्रत्यक्षस्थत्ले संयोग–संयुक्त–समवायादिसन्निकर्षेण घटादिना सम्बद्धानामेव चक्षुरादीनां प्रत्यक्षमाजनकत्वं नतु जनकत्वसम्बन्धेन जनकत्वघटितेच्छारूपसम्बन्धेन वा, तथा शब्दस्यापि प्रमाणत्वेन तदतिरिक्तसम्बन्धेनार्थेन संबद्धस्यैव शाब्दज्ञानजनकत्वमुचितम्।

अन्यथा तथानङ्गीकारे पर्वतो वह्निमान् इत्याद्यनुमितिस्थलेऽपि हेतुसाध्ययो: धूमज्ञानजन्यज्ञान-विषयो वह्निर्भवत्वितीच्छाविषयत्वमेव तद्बोधजनकत्वमेव हेतुसाध्ययो: सम्बन्ध: स्यादिति नैयायिकसम्मतव्याप्त्युच्छेदापत्ति: स्यात्।

तस्मात्पदपदार्थयोर्बोधजनकत्वं तदघटितेच्छारूपञ्च सम्बन्धो नोचित:।

ननु विनापीच्छां घनगर्जितेन मेघानुमानदर्शनादुक्तेच्छाविषयत्वस्यानुमानस्थले सम्बन्धस्यासम्भव, इत्यत्रोच्यते यो हि घटभूतलयो: संयोगवत्तदुभयस्मिन्नपि स सम्बन्धिनि वर्तते स एव संबन्धो भवति, जनकत्वादि तु पदमात्रवृत्ति, अत उभयवृत्तित्वाभावान्न सम्बन्धत्वम् इच्छापि नोभयवृत्ति:। मञ्जूषायामुक्तमिदम् इच्छाविषयबोधीयविषयतायां नियामकत्वाभावात्। अयं भाव: योह्याधाराधेयभावनियामकत्वेन दृष्ट: स एव सम्बन्ध:। प्रकृते इच्छीयविषयताश्रयबोधनिष्ठजन्यतानिरूपितजनकत्वाख्यसम्बन्धेन अयमर्थ: अयं शब्दो वा इच्छावान् इति व्यवहारादर्शनात् तस्या: सम्बन्धत्वाभाव:। आश्रयत्वनियापकत्वाभावे सम्बन्धत्वं स्यादिति तु वक्तुमशक्यम् सम्बन्धलक्षणानाक्रान्तत्वात्। तथा च संबन्धिभिन्नत्वेसति द्विष्ठत्वे सति विशिष्टबुद्धिनियामकत्वं सम्बन्धत्वमिति सम्बन्धलक्षणम्। तत्राभेदे संबन्धत्ववारणायाह सम्बन्धिभिन्नत्वेसतीति, केवलजनकत्वादेर्वारणायाह द्विष्ठेति वृत्यानियामकविषयत्वादिवारणायाह विशिष्टेति, यद्यपि ज्ञानरूपकार्यम्प्रति विषयस्य ज्ञानकर्त्रोरुभयोरपि कारणत्वं तथापि नहि जनकत्वसम्बन्धेन विषयविशिष्ट: कर्ता कर्तृविशिष्टो विषयो वेति विशिष्टबुद्धि:। ये बोधजनकत्वं शक्तिं वदन्ति तेषाम्मतेपि एते दोषा: उन्नेया:।

बोधजनकत्वस्याश्रयतया पदे निरूपकतया अर्थेपि विशिष्टबुद्धिसत्वात् अस्तु सम्बन्धत्वमित्यपास्तम्, निरूपकतायाः वृत्त्यनियामकत्वाद् नवीनाः पूर्वोक्तदोषसद्भावात् पदपदार्थे सम्बन्धान्तरमेवशक्तिः वाच्यवाचकभावापरपर्याया इति वदन्ति, तद्ग्राहकञ्च इतरेतराध्यासरूपं तादात्म्यम्, तच्च सङ्केतः तादात्म्यस्य शक्तिनियामकत्वात् शक्तिरिति व्यवहारः भेदाभेदघटितस्य तादात्म्यस्य द्विष्ठत्वाभावेन शक्तित्वाभावः। अभेदस्य सम्बन्धिभिन्नत्वाभावेन तथात्वासम्भवात्। तदुक्तं पातञ्जले भाष्ये सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः योयं शब्दः सोर्थः योर्थः स शब्द इति, पाणिन्यादिस्मार्तसङ्केतस्यैवाभिधानियामकत्वम् तस्यैव वाचकत्वं साधुत्वञ्च, अयमेव सम्बन्धः पदे वाक्येच, तदाह न्यायभाष्यकारः समयज्ञानार्थं चेदं पदलक्षणाया वाचोन्वारख्यानं व्याकरणम् वाक्यलक्षणाया वाचोऽर्थलक्षणम् इति। अनेन हि पदेष्विव वाक्येऽपि ऐश्वरः समय इति स्पष्टमेवोक्तम्। वाक्यविषये समयग्राहकमाकाङ्क्षाद्यपि। समयज्ञानार्थमित्यस्य साधूनामिति। पदलक्षणायाः पदरूपाया समाख्यानम् प्रकृतिप्रत्ययादिप्रदर्शनद्वारा बोधकम् व्याकरणम्। वाक्यलक्षणायाः वाक्यरूपाया अन्वाख्यानम् वाक्यार्थबोधकम् अर्थलक्षणम् तर्कमीमांसादि, एतेन पदार्थे संबन्धग्रहवन्त्यपि पदानि वाक्यार्थे समयग्रहानपेक्षान्येवेति वाक्यस्फोटो नैयायिकासम्मतः इति परास्तं न्यायभाष्यकारेणैव वाक्यशक्तिबोधनात्। कः शब्दः कोऽर्थ इति प्रश्ने घट इत्ययं शब्द घट इत्ययमर्थ इत्येकाकारोत्तरदर्शनात्तयोरध्याससिद्धिः।

शक्तिग्राहकत्वात्तादात्म्यमुपयुज्यते तत्तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् अत्र अभेदस्याध्यस्तत्वात् न तयोर्विरोधः। तत्र भेदस्योद्भूतत्वविवक्षायां अस्यार्थस्य वाचकः प्रगृह्यम्, तस्य वाचकः प्रणवः इत्यादौ षष्ठी। अभेदस्योद्भूतत्वविवक्षायान्तु प्रथमा, यथा वृद्धिरादैच् ओमित्येकाक्षरं ब्रह्म इत्यादौ सर्वथा अभेदे तादात्म्यव्यवहारो न जायते घटे स्वधर्मव्यवहाराभावात् नापि सर्वथा भेदे अश्वपुरुषयोरिव तद्व्यवहाराभावात् शब्दार्थयोस्तादात्म्यादेव कः शब्दः, कोऽर्थ इति प्रश्ने घट इत्ययं शब्दः घट इत्ययमर्थइत्येकाकारोत्तरदर्शनात्तयोरध्याससिद्धिः।

नन्वेवं शब्दार्थयोस्तादात्म्यस्वीकार असि शब्दोच्चारणे, जिह्वोच्छेदापत्तिः मधुशब्दोच्चारणे मधुधारणापत्तिरिति चेत्र, अभेदस्याध्यस्तत्वकथनेनास्य दोषस्य निर्मूलत्वात्।

वस्तुतो बौद्ध एवार्थः शक्यः पदमपि बौद्धम् तयोरभेदः न च बौद्धे दाहादिशक्तिमत्वम्।

सोऽयं शब्दार्थसम्बन्धः औत्पत्तिकः, नत्वाधुनिकः अतएवोच्यते औत्पत्तिकस्तु, सम्बन्धः शब्दस्यार्थेनेति भाष्येप्युक्तमेतत् सिद्धे शब्दार्थसम्बन्धे इति।

अतएवाह न्यायवाचस्पत्ये सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षात्कृतः सङ्केतः, तद्व्यवहारच्चास्मदादीनामपि सुग्रहः सङ्केतः।

शब्दार्थसम्बन्धविषये हरिरप्याह–

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा।
सम्बन्धिशब्दे सम्बन्धो योग्यताम्प्रतियोग्यता।
समयाद् योग्यता संविन्मातापुत्रादियोगवत्।
सति प्रत्ययहेतुत्वं सम्बन्धे उपपद्यते।
शब्दस्यार्थे यतस्तस्मात्सम्बन्धोस्तीति गम्यते।

इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषादिषु घटादिषु यथा पुरुषप्रयत्ननिरपेक्षा अनादिर्योग्यता, योग्यतैव शब्दार्थयोः सम्बन्धः इति कुञ्चिकाकार आह ल.म. ४० पृ. कलाकारऽस्तु एतत्कारिका-व्याख्याने तस्मात्सङ्केतकृत एव वाच्यवाचकभावः शक्तिविशेषरूपः। उत्तरस्य त्वयमर्थः दीपस्य प्रकाशवत् स्थित एवास्य वाच्यस्य वाचकेन सहाविभागरूपः सम्बन्धः तदेव वाचकत्वम् अन्योन्याध्यासरूपः, ईश्वरस्य सङ्केतस्तु अनादिवासनासिद्धं स्थितमेव तं प्रकाशयति, यथा विद्यमान एव पितापुत्रयोः सम्बन्धोऽयमस्य पिता अयमस्य पुत्र इति सङ्केतेनावद्यते इत्यनेन कलाविवरणेन तात्दात्म्यस्य सम्बन्धत्वेन प्रतीतिः, अयम् सिद्धान्तः, अतएवाग्रे तत्रैव उक्तटीकायाम् उक्तम् उक्तेर्थे सम्मत्यन्तरमत्याह हरिति तत्राद्यकारिका तज्जनकतैव शक्तिरित्यर्थे साधकत्वेन लिखिता दीक्षितैर्वैयाकरणमतोन्मज्जने भूषणकृतापि तथैव व्याख्याता तन्निरासायाह, अस्यार्थ इत्यादिना (मञ्जूषायाम्) अभेदबोध्यम् उक्तरीत्या बोधजनकम् शक्तिरित्यायाति, तत्र श्रीदीक्षितः भूषणकारोपि सम्मतः। अयम्भावः दीक्षितादिमते बोधजनकता शक्तिरित्यत्र सा कारिका प्रमाणत्वेनोक्ता, किन्तु मञ्जूषाकारमते बोधजनकतावच्छेदकीभूतः यो धर्मः वाच्यवाचकभावापरपर्यायः शक्तिरूपः स एवोक्तः। अतः नव्यमते वाच्यवाचकभावः शक्तिरिति।

स चाखण्डोयाधिरूपः। स च पदपदार्थोभयनिष्ठः। तद्ग्राहकञ्च तादात्म्यम्, इति प्रदर्शितमेव। शक्त्युपकारकत्वात् कैश्चित् तादात्म्यमेव शक्तिरितित्यपि वैयाकरणसम्प्रदायः।

सा च शक्तिः साधुष्विवापभ्रंशेपि शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात्। व्यवहारदर्शनात् च पूर्वजन्मानुभूतशक्तिस्मरणम्, जीवनादृष्टादेस्तद्बोधकत्वस्वीकारेण न काचिदानुपत्तिः।

नैयादिकादयः अपभ्रंशेषु शाक्तिं नाभ्युपगच्छन्ति साधुस्मरणद्वारा बोधस्तन्मते तदाह–

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभासते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः इति।

इदं नोचितम् साधुस्मरणं विनापि बोधदर्शनात्। साधुस्मरणेन बोधइति स्वीकारे पामराणां साधुशब्दमजानतां बोधानुपपत्तेः। अतः अपभ्रंशेषु शक्तिरस्तीति मन्तव्यम् अतएवोक्तम्--वाचकत्वाविशेषेपि नियमः पुण्यपापयोरिति, अत एव भाष्यकृता उक्तम् समानायामर्थावगतौ शब्दैश्चाशब्दैश्च शास्त्रेण धर्मनियमः क्रियते इति।

तथा च पाणिनीयव्याकरणव्युत्पत्तिज्ञानपूर्वकं साधुत्वेन ज्ञातसाधुप्रयोगाद्धर्म इति बोध्यम्। तथा चार्थबोधाय साध्वसाधुशब्दोभयप्रयोगेण लौकिको व्यवहारः। तन्निर्वाहाय अपभ्रंशेषु शक्तिरभ्युपेया पुण्यन्तु पूर्वोक्तरीत्या साधूच्चारणे एवेति शम्।

न्यायवैशेषिकदर्शने शब्दार्थसम्बन्धविमर्शः

आचार्यः श्रीसुधाकरदीक्षितः

न्यायदर्शनानुसारं शब्दो द्विविधो भवति। केचन शब्दा ध्वनिरूपा भवन्ति केचन शब्दा वर्णरूपा भवन्ति। वर्णरूपस्य शब्दस्य समूहः पदमित्युच्यते। पुनः पद समूह एव व्यवहारे शास्त्रे च वाक्यरूपेण अनुमतोऽस्ति। यदा सार्थकाः शब्दा वाक्यभावमवाप्ता भवन्ति तदा तैः शब्दैर्वाक्यार्थबोधो भवति। वाक्यार्थबोधः, शाब्दबोधः, अन्वयबोधो वा समानार्थका भवन्ति। न्यायदर्शने न्यायसूत्रकारः "आप्तोपदेशः शब्दः" इति सूत्रे शब्दस्य लक्षणम् प्रस्तौति। अग्रे पुनः आप्तशब्दार्थः क इति जिज्ञासायाम् "आप्तस्तु यथार्थवक्ता" इति समाधत्ते। अयं यथार्थवक्ता, ईश्वर एव नान्यः। एतावता ईश्वरोच्चरिता वेदाः शब्दप्रमाणरूपेण न्यायदर्शने स्वीक्रियन्ते।

आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयोक्ता उपदेष्टा। साक्षात्करणमर्थस्य, आप्तिः, तया प्रवर्तत इत्याप्तः। ऋष्यार्यम्लेच्छानां समानं लक्षणम्। तथा च सर्वेषां व्यवहाराः प्रवर्तन्त इति। एवमेभिः प्रमाणैर्देवमनुष्यतिरश्चां व्यवहाराः प्रकल्पयन्ते, नातोऽन्यथेति।[१]

वस्तुतस्तु सार्थकः शब्द एव शाब्दबोधजनने समर्थो भवति। सार्थको नाम अर्थयुक्तः, अर्थ-सम्बद्धो वा इति विज्ञेयम्। अयं शब्देऽर्थसम्बन्धः शक्तिस्वरूपो भवति। कदाचिदर्थस्य शब्दे सम्बन्धः लक्षणारूपोऽपि स्वीक्रियते। यथा लोके अनादिकालाद् गोशब्दश्रवणानन्तरम् "लाङ्गूलखुरविषाणककुद्मतः" पशुविशेषस्य बोधो नियमेन भवति। अयं बोधः गोशब्दस्य एतादृशं पशुं बोधयितुं शक्तिरूपो यः सम्बन्धोऽस्ति तद्वशादेव भवति। आविद्वदङ्गनागोपालं सिद्धमिदं तथ्यम्। एवमेव वाराणसेयः कश्चन स्वमित्रं प्रति "गङ्गायाम् मे निवासः" इति वदति चेद् गङ्गापदेन शक्तिरूपसम्बन्धवशात् स्मृतस्य गङ्गाप्रवाहरूपस्यार्थस्य बोधो गङ्गाप्रवाहे निवासस्य असम्भवान्नैव भवति। प्रत्युत गङ्गाप्रवाहसम्बन्ध-रूपलक्षणामहिम्ना तीररूपस्यार्थस्य बोध एव भवति। एतावता शब्देऽर्थस्य सम्बन्धः शक्तिलक्षणान्यतररूपो भवतीति विज्ञातं भवति। गोपदं गङ्गापदं वा श्रुत्वा पशुविशेषस्य तीरस्य वा स्मरणात्मकं ज्ञानं कथं भवतीति जिज्ञासा सहजतया समुदेति। अस्या जिज्ञासायाः समाधानं जनसामान्यानुभवाधारेणाञ्जस्येन भवति। यथा लोके वायुयानसञ्चरणं श्रुत्वा वायुयानस्य नभे स्थितस्य स्मरणं भवति। विवाहमण्डपं समवलोक्य मण्डपे जायमानस्य विवाहकार्यस्य स्मरणं भवति। फाल्गुनमासे वायोः प्रवाहेण शिंशपावृक्षपत्राणां

---

१. अ–१, आ–२, पृष्ठ सं.–१८, सूत्र सं.–७ न्यायदर्शनम् इति।

शब्दविशेषं श्रुत्वा वसन्तर्तोः नेदीयस्त्वं स्मर्यते तथैव गोपदं गङ्गापदं वा श्रुत्वा पशुविशेषस्य तीरस्य वा स्मरणं भवतीति स्पष्टं भवति। एकस्य सम्बन्धस्य द्वौ सम्बन्धिनौ भवतः। अनयोः सम्बन्धिनोरेकस्य संबन्धिनो ज्ञानं भवति चेदपरस्य संबन्धिनः स्मरणं भवत्येवेति नियमः। अत एव "एकसम्बन्धिज्ञानं अपरसम्बन्धिस्मारकं इति चोच्यते" एतावता शब्दार्थयोर्मध्ये शक्तिरूपो लक्षणारूपो वा सम्बन्धो भवति। अस्य सम्बन्धस्य च शब्दरूप एकः सम्बन्धी ज्ञातश्चेदन्यस्य सम्बन्धिनः स्मरणात्मकं ज्ञानं न्यायेनानेन सहजतया भवति। एतावता पदं श्रुत्वा पदसम्बन्धिनः पदार्थस्य स्मरणं सहजतया भवतीति सुस्पष्टं भवति।

व्याकरणदृष्ट्या "सुप्तिङन्तं पदम्" इति सूत्राधारेण सुबन्तस्य तिङन्तस्य च पद इति नाम संज्ञा वा भवति। परं न्यायदर्शनानुसारं "शक्तं पदम्" इति परिभाषया ते सर्वेऽपि वर्णसमूहाः पदपदेन प्रोच्यन्ते ये शब्दार्थसन्बन्धमहिम्नाऽर्थबोधजनने सक्षमा भवन्ति। फलतो व्याकरणदृष्ट्या 'रामः' इति सुबन्तं 'गच्छति' इति तिङन्तम् वा पदं भवति। न्यायदृष्ट्या तु 'रामः' इत्यत्र पद द्वयं विद्यते प्रथमं पदं राम इति द्वितीयं पदं राम पदोत्तरं विद्यमाना सु विभक्तिः, यतः राम इति पदं दशरथपुत्रस्याव-बोधने शक्तं 'सु' विभक्ति पदं च रामगतस्यैकत्वरूपस्यार्थस्य बोधजनने समर्थमिति सुविदितम्। अग्रे पुनः व्याकरणशास्त्रे न्यायशास्त्र उभयत्र पदसमूहो वाक्यमिति वाक्यलक्षणमेकमेव सिद्ध्यति।

पदसमूहो वाक्यम् वाक्यस्य कः अर्थः? इति जिज्ञासायाम् वाक्यार्थनिर्णयार्थमधिकृतमस्ति मीमांसाशास्त्रम्। वस्तुतो मीमांसाशास्त्रमेव वाक्यार्थनिर्णायकरूपेण सुधीभिः स्वीकृतम् विद्यते। अथ च पदेन योऽर्थो ज्ञायते वाक्येन योऽर्थोऽवबुद्ध्यते तस्यार्थस्य प्रमापणं केन माध्यमेन कर्तव्यमिति प्रश्नः समुदेति चेत् प्रमाणेनैव तत्र प्रमितिर्भवतीति वयं सर्वे साधु जानीमः। मानाधीना मेयसिद्धिरिति प्रोच्यते परिणामतस्तस्य–तस्यार्थस्य प्रमापणाय यानि प्रमाणानि अ .क्ष्यन्ते तेषां प्रमाणानां वास्तविकं स्वरूपं निर्धारयितुमेवाधिकृतमस्ति न्यायशास्त्रम्। न्यायशास्त्रं वस्तुगत्या प्रमाणशास्त्रं व्याकरणशास्त्रं वस्तुगत्या पदशास्त्रं पदार्थशास्त्रं, मीमांसाशास्त्रम्। अत्र मीमांसेत्युक्ते पूर्वमीमांसापि गृह्यते, एवमुत्तरमीमांसापि गृह्यते। एतावता मीमांसाशास्त्रं तु वाक्यार्थशास्त्रमित्युच्यते। "वाक्यार्थविचारात्मिका मीमांसा" इत्युच्यते। तत्र कोऽयं पदार्थ इति चिन्तायाम् अथवा पदस्यार्थः कोऽस्तीति जिज्ञासायां पदस्य तदर्थस्य च सम्बन्धो नूनं निर्णेतव्यः। सन्दर्भेऽस्मिन्नेतादृशः सम्बन्धनिर्णयो यथाशास्त्रं यथासिद्धान्तम् वैयाकरणैरपि क्रियते नैयायिकैरप्यनुष्ठीयते मीमांसकैरपि विधीयते तत्र किं मतं ज्याय इति साम्प्रतं चिन्तयिष्यते। वस्तुगत्या तस्य–तस्य शास्त्रस्य यो मुख्यः पक्षोऽस्ति तादृशम् मुख्यं पक्षमाश्रित्य सर्वाण्यपि शास्त्राणि स्व–स्वमतं पोषयितुं प्रवृत्तानि भवन्ति, अथ च तस्य–तस्य सर्वस्यापि शास्त्रस्य यद्–यन् मतं तन्मतमस्माभिः सावधानैः सद्भिः सम्यक् परिशील्यते चेत् स्वीयमपि शास्त्ररहस्यमाञ्जस्येन ज्ञातुं शक्यं भवति। अस्माकं शास्त्रस्य वास्तविकं रहस्यं किम्? इति तदैव ज्ञातुं शक्यते यदा शास्त्रान्तरस्यापि मतान्यस्माभिः

सम्यक् ज्ञायन्त अत एव यद्यत्र शक्तिमाश्रित्य व्याकरणशास्त्रस्य किं मतं, न्यायशास्त्रस्य किं मतम्, मीमांसाशास्त्रस्य किं मतमिति विविच्यते चेन्नूनं तत्रास्माकं सर्वेषां यूनां लाभो भविष्यति।

अत्र नैयायिकास्तु प्रायो यल्दलोकसिद्धं तद्यदि शास्त्रीयपरम्पराविरुद्धन्न भवति, वेदार्थनिर्णयाय यद्यनुकूलं भवति तर्हि तदेव स्वीकुर्वन्ति। नैयायिकास्तथा किञ्चिन्न स्वीकुर्वन्ति यल्लोक-दृष्ट्योपपादयितुमशक्यं स्यात्। लोके वयं सर्वेऽप्यनुभवामो यद्यदि कश्चन बालक उत्पन्नो भवति तर्हि पिता अभिलषति अस्येदं नाम भवतु; तर्हि पितुरिच्छानुसारं तस्य बालकस्य तन्नाम निर्धार्यते। तदनन्तरं तस्य बालकस्य बोधः तेन नाम्ना भवति। एतावता पितुरिच्छैव तत्र सङ्केतयति "मम बालकस्येदं नाम" इति। लोके प्रसिद्धमिदं तथ्यं सर्वे विजानन्ति यदुत्पन्नस्य बालकस्य नामनिर्धारणं पित्रा क्रियते मात्रा वा क्रियते अयमेव विधिरप्यस्ति अनयैव दिशात्र जगति यावत् यच्च वस्तुजातं तस्य वस्तुजातस्य यद्–यन् नाम निर्दिष्टमस्ति तत्तन्नाम कस्यचन इच्छयैव निर्धारितमस्ति। कस्येच्छा स्यात् तत्र प्रामुख्येनेति जिज्ञासायां वयं स्वीकुर्मः यत् सृष्टेः प्रारम्भे परमेश्वर एव प्रयोजकस्यापि शरीरं गृह्णाति प्रयोज्यस्यापि शरीरं गृह्णाति प्रयोजको नाम यस्तत्र बोधयति ''अस्य वस्तुन इदं नामे''ति। यो जानातीदमस्य वस्तुन नामेति स प्रयोज्यः। लोके गृहे पितास्थानीयो मातृस्थानीयो वा योऽस्ति सोऽपि प्रयोजकोऽस्ति। बालको यो मातुर्पितुर्वा सङ्केतानुसारं तस्य तस्यार्थस्य बोधं करोति सः प्रयोज्यो भवति। एतावता यथास्माकं गृहे कश्चन बालकोऽस्माकं सङ्केतानुसारं तस्य–तस्य वस्तुनो नाम तत्तच्छब्दरूपं जानाति तथैवेश्वरोऽपि सृष्ट्यारम्भे स्वयमेव प्रयोजकस्यापि शरीरं गृह्णाति प्रयोज्यस्यापि शरीरं गृह्णाति प्रयोज्यप्रयोजकयोः शरीरं स्वयं सन्धार्य ईश्वर एव बोधयति "घटपदस्य घटोऽर्थः'' "नदीपदस्य जलप्रवाहोऽर्थः" "गोपदस्य गौः अर्थः" इति।

उदयनाचार्यः न्यायकुसुमाञ्जल्यां वदति–"स्वयमेवेश्वरस्तत्र प्रयोज्यप्रयोजकशरीरे सन्धार्य अस्मान् जीवान् तत्तदर्थस्य बोधकं तत्तत् पदमिति साधु बोधयति। अनया दिशा इदं निर्गलति यदीश्वरस्य येच्छास्ति सेच्छैवात्र शक्तिरूपेण गृह्यते। मुख्यरूपेणेश्वरेच्छैव शक्तिरिति सामान्यः सिद्धान्तः। पुनरस्मिन् पक्षे ये केचन दोषा आगच्छन्ति, केचनाक्षेपा वा भवन्ति तेषां सर्वेषामाक्षेपाणां यथा-यथं समाधानं नैयायिकैः क्रियते। अथ च नैयायिकानां मुख्यः पक्षोऽयमेव यद् यथाशक्यं ये सप्तपदार्थाः द्रव्य–गुण–कर्म–समान्य विशेष–समवायाभावाः स्वीकृताः सन्ति एतेष्वेव सप्त-पदार्थेषु गौतमाभिमतानां षोडशपदार्थानामप्यन्तर्भावो भवति। सप्तपदार्थातिरिक्तोऽन्यः कश्चन पदार्थः कल्प्यते चेत् तत् गौरवाय भवत्यतोऽवश्यं अन्ये केचनापि ये पदार्थाः प्रसिद्धाः सन्ति तेषां सर्वेषामन्तर्भावो यथाशक्यं सप्तपदार्थेष्वेव कर्तव्यः। अनया दिशेच्छायाः शक्तिरूपेण स्वीकृताया गुणरूपे पदार्थेऽन्तर्भावो भवति। येयं शक्तिरस्ति सा शक्तिर्यदीच्छारूपे गुणेऽन्तर्भावयितुं शक्यते चेत् तर्हि शक्त्याख्यस्यातिरिक्तस्य पदार्थस्य स्वीकरणं गौरवाय भविष्यत्यनावश्यकञ्च सेत्स्यतीति धिया महता समारम्भेण नैयायिका वदन्ति यद् यस्य यस्य

पदस्य श्रवणानन्तरं यस्य–यस्यार्थस्य यो बोधो भवति तं बोधमुपपादयितुं तस्य–तस्य पदस्य तस्मिन्–तस्मिन् अर्थे ईश्वरेच्छारूपैव शक्तिरङ्गीकार्या इति।

केचन तत्रार्था आधुनिकैरपि निर्मीयन्ते यथा "राकेट" इति। तर्ह्याधुनिकैः येऽर्था निर्मिताः सन्ति तेषां नामाधुनिकैरेव निर्धार्यते। अस्यां स्थितावीश्वरेच्छा शक्तिः भविष्यतीति प्रश्नो यदा समुदेति तदा नैयायिका वदन्ति तत्रेच्छायामीश्वरीयत्वं विशेषणं मास्तु। इच्छैव शक्तिरित्युच्यतामिति। इच्छैव शक्तिरिति कथनेनेश्वरस्यापीच्छा गृहीतुं शक्यते, अस्माामाधुनिकानामपीच्छा गृहीतुं शक्यते। एतावता क्लृप्ता येच्छा तामिच्छाम् स्वीकृत्यैव तत्र तस्या एवेच्छायाः शक्तिरिति नाम्ना व्यवहारं विधाय लोकेऽस्माकमनुभवारूढं सर्वं यत्किञ्चिदप्यस्ति तस्य सर्वस्य साधूपपादनं कर्तुं शक्यते। फलत इच्छैव शक्तिरस्ति इति निर्णीतं भवति। पुनः शक्तिरूपाया इच्छायाः परिष्कारः कथं करणीयः केन रूपेण तस्योपयोगो भविष्यतीदं सर्वमत्र यथा-स्थानं विचारयिष्यते। विचारेणानेन महान् लाभो भविष्यति।

शक्तेरतिरिक्तपदार्थत्वमनङ्गीकुर्वन्तो नैयायिका यदा पृच्छ्यन्ते यल्लोके योऽयं प्रामाणिको व्यवहारो, वह्नौ दाहानुकूला शक्तिरस्ति, जले पिपासाशमनानुकूला शक्तिरस्ति, कुठारे छेदनानुकूला शक्तिरस्ति, इत्याद्याकारकः शक्तिमधिकृत्य वर्तते स व्यवहारो नैयायिकैः कथमुपपाद्यते? अत्र नैयायिकानामेकमेव समाधानमस्ति यच्छक्तेः कारणतायामेवान्तर्भावो विधीयत इति। उपर्युक्तेषु व्यवहारेषु नैयायिकमते अर्थावबोधो यथाक्रमं "वह्नौ दानानुकूला कारणतास्ति", जले पिपासाशमनानुकलता कारणतास्ति। कुठारे छेदनजनिका छेदनानुकूला वा कारणतास्तीत्येवं भवति। अत्रानुकूलत्वं कारणत्वमेव विज्ञेयम्। तर्हि लोके यत्र–यत्र शक्तिव्यवहारस्तत्र–तत्रास्माकं मते कारणताया व्यवहारोऽस्ति, कारणता–अनन्यथासिद्धनियतपूर्ववृत्तित्वरूपा भवति। अनन्यथासिद्धनियतपूर्ववृत्तित्वं यत्र–यत्रास्ति, तत्र–तत्र नैयायिकैः कारणता यदुच्यतेऽन्यैः सैव कारणता तत्र शक्तिशब्देन प्रोच्यते। इत्येवं तत्र नैयायिका वदन्ति। इत्येतावता नैयायिकदृष्ट्या सर्वोऽपि पूर्वपक्षः समाहितो भवति। बहव एवं पृच्छन्ति यदिच्छायाः कारणत्वं कुत्र क्लृप्तमिति चेदिच्छायाः कारणत्वं कुत्र क्लृप्तमिति प्रश्नो नैव कर्तव्यः। कुत इति चेत् कारणत्वं त्वन्वयव्यतिरेकाभ्यां निर्धार्यते घटं प्रति तत्र दण्डस्य कारणतास्ति, घटं प्रति चक्रस्य कारणतास्ति, चक्रस्य कारणत्वमन्यत्र कुत्रापि क्लृप्तं न वेति प्रश्नो न कर्तव्यः चक्रसत्त्वे घटसत्त्वं चक्राभावे घटाभाव इत्येवमन्वयव्यतिरेकोऽस्ति चेत् तर्हि घटं प्रति चक्रस्य कारणता स्वीकरणीया, एवं शाब्दबोधो भवति चेत् तत्र पदज्ञानं करणम्। पदज्ञानस्य अन्यत्रापि कारणत्वं क्लृप्तं किम्? यदि न क्लृप्तं तर्हि पदज्ञानस्य शाब्दबोधं प्रति कारणत्वं नाङ्गीकरणीयमिति न वक्तुमुचितं कुतः? पदज्ञानस्य शाब्दबोधस्य चान्वयव्यतिरेकोऽस्ति। पदज्ञाने सति शाब्दबोधो भवति पदज्ञानाभावे शाब्दबोधो न भवति। अतः शाब्दबोधं प्रति पदज्ञानस्य कारणता सिद्ध्यति। एवं कारणताया निर्धारणं तावन्वयव्यतिरेकाभ्यां सिद्ध्यतीति विज्ञातम् भवति। एवमेव तत्र पदे अर्थे वा यदि इच्छास्ति तदा तत्र पदे ज्ञाते अर्थस्य बोधो भवति। पदे अर्थे वा इच्छा यदि नास्ति तर्हि पदज्ञाने जाते सत्यर्थबोधो न जायते।

यदि भवतां नाम अस्ति–"करुणानन्द" इति तर्हि 'करुणानन्द' इति पदेन करुणानन्दरूपस्य तत्र विद्वद्विशेषस्य बोधो भवति चेदत्र किं नियामकम्? इत्येवं पृच्छ्यते चेदिदमेव वक्तव्यं यत् "इयं व्यक्तिः तत्र करुणानन्दपदेन बोद्धव्या" एतादृशसङ्केतस्य इच्छाया वा सत्त्वादेत्र करुणानन्दपदेन तत्र विद्वद्विशेषस्य बोधो भवतीति।

एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिरीत्या पदे अर्थे वा विद्यमाना येच्छा सा सम्बन्धरूपा सम्बन्धिनमर्थं पदं वा स्मारयतीत्यभ्युपगम्यते। अस्या इच्छायाः यदि प्रतियोगित्वं क्लृप्तं नास्ति, एवमेवेच्छाया यद्यनुयोगित्वमपि क्लृप्तं नास्ति तर्हीच्छाया निष्प्रतियोगिकत्वात् सम्बन्धत्वं कथं स्यादिति प्रश्नस्समुदेति। अस्य प्रश्नस्य समधानार्थं तत्र शक्तिवादे प्रोक्तं यत् नैयायिका वस्तुगत्येच्छायाः सम्बन्धत्वकल्पने खलु फलमेव कारणमथवा प्रामाणिको लोकानुभव एव कारणं मन्वते। वस्तुतस्तत्र "अनेन पदेनास्यार्थस्य बोधो जायताम्" इति कस्यचनेच्छैवास्ति यदनुरोधेन पदात् अर्थावबोधः जनसामान्यस्य भवति। इच्छां विना न भवत्यर्थावबोधः फलत एतादृशप्रामाणिकानुभवानुरोधेनेच्छायाः सम्बन्धत्वं कल्पनीयमेव। यद्यपि वाच्यवाचकभावरूपः सम्बन्धस्तत्र बोधकत्वरूपः संबंधः तादात्म्यरूपः सम्बन्धः एवं बहवः सम्बन्धाः विद्वद्भिः कल्प्यन्ते परन्त्वेतेषु सम्बन्धेषु पदार्थान्तरत्वमङ्गीकरणीयं भवति परमिच्छाया गुणत्वेन क्लृप्तत्वात् पदार्थान्तरकल्पना न कार्या भवतीति विज्ञेयम्। एतावता फलानुरोधेनैवेच्छायाः सम्बन्धत्वं कल्प्यते चेच्छोभनम्। ईश्वरस्य इच्छा पदपदार्थयर्मोध्ये सम्बन्धरूपेण स्वीक्रियते सेयं इच्छा नित्यैकाभिमता। अस्यां स्थितौ यदीश्वरस्येच्छैव शक्तिः स्यात् तर्हि घटेऽपि सैवेच्छास्ति पटेपि सैवेच्छास्ति तर्हि घट पदात् पटस्य बोधः कुतो न भवति? एवं पट पदाद् घटस्य बोधः कुतो न भवतीत्येवं सहजतया प्रश्नः समुदेति। प्रश्नस्यास्य समाधानार्थमिच्छा शक्तिरित्यस्य तात्पर्यमिच्छीया विशेष्यता शक्तिरस्तीति समुन्नीयते। इच्छायां विशेष्यविधया योऽर्थः प्रतीयते तस्मिन्निच्छीया विशेष्यता तिष्ठति सा विशेष्यता तु विशेष्यभेदेन भिन्ना-भिन्ना भवति। काममीश्वरेच्छैकैव परन्त्वीश्वरेच्छीया विशेष्यता तत्र–तत्र पदार्थे भिन्ना- अस्ति। घटपदेन घटरूपस्यार्थस्य बोधो भवतीत्यस्माकं सर्वेषामभितम् एतादृशानुभवानुरोधेनेश्वरेच्छा "घटपदाद् घटो बोद्धव्यः" इत्याकारिकाऽर्थ विशेष्यिका, "घटपदं घटरूपमर्थं बोधयतु" इत्येवं पदविशेष्यिका चेच्छा स्वीक्रियते। यदि पदविशेष्यिकेच्छास्ति चेत् तर्हि "घटरूपार्थविषयकबोधजनकतावत् पदम्" इत्येवं तत्रेच्छाया विवरणं करिष्यते। घटरूपार्थविषयक-बोधजनकतावत् पदमित्याकारिकायामिच्छायां पदं विशेष्यं भवति। इच्छीया विशेष्यता च घटपदे भवति फलत इच्छीयविशेष्यताया घटपदे सत्त्वात् घटपदेन घटत्वविशिष्टस्य बोधो भविष्यतीति तथ्यं निर्गलति। अर्थविशेष्यिकेच्छा स्वीक्रियते चेत् तदा घट पदाद् घटो बोद्धव्य इत्यस्या इच्छाया विवरणं "घटपदजन्यबोधविषयतावानर्थः" इत्येवं विधीयते। एतदिच्छानुराधेन घटपदजन्यबोधविषयत्वनिष्ठ-प्रकारतानिरूपितेश्वरेच्छीया विशेष्यताऽर्थे तिष्ठति अस्यां स्थितौ तत्रेश्वरेच्छाया या विशेष्यता तस्या विशेष्यताया अर्थे पदे च सत्त्वात् तादृशविशेष्यतारूपसंसर्गपुरस्कारेण पदे श्रुते सत्यर्थस्य बोधो भविष्यति। अर्थे ज्ञाते सति पदस्यापि स्मरणं भविष्यति। तादृशविशेष्यतायाः सम्बन्धबलेनैक-

सम्बन्धिज्ञानमपरसम्बन्धि– स्मारकमितिरीत्यान्यस्य सम्बन्धिनः स्मरणं भवतीति ज्ञेयम्। अत्र तावदेक आक्षेपो भवति यत् सम्बन्धस्तु द्विष्ठो भवति विशेष्यता तु द्विष्ठा नास्ति तर्हि कथं विशेष्यतायाः सम्बन्धत्वम्? अत्र वयं वदामः यत् कः सम्बन्धो द्विष्ठो भवति? वाच्यवाचकभावः सम्बन्धोऽपि द्विष्ठो नास्ति। वाच्यवाचकभावो नाम वाच्यता वाचकता, वाचकता केवलं वाचकेऽस्ति वाच्यता केवलं वाच्येऽर्थेस्ति फलतो वाच्यवाचकभावः सम्बन्धो द्विष्ठः कथं भविष्यति? आधाराधेयभावः सम्बन्धः कथं द्विष्ठो भविष्यति? कुतः? आधाराधेयभावो नाम आधारता, आधेयता, आधारताऽऽधारे वर्तत आधेयता चाधेये वर्तते तर्हि द्विष्ठत्वं कुत्रास्ति? कुत्रापि द्विष्ठत्वं नास्ति, एतावता द्विष्ठत्वं नाम द्विसम्बन्धित्वं स्वीकार्यम्।

वाचकत्वं वाचके स्वरूपसम्बन्धेन वर्तते निरूपकत्वसम्बन्धेन च वाच्ये वर्तते। वाच्यत्वं स्वरूपसम्बन्धेन वाच्येऽस्ति निरूपकत्वसम्बन्धेन वाचकेऽस्ति फलतो वाचकत्वे वाच्यत्वे च द्विसम्बन्धित्वं निराबाधं सिद्ध्यति। एवमेवेश्वरेच्छाया अपि द्विसम्बन्धिनत्वं निराकुलं तिष्ठति। ईश्वरेच्छीया विशेष्यता तावत् स्वरूपसम्बन्धेन पदेऽस्ति निरूपकत्वसम्बन्धेन परम्परया तत्रार्थेऽस्ति। यद्यर्थविशेष्यिकेच्छाऽस्ति चेत् तर्हि विशेष्यता स्वरूपसम्बन्धेन तत्रार्थे भवति। परम्परया निरूपकत्वसम्बन्धेन च पदे तिष्ठति। फलतो द्विसम्बन्धित्वं तत्रेच्छारूपे सम्बन्धेऽपि उपपादयितुं शक्यते। एवं सिद्धान्तत ईश्वरेच्छीयविशेष्यतायाः सम्बन्धत्वे कश्चनाऽपि विरोधः नैवाशङ्कनीयः।

वृत्तिविचारे व्यञ्जनावृत्तिप्रसङ्गः

प्रो॰ अमिता शर्मा

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥ (काव्यादर्शः)

अस्मिन् संसारे शब्देनानुविद्धमिव सर्वं ज्ञानमवभासते। कश्चिदर्थं मनसि निधायैव वक्त्रा शब्दः प्रयुज्यते। तं शब्दं श्रुत्वा श्रोतुरर्थबोधो भवेदित्यस्य कृते अनिवार्यमिदं यत् तस्मिन् शब्दे वक्तृविवक्षितार्थावबोधनात्मिका शक्तिर्भवेत्। अत एव विभिन्नेषु शास्त्रेषु शब्दशक्तिविचारः प्राचीनकालादेव प्रचलति विशिष्टरूपेण मीमांसा–न्याय– व्याकरणशास्त्रेषु।

मीमांसादर्शने महर्षिजैमिनिना शब्दार्थयोर्नित्य एव सम्बन्धः स्वीकृतः। तथा हि 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः'। (मीमांसासूत्रम् १.१.५)

अस्य सूत्रस्य व्याख्यानावसरे स्वकीये मीमांसाश्लोकवार्तिके भट्टकुमारिलेन शब्दार्थयोः स्वाभाविकः सम्बन्धो व्यवहारानादित्वसाधनेन सहैव समुपपादितः। एभिर्व्यवहारस्यानादित्वं व्यवहारे च सम्बन्धग्रहस्य प्रत्यक्षानुमानार्थापत्तीति प्रमाणत्रयं प्रतिपादितम्। तथा हि–

शब्दवृद्धाभिधेयाँश्च प्रत्यक्षेणात्र पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥

अन्यथानुपपत्त्या च बुद्ध्येच्छक्तिं द्वयात्मिकाम्।
अर्थापत्त्यावबुद्ध्यन्ते सम्बन्धं त्रिप्रमाणकम्॥ (श्लोकवार्तिकम्, पृ॰ ६८०)

भट्टकुमारिलो मनुते यद् गवादिपदानां न गवाद्यर्थे शक्तिरपि तु गवाद्यर्थविषयकशाब्दबोधात्मके ज्ञाने। दाहानुकूलशक्तिरिव पदेऽपि शक्तिरतिरिक्तैव। किन्तु वस्तुतो न घटाद्यर्थनिरूपिता शक्तिः घटपदे अपितु घटाद्यर्थविषयकज्ञाननिरूपितैव घटपदस्य शक्तिः। ज्ञानस्यैव शक्यत्वेऽपि तज्ज्ञानशक्तत्वमेव तद्वाचकत्वम्। तच्च वाचकत्वं तद्विषयकशाब्दधीजनकतावच्छेदकधर्मवत्त्वरूपम्। वस्तुतो घटाद्यर्थविषयक–ज्ञानस्यैव घटादिपदशक्यत्वेऽपि तज्ज्ञाननिष्ठवाच्यत्वं तज्ज्ञानविषयीभूतेऽर्थे आरोप्य तदर्थे वाच्यत्वव्यवहारः।

ईश्वरेच्छारूपा शक्तिरिति प्राचीननैयायिकानां मतमस्ति–नव्यानां मते तु इच्छामात्रं शक्तिर्नत्वीश्वरेच्छा यतो ह्याधुनिकसंकेतेऽपि शक्तिरस्त्येव। अस्माच्छब्दादयमर्थो बोद्धव्यः, इदं पदमममुमर्थं बोधयतु इत्याकारा ईश्वरेच्छा शक्तिः। सैव सङ्केतः सम्बन्धः। शक्तेर्यद्यपि विषयत्वलक्षणः सम्बन्धः पदेऽर्थे बोधे च तथापि बोधनिष्ठजन्यतानिरूपितजनकतावत्त्वेन शक्तिविषयो वाचकः पदजन्यबोधविषयत्वेन शक्तिविषयो वाच्यः। स च शक्तिग्रहो प्रथमं वाक्य एव तथाप्यावापोद्वापाभ्यां शास्त्रकृत्कल्पिताभ्यां तत्तत्पदे शक्तिग्रह इति मन्यते।

लघुमञ्जूषाकारेण नागेशभट्टेन नैयायिकानां मतं खण्डितम्। तन्मते ईश्वरेच्छायाः शक्तित्वं तदैव स्यात् यदा तस्याः सम्बन्धत्वं स्यात्। सम्बन्धत्वञ्चाधाराधेयभावनियामकस्यैव दृष्टं, सर्वसम्मतञ्च। यथा हि 'सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामक' इत्यभियुक्तव्यवहारात् यथा घटवद्भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्च। नात्र तथा घटशब्दः इच्छावान्, तदर्थो वा इच्छावान् इति व्यवहारः। तस्मात्पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया। (परमलघुमञ्जूषा शक्तिविचारः) नागेशमते स एव सम्बन्धः। स सम्बन्धः पदे वाक्ये च। तस्मादितरेतराध्यासः सङ्केतस्तन्मूलकं तादात्म्यञ्च सम्बन्ध इति। पातञ्जलभाष्येऽप्युक्तम् 'सङ्केतस्तु पदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो योऽर्थः स शब्द इति।' स्मृत्यात्मक इत्यनेन बोध्यते यत् ज्ञातस्यैव सङ्केतस्य शक्तिबोधकत्वं भवति। प्राचीनवैयाकरणास्तु बोधजनकतामेव शक्तिमाहुः। यथा चोक्तं भर्तृहरिणा–

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।। (वाक्यपदीयम् III/३२९)

इत्थं वैयाकरणानां मते वाच्यवाचकरूपाखण्डपदार्थः शक्तिः पदपदार्थयोः सम्बन्धः। तद्ग्राहकसङ्केतस्तु इतरेतराध्यासमूलकं तादात्म्यम्। तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। तादात्म्यस्य भेदाभेदरूपत्वेनैव अग्निशब्दोच्चारणे मुखदाहापत्तिरपि निरस्ता भवति वैयाकरणानां मते। वस्तुतो बौद्ध एवार्थः शक्यः। पदमपि बौद्धमेव स्फोटात्मकं वाच्यमिति तयोस्तादात्म्ये बौद्धवह्नौ दाहकत्वशक्तिर्नास्तीति। नैयायिकैः शाब्दबोधं प्रति वृत्तिज्ञानं पदज्ञानञ्च स्वातन्त्र्येण कारणमुक्तं, परन्तु पृथक्–पृथक् तयोः कारणत्वस्वीकारे कार्यकारणभावद्वयकल्पने महद् गौरवं स्यादिति लाघवाद् विशिष्टस्य कारणत्वं वैयाकरणैः स्वीक्रियते। यथा चोक्तं नागेशभट्टेन–'तद्धर्मावच्छिन्नविषयकशाब्द–बुद्धित्वावच्छिन्नां प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः। अत एव नागृहीतवृत्तिकस्य शाब्दबोधः।' (परमलघुमञ्जूषा, शक्तिविचारः)।

साहित्यशास्त्रे सर्वप्रथमं ध्वन्यालोके काव्यात्मरूपेण ध्वनिप्रतिष्ठापनप्रसङ्गे शब्दशक्तिविचारः कृतः। ध्वन्यालोककारेण शाब्दव्यवहारस्य भेदत्रयं स्वीकृतम् यथा हि–'तदेवं शाब्दे व्यवहारे त्रयः प्रकाराः–वाचकत्वं गुणवृत्तिर्व्यञ्जकत्वं च'। (ध्वन्यालोकः, तृतीयोद्योतः, पृ० ४६९)। वाच्यव्यङ्ग्ययोः पार्थक्यं स्पष्टीकुर्वता ध्वनिकारेणोक्तम् 'न च स्वपरव्यवहारो वाच्यव्यङ्ग्ययोरपह्नोतुं शक्यः। एकस्य

सम्बन्धित्वेन प्रतीतेरपरस्य च सम्बन्धिसम्बन्धित्वेन'। ध्वन्यालोकः, तृतीयोद्योतः पृ० ४५७। परमत्र शब्दशक्तिविचारो विविक्ततया नोपस्थापितः। काव्यप्रकाशकारेण मम्मटाचार्येण ध्वनिकारस्य मतमनुसरता त्रिविधः शब्दस्त्रिविधोऽर्थस्त्रिविधा च शक्तिः स्वीकृता। अभिधाविवेचनमनेन महाभाष्यमनुसृत्यैव कृतम्। यथा हि वाचकं लक्षयतानेनोक्तम्–'साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः'। चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारस्य मतमनुसरन् स 'सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा (II/७)'। इत्येव मनुते। अत्रैवानेनोक्तम्–'स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते'। का० प्र० II/८ काव्यप्रकाशस्यास्य प्रसङ्गस्य व्याख्यायां साहित्यचूडामणावुक्तम्–'मुख्यः प्राथमिकः न तु प्रधानभूतः। यस्मादभिधा मुख्यो व्यापारः एवमभिधायकः शब्दोऽपि मुख्यः'।

लक्षणानिरूपणेऽपि विविधशास्त्राणां वैशिष्ट्यं प्राप्यते। स्वबोध्यसम्बन्धो लक्षणेति मीमांसकाः। स्वं वाक्यादिः तेन बोध्यो योऽर्थस्तत्सम्बन्धो लक्षणा। गम्भीरायां नद्यामित्यस्य वाक्यस्य बोध्या गम्भीराभिन्ना नदी तत्सम्बन्धस्तीरे इति वाक्येऽपि लक्षणा। एतादृशे लक्षणाया असम्भवात् समुदायबोध्यगभीरत्वविशिष्टनदीपदार्थः, तत्सम्बन्धो लक्षणेति स्वीक्रियते।

शक्यसम्बन्धो लक्षणेति नैयायिकानां मतमस्ति। तत्र तात्पर्यानुपपत्तिरेव बीजम्। वाक्ये शक्तेरभावात् शब्दसम्बन्धरूपा लक्षणापि न भवति। 'गभीरायां नद्यां घोषः' इत्युक्ते नदीपदस्य नदीतीरे लक्षणा, गभीरपदार्थस्य नद्या सहाभेदान्वयः, क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात्। यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरनदीतीरे लक्षणया गभीरपदं तात्पर्यग्राहकम्।

नागेशभट्टेन लक्षणा निरस्तीकृता। तन्मते गौरवादन्याय्यत्वाच्च नैषा स्वीकरणीया। यथा हि तेनोक्तम्–'सति तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्याल्लक्षणाया अभावात् वृत्तिद्वयचावच्छेदकद्वयकल्पने गौरवात् जघन्यवृत्तिकल्पनया अन्याय्यत्वाच्च। तात्पर्यं चात्र ऐश्वरं देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादिभिर् लब्धम्'। (परमलघुमञ्जूषा–लक्षणानिरूपणम्) तन्मते शक्तिर्द्विधा भवति–प्रसिद्धाऽप्रसिद्धा च। गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः तीरादौ चाप्रसिद्धा।

आनन्दवर्धनाचार्येण व्यञ्जनाप्रतिष्ठापनप्रसङ्गे गुणवृत्तिरपि स्वीकृता। शब्दस्यामुख्यो व्यापारो गुणवृत्तिरमुख्यत्वेन व्यवस्थितं वाचकत्वमेवास्ति। अस्मिन् प्रकरणे तेन गुणवृत्तिव्यञ्जकयोः पार्थक्यमपि सूचितम्। वस्तुतस्तु आनन्दवर्धनाचार्यात् प्राक् केनापि व्यञ्जनावृत्तिर्नाङ्गीकृता। काव्यस्यात्माध्वनिरिति स्वमतप्रतिष्ठापनप्रसङ्गे कोऽयं ध्वनिः कथं चास्य गुणवृत्तावन्तर्भावो न सम्भव इति सर्वं प्रतिपादितम्। अभिधालक्षणाभ्यां पृथगेव प्रतीयमानार्थ इति प्रतिपादयन् सः कथयति–

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।(प्रथमोद्योतः,कारिका–४)

प्रतीयमानार्थश्च वस्त्वलङ्काररसरूपेण त्रिविधो भवति। अयमर्थोऽभिधावृत्तिबोध्यो नास्ति उपसर्जनीकृतस्वार्थौ शब्दार्थौ तमभिव्यङ्क्तः–

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥

(प्रथमोद्योतः, कारिका १३)

अभिधया तु सङ्केतितार्थस्यैव बोधो भवति, अयन्तु संकेतितार्थाद्भिन्न एव। यथा ह्युक्तम्–'स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलङ्काररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते। सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम्। तथा ह्याद्यस्तावत्प्रभेदो वाच्याद् दूरं विभेदवान्। स हि कदाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः क्वचिद्वाच्ये प्रतिषेधरूपे विधिरूपो, क्वचिद्वाच्ये विधिरूपेऽनुभयरूपो, क्वचिद्वाच्ये प्रतिषेधरूपेऽनुभयरूपः। संलक्ष्यक्रमरूपालङ्कारध्वनिरपि वाच्याद्भिन्न एव। अथ च रसादिलक्षणस्तृतीयो भेदस्तु वाच्यसामर्थ्याक्षिप्तः प्रकाशते, न तु साक्षाच्छब्दव्यापारविषय इति वाच्याद् भिन्न एव। अपि च वाचकत्वाद् व्यञ्जकत्वस्यान्यत्वं भवति यतो हि वाचकत्वं शब्दैकाश्रयमितरस्तु शब्दाश्रयमर्थाश्रयं च शब्दार्थयोर्द्वयोरपि व्यञ्जकत्वस्य प्रतिपादितत्वात्।

गुणवृत्तिव्यञ्जकत्वयोरपि पार्थक्यं स्वरूपतो विषयतश्च प्रतिपादितम् तृतीयोद्योते– "रूपभेदस्तावदयम्–यदमुख्यतया व्यापारो गुणवृत्तिः प्रसिद्धा। व्यञ्जकत्वं तु मुख्यतयैव शब्दस्य व्यापारः। न ह्यर्थाद्व्यङ्ग्यत्रयप्रतीतिर्या तस्या अमुख्यत्वं मनागपि लक्ष्यते। अयं चान्यः स्वरूपभेदः यद्गुणवृत्तिरमुख्यत्वेन व्यवस्थितं वाचकत्वमेव। व्यञ्जकत्वं तु वाचकत्वादत्यन्तं विभिन्नमेव। अयं चापरो रूपभेदो यद्गुणवृत्तौ यदार्थोऽर्थान्तरमुपलक्षयति तदोपलक्षणीयार्थात्मना परिणत एवासौ सम्पद्यते यथा 'गङ्गायां घोषः' इत्यादौ। व्यञ्जकत्वमार्गे तु पदार्थोऽर्थान्तरं द्योतयति तदा स्वरूपं प्रकाशयन् असावन्यस्य प्रकाशकः प्रतीयते प्रदीपवत्। विषयभेदोऽपि गुणवृत्तिव्यञ्जकत्वयोः स्पष्ट एव यतो व्यञ्जकत्वस्य रसादयोऽलङ्कारविशेषा वस्तु चेति त्रयं विषयः। तत्र रसादिप्रतीतिर्गुणवृत्तिरिति न केनचिदुच्यते न च शक्यते वक्तुम्। व्यङ्ग्यालङ्कारप्रतीतिरपि तथैव। वस्तुचारुत्वप्रतीतये स्वशब्दानभिधेयत्वेन यत्प्रतिपादयितुमिष्यते तद्व्यङ्ग्यम्। तच्च न सर्वं गुणवृत्तेर्विषयः प्रसिद्ध्यनुरोधाभ्यामपि गौणानां शब्दानां प्रयोगदर्शनात्। यदपि च गुणवृत्तेर्विषयस्तदपि च व्यञ्जकत्वानुप्रवेशेन"। ध्वन्यालोकः, तृतीयोद्योतः, पृ० ४६४।

इत्थं गुणवृत्तौ ध्वनेरन्तर्भावो न सम्भवति। काव्यप्रकाशकारेणापि ध्वनिकारस्य मतमेवाङ्गीकृतम्। व्यङ्ग्यस्य प्राप्तिरभिधया लक्षणया वा न सम्भवति। तथा ह्युक्तम्–'नाभिधासमयाभावात्, हेत्वभावान्न लक्षणा' (द्वितीयोल्लासः, कारिका १५)। 'गङ्गायां घोषं' इत्यादौ लक्ष्यार्थस्योपपत्त्यनन्तरं प्रयोजनस्यावगमो व्यञ्जनाया विषयः–

"यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया"॥ (काव्यप्रकाशः II/१४)

प्रयोजनस्य प्रतीतये पुनर्लक्षणा नायाति यतो हि तत्र अर्थः सबाधो न तिष्ठति यथा हि–

लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः॥ (का॰ प्र॰ II/१६)

यदि कश्चिद् कथयेत् सप्रयोजनस्यैव लक्ष्यार्थस्य बोधो भवेत्तं प्रत्युक्तम्–

'प्रयोजनेन सहितं लक्षणीयं न युज्यते॥' (II/१७)

यतो हि–

'ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्।'
'प्रत्यक्षादेर्नीलादिविषयः फलं तु प्रकटतासंवित्तिर्वा॥ (II/१८)

'अयं घटः' इति प्रत्यक्षज्ञानानन्तरं 'घटमहं जानामि' इति रूपा प्रकटता संवित्तिर्वा भवति। अत एव संयोगविप्रयोगादिभिरनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते वाच्याद् भिन्नार्थस्य बोधको व्यापारो व्यञ्जना–

'अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम्॥ (II/१९)

लिङ्गिलिङ्गभाव एव व्यङ्ग्यव्यञ्जकभावो वक्त्रभिप्रायश्च अनुमेयरूप एव इति तार्किकाणां मतमपि आनन्दवर्धनाचार्येण निरस्यते। तन्मते शब्दानां विषयो द्विविधो भवति–अनुमेयः प्रतिपाद्यश्च। तत्रानुमेयो विवक्षालक्षणः। विवक्षा च शब्दस्वरूपप्रकाशनेच्छा शब्देनार्थप्रकाशनेच्छा चेति द्विप्रकारा। तत्राद्या शाब्दव्यवहाराङ्गम्। सा हि प्राणित्वमात्रप्रतिपत्तिफला। द्वितीया तु शब्दविशेषावधारणावसितव्यवहितापि शब्दकरणव्यवहारनिमित्तम्। ते तु द्वे अप्यनुमेयो विषयः शब्दानाम्। प्रतिपाद्यस्तु प्रयोक्तुरर्थप्रतिपादन-समीहाविषयीकृतोऽर्थः। स च द्विविधः–वाच्यो व्यङ्ग्यश्च। प्रयोक्ता हि कदाचित्स्वशब्देनार्थं प्रकाशयितुं समीहते कदाचित्स्वशब्दानभिधेयत्वेन प्रयोजनापेक्षया कयाचित्। (गोपनकृत सौन्दर्यादिलाभाभिसन्धानादिकया) स तु द्विविधोऽपि प्रतिपाद्यो विषयः शब्दानां न लिङ्गितया स्वरूपेण प्रकाशते अपितु कृत्रिमेणाकृत्रिमेण वा सम्बन्धान्तरेण। विवक्षाविषयत्वं हि तस्यार्थस्य शब्दैर्लिङ्गितया प्रतीयते न तु स्वरूपम्। यदि हि लिङ्गितया तत्र शब्दानां व्यापारः स्यात्तच्छब्दार्थे सम्यङ्मिथ्यादिविवादा एव न प्रवर्तेरन् धूमादिलिङ्गा-नुमितानुमेयान्तरवत्। व्यङ्ग्यश्चार्थो वाच्यसामर्थ्याक्षिप्ततया वाच्यवच्छब्दस्य सम्बन्धी भवत्येव। साक्षादसाक्षाद्भावो हि सम्बन्धस्याप्रयोजकः। (ध्वन्यालोकः, तृतीयोद्योतः, पृ॰ ४८६)

अथ च काव्यविषये व्यङ्ग्यप्रतीतीनां सत्यासत्यनिरूपणस्याप्रयोजकत्वमेवेति तत्र प्रमाणान्तर-व्यापारपरीक्षोपहासायैव सम्पद्यते। तस्माल्लिङ्गिप्रतीतिरेव सर्वत्र व्यङ्ग्यप्रतीतिरिति न शक्यते वक्तुम्। लोचनटीकाकारेण आनन्दवर्धनाचार्यस्य मतमिदमित्थं विव्रियते–'न हि तेषां वाक्यानामग्निष्टोमादिवाक्यवत्-सत्यार्थप्रतिपादनद्वारेण प्रवर्तकत्वाय प्रामाण्यमन्विष्यते प्रीतिमात्रपर्यवसायित्वात्। प्रीतिरेव चालौकिक-

चमत्काररूपाया व्युत्पत्त्यङ्गत्वात्। नायं सहृदयः केवलं शुष्कतर्कोपक्रमकर्कशहृदयः प्रतीतिं परामर्ष्टुं नालमित्येष उपहासः। (लोचनटीका, तृतीयोद्योतः पृ० ४९०)

इत्थं प्रत्यक्षानुमानाभिधालक्षणाविलक्षणमेव व्यञ्जकत्वं भवतीति। मम्मटाचार्येणापि काव्यप्रकाशस्य पञ्चमोल्लासे ध्वनिकारस्य मतमनुसृत्य सर्वविप्रतिपत्तिनिरसनपूर्वकं रसादिरूपव्यङ्ग्यप्रतीतिर्विलक्षणा भवतीति प्रतिपादितम्। यथा हि–

'भ्रम धार्मिकविस्रब्धः स शुनकोऽद्य मारितस्तेन गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेन।'

इत्यत्र निषेधात्मको योऽर्थस्संप्राप्यते तत्र अनुमाप्यानुमापकरूपं संम्बन्धो नैयायिकैः स्वीक्रियते यतो हि 'त्रिरूपाल्लिङ्गात् लिङ्गिज्ञानम् अनुमानम्' पक्षसत्त्वं–सपक्षसत्त्वं–विपक्षासत्त्वञ्चेति त्रिरूपं लिङ्गम्। अत्रापि गोदावरीतीरं भीरुभ्रमणायोग्यम्, भयकारकसिंहोपलब्धेः। यद् यद् भीरुभ्रमणं तत्तद् भयकारणनिवृत्त्युपलब्धिपूर्वकम्, यन्नैवं तन्नैवं यथा गृहम्।

मम्मटाचार्योऽस्य निरसनमित्थं करोति–'भीरुरपि गुरोः प्रभोर्वानिदेशेन प्रियानुरागेण अन्येन चैवंभूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः। शुनो बिभ्यदपि वीरत्वेन सिंहान्न बिभेति इति विरुद्धोऽपि। गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः अपितु वचनात्। न च वचनस्य प्रामाण्यमस्ति अर्थेनाप्रतिबन्धादित्यसिद्धश्च। तत्कथमेवंविधाद्धेतोः साध्यसिद्धिः'।

यद्यपि व्यङ्ग्यव्यञ्जकभावेऽपि किञ्चिद् वैशिष्ट्यन्तु भवत्येव येनार्थप्रतीतौ व्यभिचारो न भवति। यथा ह्युक्तम् काव्यप्रकाशे–

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंन्निधेः।
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम्
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥ (III/२१,२२)

इत्थं काव्ये प्रतीयमानार्थस्यैव प्राधान्यं भवति यतो हि तेनैव काव्य शोभान्वितं भवति वस्तुतस्तु रसो व्यङ्ग्य एव भवति रसं विना च काव्यत्वं न भवति यथा ह्युक्तं भरताचार्येण–न हि रसादृते कश्चिदर्थः प्रवर्तते। अतः एव काव्यज्ञैरवश्यमेव व्यञ्जना स्वीकर्तव्या।

आनन्दवर्धनाचार्यानन्तरं वैयाकरणैर्नागेशभट्टादिभिरपि व्यञ्जनावृत्तिः स्वीकृता। यथा हि नागेशभट्टेन व्यञ्जनां स्वीकृत्य तस्य लक्षणमित्थं प्रदत्तम्–मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धा-सम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानंप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना। (परमलघुमञ्जूषा, व्यञ्जनानिरूपणम्)

प्राचीनव्याकरणनये व्यञ्जनास्वीकारे प्रमाणमस्ति निपातानां द्योतकत्वं स्फोटस्य च व्यङ्ग्यता। आनन्द-वर्धनाचार्यस्य सङ्कल्पनेयं वस्तुतः वैयाकरणानां मतमाधृत्यैव पल्लविता वर्तते।

पदार्थसंसर्गस्य वाच्यत्वविचारः

डॉ.भगवत् शरणशुक्लः

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।[१]

इति भर्तृहरिकारिकया ज्ञायते यत् लोके सर्वमपि ज्ञानं व्यवहारे शब्दमाध्यमेनैव भवति। अर्थेनासम्बद्ध: शब्दो लोकेऽर्थप्रत्यायको न भवितुमर्हति, अत: शब्दार्थयो: कश्चित् सम्बन्ध: परिकल्प्यते। स एव पदपदार्थयो: सम्बन्ध: वृत्तिपदेनाभिधीयते। पदपदार्थयो: सम्बन्धज्ञानं च तत्पदजन्यशाब्दबोधायैव। अत: 'शाब्दबोधानुकूलपदार्थज्ञानजनकज्ञानविषय: पदपदार्थसम्बन्धविशेषो वृत्ति: इति वृत्तिपदार्थ आयाति। वृतु वर्तने धातो: भावे क्तिनि सति वर्त्तनं वृत्ति: इति रीत्या वृत्तिशब्दो व्युत्पद्यते। महाभाष्ये तावत् "हलोऽन्तरा: संयोग:'' इति सूत्रे इत्थमेव वृत्तिस्वरूपं ध्वनितम्[२], तद्यथा "ग्रामशब्दोऽयं बह्वर्थोऽस्ति, शालासमुदाये वर्तते, तद्यथा ग्रामो दग्ध इति। तद् य: सारण्यके समीपके स स्थण्डिलके वर्त्तते, तमभिसमीक्ष्यैतत् प्रयुज्यते-अनन्तराविमौ ग्रामौ इति"।

एतस्मिन् भाष्ये वर्त्तते इति पदेन लडर्थस्य अविवक्षितत्वात् वृतु धातु: प्रकृतिभूतस्य वृत्त्यर्थस्यैव बोधको भवति, अस्ति इति पदप्रयोगात्। अन्यथा वर्त्तते इति पदेनैव सत्तार्थस्य ज्ञानात् अस्ति- पददानं व्यर्थं स्यात्। तेन ग्रामशब्दस्य शाला समुदाये वृत्ति: इति ज्ञानस्य सत्त्वात् पदपदार्थसम्बन्धविशेषो वृत्तिरिति वृत्तिपदार्थो ज्ञायते।

शक्तिवादे गदाधरभट्टाचार्य:[३] "सङ्केतो लक्षणा चार्थे पदवृत्तिरिति" कथनेन सङ्केतलक्षणान्यतरत्वं वृत्तित्वमिति वृत्तिलक्षणं निष्पद्यते तन्मते। अर्थात् अर्थनिरूपितपदनिष्ठसङ्केतलक्षणान्यतररूपसम्बन्धत्वं वृत्तित्वमिति वृत्तिपदार्थ: सिद्ध्यति। वृत्तिं च सर्वे दार्शनिका: शास्त्रविद: प्राय: स्वीकुर्वन्त्येव। वृत्तिर्द्विधा इति नैयायिका: मीमांसाकादयश्च। वैयाकरणाश्च वृत्तिस्त्रिधा शक्तिलक्षणाव्यञ्जनारूपा इति स्वीकुर्वन्ति। शक्तिवादटीकाकार: हरिनाथतर्कसिद्धान्तभट्टाचार्यश्च[४] "शाब्दबोधनिरूपिता या स्मृतित्वावच्छिन्नजनकता

---

१. वा. प. ब्र. का. १२४।

२. महाभाव्य १.१.७।

३. शक्तिवादे प्रारम्भे एव।

४. शक्तिवादे-पृ. ३ विवृति सहित संस्करये।

तन्निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतावत्सांसर्गिकविषयतावत्त्वं वृत्तित्वमिति वृत्तिपदार्थं परिष्कृतवान्। तत्पदविषयकशाब्दबोधं प्रति तत्पदविषयकोद्‌बुद्धसंस्कारसमानाधिकरण-तत्पदार्थनिरूपिततत्पदविषयकवृत्ति ज्ञानं कारणम्– इति कार्यकारणभावे शाब्दबोधनिरूपितस्मृति-जनकोद्‌बुद्धवृत्तिविषयकसंस्कारनिष्ठावच्छेदकतानिरूपितावच्छेदकतावत्सांसर्गिकविषयता वृत्तिनिष्ठा तद्विषयतावत्त्वस्य वृतौ सत्त्वात् लक्षणसमन्वयो भवति।

गदाधरभट्टाचार्यः स्वमतेन[१] वृत्तिपदं व्याचक्षाणः इदम् पदम् इमम् अर्थं बोधयतु, इत्यनेन इदमर्थनिष्ठविषयतानिरूपकबोधनिष्ठजन्यतानिरूपितजनकतावत्पदमित्येवंरूपां पदविशेष्यिकाम्, अस्माच्छब्दादयमर्थो बोद्धव्यः इत्यनेन "इदमभिन्नशब्दनिरूपितजन्यतावद्बोधनिरूपितविषयतावानर्थः" इत्येवं रूपामर्थविशेष्यिकाम् इच्छां सङ्केतरूपां शक्तिं स्वीकरोति। प्राचीनमते च पश्चात् ईश्वरेच्छा शक्तिरिति प्रदर्शयति। स च स्वमते मीमांसकमते च शक्तिस्वरूपं विचार्य परमतखण्डनपूर्वकं स्वमतं च संस्थाप्य पुनः विचारयति यत् पदार्थसंसर्गः वाच्यः अर्थात् तत्पदशक्यो भवति न वा इति। यतोहि मीमांसकेषु तावत् ये अन्विताभिधानवादिनः प्रभाकर[२]प्रभृतयस्ते कथयन्ति यत् पूर्वं पदार्थाः अभिहिताः भवन्ति पश्चाच्चान्वयः इति तन्नोचितम्। यतोहि पदानां पदार्थेषु वृत्तिज्ञानं व्यवहाराद् भवति। तद्यथा–प्रयोजकवृद्धः प्रयोज्यवृद्धम् उक्तवान् यत् घटमानय इति तदनन्तरं घटम् आनयन्तं प्रयोज्यवृद्धं पश्यन् अनुमाति–अस्य प्रयोज्यवृद्धस्य चेष्टा घटानयनविषयकप्रवृतिमनुमाय एतस्य प्रयोज्यवृद्धस्य प्रवृत्तिः घटानयनं मत्कार्यमिति ज्ञानजन्या मदीयस्तन्यपानादिविषयकप्रवृत्तिवद् इति प्रवृत्तिकारणं कार्यताज्ञानम् अनुमाय घटानयनकार्यताज्ञानं किञ्चित्कारणजन्यं कादाचित्कत्वाद् घटादिवद् इति सामान्यरूपेण कारणमनुमाति। पश्चात् सः अस्य कार्यताज्ञानं प्रयोजकवृद्धोच्चरितेन 'घटमानय' इति वाक्यजन्यं तदन्वयव्यतिरेकानुविधायित्वाद् यो यदन्वयव्यतिरेकानुविधायी स तज्जन्यो दण्डान्वयव्यतिरेकानुविधायी घटो यथा दण्डजन्यः तथा 'घटमानय' इति वाक्यान्वयव्यतिरेकानुविधायि कार्यताज्ञानं तद् वाक्यजन्यमिति वाक्यं कारणत्वेन निश्चिनोति। ततश्च पटमानय इत्युच्चरिते पटानयनं पश्यति न घटानयनं स इत्थमन्वयव्यतिरेकाभ्यां पदमपि तत्तदर्थबोधे अन्वितं सत् कारणमित्युक्तरीत्या अनुमाति। एवञ्च पदवाक्ययोः तत्तदर्थे ज्ञानरूपकार्येण कश्चन सम्बन्धो वाच्यः। कार्येण असम्बद्धात् कारणात् कार्यानुपपत्तेरिति स जानाति। इत्थं व्यवहारेण अन्वितस्यैव घटादिपदस्य शक्तिविषयतया ज्ञानं भवति। तर्हि तेषां मते पदार्थसंसर्गोऽपि वाच्यो भवति। ते च "इतरान्वितो घटः घटपदशक्यः" इत्येतादृशं शक्तिज्ञानं कुर्वन्ति। अतस्तेषां मते इतरान्वितघटादिविषयशाब्दबोधजनकशक्तिमन्तः घटादिशब्दाः इतरान्वितघटादिवाचकाः भवन्ति। अथ च इतरान्वितघटादिविषयशाब्दबोधं प्रति इतरान्वितो घटः घटपदवाच्यः इत्याकारकमेव शक्तिज्ञानं कारणं भवति न च घटो घटपदशक्यः इत्याकारकम्, तत्र अन्वयांशस्य अनन्तर्भावात् शक्तिग्रहस्य तथा स्वीकारे वृत्तिज्ञानस्य विषयत्वाभावात् पदार्थसंसर्गस्य शाब्दबोधविषयतानुपपत्तिः

---

१. शक्तिवादे विवृति संस्करणे पृ. ५

२. तत्रैव पृ. १८

स्यादेव चेदुच्यते इतरान्वितघटादेः प्रतीतिः वाक्यादेव भवति, इन्द्रियाद्यसन्निकृष्टत्वात्, अतः घटमानय इत्यादौ इतरपदार्थघटितघटादेः तादृशवाक्यजन्यशाब्दबोधात् प्राक् इतरपदार्थान्वितघटादौ शक्तिग्रह एव न सम्भवति अनुपस्थितत्वाद् उपस्थिते एव पदार्थे च शक्तिग्रहसम्भवात्। तथा च पदार्थान्तरसंसर्गस्य शक्तिज्ञानविषयतया घटादिपदवाच्यता नास्ति। तन्नोचितम्, यतोहि शाब्दबोधात् प्राक् विशेषरूपेण आनयनादिपदार्थान्तरघटितस्य वाक्यार्थभूतस्य घटादेः शाब्दबोधात् पूर्वमनुपस्थितावपि इतरपदार्थत्वादिरूपसामान्यधर्मेण रूपेण आनयनादिघटितघटादेः शाब्दबोधात् पूर्वमपि उपस्थितिसम्भवाद् इतरपदार्थत्वादिसामान्यरूपेण आनयनाद्यन्वितघटादौ शक्तिज्ञानस्य सम्भवात् पदार्थसंसर्गस्य शक्तिज्ञानविषयकत्वात् घटादिपदवाच्यत्वं सिद्ध्यत्येव।

अत्र "अनन्यलभ्यः शब्दार्थः" इतिसिद्धान्तत्वात् वस्तुतः इतरान्वितघटः घटपदशक्यः इत्याकारकं शक्तिज्ञानं न स्वीकरणीयम्। अपितु अन्वितः घटः घटपदशक्यः इत्येवशक्तिज्ञानं स्वीकरणीयम्। पदार्थान्तरस्य लाभः पदान्तरगम्यो न तु घटादिपदगम्यः। अतः तदंशान्तर्भावेन शक्तिज्ञानमुपयुक्तं नास्ति।

"प्रमाणाद्धि प्रमेयसिद्धिः" इति सिद्धान्तात् अन्वयः घटादिपदवाच्यः। अन्वयांशे च घटादिपद-शक्तिज्ञानस्य शाब्दबोधोपयोगित्वमित्यत्र न किमपि प्रमाणमिति न वक्तव्यम्। घटादिपदविषयकशाब्दबोधं प्रति घटादिपदविषयवृत्तिज्ञानजन्योपस्थितिः कारणमिति सामान्येन कार्यकारणभावस्य स्वीकारात् तदेव प्रमाणं विद्यते। अन्वयांशे घटादिपदावाच्यतास्वीकारे वृत्तिज्ञानादन्वयांशस्यानुपस्थितौ तस्य शाब्दबोधविषयत्वा-सम्भवात् अन्वयांशे शक्तिज्ञानस्यापि शाब्दबोधे अपेक्षा आवश्यकी अस्त्येव चेदुच्यते-पदार्थान्तर-संसर्गविषयशाब्दबोधं प्रति वृत्तिज्ञानजन्योपस्थितिः कारणम् इति न स्वीकरिष्यामो येन पूर्वोक्तप्रकारेण पदार्थान्तरसंसर्गस्य घटादिपदवाच्यत्वापत्तिर्भवेत्। अपितु संसर्गभिन्नपदार्थान्तरविषयकशाब्दबोधं प्रत्येव वृत्तिज्ञानजन्योपस्थितिः कारणम् इति स्वीकरिष्यामः। तर्हि वृत्तिज्ञानजन्योपस्थितौ संसर्गताभिन्नविषय-कत्वस्य वृत्तिज्ञानजन्यत्वस्य वर्तमानात् तयोरवच्छेद्यावच्छेदकभावकल्पने गौरवं स्यात्। यद्यपि प्रकारता सम्बन्धेन शाब्दबोधं प्रति विषयतासम्बन्धेन वृत्तिज्ञानजन्योपस्थितिः कारणमिति विशेष्यतासम्बन्धेन शाब्दबोधं प्रति च विषयतासम्बन्धेन वृत्तिज्ञानजन्योपस्थितिः कारणमिति स्वीक्रियते तदा प्रथमकार्यकारणभावेन विशेषणीभूतधर्माणां द्वितीयकार्यकारणभावेन च धर्मिणः शाब्दबोधे प्रतीतिः साध्यते, सामान्येन तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्योपस्थितिः कारणिति न कल्प्यते येनोक्तप्रकारेण पदार्थान्तर-संसर्गस्य घटादिपदवाच्यतापत्तिर्भवेत्? तथापि एतादृशद्विविधकार्यकारणभावकल्पने गौरवमेवापतति। अतः पूर्वोक्त एव कार्यकारणभावः युक्तियुक्तः इति।

अत्र नैयायिकपक्षतः गदाधरभट्टाचार्याः कथयन्ति यः कार्यकारणभावः सामान्येन तद्विषयक-शाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिः कारणमिति मीमांसकैः स्वीकृतः तन्नोचितः। यतोहि विशेष्यविशेषण-भावानवगाहिवृत्तिज्ञानाद् विशेष्यविशेषणभावराहित्येन एकपदोपस्थितयोः पदार्थपदार्थावच्छेदकयोः घटघटत्वादिरूपयोः विशेष्यविशेषणभावक्रमेण शाब्दबोधापत्तिर्भविष्यति। तत्र "घटघटत्वे घटपदवाच्ये" इत्याकारकं विशेष्यविशेषणभावरहितवृत्तिज्ञानं विद्यते। तत्र च विशेष्यविशेषणभावरहितयोरेव

घटघटत्वयोरुपस्थितिशाब्दबोधौ भवतः न तु घटत्वप्रकारकघटविशेष्यकौ उपस्थितिशाब्दबोधौ भवतः। अतः तद्धर्मप्रकारकतद्विशेष्यकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतद्धर्मावच्छिन्नविषयकोपस्थितिः कारणमित्येव कार्यकारणभावः स्वीकरणीयः। तत्र च पदार्थान्तरसंसर्गकशाब्दबोधस्य किञ्चिद्धर्मप्रकारेण संसर्गविषयकत्वाभावाद् वृत्तिज्ञानात् पदार्थान्तरसंसर्गस्य अनुपस्थितावपि संसर्गमर्यादया पदार्थान्तरसंसर्गकः शाब्दबोधो भवत्येव। शाब्दबोधे च शक्त्या लक्षणया च उपस्थितस्यैव तत्तदर्थस्य प्रतीतेः सत्वात् शक्तिज्ञानजन्योपस्थित्यवहितोत्तरत्वविशिष्टशाब्दबोधं प्रति शक्तिज्ञानजन्योपस्थितिः कारणम्, लक्षणाज्ञानजन्योपस्थित्यवहितोत्तरत्वविशिष्टशाब्दबोधं प्रति लक्षणाज्ञानजन्योपस्थितिः कारणमिति कार्यकारणभावः उभयविधो वाच्यः। स च अनुगताननतिप्रसक्तकारणतावच्छेदकधर्मः अवश्यं स्वीकरणीय एव। इत्थं यद्यपि पदार्थसंसर्गस्य वृत्त्या उपस्थितिर्न भवति तथापि वृत्त्यनुपस्थितस्यापि संसर्गस्य शाब्दबोधोपगमे संसर्गविषयकवृत्तिज्ञानजन्योपस्थितेरपेक्षा नास्ति। तस्य प्रतीतिः शाब्दबोधे संसर्गमर्यादयैव करणीया। "शाब्दबोधे चैक पदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते" इति व्युत्पत्तिग्रन्थाद् इति बोध्यम्।

वैयाकरणास्तावत् अखण्डवाक्यस्फोटवादिनस्तेषां मते परमार्थतः वाक्ये एव शक्तिः तस्मात् विलक्षणबोधस्य सत्त्वात् वाक्ये पदे च पदवर्णप्रतीतेरभावात्। उक्तं च वाक्यपदीये–

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्ये पदानामत्यन्तं प्रविवेको न कश्चन॥[2]

पदेषु वः नः पचतीव्यादिषु, वर्णे=प्रकृतौ प्रत्यये इ (गतौ) भू इत्यादि धातुषु अ. (अकारो वासुदेवः)) राम इति प्रतिपादिकादिषु सु तिबादिषु प्रत्ययेषु हरेऽव विष्णोऽव इत्यादिवाक्येषु च तथा पदेषु प्रकृति प्रत्यायानां तत्रापि अकारादीनां ककारादीनां वर्णानां वाक्येषु पदानां कश्चन प्रविवेको न भवति। वृद्धव्यवहारेण बालः पूर्वं वाक्येषु पश्चाद् आवापोद्वापाभ्यां पदेषु शक्तिं स्वीकरोति। तत्रापि वाक्यस्यैव व्यवहारे मुख्यविषयतायाः सत्वाद् वाक्येऽपि शक्तिं वैयाकरणाः स्वीकुर्वन्ति। अतस्तेषां मते घटमानयेत्यादिवाक्यानां त्वदभिन्नैककर्तृकघटकर्मकप्रेरणाविषयः आनयनानुकूल व्यापारादिषु अर्थेषु शक्तिरस्ति। इतरान्वितः घटः अन्वितः घटो वा घटपदशक्यः इत्याकारकः शक्तिग्रहः मीमांसकाभिमतो नोचितः। वाक्यशक्तिवादेऽपि तद्धर्मावच्छिन्नविषयकशाब्दबोधं प्रति तद्धधर्मावच्छिन्ननिरूपितवृत्तिविशिष्टजन्योपास्थितिः स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यस्वाश्रयपदवाक्यविषयकत्वएतदुभयसम्बन्धेन कारणम् इति कार्यकारणभावोऽस्त्येव। घटमानयेत्यादिवाक्येषु घटमनायत्वादिधर्मावच्छिन्नविषयकशाब्दबोधं प्रति वाक्यनिष्ठवृत्तिविषयकोद्बुद्धसंस्कारसमानाधिरणवृत्याश्रयघटमानयेत्यादिविषयिकायाः तत्वावच्छिन्ननिरूपितवृत्तिजन्यवाक्योपस्थितेः सत्त्वात् शाब्दबोधो भवत्येव। वाक्ये शक्तिग्रहस्य प्रमाणं कृत्तद्धितसमासाश्च इति सूत्रस्य समासग्रहणनियमार्थबोधकं भाष्यमेव। यतोहि वाक्ये शक्तिमत्वादेव ''प्रत्यय ग्रहणे तदादेः

१. व्युत्पत्तिवादे प्रारम्भे एव।
२. वाक्यपदीये ब्रह्मकाण्डे।

तदन्तस्य ग्रहणमिति" न्यायाद् देवदत्तः ग्रामं गच्छति, राजन् ङ स् पुरुष सु इत्यादेश्च प्रत्ययान्ततदादिभिन्नत्वाद् अर्थवत्सूत्रेणैव प्रातिपदिकत्वे सिद्धे किं द्वितीयसूत्रे समासग्रहणेन तदैव समासग्रहणं व्यर्थं सत् "यत्र संघाते पूर्वो भागः पदं उत्तरस्तु प्रत्ययो न, तस्य चेत् प्रातिपदिकसंज्ञा तर्हि समासस्यैव इति ज्ञापयति तेन समाससंज्ञकानां प्रातिपदिकसंज्ञा भवति वाक्यरूपं न भवति। वाक्ये शक्त्यस्वीकारे वृत्तिमत्त्वरूपार्थवत्त्वाभावादेव प्रातिपदिकसंज्ञायाः अभावात् समासग्रहणस्य नियमार्थ-स्वीकारो भाष्यकारस्य असङ्गतमेव स्यात्। अतः वाक्ये शक्तिरवश्यमेव सर्वैः परमार्थतः स्वीकरणीयैव। अन्विताभिधानवादिनां मीमांसकानाम् अन्येषां वा वाक्येषु शक्त्यस्वीकर्तृणां सिद्धान्तः शास्त्रसम्मतो नास्ति इति बोध्यम्। विस्तरभयान्नाधिकं लिख्यते इति शम्।

भट्टाचार्याभिमतशक्तिस्वरूपम्

डॉ. विष्णुपदमहापात्रः

न्यायसिद्धान्ते शाब्दबुद्धित्वावच्छिन्नं प्रति पदज्ञानस्य करणत्वं पदार्थोपस्थितेश्च व्यापारत्वम्। फलेऽन्वयबोधे पदजन्यपदार्थोपस्थितेः कारणत्वं नाभ्युपेयते चेत्तर्हि घटादिपदात् पटादिविषयकान्वय-बोधस्यापत्तिः स्यात्, तद्वारणाय पदजन्यपदार्थोपस्थितेः कारणत्वमभ्युपेयम्। तथासति "एकसम्बन्धिज्ञानमपर-सम्बन्धिस्मारकमि"ति न्यायेन घटादिपदात् समवायेन आकाशविषयकान्वयबोधवारणाय तादृशान्वयबुद्धौ वृत्तेः कारणत्वमवश्यमङ्गीकार्यम्। तथा च तदर्थविषयकान्वयबुद्धित्वावच्छिन्नं प्रति वृत्तिज्ञानाधीनपदजन्यपदार्थो-पस्थितिः कारणमिति फलितम्। एतादृशकार्यकारणभावस्वीकारेऽपि घटादिपदात् यथा घटत्वप्रकारकघट-विशेष्यकान्वयबोधो भवति तथैव घटत्वविशेष्यकघटप्रकारकान्वयबोधः मा भवतु तदर्थमुपस्थितौ प्रकारतायाः विशेष्यतायाश्च नियन्त्रणमपि आवश्यकम्। एतेन फलितं वृत्तिज्ञानाधीनशब्दजन्यशब्दार्थो-पस्थितिद्वारैव शाब्दबोधो भवति। परन्तु शाब्दबोधस्य कारणीभूतः यः शब्दः स शब्दः सार्थकत्वेन निरर्थकत्वेन वा शाब्दबोधस्य जनकः इति जिज्ञासायामुच्यते तर्कालंकारैः–

स्वार्थान्वयगोचरबोधः साकांक्षैरपि सार्थकैरेव शब्दैः सम्पादनीयो भवति न तु निरर्थकैः शब्दैः। "सार्थकः शब्दः" इत्युक्ते–

> **शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्।**
> **प्रकृतिःप्रत्ययश्चैव निपातश्चेति स त्रिधा॥** श० श० प्र० का–६.

अर्थात् यादृशः शब्दः शब्दान्तरं सहकृत्यैव स्वस्य स्वघटकस्य वा वृत्त्युपस्थाप्य यादृशावगाहिबोधं प्रत्यनुकूलः तथाविधार्थे स सार्थकः। स्वस्य इति कथनेन रूढिविशिष्टघटादिपदानां संग्रहः, स्वघटकस्येत्यनेन यौगिकविशिष्टपाचकादिपदानां संग्रहः, तेषां पदानां च सार्थकत्वमिति।

तदर्थविषयकान्वयबुद्धौ यथा सार्थकशब्दज्ञानस्य कारणत्वं विद्यते तथैव वृत्तिज्ञानस्यापि कारणत्वमस्त्येव। सा च वृत्तिः का इति जिज्ञासायामुच्यते भट्टाचार्यैः–"**संकेतो लक्षणा चार्थे पदवृत्तिः**" अर्थात् (घट) अर्थनिरूपिता (घट) पदनिष्ठा या वृत्तिः संकेतरूपा, तीरादिनिरूपिता गंगादिपदनिष्ठा वृत्तिः लक्षणारूपा इति। "संकेतः शक्तिः" इत्यत्र शक्तेः यदि ईश्वरीयसंकेतरूपत्वं चाभिमन्यते तर्हि पित्रादिकृतानामाधुनिकसंकेतानां संग्रहो न स्यादित्यतस्तदुभयसंग्रहार्थं मूले "संकेतः" इति भट्टाचार्यैरभिहितम्।

तत्र मीमांसकाः प्रलपन्ति यदि ईश्वरसंकेतस्य शक्ति इत्यभ्युपेयते चेत्तर्हि गगरी–गाछ–माछ इत्याद्यपभ्रंशशब्देभ्यः शक्तिभ्रमेण घटादिपदार्थविषयकान्वयबोधो भवति, भगवदिच्छायाः सन्मात्रविषयत्वात् अपभ्रंशशब्दस्यापि बोधकत्वरूपेण भगवत्संकेतविषयत्वं स्यात्, तथाच न्यायनये अपभ्रंशशब्दस्य

वाचकत्वं साधुत्वं च स्यात्। एवञ्च बोधकत्वेन भगवत्संकेतविषयत्वस्य वाचकत्वात् तस्य च सन्मात्रविषयत्वाद् गंगादिपदेन तीरादिबोधनम्, गंगादिपदस्य च तीरादिबोधकत्वेन भगवत्संकेतविषयत्व-प्राप्तमिति धिया गंगादिपदस्य तीरादिवाचकत्वापत्तिः स्यात्। तच्च नानुमतम्, यतः बोधकत्वेन भगवत्संकेतविषयत्वं वाचकत्वं नाऽस्माभिः स्वीक्रियते, अपि च बोधकत्वेच्छया "इदं पदमिममर्थं बोधयतु" इत्याद्याकारकेच्छया इति यावद् भगवदुच्चरिता इत्यतः नापभ्रंशशब्दानां वाचकत्वम्, एवञ्च तादृशं वाचकत्वं यदि गृह्यते तर्हि अस्मदाद्युच्चरितपदेषु अव्याप्तिः स्यात्, भणितं भट्टाचार्यैः यत्—"तत्र—अस्मदाद्युच्चरितपदेष्वव्याप्तेः, तज्जातीयत्वनिवेशेऽपि वेदस्थ लाक्षणिकेषु (आयुर्वैघृतम्, आदित्यो वै यूपः) अतिव्याप्तेः, सादिदेवदत्तादिपदेऽव्याप्तेश्च, "द्वादशेऽन्हि पिता नाम कुर्य्या"दितिवेदे नामपदस्य देवदत्तादिपदपरत्वेऽपि देवदत्त इत्यादि स्वरूपाणां भगवदनुच्चरितत्वात्। एवमीश्वरसंकेतस्य शक्तित्वे ईश्वरानङ्गीकर्तृमते शाब्दबोधानुपपत्तिः। अथ शाब्दबोधोपयोगितायामीश्वरीत्वमनुपादेयमेव"।

भट्टाचार्याणामभिप्रायस्तु—शाब्दबोधीयकारणतायामीश्वरनिवेशोऽनावश्यकः, अपि च संकेत मात्रमेव शक्तिः। तथाच ईश्वरानङ्गीकर्तृणां नये शक्तिस्वरूपे ईश्वरीयत्वस्य निवेशाभावात् नान्वयबोधानुपपत्तिः। संकेतमात्रस्य शक्तित्वे पाणिन्यादिकृतनदीवृद्ध्यादिरूपसंकेतस्य वृत्तित्वं निर्वहति। आधुनिकसंकेत-ज्ञार्नाच्छाब्दबोधश्चापि निर्वहति।

संकेतरूपा या शक्तिः सा इच्छारूपा भवति न तु पदार्थान्तरम्। तादृशीच्छापदार्थाः द्विविधाः—"इदं पदममुमर्थं बोधयतु, अस्माच्छब्दादयमर्थो बोद्धव्य इति" (अर्थात् पदविशेष्यकाऽर्थप्रकारिका, अर्थविशेष्य-कपदप्रकारिका च।) "इदं पदममुमर्थं बोधयतु" इत्यत्र इदमर्थविषयकबोधजनकतावद् इदं पदं भवतु इत्याकारिकाऽर्थप्रकारकपदविशेष्यकेश्वरेच्छा शक्तिः सैव संकेतः। तथा च एतदर्थनिष्ठप्रकारतानिरूपित-विषयत्वनिष्ठप्रकारतानिरूपितबोधनिष्ठप्रकारतानिरूपितजनकत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयपदमिति बोधः। स्वार्थजनकबोधविषयत्वनिष्ठप्रकारतानिरूपितेच्छीयविशेष्यतावत्त्वमर्थस्य पदे सम्बन्धः "पदं गां वक्ति" इत्यत्र गोविषयकबोधजनकत्वनिष्ठप्रकारतानिरूपितेच्छीयविशेष्यताश्रयाऽभिन्नगोपदमिति कर्त्राख्यातस्थले अर्थप्रकारकपदविशेष्यकबोधः।

"पदेन गौरुच्यते" इत्यत्र पदनिष्ठगोविषयकबोधजनकत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यता-निरूपकविषयतात्वावच्छिन्नप्रकारत्वावच्छिन्नविशेष्यतानिरूपकजनकतात्वावच्छिन्नप्रकारत्वावच्छिन्न-विशेष्यतानिरूपकबोधत्वावच्छिन्नप्रकारत्वावच्छिन्नविशेष्यतानिरूपकविषयित्वसम्बन्धावच्छिन्नगोत्वा-वच्छिन्नप्रकारताश्रयाऽभिन्नगौरिति कर्माख्यातस्थले परम्परया निरूपकत्वमभ्युपेत्य बोधः सम्पद्यते।

"अस्मात्पदादयमर्थो बोद्धव्यः" इत्यत्र "एतत्पदजन्यबोधविषयतावानयमर्थो भवतु" इत्यस्मात् पदप्रकारकार्थविशेष्यकेच्छा शक्तिरिति। तथाच एतत्पदनिष्ठप्रकारतानिरूपितजन्यत्वनिष्ठप्रकारतानिरूपित-बोधनिष्ठप्रकारतानिरूपितविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयोऽर्थः इति बोधः। स्वजन्यबोधविषयत्व-निष्ठप्रकारतानिरूपितेच्छीयविशेष्यतावत्त्वं पदस्यार्थे सम्बन्धः।

द्वितीयेच्छायां—"पदेन गौरुच्यते" इति कर्माख्यातस्थले साक्षात् "पदं गां वक्ति" इति कर्त्राख्यातस्थले च परम्परया निरूपकत्वमभ्युपेत्य अन्वयबोधः उपपादनीयः इत्यलम्।

शब्दशक्तिविमर्शः

डॉ.हरेराम त्रिपाठी

शक्धातोः क्तिन् प्रत्यये कृते सति शक्तिशब्दस्य निष्पत्तिर्भवति। तस्यार्थः कार्यजननसामर्थ्यम्। वा तस्यार्थो देवी सा च सर्वभूतेषु शक्तिरूपेण विद्यमाना[१] अस्ति। शक्यते जेतुमनया इत्यपि तस्य व्युत्पत्तिर्भवति। सा च शक्तिः प्रभावोत्साहमन्त्रजभेदात्त्रिविधा।[२] तत्र प्रभुत्वे साधकत्वात् कोषदण्डौ प्रभुशक्तिः। विक्रमेण स्वशक्त्या विस्फुरणमुत्साहशक्तिः। सन्ध्यादीनां सामादीनाञ्च यथावस्थानं मन्त्रशक्तिः। शक्तेः अन्येऽपि अर्थाः सन्ति। द्रविणम्, तरः, सहः, बलम्, शौर्य्यम्, स्थामः, शुष्मम्, पराक्रमः, प्राणः, सहम्, उर्ज्जः, जटाधरा, कासूश्चेति। पुराणेषु शक्तेः त्रैविध्यं प्रतिपादितं विद्यते। श्वेता, रक्ता, कृष्णा च। तत्राद्या सात्विकी ब्रह्मसंस्थिता, द्वितीया रजस्त्वात् वैष्णवी, तृतीया तमस्त्वात् रौद्री[३] इति। भावप्रकाशे शक्तिर्नाम प्रकृतिरिति सा च नित्या अविकृतिरूपा सत्त्वरजस्तमसां साम्यावस्था इति। शक्तिं गृह्णाति इति शक्तिग्रहः वा शक्तेः ग्रहो ग्रहणम् इति व्युत्पत्त्या शब्दशक्तिज्ञानमेव शक्तिग्रहपदार्थः। शब्दशक्तिज्ञानन्तु शाब्दबोधे सहकारिकारणं भवति। अत एव विश्वनाथेनोक्तम्–

पदज्ञानं तु करणं, द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं, तत्र शक्तिधीः सहकारिणी॥[४]

अर्थात् शाब्दबोधे पदविषयकज्ञानं करणं भवति। पदज्ञानजन्यं यत् पदार्थस्य ज्ञानम् तद् व्यापारो भवति। तत्र शक्तिज्ञानं सहकारिकारणं भवति। न्यायमते शक्तिपदेन शब्दशक्तेः ग्रहणं भवति। पदस्य वृत्तिः द्विविधा भवति "सङ्केतो लक्षणा चार्थे पदवृत्तिः"[५] इति। अत्र सङ्केत एव शक्तिरिति। प्राचीननैयायिकानां नये ईश्वरेच्छाशक्तिः नव्ये तु इच्छा एव शक्तिः। अत एव न्यायसिद्धान्तमुक्तावलीकारः आह–"शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः। सा च "अस्मात् पदादयमर्थो बोद्धव्य इति ईश्वरेच्छारूपा"।[६] इदं

---

१. या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता (देवीमाहात्म्यम्)।

२. शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः॥ द्वितीयकाण्ड अमरकोशः पृ.सं. ३७ केन्द्रीय सं. विद्यापीठ तिरुपति १९८१।

३. एषा श्वेता परा सृष्टिः सात्त्विको ब्रह्मसंस्थिता।
एषैव रक्ता रजसि वैष्णवी परिकीर्तिता।
एषैव कृष्णा तमसी रौद्री देवी प्रकीर्तिता॥ वाराहपुराणं त्रिशक्तिमाहात्म्यम्।

४. न्यायसिद्धान्तयुक्तावली कारिकावली ८१.पृ.सं. २९।

५. शक्तिवादः पृ.सं. १ श्री काशी संस्कृतग्रन्थमाला ७७ विवृतिसहितः १९८६ चौखम्बा संस्कृत संस्थान वाराणसी अनुवादक श्री चन्द्रधारीसिंह भारतीय बुक कार्पोरेशन दिल्ली १९९०।

६. न्यायसिद्धान्तमुक्तावली पृ.सं. १६९।

पदममुमर्थं बोधयतु इति ईश्वरेच्छापि शक्तिरिति। इच्छा द्विविधा भवति। पदप्रकारिका अर्थविशेष्यिका, अर्थप्रकारिका पदविशेष्यिका च। तत्रार्थविशेष्यिकाया इच्छाया आकारस्तु "अस्मात् पदादयमर्थो बोद्धव्य इति।" अस्माद् घटपदात् पृथुबुध्नोदराद्यात्मकः जात्याकृतिविशिष्टव्यक्तिरूपार्थोः (समवायः, घटत्वं, घटश्च) बोद्धव्यः। पदादित्यत्र पञ्चम्यर्थो जन्यत्वम् तस्य बोद्धव्यैकदेशे बोधेऽन्वयः। तव्यत् (कर्मणि) प्रत्ययार्थो विषयता, पदादित्यत्र पदपदार्थः पदज्ञानम्, अस्मादित्यत्र पञ्चम्यर्थः अभेदः तेन सम्बन्धेन इदमर्थस्य पदपदार्थैकदेशे पदेऽन्वयः। तथाच एतदभिन्नपदज्ञानजन्यबोधविषयतावानयमर्थो भवतु इत्याकारिका पदप्रकारिका अर्थविशेष्यिका ईश्वरेच्छा शक्तिः। एवञ्च एतत्पदनिष्ठप्रकारतानिरूपित-जन्यत्वनिष्ठप्रकारतानिरूपितबोधनिष्ठप्रकारतानिरूपितविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयोऽर्थ इति शाब्दबोधः। उक्तरीत्या स्वजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यतावत्त्वं पदस्य अर्थे सम्बन्धः। "इदं[1] पदमिममर्थं बोधयतु"।

अत्र अर्थपदोत्तरद्वितीयाविभक्तेरर्थो विषयकत्वं तस्य आश्रयत्वसम्बन्धेन धात्वर्थे बोधेऽन्वयः इममित्यत्र विभक्त्यर्थः अभेदः तेन सम्बन्धेन इदम्पदार्थस्य एतदित्यस्य अर्थेऽन्वयो लोडर्थो जनकत्वं तस्य च आश्रयतासम्बन्धेन पदेऽन्वयः। तथा च एतदभिन्नार्थविषयकबोधजनकताश्रयमिदं पदं भवतु इत्याकारिका अर्थप्रकारकपदविशेष्यिकेश्वरेच्छा। एवञ्च एतदर्थनिष्ठप्रकारतानिरूपितविषयत्वनिष्ठप्रकारता निरूपितबोधनिष्ठप्रकारतानिरूपितजनकत्वनिष्ठप्रकारतानिरूपितविशेष्यताश्रयः पदमिति शाब्दबोधो भवति। "पदं गां वक्ति"[2] इत्यत्र "अस्मात्पदादयमर्थो बोद्धव्य" इतीच्छायाः शक्तिरूपत्वे गामित्यत्र द्वितीयार्थो वृत्तित्वम्, बोधविषयत्वप्रकारतानिरूपित-ईश्वरेच्छीयविशेष्यता वच्यादिधात्वर्थः, धात्वर्थविशेष्यतायाः परम्परया निरूपकप्रकारताश्रयत्वरूपं कर्तृत्वं तिप्रत्ययार्थः। एवञ्च गोनिष्ठा या बोधविषयत्वनिष्ठाप्रकारता तन्निरूपिताईश्वरेच्छीयविशेष्यता-तादृशविशेष्यतानिष्ठविशेष्यतानिरूपिता निरूपितत्वनिष्ठप्रकारत्वा-वच्छिन्नविशेष्यतानिरूपितप्रकारतातन्निष्ठप्रकारत्वावच्छिन्नविशेष्यतानिरूपितविषयत्वनिष्ठप्रकारत्वावच्छिन्न-विशेष्यतानिरूपितबोधत्वावच्छिन्न प्रकारत्वावच्छिन्नविशेष्यता निरूपितजन्यत्वसम्बन्धावच्छिन्न प्रकारताश्रयतावद् गोपदमिति प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोध इति। "पदेन गौ रुच्यते"[3] इत्यत्र कर्मवाच्यस्थले धात्वर्थो बोधविषयत्वं तं प्रत्ययार्थः प्रकारता निरूपितेश्वरेच्छीय- विशेष्यता, तृतीयार्थः जन्यत्वं तथाच गोपदजन्यबोधविषयत्वनिष्ठ प्रकारतानिरूपितेश्वरेच्छीयविशेष्यतायाः आश्रयतावान् गौः इति शाब्दबोधोऽत्र भवति।

"इदं पदममुमर्थं बोधयतु" इतीश्वरेच्छायाः सङ्केतरूपत्वे पदं गां वक्ति इत्यत्र बोधजनकत्वप्रकारता-निरूपितेश्वरेच्छीयविशेष्यत्वं धात्वर्थः। तादृशविशेष्यताया आश्रयत्वसम्बन्धेन पदेऽन्वयः। तथा च गोनिष्ठ विषयतानिरूपकबोधजनकत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यताश्रयः गोपदमिति। "पदेन गौरुच्यते"[4] इत्यत्र तृतीयार्थ आधेयत्वम्। आधेयत्वे निरूपितत्वसम्बन्धेन पदस्यान्वयः, आधेयत्वस्य धात्वर्थे विशेष्यत्वेऽन्वयः। तथाच गोपदनिष्ठा गोपदनिरूपिताधेयतावती या बोधजनकत्वनिष्ठप्रकारता-

१. शक्तिवादः पृ.सं. ५
२. शक्तिवादः पृ.सं. ६
३. शक्तिवादः पृ.सं. ६
४. शक्तिवादः पृ.सं. ६

निरूपितेश्वरेच्छीयविशेष्यता तादृशविशेष्यतानिष्ठविशेष्यतानिरूपितनिरूपितत्वनिष्ठप्रकारत्वावच्छिन्न विशेष्यता निरूपितप्रकारत्वनिष्ठप्रकारत्वावच्छिन्न विशेष्यतानिरूपितजनकत्वनिष्ठप्रकारत्वावच्छिन्नविशेष्यता निरूपित-बोधत्वावच्छिन्नप्रकारत्वावच्छिन्नविशेष्यतानिरूपितविषयित्वसम्बन्धावच्छिन्नप्रकारताश्रयः गौः इति। शक्त्या अर्थस्य बोधकं यत्पदं तस्य नैमित्तिकी संज्ञा भवति। अत एव जगदीश आह–

जात्यवच्छिन्न सङ्केतवती नैमित्तिकी मता।।
जातिमात्रे हि सङ्केताद्व्यक्तेर्भानं सुदुष्करम्।।[१]

जातिविशिष्टव्यक्तौ गृहीतसङ्केता संज्ञा नैमित्तिकी संज्ञेति। यथा घटपदस्य प्रवृत्तिनिमित्तं घटत्वं विद्यते। प्रवृत्तित्वं नाम वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमिति।[२] घटपदवाच्यः समवायेन घटत्वविशिष्टो घटः। तत्र वाच्यत्वं घटत्वे विद्यते घटपदवाच्यो घटपदार्थस्तत्र वृत्तिः घटत्वमस्ति अथ च घटत्वविशिष्टघट इति पदार्थोपस्थितिघटकघटत्वे प्रकारत्वमपि विद्यते। अतः घटत्वं प्रवृत्तिनिमित्तं तद्वत् घटपदार्थस्य सत्त्वात् घटपदस्य नैमित्तिकी संज्ञा[३] भवति। न्यायमते घटघटत्वसमवायानां घटपदशक्तिमत्त्वं प्रतिपादितम्। ईश्वरेच्छीयविशेष्यता घटे घटत्वे समवाये च वर्तते। तत्र आश्रयत्वसम्बन्धावच्छिन्नघटपदजन्यबोधविषयत्वनिष्ठप्रकारता निरूपितेश्वरीयेच्छीयविशेष्यता घटे, अवच्छेदकत्वसम्बन्धावच्छिन्नघटपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यताघटत्वे, अवच्छेदकतावच्छेदकत्वसम्बन्धावच्छिन्नघटपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यता समवाये[४] च वर्तते। घटो घटपदजन्यो भवतु, घटत्वं घटपदजन्यबोधविषयतावच्छेदकं भवतु, समवायः घटपदजन्यबोधविषयतावच्छेदकतावच्छेदको भवतु इति। अत एव न्यायसूत्रकारेणोक्तं "जात्याकृतिव्यक्तयस्तुपदार्थ"[५] इति।

अत्र गदाधर उक्तवान् "घटादिपदस्य पदार्थतावच्छेदकीभूतघटत्वादिविशिष्ट एव शक्तिर्न तु तदुपलक्षिते, घटत्वादेरुपलक्षणत्वे तस्य द्रव्यत्वकम्बुग्रीवादिमत्त्वाद्यविशेषेण घटादिपदाद् द्रव्यत्वादिना न बोधः, अपि तु घटत्वादिनैवेति नियमानुपपत्ते"।[६] अर्थात् घटपदस्य अर्थः समवायेन घटत्वविशिष्टो घटः पदार्थतावच्छेदकं घटत्वं तद्विशिष्टे घटे एव घटपदस्य शक्तिः घटत्वोपलक्षिते घटरूपार्थे घटपदस्य न शक्तिः स्वीक्रियते। यदि घटत्वोपलक्षिते घटे एव घटपदस्य शक्तिः स्वीक्रियते तदा द्रव्यत्वेन सह घटस्य वैलक्षण्यं न भवितुमर्हति यतोहि घटत्वसामानाधिकरण्यरूपवैशिष्ट्यवद् द्रव्यत्वसामानाधिकरण्यस्यापि तत्र सत्त्वात्। यदि घटत्वोपलक्षितघटस्य घटपदेन बोधो भवतीति स्वीक्रियते तदा द्रव्यत्वोपलक्षितत्वात् घटपदेन द्रव्यत्वोपलक्षितघटस्यापि बोधः स्यात् परन्तु इत्थं न भवति

१. शब्दशक्तिप्रकाशिका पृ.सं. ७९ कारिका संख्या १९।
२. शक्तिवादः पृ.सं. 41।
३. "सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रम्" शब्दशक्तिप्रकाशिका पृ.सं. ७९-८०।
४. शक्तिवादः पृ.सं.41 –समवायस्येति त्रितयमेव घटपदजन्यबोधविषयतायां।
५. न्यायसूत्रम् पृ.सं. शक्तिवाद पृ.सं. 41
६. शक्तिवादः (सविवृत्तिके शक्तिवादे) सामान्यकाण्डम् पृ.सं.–६

घटपदेन घटत्वेनैव घटस्य बोधो जायते। अतः घटपदस्य समवायेन घटत्वविशिष्टे शक्तिरिति। अत्र तौतादिका भाट्टाः घटपदस्य सङ्केताख्यं सम्बन्धं घटत्वे[१] एव स्वीकुर्वन्ति व्यक्तेः अनन्तत्वात्तत्र न शक्तिरिति। अत एवोक्तं "विशेष्यं नाभिधा गच्छेत् क्षणिशक्तिर्विशेषणे"[२] इति अत्र जिज्ञासा जायते यदि घटपदस्य शक्तिः घटत्वे स्वीक्रियते तर्हि घटव्यक्तेः लाभः कथं भवति। "घटमानय" कर्मत्वं घटीयं घटत्वनिष्ठकर्मतात्वादित्यनुमानरूपाक्षेपेणैव घटव्यक्तेर्लाभो भविष्यति।

न च घटत्वादावानयनकर्मत्वाभावात् कथं कर्मत्वे घटत्वादेराधेयतया अन्वयबोधो योग्यता-विरहादिति वाच्यम्। सुबर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य घटत्वादेः साकाङ्क्षत्वात्। सुबर्थबहुत्वादेरपि स्वपर्याप्त्यधिकरणसमवेतत्वसम्बन्धेन घटपदार्थे घटत्वादावन्वयो बोध्य इति भट्टानुयायिनो वदन्ति।

तन्मतं न समीचीनं विद्यते वा तन्मन्दमिति। घटमानय इति वाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य घटानयने प्रवृत्तिर्दृश्यते सा च घटानयनज्ञानसाध्या, तच्च ज्ञानं घटमानयेति वाक्यजन्यमिति। वाक्यजे ज्ञाने पदोपस्थापित एवार्थोऽन्वयप्रतियोगितया भासते इति सिद्धान्तात्। तथा च घटपदाद् घटव्यक्तेरनुपस्थितौ कथं शाब्दबोध इति। अत्र जगदीशो "गामानय" इति वाक्यमादाय वदति "विनापि[३] आक्षेपं गामानयेत्यादितो गवादिकर्मताकत्वेनानयनादेरन्वयबोधस्याऽऽनुभविकत्वात्, गौर्गच्छति इत्यादौ शुद्धगोत्वे गतिमत्त्वाद्यन्वयस्य अनुभवेनास्पर्शात्" इति।

अत्र मण्डनमिश्राः वदन्ति। घटपदस्य घटत्वे शक्तिः घटे तु लक्षणा भविष्यति। व्यक्तीनां बहुत्वेनान्यलभ्यत्वेन च घटे शक्तेरकल्पनात्। तात्पर्यानुपपत्तितः लक्षणायां बीजत्वात्। अत एव मण्डनमिश्र आह–

जातेरस्तित्वनास्तित्वे न हि कश्चिद् विवक्षति।
नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे॥[४]

जातौ शक्तिर्व्यक्तौ लक्षणा चेति मतं तुच्छं वर्तते। यतोहि घटविषयत्वानिरूपितघटत्वविषयता शालिबोधौपयिकशक्तिमत्पदघटितप्रयोगासम्भवेन घटत्वमात्रस्याशक्यत्वे घटत्ववति घटादौ लक्षणायाः वक्तुमशक्यत्वात्, शक्यसम्बन्धस्यैव लक्षणात्वात्।

प्राभाकरास्तु[५] घटत्वशक्तत्वेन ज्ञातं घटपदं घटत्वरूपेण घटशाब्दत्वावच्छिन्नं प्रति कारणं भवति। अतो न रूपान्तरेण घटविषयकान्यांशे घटत्वप्रकारकसमूहालम्बनशाब्दे च व्यभिचारः। अत्र नैयायिकाः वदन्ति घटमानय इति वाक्याद् व्यक्तिबोधात् तत्रापि गोपदशक्तिः स्वीकार्या। न च घटत्वप्रत्ययानन्तरं घटव्यक्तिप्रतीतिरत्र, येन घटत्वविशिष्टे शक्तिग्रहः स्याद् विशेषणज्ञानस्य विशिष्टज्ञानात्पूर्वं

---

१. शब्दशक्तिप्रकाशिका पृ.सं.–८०
२. शब्दशक्तिप्रकाशिका पृ.सं.–८० (टिप्पणी १)
३. शब्दशक्तिप्रकाशिका पृ.सं.–८५
४. शब्दशक्तिप्रकाशिका पृ.सं.–८७
५. प्राभाकरास्तु गोत्वशक्तत्वेन ज्ञातं पदं ताद्रूप्येण गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुः। शब्दशक्तिप्रकाशिका पृ.सं.–९०।

नियमेन सत्त्वस्यावश्यकत्वात्, किन्तु युगपदेव। न च तदुपपादकं युगपदवृत्तिद्वयं सम्भवति। क्वचिन्मुख्यं हि क्वचिल्लाक्षणिकं भवति, न च जातौ क्वचिन्मुख्यः प्रयोगो व्यक्तिमनादाय क्वचिदपि पदाज्जातेर्व्यवहाराभावात्तथा च घटबोधार्थं तत्रापि शक्तिरावश्यकी।[१] पदशक्तेः कार्यापेक्षतया उभयविषयकज्ञानस्यैव कार्यस्यानुभवसिद्धत्वादुभयत्रैकैव शक्तिः। एवञ्च सङ्केतग्राहकस्य जातिव्यक्तिसाधारणस्य प्रमाणसिद्धत्वादुभयत्रापि समवाये च सङ्केतरूपा शक्तिरिति नैयायिकानां सिद्धान्तः।[२]

---

१. अत्र ब्रूमः शाब्दमतेर्गवादिव्यक्त्यवगाहित्वमवश्यङ्कारणप्रयोज्यं जन्यधीविषयतायास्तत्प्रयोज्यत्वनियमादन्यथा पक्षधर्मिककसाध्यावगाहितादेरपि–पृ. सं.–१००

२. इति त्रयाणां वाच्यत्वोपपत्तिः शक्तिवादः पृ. सं. ४४

शक्तिः

जयकान्तसिंहशर्मा

असौ पुनर्व्याकरणं ग्रहीष्यन् सूर्योन्मुखः प्रष्टुमनाः कवीन्द्रः।
उद्यद्गिरेरस्तगिरिञ्जगाम ग्रन्थं महद् धारयनप्रमेयः।।

इत्यादिकवेर्वचनाद्वेद इव तत्प्रधानाङ्गं किमपि पुण्यतमं शास्त्रं व्याकरणमप्यनाद्येव, अत एव **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो** ज्ञेयश्चेत्यागमेन साङ्गस्य वेदस्याध्ययनमनादिकालेन बोध्यते। व्याकरणं नामासाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयोजको नियमविशेषः, तथाविधस्य शब्दस्य नैयायिकवैशेषिकादयो गुणत्वं मीमांसकादयश्च द्रव्यत्वं मन्यन्ते किन्तु शाब्दिकास्तु येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द इति भाष्योक्तेः द्रव्यत्वे सत्यर्थप्रत्यायकत्व-मातिष्ठन्ते–

"इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये"
आचाण्डालं मनुष्याणां समं शास्त्रप्रयोजनमिति

व्याकरणदर्शनस्य शब्दप्रमाणं हृदयमेव, शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणमिति भाष्योक्तेः। अर्थवत्सूत्रेऽपि अर्थविषयकबोधजनकत्व- घटितमेवार्थवत्त्वं सर्वसम्मतम्, तत्र बोधपदेन शाब्दबोध एवाभिमतः प्रत्यासन्नत्वात् लाघवत्वाच्चेति शब्दप्रमाणं विना नेदं सङ्गच्छते। तदशिष्यं सञ्ज्ञाप्रमाणत्वादिति सूत्रे सञ्ज्ञाशब्दानां प्रामाण्यमुपस्थापयतां सूत्रकाराणां मते शब्दानां प्रामाण्यं स्वीकृतमेव। ''लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम'' इति चोक्तवतां वार्तिककाराणामपि तत्प्रामाण्यस्वीकार एव। अस्मिन् संसारे सर्वापि इतिकर्त्तव्यता शब्दाधीनैवास्ते, घोरान्धकारे विषमस्थले इतस्ततः परिभ्रष्टः कोऽपि पथिकः प्रदीपाद्यभावे शब्देनैव सम्बोधितो भवतीति शब्दस्याकुण्ठं प्रामाण्यं बोधितं भवति। यथोक्तं श्रीहरिणा–

इतिकर्त्तव्यता लोके सर्वा शब्दव्यपाश्रयेति

तत्र शब्दो न तावत्स्वरूपः सन् हेतुर्नापि उदयनाचार्यसम्मतवज्ज्ञायमानतया हेतुः किन्तु प्रत्यक्षमेव शाब्दबोधे हेतुः। उच्यते हि भाष्यकारेण–उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति न तु

सम्प्रतीयमानः। यथा घ्राणेन्द्रियगृहीतस्यैव गन्धस्य सुखादिजनकत्वं यथा च पटहादिशब्दस्य कर्णपीडाजनकत्वं श्रुतस्यैव न तु स्मृतस्य, तथैव पदानां बोधजनकत्वं श्रुतानामेव न तु यथाकथञ्चित्प्रतीतानाम्।

इत्थं शब्दस्य प्रामाण्ये सुस्थिते सर्वैरपि शब्दैर्न भवति विशिष्टः शाब्दबोधः किन्तु श्रावणप्रत्यक्षविषयतावच्छेकधर्मावच्छिन्नैः कैश्चिदेव शब्दैः शाब्दबोधोदयः, न तु अतथाभूतैरपरैः शब्दैरिति तत्पदजन्यतदर्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतदर्थविषयोपस्थितिः कारणमिति निश्चीयते कार्यकारणभावः। तथा च सति घटपदश्रवणादेकसम्बन्धिज्ञानमुदयोपस्थितस्याकाशादेर्न शाब्दबोधे भानम्, तदुपस्थितेः पदवृत्यजन्यत्वात्। इयं च वृत्तिः शब्दनिष्ठेति सर्वसिद्धान्तः।

का नाम पदनिष्ठा वृत्तिरिति चेच्छाब्दबोधानुकूलपदपदार्थज्ञानजनकज्ञानविषयः पदपदार्थयोः सम्बन्धविशेष एव वृत्तिः। भाष्ये हि हलोऽनन्तराः संयोग इति सूत्रे ''ग्रामशब्दो हि बह्वर्थः, अस्त्येव शालासमुदाये वर्तते तद्यथा ग्रामो दग्ध इति, तद्य: सारण्यके ससीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत् प्रयुज्यते अनन्तरौ इमौ ग्रामौ'' इत्युक्तम्। अत्र वाक्ये वर्तत इति पदस्य वृत्तिरित्यर्थः, लडर्थस्याविवक्षणात् धातुमात्रार्थो विवक्षितः, अन्यथासुधातूपादानमनर्थकं स्यात्। अनेन प्रघट्टकेन पदपदार्थयोर्वृत्तिनामकः कश्चन विलक्षणः सम्बन्धोऽस्तीति सिद्ध्यति, ''तद्य सारव्यके ससीयके समभिसमीक्ष्य'' इति कथनेन पदज्ञानस्य पदनिष्ठवृत्तिज्ञानस्य च शाब्दबोधे कारणता ध्वनिता। इत्थं पदपदार्थयोः सम्बन्धविशेषत्वमेव वृत्तित्वम्। तदेवं वृत्तेः सम्बन्धरूपतायामेव एकसम्बन्धिज्ञानमं परसम्बन्धि-स्मारकमितिविधया पदस्य श्रावणप्रत्यक्षे सति अर्थनिरूपितवृत्त्याख्यसम्बन्धेन सम्बन्धिनोऽर्थस्य स्मरणमिति वृतिज्ञानस्य हेतुत्वं निर्वहति।

शक्तिवादे श्रीगदाधरभट्टाचार्येण ''सङ्केतो लक्षणा चार्थे पदवृत्तिरित्युक्तम्। तेन चेदमेव प्रतीयते यच्छक्तिलक्षणान्यतरत्वमित्येव वृत्तिलक्षणम्, अन्यथा वृत्तिसामान्यलक्षणानुक्तौ विशेषलक्षणानवसर एव स्यात्। तत्र टीकायां श्रीहरिनाथभट्टाचार्येण तु'' शब्दनिरूपिता या स्मृतित्वावच्छिन्ना जनकता तन्निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतावत्सांसर्गिकविषयतात्त्वम् वृत्तित्वमिति रूपेण लक्षणं परिष्कृतम्।

तदेतद्वयमपि शाब्दिकानामसम्मतम्, लक्षणाया अस्वीकारात् प्रथमस्य वृत्तित्वज्ञाने एतद्घटककार्यकारणभावज्ञानम्, तज्ज्ञाने चोक्तवृत्तित्वज्ञानम् इत्यन्योन्याश्रयदोषेण व्यापारवत्त्वाभावोपपादकेन नव्यानां मतेन द्वितीयस्याप्यसंभवात्। मञ्जूषादौ'' सा चेयं वृत्तिस्त्रिविधा शक्तिर्लक्षणा व्यञ्जना चेति यत्त्रैविध्यमुक्तं तत्परमतेन वैयाकरणमते लक्षणाया अतिरिक्तवृत्तित्वं नास्ति कार्यकारणयोर्गौरवात्।

तार्किकास्तावदस्माच्छब्दादयमर्थो बोद्धव्यः, इदम्पदममुमर्थं बोधयत्वित्युभयविधेच्छामादाय क्रमशः प्रथमेच्छादिशा पदप्रकारकार्थविशेष्यकशक्तिं द्वितीयेच्छादृशार्थप्रकारपदविशेष्यक शक्तिं च पर्यविसाययन्ति। ततश्च घटपदज्ञानजन्यबोधविषयत्वप्रकारिकानिरूपितभगवदिच्छीयविशेष्यतावत्त्वेन घटपदवाच्यताया व्यवहारो

सर्वकिमादीनां शब्दानां कुत्र शक्तिः

डॉ॰ केदारप्रसादपरोहा

न्यायनये ज्ञानं द्विविधमनुभवस्मृतिभेदेन। तत्रानुभवः द्विविधः यथार्थानुभवायथार्थानुभवभेदात्। यथार्थानुभवः चतुर्विधः प्रत्यक्षप्रमानुमितिप्रमोपमितिप्रमाशाब्दप्रमाभेदात्। अत्र वैशेषिकाः वदन्ति यदुपमितिशाब्दप्रमयोः अनुमितिप्रमायामन्तर्भावात् प्रभा द्विविधा एव प्रत्यक्षानुमितिप्रभाभेदादिति। अस्य मतस्य खण्डनं कुर्वन्नाह जगदीशभट्टाचार्यः—

साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥[१]

आकाङ्क्षासत्तियोग्यताविशिष्टपदप्रयोज्यः यः तत्तदर्थसंसर्गावगाही बोधोऽनुभवो जायते, स चायं बोधस्तादृशपदोपस्थाप्यस्यैवार्थस्यावगाहित्वान्न प्रत्यक्षानुमित्योः अन्तर्भवितुमर्हति। तथाच विलक्षणप्रमात्वात् शाब्दप्रमापि प्रमान्तरमिति।

शाब्दप्रमायां पदज्ञानं करणं पदजन्यपदार्थोपस्थितिः व्यापारः शक्तिश्च सहकारिकारणं भवति। का शक्तिः? उच्यते प्राचीनैः ''ईश्वरेच्छा शक्तिः'' सा च ''इदं पदमिममर्थं बोधयतु''[२] अस्माच्छब्दादयमर्थो बोद्धव्य''[३] इति। आधुनिकसङ्केतस्तु परिभाषा इति। अत्र नव्याः वदन्ति नेश्वरेच्छाशक्तिः अपि तु इच्छैव शक्तिः। सा च ईश्वरस्य स्यात् वा जीवस्य। केषाञ्चन सर्वनामशब्दानां कुत्र शक्तिः स्वीक्रियते? इति विषयमाधारीकृत्य वक्ष्यामीति।

सर्वे घटाः रूपवन्तः[४] इत्यत्र सर्वपदार्थस्तु उद्देश्यतावच्छेदकघटत्वाद्यवच्छिन्नस्य अशेषताप्रतीतेः अशेषत्वं सर्वपदार्थः। विधेयशून्यावृत्तितदुद्देश्यतावच्छेदकवत्त्वरूपमशेषत्वं न, सर्वे घटाः प्रमेयाः इत्यत्र प्रमेयत्वविधेयस्थले विधेयशून्यत्वस्य अप्रसिद्ध्या अशेषत्वस्य निर्वचनं कर्तुमशक्यत्वात्। तदुद्देश्यतावच्छेदक व्यापकतत्तद्विधेयवत्त्वमपि नाशेषत्वम्। स्वरूपो घटत्वादेः उद्देश्यतावच्छेकत्वं घटनिष्ठाभावाप्रतियोगित्वं घटत्वत्वने तादृशस्थले घटत्ववन्निष्ठाभावाप्रतियोगित्वं व्यापकत्वं तद्वत्तत्तद्विधेयवत्त्वं, तादृशविधेयवदवच्छिन्ने विधेयस्य अन्वयो न सम्भवति उद्देश्यतावछेदकविधेययोरैक्यात्। विधेयान्वयिव्यापकतापर्यन्तं

१. शब्दशक्तिप्रकाशिका पृ. ७
२. शक्तिवादः पृ.सं. ५
३. शक्तिवादः पृ.सं. ५
४. शक्तिवादः पृ.सं. १२६

भाष्यकारोऽपि द्वयोरेव सामानाधिकरण्यं विशेषणविशेष्ययोर्वा सञ्ज्ञासञ्ज्ञिनोर्वा इति प्राह, उद्द्योतकारस्तु स्पष्टमेव ब्रवीति–तादात्म्यमेव शब्दार्थयोः शक्तिरिति।

प्राचीनवैयाकरणास्तु ''इन्द्रियाणां स्वविषयेषु'' इतिकारिकापुरस्कारेण बोधजनकतां शक्तिमाहुः किन्तु शाब्दिकशिरोमणिर्नागेशभट्टस्तु गम्भीरोचितयुक्तिभिः बोधजनकत्वस्य द्विष्ठत्वाभावेन सम्बन्धत्वमेवा-सम्भावयन् शब्दार्थोभयनिष्ठं वाच्यवाचकभावलक्षणं सम्बन्धं शक्तित्वेन स्वीकृत्य तादात्म्यस्य तद्द्योतकत्वं समर्थितवान्।

तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्, तत्र शब्दस्यार्थे भेदो वास्तविकः, अभेद आरोपितः इत्युभयोर्विरुद्धत्वादेकत्र समादेशा सम्भवात्। भेदस्योद्भूतत्वविवक्षायामस्यार्थस्यायं वाचक इत्येवमादेर्व्यवहारो भवति। अत्र प्रगृह्यं, तस्य वाचकः प्रणव इत्यादीनि शिष्टवचनानि सङ्गच्छन्ते। अभेदस्योद्भूतत्वे वृद्धिरादैच्, ओमित्येकाक्षरं ब्रह्मेति सामानाधिकरण्येन व्यवहारः संगच्छते।

इत्येवं शाब्दिकसरणिः काचित्सङ्क्षेपेणेह निर्दिष्टा, स्फीता विशदा च उपाचार्यं ग्रन्थग्रन्थि-विस्फोरणावसरे लभ्येति शम्।

घटे घटत्वे समवाये च भवति, यत आश्रयतासम्बन्धेन घटरूपार्थो घटपदजन्यबोधविषयतावान् भवतु, अवच्छेदकतासम्बन्धेन घटत्वं घटपदजन्यबोधविषयतावद् भवतु, अवच्छेदकतावच्छेदकतासम्बन्धेन समवायो घटपदजन्यबोधविषयतावान् भवत्वित्यादिविषयकेच्छायाः कल्पनात्। प्रथमेच्छादिशा घटादिवाचकत्वव्यवहारो घटादिपदे परम्परया समुपपाद्यते। द्वितीयेच्छापक्षे च घटादिरूपार्थविषयकबोधजनकत्व-प्रकारिकानिरूपितभगवदिच्छीयविशेष्यताया घटपदे सत्त्वात् घटपदे घटघटत्वादिवाचकव्यवहारः साक्षादेव किन्तु घटाद्यर्थे वाच्यत्वव्यवहारः परम्परयोपपाद्यते। इत्थं ते सङ्केतरूपां शक्तिमुद्घोषयन्ति। किन्तु तदविचारितरमणीयं प्रतिभाति, इच्छाया हि समवायेनेश्वर एव सत्त्वात्पदपदार्थयोस्तादृशशक्तेर्दौलभ्यात्। विलक्षणविषयतासम्बन्धेन तादृशेच्छावत्त्वात्मकशक्तेः पदे पदार्थे च सत्त्वेऽपि तादृशविलक्षणविषयतायाः परम्परात्मिकायाः शक्तिनियामकत्वे मानाभावात् साक्षादिच्छायाः पदे पदार्थे वाऽसम्भवात्।

किञ्च सम्बन्धस्य सम्बधिभ्यां भिन्नत्वे द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकत्वेनैव सम्बन्धत्वमिष्टम्। अयमाशयः—तादृशेच्छायाः शक्तित्वं तदैव स्याद्यदा तस्याः सम्बन्धत्वं स्यात् शाब्दबोधौपयिकत्वे सति सम्बन्धत्वस्यैव वृत्तित्वस्वीकारात्। सम्बन्धत्वं चाधाराधेयभावनियामकस्यैव दृष्टं सर्वसम्मतञ्च। अत्र चेच्छीयविषयताश्रयबोधनिष्ठजन्यतानिरूपितजनकत्वाख्यविषयतासम्बधेन अयमर्थः, अयञ्च शब्द इच्छावानिति व्यवहारादर्शनात्, तस्या सम्बन्धत्वकल्पनं मनोरथमात्रमेव स्यात् अनुमानप्रयोगश्च-ईश्वरेच्छा शक्तिर्न सम्बन्धः आश्रयताया अप्रयोजकत्वात् तादात्म्यवत्। नात्र हेतुरसिद्धः सम्बन्धो हि सम्बन्धिभ्यां भ्सिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामक इत्यभियुक्त-व्यवहारात्। विशेष्यविशेषणसम्बन्धैतत्त्रितयावगाहिनी बुद्धिरेव विशिष्टबुद्धिः अत्राभेदे सम्बन्धत्ववारणाय सम्बन्धिभिन्नत्व इति केवलजनकत्वादेवरिणाय द्विष्ठत्वे इति, वृत्तिनियामकविषयत्वादिनिरासाय विशिष्टबुद्धिरित्युक्तम्।

शक्तेराकाशकुसुमत्वं मा भूदिति वैयाकरणैः पदपदार्थयोः उक्तेश्वरेच्छादिभिन्नं सम्बन्धान्तरमेव वाच्यवाचकभावापरपर्यायां शक्तिरिति स्वीक्रियते। वाच्यवाचकभावापर्याया नाम वाच्यवाचकभावपद-प्रतिपाद्येत्यर्थः। अत्र हि वाच्यं वाचकत्वं च न बोधविषयरूपं, अपितु अखण्डोपाधिरूपं पदार्थान्तरमेव, तस्य च वाच्यवाचकभावरूपशब्दार्थोभयनिष्ठवात् सम्बन्धत्वं सुतरामुपपद्यते।

इत्थं नवीनानां वैयाकरणानां वाच्यवाचकभावपदप्रतिपाद्या शक्तिः, तादात्म्यं च सम्बन्धः, योऽर्थः स शब्दः, यश्शब्दः सोऽर्थ इत्याकारक इतरेतराध्यासात्मकसङ्केत एव शक्तिग्राहकः, पदपदार्थ-योरितरेतराध्यासः शब्दार्थयोस्तादात्म्यादेवेति निष्कर्षः। शाब्दिकसम्मता शक्तिः सूत्रभाष्यादिसम्मता तथाहि वृद्धिरादैच इत्यादौ शक्तिप्रमापके समानविभक्तिकनिर्देशं करोति सूत्रकारः, यथा नीलो घट इति व्यवहारस्तादात्म्यमूलकस्तादात्म्यसम्बन्धेन नीलविशिष्टो घट इति बोधाकारश्च, तथैव तादात्म्यसम्बन्धेन वृद्धिपदविशिष्टा आदैच इति बोधः। अनया रीत्यां तादात्म्यसम्बन्धस्यैव शक्तित्वं सिद्ध्यति, ''वृद्धिरात्रितिसूत्रे

सर्वपदार्थः इत्यपि वक्तुं न शक्यते। नामार्थयोः नामधात्वर्थयोः वा साक्षाद्भेदेन अन्वयबोधस्य अस्वीकारादिति। सर्वपदस्य न अर्थः अशेषत्वं यतोहि उद्देश्यतावच्छेदकावच्छेदेन विधेयस्य अन्वयस्वीकारादशेषस्य लाभस्तु आकाङ्क्षया एव भवितुमर्हति। वस्तुतस्तु सर्वपदार्थः अनेकत्वं उद्देश्यतावच्छेदकसमानाधिकरणभेदप्रतियोगित्यमिति तथा च। तच्च सर्वे घटाः[१] इत्यत्र घटनिष्ठान्योन्याभावप्रतियोग्यभिन्नाः घटाः इति शाब्दबोधो जायत इति। अत्रोद्देश्यतावच्छेदकव्यापकविधेयव्याप्यपर्याप्तिको धर्मः सर्वपदप्रवृत्तिनिमित्तं भवति।

किं पदस्य जिज्ञासिते शक्तिः[२] स्वीक्रियते। तत्र उद्देश्यवाचककिं पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकधर्मावच्छिन्न विधेयतानिरूपितोद्देश्यताऽवच्छेदकत्वेन वक्तृजिज्ञासितो धर्मः प्रवृत्तिनिमित्तम्।

विधेयवाचककिं पदस्य स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकत्वोपल। क्षितधर्मावच्छिन्नोद्देश्यता निरूपितविधेयतावच्छेदकत्वेन जिज्ञासितः यः विशेषधर्मः तदवच्छिन्ने[३] शक्तिः। कुत्सार्थकमपि क्वचित् किं पदमिति।[४]

तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने यत्पदस्य शक्तिः।[५] यत्पदजन्योपस्थितिविषयत्वेन वक्तृबुद्धिविषयतावच्छेदकावच्छिन्ने तत्पदस्य शक्तिः।[६]

इदमेतदोः वक्तृप्रत्यक्षज्ञाननिरूपितलौकिकविषयतावत्यां शक्तिः। अदस्शब्दस्य लौकिकप्रत्यक्षभिन्नज्ञानविषये अर्थात् परोक्षविषये शक्तिः। समभिव्याहृतपदोपस्थाप्ये[७] स्वपदस्य शक्तिः स्वीक्रियते। समभिव्याहृतत्वं तु एकवाक्यघटकत्वम्। एकवाक्यघटकत्वञ्च स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वम्। एकशब्दस्य कैवल्यादिविशिष्टे शक्तिः कैवल्यञ्च स्वसजातीयद्वितीयराहित्यं तच्च स्वसजातीयनिष्ठभेदाप्रतियोगित्वम्[८], स्वसजातीयत्वञ्च उद्देश्यविधेयवाचकैकशब्दात् कैवल्यघटकत्वेन प्रकृतिविधेयवत्त्वरूपं प्रतीयते। तथाच सङ्केताद् वा विस्तरभयात् केषाञ्चन सर्वनामशब्दानां किम्, तत्, यत्, इदम्, एतद्, अदस्, स्वेत्यादीनां शब्दानां कुत्र शक्तिरिति गदाधरदिशा मया निरूपितमिति।

---

१. शक्तिवादः पृ.सं. १२९
२. शक्तिवादः पृ.सं. १४८
३. शक्तिवादः पृ.सं. १५१
४. शक्तिवादः पृ.सं. १५४
५. शक्तिवादः पृ.सं. १५६
६. शक्तिवादः पृ.सं. १५८
७. शक्तिवादः पृ.सं. १६०
८. शक्तिवादः पृ.सं. १६८

शब्दो न प्रमाणमात्रम् प्रत्युत शब्दतत्त्वं महार्थः

डॉ. कमलेश झा

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥

भारतीयेषु दर्शनेषु वाचश्चातुर्विध्यं विविच्यते। तत्र या वैखरी स्थूलभूता वाक् सा नैयायिकैः श्रोत्रनिर्ग्राह्या आकाशगुणभूता तत्तदर्थस्वरूपस्य वाच्यस्य वाचकरूपेण स्वीकृता। अथ शाब्दबोधम्प्रति पदार्थोपस्थिति द्वारा तज्ज्ञानस्य कारणत्वं प्रतिपाद्यते। चक्षुषा घटप्रत्यक्षजनने चक्षुषो ज्ञानं कामं नापेक्ष्यते किन्तु पदेन गौरित्यादिना गवार्थबोधजनने पदस्य ज्ञानं नितरामपेक्षितम्भवति। गौरिति ज्ञानम्, गौरिति वाचकम्; गौरिति वाच्यम् इति प्रतीत्या शब्द-तदर्थ-तज्ज्ञानानां कृते शब्दः प्रयुज्यते। गौः, घटः, गामानय, गां बधान इत्येवमादिरूपः शब्दः प्रमाणं भवति तत्तच्छाब्दप्रमां प्रति। आकाङ्क्षायोग्यतासन्निधि-मत्पदसमूहो वाक्यं, निराकाङ्क्षप्रतिपत्तिपर्यन्तं वाक्यार्थमवगमयति।

अर्थनिरूपिता पदनिष्ठा वृत्तिः सङ्केतो लक्षणा चेति। वृत्त्या पदार्थोपस्थितिद्वारा पदज्ञानवतो वाक्यार्थज्ञानं शब्देन जायते। ईश्वरेच्छारूपः इच्छारूपो वा संकेतः शक्तिरिति क्लृप्तेषु सप्तसु पदार्थेषु विद्यमानाम् इच्छामादायैव लाघवेन शाब्दबोधः समुपपादनीयः इति नैयायिकानां काचन दृष्टिः समुल्लसति। एतावता तस्य तस्य पदस्य ते ते अर्थाः वृत्त्या ये उपस्थिता भवन्ति ते किल पदार्थाः भवन्ति। पदेन उपस्थिता येऽर्थाः, तत्र चैकपदे अपरपदार्थस्य यः संसर्गः स तु अपदार्थोपि संसर्गमर्यादया भासते स एव वाक्यार्थ इति नैयायिकैः महता संरम्भेण प्रतिपाद्यते। खण्डन-मण्डनपद्धतिमवलम्बमानैर्विभिन्नैः दार्शनिकैः भिन्नभिन्ना वाक्यार्थविचाराः तत्तद्विद्या सिद्धान्तभूताः प्रवर्तिताः। एषां वर्गीकरणं पञ्चसु बिन्दुषु विभाजितं भवति। तद्यथा–

१. अभिहितान्वयवादो भाट्टमीमांसकानाम्।
२. अन्विताभिधानवादः प्राभाकराणाम्।
३. तात्पर्यशक्तिवादो जयन्तभट्टस्य।
४. संसर्गमर्यादावादो गदाधरभट्टाचार्यस्य।
५. प्रतिभा वाक्यार्थ इति भर्तृहरेः।

प्रत्येकं शास्त्रस्य किमपि वैशिष्ट्यं, महत्त्वम्, मूल्यं च भवति। तदेवाधारीकृत्य व्याकरणं पदशास्त्रमित्यभिधीयते, न्यायोवैशेषिकश्च प्रमाणशास्त्रं, मीमांसा तु वाक्यशास्त्रमित्याख्यायते। वेदवाक्यार्थविचारनिपुणं मीमांसाशास्त्रं केनचित् प्रयोजनेन पुरस्कृतेन सङ्चालितं प्रकाशते। भवन्ति हि शब्दाः नित्याः अपौरुषेयाः द्रव्यरूपा विभवः। ततश्च क्रमरहिता एव ते भान्ति। अतः कौमारिलैः तदीयासु उपस्थितिषु क्रमो ग्राह्यो भवतीति स्वीक्रियते। ज्ञानं चैतन्मते अतीन्द्रियं भवति। अनुव्यवसायस्थाने ज्ञातता अनुमन्यते। वर्णात्मा शब्दो द्रव्यम्, ध्वनिस्तु वायुगुणः। श्रोत्रेण गृहीतो ध्वनिः श्रोतं संस्कुर्वन् तत्रस्थं विभुवर्णमपि संस्करोति। द्रव्यात्मनो वर्णस्यापि श्रोत्रेन्द्रियेणैव ग्रहणं भवति। यथा च घटस्य रूपवतो द्रव्यस्य चाक्षुषविषयता तथा शब्दस्य द्रव्यस्य सतः श्रावण विषयता अनुमन्यते। प्रयोजनानुरोधेन कल्पना आद्रियतामिति मीमांसारीतिः। वर्णानां नित्यत्वम्, अपौरूषेयत्वं विभुत्वं च मौलिभूतं प्रयोजनं जागर्ति। गृहीतशक्तिकस्य पदैः पदार्थोपस्थितौ जायमानायां सत्याम् उपस्थितानां पदार्थानां परस्परं यः संसर्गः स पदार्थैरेव बोध्यते। संसर्ग एव च वाक्यार्थः। यथा गङ्गायां घोष इत्यादौ लाक्षणिकेन गङ्गादिपदेन प्रवाहरूपोऽर्थो बुध्यते अथ प्रवाहादिरर्थः तीरादिकं लक्ष्यार्थं बोधयति। एवञ्च सर्वं पदं लाक्षणिकमेभिः स्वीक्रियते। नात्र शक्यसम्बन्धो लक्षणा प्रत्युत बोध्यसम्बन्धो लक्षणा इति तल्लक्षणं स्वीक्रियते। अशब्दो यदि वाक्यार्थ पदार्थोपि तदा भवेद् इत्येवमादिकान् स्वपक्षे निपततः आक्षेपान् "अनन्यलभ्योहि शब्दार्थः" इत्यादिनयपुरस्कारेण मीमांसकाः परिहरन्ति। न्यायमते समभिव्याहार आकाङ्क्षा इत्युच्यते। व्याकरणे मीमांसायां च समभिव्याहारो वाक्यमित्युच्यते। शक्तिः सामर्थ्यरूपा इति मीमांसकाः, वाच्यवाचकभावः सम्बन्धः शक्तिरिति वैयाकरणाः। वैयाकरणैः वाक्यपदीये वाक्यकाण्डे अन्यत्र च यथा मीमांसासम्मतः वाक्यार्थविचारो निकटतर प्रतिद्वन्द्वितया अधिक्षिप्यते तथैव शास्त्रदीपिकायाम् अन्यत्र च तत्त्वबिन्दुप्रभृतिग्रन्थेषु वाच्यवाचकभावः सम्बन्धः तन्मूलको वाक्यार्थविचारश्च अधिक्षिप्यते। मीमांसा-शब्दशास्त्रयोः नैकट्यं वाक्यार्थविचारप्रसङ्गे द्रष्टुं शक्यते। व्यापारमुख्यविशेष्यकः शाब्दबोधः शाब्दिकानां चेद् मीमांसकानां भावनामुख्यविशेष्यकः। सा च भावना आत्मनिष्ठो व्यापारविशेषः। वाक्यपदीयमङ्गलश्लोके उभयसम्मतिर्द्रष्टुं शक्यते। वाग्वै ब्रह्मेति श्रुत्यनुरोधिनी वाचः परतत्त्वता परमार्थता चेत्युभयत्र सम्मता। अनादिनिधनपदाभिहिता नित्यता उभयत्र समानभूता। ब्रह्मेति कथनेन वृहत्वाद् बृंहत्वाद्वा विभुत्वमुभयत्र समानम्। वर्णात्मिकाया एव वाचः विभुत्वं न तु ध्वन्यात्मिकाया इत्येवमभिप्रायोऽक्षरपदस्योभयत्र समानः। चैतन्यात्मपरतत्त्वभूतं शब्दतत्त्वं परमोपादेयं, न श्रोत्रग्राह्यं प्रमाणमात्रम्। अनादिनिधनेति पूर्वार्द्धे यथा मीमांसा-शब्दशास्त्रयोरुभयोः सम्मतिः तथा उत्तरार्द्धे वेदान्त-शब्दशास्त्रयोरूभयोः सम्मतिर्वर्तते। अतद्व्यावृत्त्या मिथ्यात्वं जगतः अध्यासमाध्यमेन स्वीकुर्वद्भिर्वेदान्तिभिः विवर्तवादः, जगतः प्रक्रिया च व्यवहारपदे स्वीक्रियते। शाब्दिकैस्तु स्वप्नविषयप्रति-भासदृष्टान्तेन सर्वस्वीकारेण प्रतिभासस्यात्मसात्करणद्वारा शब्दतत्त्वात्मनि ब्रह्मणि जगतो विवर्तः प्रक्रिया चानुमन्यते। नैयायिकैरास्तिकवर्य्यैः नास्तिकयुक्तिखण्डनाय अनुमानेन सयुक्ति ईश्वर सिद्धिरूपपाद्यते। परं भरस्त्वेषां श्रुतेः प्रामाण्ये नितरां जागर्ति। अत एव-"द्यावाभूमी जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता-इत्यादय आगमा अप्यनुसन्धेयाः" इति विश्वनाथोक्तिः

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥

इति आचार्योक्तिश्च सुतरां संगच्छते।

अहं चेतनः इति प्रतीतिस्तु जायते न तु अहं चैतन्यमिति अनित्यज्ञानादिमान् जीवः तेन च विभिन्नजीवेन नित्येच्छाज्ञानकृतिमानीश्वरो भेदेनोपास्यते श्रद्धादरभाक्। तदिदं प्रमाणशास्त्रं प्रदीपवत् सर्वशास्त्रप्रकाशकं प्रथते। व्युत्पत्तेराधानं प्रमाणशास्त्राराधनं विना नैव सम्भवति। वाक्यशास्त्रेण शब्दतत्त्वात्मनः ब्रह्मणः सान्निध्यं नीयते। पदशास्त्रेण तु गृहीतागमार्थानामद्वये शब्दतत्त्वात्मनि स्वात्मनि स्थिरे प्रत्यवमर्शशीले असत्यविभक्तान्यरूपोपग्राहिताशालिनि विवर्तभूतं विश्वं चकास्तीति व्युत्पन्ना अत्राधिक्रियन्ते। वेदान्तदर्शनं प्रत्यभिज्ञादर्शनं च मध्यमणिन्यायेन व्याकरणदर्शनं सबहुमानं मध्यस्थतां नयतः।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥

तदेवं विमृश्यमाने सुस्पष्टमाभाति यद् भारतीयचिन्तने न केवलं प्रमाणमात्रतया शब्दः प्रतिबिम्बति प्रत्युत महार्थभूतं शब्दतत्त्वमप्यात्ममहेश्वरो विश्वात्मा विश्वोत्तीर्णश्च[१] स्वातन्त्र्येण स्वच्छस्वच्छन्दतया परिस्फुरतीति शम्।

---

१. कर्तरिज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः॥

शक्तिस्वरूपविमर्शः

डॉ॰ कमलेशमिश्रः

शक्तिर्नाम शाब्दबोधानुकूलः पदपदार्थमुख्यसम्बन्धः। इयमीश्वरेच्छेति प्राचीनाः, इच्छेति च नव्याः। इयमीश्वरेच्छा सङ्केतरूपा। तस्या आकारः–'अस्मात् पदादयमर्थो बोद्धव्यः' इति। यथा घटपदाद् घटत्वावच्छिन्नो बोद्धव्य इत्येतादृशी इच्छा अर्थविशेष्यिका। 'इदं पदमिममर्थं बोधयतु' इति वा। यथा घटपदं घटत्वावच्छिन्नं बोधयत्विति। एतादृशी इच्छा पदविशेष्यिका।

इयमिच्छारूपा शक्तिस्तद्विशिष्टे भवति। तद्विशिष्टे शक्तिर्नाम घटत्वादिविशिष्टे शक्तिरिति। तथा च तद्धर्मतद्वैशिष्ट्यतदाश्रयेष्वेव शक्तिरित्यर्थः फलितः। अत्र तद्धर्मो नाम घटत्वादिधर्मः, तद्वैशिष्ट्यं नाम घटत्वादिसमवायः, तदाश्रयो नाम घटत्वाद्याश्रयो घटादिरिति।

ननु घटपदस्य कुत्र शक्तिः? घटत्वावच्छिन्न इति। अतो घटत्वं शक्यतावच्छेदकम्। शक्यतावच्छेदकं नाम प्रवृत्तिनिमित्तम्। प्रवृत्तिनिमित्तं नाम तत्तत्पदव्यवहारप्रयोजकम्। तथा च यद्धर्मविशिष्टेऽर्थे यत्पदस्य मुख्यव्यवहारो भवति, स धर्मस्तत्पदस्य प्रवृत्तिनिमित्तरूप इति भावः। प्रवृत्तिनिमित्तलक्षणं 'वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमि'ति[1] **गदाधरेणावादि**। घटघटत्वसमवायेषु घटपदस्य शक्तिः। अतो घटपदवाच्या एते त्रयः। लक्षणसङ्गमनं प्रस्तूयते। घटत्वं घटपदवाच्यम्, घटपदवाच्यघटे वर्तमानम्, वाच्यभूतघटविषयकस्मृतौ प्रकारीभूतमिति लक्षणसमन्वयः। लक्षणे वाच्यत्वे सतीति वाच्यत्वविशेषणस्य याथार्थ्यं घटत्वादेर्घटादिपदवाच्यत्वे सम्भवति, तथा–'जात्याकृतिव्यक्तयस्तु पदार्थः'[2] इति **महर्षिगौतमोक्त**पदार्थत्वस्यापि न त्वन्यथेति।

अतो यथा घटादिपदार्थो घटादिपदवाच्यस्तथैव घटादिपदार्थप्रकारीभूतधर्म घटत्वादिरपि। तथा च घटादिपदजन्यशाब्दबोधे यथा घटादिपदार्थविषयकघटादिपदवाच्यत्वज्ञानस्यापेक्षा, तथैव प्रकारीभूतघट-त्वादिधर्मविषयकघटादिपदवाच्यत्वज्ञानस्यापि। तेन च समवायादिसंसर्गकघटत्वादिप्रकारकघटादिविशेष्य-कशाब्दबोधो जायत इति।

---

१. शक्तिवादे सामान्यकाण्डे।

२. न्यायसूत्रम्–२. २. ६।

पदार्थप्रकारीभूतधर्मांशे वाच्यत्वज्ञानस्यापेक्षितत्वे आकाशपदात् शब्दाश्रयत्वप्रकारकाकाश-विशेष्यकशाब्दबोधो न स्यात्, प्राचीनैराकाशपदवाच्यतायाः शब्दाश्रयत्वेऽनङ्गीकृतत्वात्। अतः शब्दाश्रयत्वस्या-वाच्यताप्रतिपादनार्थं प्रवृत्तिनिमित्तलक्षणे 'वाच्यत्वे सति' इति विशेषणोपादानमिति चेत्, न, प्राचीनानामाकाशांशे शब्दाश्रयत्वधर्माप्रकारकशाब्दबोधस्य सम्मतत्वात्।

अत्र प्राचीनानामिदं तात्पर्यम्—यथा घटत्वादिर्जाति, न तथा आकाशत्वं शब्दाश्रयत्वं वा, एकव्यक्तिमात्रवृत्तेश्च जातित्वानङ्गीकारात्। आकाशोऽष्टद्रव्यातिरिक्तद्रव्यरूपः। अतः शब्दाश्रयत्वमिवा-ष्टद्रव्यातिरिक्तद्रव्यत्वमप्याकाशपदेन ग्राह्यम्। यदि शब्दाश्रयत्वे आकाशपदशक्तिस्तर्हि अष्टद्रव्यातिरिक्त-द्रव्यत्वेऽपि। तथा तु न सम्भवति, एकस्मिन् धर्मिणि प्रकारीभूतेषु नानाधर्मेष्वेकपदस्य पर्याप्त्या नाना-शक्तीनां कुत्राप्यभानात्। न चोभयत्रापि एका शक्तिः, एकदा आकाशपदादुभयधर्मप्रकारकबोधानवलोक-नात्। एकतरपक्षपातिन्या युक्तेरभावान्नैकत्र शक्तिर्नैकत्र च लक्षणेति। तस्माद् गत्यन्तराभावादाकाशपदस्य निर्विकल्पकबोध इति।

ननु निर्विकल्पकं नाम तत्र निष्प्रकारकं ज्ञानमिति। पदात्तु सामान्यतो निष्प्रकारकं ज्ञानं न सम्भवति। तथा सति पदार्थस्य पदार्थान्तरसम्बन्धो न स्यात्। अतः शाब्दबोधे निर्विकल्पकत्वञ्च तदंशे तत्पदोपस्थाप्यधर्माप्रकारकत्वम्, न तु सामान्यतो निष्प्रकारकत्वमित्युक्तम्[१]। यदि आकाशपदादुपस्थितिः शब्दाश्रयत्वप्रकारिका शाब्दबोधश्च निष्प्रकारकस्तर्हि उपस्थितिशाब्दबोधयोः समानप्रकारकत्वनियमोच्छेदः स्यात्। अतोऽत्र निर्विकल्पकपदं निर्विकल्पकस्मरणपरम्, न तु निर्विकल्पकशाब्दबोधपरम्। निर्विकल्पक-स्मरणञ्चाकाशपदोपस्थाप्यशब्दाश्रयत्वरूपवस्तुनाऽविशेषिताकाशधर्मिविषयकशब्दानुभवजनकम्। तथा चाकाशपदादाकाशस्य स्वरूपत एवोपस्थितिशाब्दबोधौ भवतः। अतो न तयोः समानप्रकारकत्वनियमोच्छेदः। नन्वनुभवात् संस्कारः, संस्काराच्च स्मृतिः। तेन च स्मरणं सविकल्पकं वा भवति, न तु निर्विकल्पकमिति। अतो निर्विकल्पकस्मरणस्य नोपपत्तिरिति चेत्, न, **मुरारिमिश्रै**र्निर्विकल्पकस्मरणस्योपपादितत्वात् प्रकारान्तरेण। तत्र रहस्यञ्चानुभूतस्यैव स्मरणं भवति; किन्त्वनुभूतस्य स्मरणं भवत्येवेति नियमो नास्ति, संस्कारप्रमोषेण निर्विकल्पकस्मरणस्य सम्भवात्। यथा कटकादिविशिष्टदेवदत्तस्य कालान्तरे कटकादिविषयकसंस्कारप्रमोषः। तेन च देवदत्तव्यक्तिमात्रविषयकस्मरणम्। तथैव शब्दाश्रयत्वविषयकसंस्कारप्रमोषेणाकाशपदादाकाश-व्यक्तिमात्रविषयकं निर्विकल्पकस्मरणमिति।

---

१. शक्तिवादे विशेषकाण्डे।

धेनुपदवृत्तिविमर्शः

डॉ. करुणानन्दमुखोपाध्यायः

निबन्धसारः

प्रकृतिशक्तिनिरूपणपरे शक्तिवादे गदाधरभट्टाचार्यैः गोघटादि-सामान्यपदानामिव आकाशधेनुपुष्पवन्तादिविशेषपदानामपि शक्तिस्वरूपं शक्तिज्ञान-शाब्दबोधयोः कार्यकारणभावश्च निर्णीतः।

सामान्यशब्दानां सामान्यधर्मावच्छिन्ने एव शक्तिः, तेषां विशेषधर्मावच्छिन्न-विषयकशाब्दबोधजनकत्वन्तु लक्षणया एव सम्भवति; तथैव विशेषवाचकशब्दानां विशेषधर्मावच्छिन्ने एव शक्तिरङ्गीक्रियते, तेषां सामान्यधर्मावच्छिन्नविषयकबोधजनकत्वन्तु लक्षणया एव इति नियमानुसारेण धानकर्मगोत्वविशिष्टवाचकधेनुपदेन शुद्धगोत्वावच्छिन्न-विषयकशाब्दबोधः लक्षणया एव इति न्यायसिद्धान्तः।

निबन्धेऽस्मिन् धेनुपदशक्तिविमर्शवेलायां प्राभाकरमीमांसकमतं सम्यग् आलोचितम्। तेषामयमाशयः–धानकर्मताविशिष्टे एव धेनुपदस्य शक्तिर्नतु गोत्वमपि विशेषणमावश्यकम्, गोत्वस्य शक्त्युपाधित्वेन शक्तिनियन्त्र-कत्वाद् धेनुपदेन महिष्यादिबोधो न सम्भवति। गोत्वमेव शक्यं धानकर्मत्वमेव शक्त्युपाधिरिति विपरीताश्रयणं कथं न सम्भवति एतदपि प्राभाकरदृष्ट्या विचारितम्। अन्ते धेनुपदशक्तिस्वरूपविषये सिद्धान्तरहस्यम् उन्मोचितं वर्तते।

१. भूमिका–

इह खलु संसारे श्रूयमाणैरपि सर्वैः शब्दैः सर्वेषां न तदर्थप्रतिपत्तिः, न वा सद्यः, किन्तु कैश्चित् शब्दैः केषाञ्चित् स्वल्पचिरेण जन्यते; तस्मात् तत्सम्पादिनी पदपदार्थसम्बन्धविशेषधीजनित-पदार्थोपस्थितिः कल्प्यते। न च शाब्दबोधौपयिकः सम्बन्धविशेषः अर्थानुयोगिकः पदप्रतियोगिक[१]

१. गोपदाद् गोत्वावच्छिन्नो बोद्धव्यः।

अर्थप्रतियोगिकः पदानुयोगिको[१] वा वृत्तिरूपः संकेतलक्षणोभयात्मकः। तत्र संकेतरूपावृत्तिमुख्या भवति, लक्षणा च गौणीरिति। मुख्यावृत्तिरेव शक्ति अभिधादिशब्देन अभिधीयते शास्त्रेषु।

पदशक्तिनिरूपणाय प्रारभ्यमानेऽस्मिन् शक्तिवादात्मके ग्रन्थे गदाधरभट्टाचार्यैः प्रकृत्यात्मकपद-निष्ठशक्तिरेव निरूप्यते, प्रत्ययात्मकपदशक्तिनिरूपणन्तु तैः व्युत्पत्तिवादे कृतम्। सामान्यविशेषभेदेन प्रकृत्यात्मकपदमपि द्विविधं दृश्यते। अत्र सामान्यपदेन जात्यवच्छिन्नवाचकपदानि गोघटमनुष्यादीनि, विशेषपदेन च जातिमात्रावच्छिन्नत्वविशिष्टभिन्नार्थवाचकानि आकाशादीनि पदानि गृह्यन्ते।

विशेषपदान्यपि विविधानि दृश्यन्ते, यथा कानिचित् विशिष्टाऽवाचकानि आकाशादीनि, अपराणि नानाधर्मविशिष्टैकधर्मिवाचकानि धेनुस्वर्गादीनि, इतराणि च नानाधर्मविशिष्टनानाधर्मिवाचकानि पदानि पुष्पवन्तादीनि इति।

तत्र नानाधर्मविशिष्टैकधर्मिवाचकपदानां शक्तिस्वरूपनिर्णयार्थं शक्तिज्ञान-शाब्दबोधयोः कार्यकारणभावनिर्णयार्थञ्च तेषां प्रतिनिधिभूतस्य धेनुपदस्य शक्तिस्वरूपं निर्णीतं भट्टाचार्यैं इत्यस्मदगुरुचरणाः।

२. धेनुपदस्य व्युत्पत्तिः—

"धीयते पीयते वत्सेन इति धेनुः" इतिव्युत्पत्त्या धेनुपदस्य निष्पत्तिर्भवति। अत्र "अकथितं च" इति पाणिनिसूत्रानुसारेण अपादानत्वाऽविवक्षायां कर्मसंज्ञा भवति इति धानक्रियायाः कर्म धेनुर्भवति। धानकर्मता च दुग्धपानकर्मता, दुग्धप्रतियोगिकगलाधः संयोगानुकूलो यो व्यापारस्तद्रूपं, तत्कर्मता च तादृशविभागानुयोगिता तदाश्रयतया गवादिकं कर्म; अतएव गां धयति स्तनं पिबति इत्यादिप्रयोगानां साधुत्वम्।

३. धेनुपदस्य शक्तिः—

सामानाधिकरण्यसम्बन्धेन धानकर्मत्वविशिष्टगोत्वावच्छिन्ने धानकर्मनिष्ठगोत्वावच्छिन्ने वा धेनुपदस्य शक्तिरस्ति इति न्यायसिद्धान्तः। धानकर्मताविरहाद् वृषभादेः, गोत्वविरहाच्च महिष्यादेर्न धेनुपदेन बोधः।

शक्तिग्रह-शाब्दबोधयोः समानविषयकत्वेनैव कार्यकारणभाव अङ्गीक्रियते। समानविषयकत्वञ्च स्वनिष्ठप्रकारतानिरूपितविशेष्यताकत्वं बोध्यम्। स्वपदेन शक्यतावच्छेदकीभूतधर्मो गृह्यते। तथा च प्रकृते धेनुपदस्य शक्तिः धानकर्मनिष्ठगोत्वावच्छिन्ने अस्ति, ततः तज्ज्ञानाद् धानकर्मनिष्ठगोत्वावच्छिन्नविषयक एव शाब्दबोधो जायते।

---

१. गोपदं गोत्वावच्छिन्नमर्थं बोधयतु।

यदा कश्चन पुरुषः केवलगोत्वावच्छिन्नतात्पर्येण धेनुपदं प्रयुंक्ते तदा शक्त्या केवलगोत्वावच्छिन्नविषयकशाब्दबोधो न भवति किन्तु गौणीवृत्त्या एव, प्रवृत्तिनिमित्तैकदेशं परित्यज्य शक्त्या शाब्दबोधानभ्युपगमात्। प्रवृत्तिनिमित्तत्वं नाम वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वम्[१]। प्रकृते च धानकर्मनिष्ठगोत्वमेव धेनुपदप्रवृत्तिनिमित्तत्वम्, अतो यदा धेनुपदेन शक्त्या शाब्दबोधो भवति तदा धानकर्मगोत्वावच्छिन्नविषयक एव शाब्दबोधो जायते, न तु केवलगोत्वावच्छिन्नविषयकबोधोऽपि। तस्माद् यदा केवलगोत्वावच्छिन्नबोधतात्पर्येण धेनुपदं कश्चन प्रयुंक्ते तदा श्रोतुः गोत्वमात्रावच्छिन्नविषयकशाब्दबोधो लक्षणया एव।

४. धेनुपदशक्तिज्ञानशाब्दबोधयोः कार्यकारणभावः–

नानाधर्मविशिष्टैकधर्मिवाचकधेन्वादिपदात् शक्त्या शुद्धगोत्वाद्यवच्छिन्नविषयकशाब्दबोधवारणाय शक्तिज्ञानशाब्दबोधयोः कार्यकारणभाव एवं स्वीकरणीयः, एकमात्रधर्म (गोत्वमात्रधर्म) प्रकारकशाब्दबोधं प्रति तद्धर्मावच्छिन्नत्वावच्छिन्ना तदितरधर्मावच्छिन्नत्वानवच्छिन्ना या तत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपित भगवत्संकेतीयविशेष्यताकत्वसम्बन्धेन तत्पदप्रकारकं तद्धर्मावच्छिन्नविशेष्यताकशक्तिज्ञानं कारणम्। तथा च उक्तविशेष्यताकत्वसम्बन्धेन 'घटपदविशिष्टे घटो'ऽर्थः बोद्धव्यः

> **वाच्योपस्थितिप्रकारत्वम् इत्यनुक्ते घटस्य मृत्पदप्रवृत्तिनिमित्तत्वं स्यात्, घटस्य मृत्पदवाच्यत्वात् मृत्पदवाच्यकपालवृत्तित्वाच्च।**
>
> **वाच्योपस्थितिप्रकारत्वम् इत्युक्ते घटस्य मृत्पदवाच्यघटकपालाद्युपस्थितौ, प्रकारतया भासमानत्वाभावात् न तस्य मृत्पदप्रवृत्तिनिमित्तत्वम्॥**

वाच्यत्वे सति इत्यनुक्ते शब्दाश्रयत्वस्य आकाशपदप्रवृत्तिनिमित्तत्वं स्यात्, तस्य आकाशवृत्तित्वात् आकाशोपस्थितौ प्रकारतया भासमानत्वाच्च। वाच्यवृत्तित्वे सति इत्यनुक्ते आकृतेरपि गवादिपदप्रवृत्तिनिमित्तत्वं स्यात्, "जात्याकृतिव्यक्तयः पदार्थः" इतिन्यायसूत्रप्रामाण्येन आकृतेरपि पदार्थत्वेन वाच्यत्वाद् वाच्योपस्थितिप्रकारत्वाच्च। वाच्यवृत्तित्वे सति इत्युक्ते आकृतेरवयवसंयोगरूपत्वाद् अवयवमात्रवृत्तित्वेन वाच्यभूतगवादिव्यक्त्यवृत्तित्वात् न गोपदप्रवृत्तिनिमित्तत्वम्। इत्याकारकशक्तिज्ञानस्य घटपदजन्यबोधविषयत्वनिष्ठप्रकारताया एकधर्मावच्छिन्नत्वावच्छिन्नत्वेन विषयत्वात् घटपदात् तादृशघटत्वैकधर्मप्रकारकशाब्दबोधः सम्भवति। धेनुपदजन्यबोधविषयत्वनिष्ठप्रकारता तु यथा गोत्वावच्छिन्नत्वावच्छिन्नाऽप्यस्ति तथैव धानकर्मत्वावच्छिन्नत्वावच्छिन्नाऽप्यस्ति, तस्मात् कारणाद् धेनुपदेन केवलगोत्वप्रकारकशाब्दबोधो शक्त्या न सम्भवति, तदर्थमकामैरपि लक्षणावृत्तिस्वीकरणीयमस्ति।

रघुनाथशिरोमणिमतम्–

धेनुपदेन शक्त्या शुद्धगोत्वावच्छिन्नविषयकशाब्दबोधवारणाय दीधितिकाराः एकमात्रधर्मप्रकारकशाब्दबोधस्थले शक्तिज्ञानशाब्दबोधयोः कार्यकारणभावम् इत्थं स्वीकुर्वन्ति–एकमात्रधर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितभगवत्संकेतीयविशेष्यतावच्छेदकत्वसम्बन्धेन तत्पदप्रकारकं तद्धर्मावच्छिन्नविशेष्यतावच्छेदकतापर्याप्त्यवगाहिशक्तिज्ञानं कारणम्। तथा च घटत्वप्रकारकशाब्दबोधप्रकारीभूतधर्मे घटत्वे घटपदजन्यबोधीयविषयत्वनिष्ठप्रकारतानिरूपितभगवत्संकेतीयविशेष्यतावच्छेदकतायाः पर्याप्तिरस्ति अतः घटपदात् घटत्वमात्रप्रकारकशाब्दबोधो भवति। प्रकृते तु धेनुपदशक्तिज्ञाने गोत्वमात्रे भगवत्संकेतीयविशेष्यतावच्छेदकतायाः पर्याप्तिर्नास्ति किन्तु धानकर्मत्वगोत्वैतदुभयधर्मे सा पर्याप्ता, अतः धेनुपदेन गोत्वमात्रावच्छिन्नविशेष्यताकशाब्दबोधस्य शक्त्या आपत्तिर्न सम्भवति। एतन्मतस्य साधुता न प्रतिभाति, यतो हि ते शक्यतावच्छेदके शक्तिं नाभ्युपगच्छन्ति, तत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितभगवत्संकेतीयविशेष्यतावच्छेदकता यत्र विद्यते तद्धर्मप्रकारक एव शाब्दबोधो भवति इत्यस्ति तेषां मतम् एवं च सति ईश्वरसंकेताऽऽधुनिकसंकेतयोरेकरूपेणैव कारणतास्वीकाराद् द्रव्यपदाद् गुणवत्त्वेन द्रव्यं बोद्धव्यम् इत्याधुनिकसंकेतग्रहाद् गुणवत्त्वप्रकारकशाब्दबोधो न स्यात् द्रव्यत्वप्रकारक एव स्याद् इत्यापत्तेर्दुर्वारत्वात्।

प्राभाकरमतम्–

प्राभाकरास्तु धानकर्मताविशिष्ट एव धेनुपदस्य शक्तिः, न तु गोत्वमपि विशेषणतया तत्र अपेक्ष्यते इति अङ्गीकुर्वन्ति। गोत्वस्य शक्त्युपाधित्वेन शक्तिनियन्त्रकतया विद्यमानत्वाद् धेनुपदेन महिष्यादिविषयकबोधो न सम्भवति। अत्र शक्त्युपाधित्वं नाम धर्मितावच्छेदकत्वेन शक्त्यभावप्रयोजकाभावप्रतियोगित्वम्। अर्थात् यस्य धर्मस्य अभावे सति शक्तेरभावः सिद्ध्यति तस्य धर्मस्य शक्त्युपाधित्वम्। यथा गोत्वं महिष्यां न विद्यते, तत्र धेनुपदशक्तिरपि नास्ति, अतः गोत्वाऽभावस्य शक्त्यभावप्रयोजकतया गोत्वस्य धेनुपदशक्त्युपाधित्वं सिद्धम्।

इदमत्र चिन्त्यम्–

प्राभाकराः यथा गोपदस्य गोत्वजातौ शक्तिं स्वीकुर्वन्ति, तथैव धेनुपदस्य शक्तिः धानकर्मत्वे कथं नाङ्गीकुर्वन्ति? समाधानन्तु एवं सम्भवति–यद् येन बिना न भासते तद्भासकसामग्री एव तद्भासयति, न तु तद्भानार्थं सामग्र्यन्तरं नापेक्ष्यते; जातिस्तु व्यक्तिं विना न भासते इति जातिभासकसामग्री एव व्यक्तिं भासयति अतो व्यक्तिभाने सामग्र्यन्तरं नापेक्ष्यते। धानकर्मता च व्यक्तिं विनापि भासते, अतस्तद्भानसामग्र्या व्यक्तिभानसम्भवाऽभावात् तद्भानार्थं धानकर्मताविशिष्टे शक्तिरावश्यकी इति ध्येयम्।

ननु धेनुपदाज्जायमाने शाब्दबोधे गोत्वस्य प्रकारतया भानस्य अनुभवसिद्धत्वात्, धानकर्ममहिष्यादिमति देशे धेनुपदजन्यबोधे गोत्वभानमवश्यमङ्गीकरणीयमस्ति; तदर्थञ्च धानकर्मत्ववत् गोत्वेऽपि शक्तेरावश्यकताऽस्ति। अशक्यस्यापि शाब्दबोधे प्रकारतया भानोपगमे द्रव्यत्वप्रमेयत्वादेरपि धेनुपदजन्यशाब्दबोधे प्रकारतया ज्ञानं स्याद् इति चेत् न, धेनुपदजन्यशाब्दबोधे गोत्वस्य प्रकारतया भाने शक्यतावच्छेदकत्वस्य प्रयोजकत्वमस्ति, तस्य चाऽशक्यत्वेऽपि शक्यतायाम् अवच्छेदकत्वात्मक-सम्बन्धविशेषाभ्युपगमात्। द्रव्यत्वप्रमेयत्वादेस्तु धेनुपदजन्यशाब्दबोधे प्रकारतया भानम् इति सुसामञ्जस्यात् न गोत्वेऽपि शक्तिस्वीकारः। तथा च प्राभाकरमते शक्तिज्ञान-शाब्दबोधयोः कार्यकारणभावः-तत्तत्पदजन्यतत्तद्धर्मप्रकारकशाब्दबोधं प्रति तत्तद्धर्मावच्छिन्नविशेष्यताकत्वसम्बन्धेन तत्तद्धर्मावच्छिन्न-प्रकारकपदविशेष्यकशक्तिज्ञानं हेतु इति। तथाहि धानकर्मत्वगोत्वैतदुभयधर्मावच्छिन्नप्रकारक-पदविशेष्यकशक्तिज्ञानेन धानकर्मत्वगोत्वोभयधर्मावच्छिन्नविषयकशाब्दबोधो भवति।

यद्यपि वृषभादिसाधारणतया गोत्वस्य अतिप्रसक्तत्वेन नावच्छेदकत्वसम्भवः, तथापि अनतिरिकवृत्तित्वस्य अत्र अविवक्षिततया अतिप्रसक्तधर्मेऽपि अवच्छेदकत्वस्वीकाराद् गोत्वस्य नावच्छेदकत्वहानिः। अनतिरिक्तवृत्तित्वस्य नियतत्वेऽङ्गीकृते तु धानकर्मत्वसामानाधिकरणगोत्वस्यैव शक्यतावच्छेदकत्वात् न दोषः।

मीमांसकमतोपरि आशंका–

गोत्वमेव शक्यं धानकर्मत्वमेव शक्त्युपधिरिति विपरीतताश्रयण कुतो न क्रियते? धानकर्मत्वापेक्षया गोत्वस्य शक्यत्वस्वीकारे लाघवमप्यस्ति, तथाहि जातित्वेन गोत्वस्य एकत्वं, तदपेक्षया स्वाधारव्यक्तिभेदेन भिन्नं भिन्नमिति अनन्तधानकर्मत्वेषु धेनुपदशक्तिस्वीकारे गौरवं स्यात्, अथ च जातित्वेन गोत्वस्य निरवच्छिन्नशक्यत्वमपि सम्भवति इत्यतः गोत्वस्यैव शक्यत्वमुचितं प्रतिभाति यद्यपि वृषभादौ अपि विद्यमानत्वाद् गोत्वस्य अतिप्रसक्तत्वं धानकर्मव्यक्तिभेदेन भिन्नत्वेऽपि गोनिष्ठं धानकर्मत्वम् अनतिप्रसक्तम् इति विपरीतताश्रयणं नोचितमिति तथापि शक्त्युपाधित्वेन विद्यमानधानकर्मत्वेन वृषभादिबोधनिवारणसम्भवेन अतिप्रसक्तस्यापि गोत्वस्य शक्यत्वोपगमे क्षतिविरहात्।

यद्यपि गोत्वजातेरेव धेनुपदशक्यत्वे स्वीकारे जातिर्व्यक्तिं विना न भासते इति जातिभासकसामग्र्या एव व्यक्तिभानसम्भवेन व्यक्तिशक्त्युच्छेदप्रसङ्गः स्यात्, तथा च धानकर्मत्वस्य गोत्वजातिनिष्ठशक्य-ताव्यधिकरणेन शक्यतावच्छेदकत्वविरहात् तस्य उपाधित्वाऽसम्भवेन वृषभादिबोधवारणमशक्यमेव प्रतिभाति, तथापि एवदनुरोधेन व्यक्तौ अपि शक्तिस्वीकार इति शंकाकर्तृणाम् आशयः।

प्राभाकरमीमांसकाः एतस्याः आशंकायाः समाधानं कुर्वन्तः कथयन्ति–यद्धर्मविशिष्टे शक्तिः तद्धर्माश्रयाणां यावतां शक्यत्वनियमानुसारेण गोत्वस्य शक्यत्वे वृषभादेरपि धेनुपदशक्यतापत्तिः स्यात्। एवं धानकर्मताविशिष्टे गवि धेनुपदशक्यतास्वीकारे गोनिष्ठधानकर्मताव्यक्तिनामेव विशेषणतया महिष्यादेः

शक्यतापत्तिविरहः, अतएव धानकर्मताविशिष्टे धेनुपदस्य शक्तिरङ्गीक्रियते गोत्वस्य च शक्त्युपाधित्वम्, न तु गोत्वमेव शक्तं धानकर्मत्वं शक्त्युपाधिरिति वैपरीत्याश्रयणं क्रियते इति।

प्राभाकरमते अस्वारस्यम्–

प्राभाकरमीमांसकमते शाब्दबोधं प्रति शक्तिज्ञानस्य आधुनिकसंकेतज्ञानस्य अनुगमकरूपाभावेन एकरूपेण कारणता न सम्भवति। अतो भिन्नरूपेण कारणतास्वीकारे गौरवं स्यात्।

किञ्च गोनिष्ठधानकर्मताव्यक्तीनाम् अनुगताऽनतिप्रसक्तरूपाभावे न शक्यत्वाऽसम्भवात्। यदि सामानाधिकरण्यसम्बन्धेन धानकर्मताविशिष्टं गोत्वमेव धानकर्मव्यक्तीनामनुगमकं भवितुमर्हति इति उच्येत, तर्हि प्रश्नोऽयं पुरतस्तिष्ठति–सामानाधिकरण्यसम्बन्धेन धानकर्मताविशिष्टे गोत्वे शक्यता अङ्गीक्रियते न वा? अङ्गीक्रियते चेत् न्यायमतेन सह समानापत्तिः स्यात्, ईश्वरानङ्गीकर्तृणां तेषां ईश्वरेच्छात्मकसंकेतरूपता शक्तेः न सम्भवति एतावन्मात्रं पार्थक्यं स्यात्। सामानाधिकरण्यसम्बन्धेन धानकर्मताविशिष्टगोत्वे धेनुपदशक्यतानङ्गीकारपक्षे अशक्यस्यापि शक्यानुगमकता स्यात्, एवं सति अशक्येन शक्यानुगमसम्भवे सर्वत्र विशेषणशक्त्युच्छेदप्रसङ्गः स्यात्।

अतिप्रसक्तेनापि धानकर्मतात्वेन धानकर्मताव्यक्तीनाम् अनुगमकरणद्वारा धानकर्मताविशिष्टे शक्तिस्वीकारापेक्षया लाघवाद् गोत्वविशिष्टे गोविशेषे शक्तिर्धानकर्मत्वस्य शक्त्युपाधित्वस्वीकार एव उचितं इति प्रतिभाति।

किञ्च धानकर्मताव्यक्तिभेदेन धानकर्मतात्वमपि भिन्नं भिन्नं, तथा च अननुगतेन तत्तद्धानकर्मतात्वेन शक्तिग्रहस्वीकारे शाब्दबोधे अपूर्वव्यक्तिभानं न स्याद् इत्यापत्तेर्दुर्वारा स्याद् इत्यलम्।

अन्विताभिधानसमीक्षा

के. एस. सतीशः

अथवा तत्पदजन्यतद्धर्मप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नत्वावच्छिन्नत्वेन स्वजन्यबोधविषयत्व-प्रकारताऽवगाहितादृशप्रकारतानिरूपितविशेष्यतासंसर्गकपदप्रकारकं ज्ञानं हेतुः। भवति च द्रव्यपदात् द्रव्यत्वप्रकारको बोधः। घटपदात् च घटत्वप्रकारक इति सर्वेषां सम्प्रतिपन्नम्। तत्र कारणं शक्तिज्ञाने भेद एव। यतः तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दबोधे तत्संर्गावच्छिन्नतद्धर्मनिष्ठावच्छेदकताकस्व-जन्यबोधविषयत्वप्रकारतानिरूपित--इच्छाविशेष्यतात्वावच्छिन्नसंसर्गकतत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठर्मितावच्छेदकताक-पदप्रकारकज्ञानत्वेन विषयताविशेषसंसर्गक--अर्थविशेष्यकशक्तिज्ञानस्य हेतुता स्वीकर्तव्या। तत्श्च, ईदृशस्य कारणस्य भेदात् कार्ये शाब्दबोधेऽपि भेदो भवति।

नन्वेवं सत्यपि द्रव्यपदजन्यविभक्त्युपस्थपित--एकत्वादिप्रकारकद्रव्यत्वावच्छिन्नविशेषकबो-धीया या एकत्वावच्छिन्नविषयता सापि द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयतात्वेन भगवदिच्छायाः विषयः। द्रव्यम्--इति शब्दाधीनायाः एकं द्रव्यमिति शाब्दबोधीयायाः द्रव्यत्वावच्छिन्नविषयतायाः एकत्वावच्छिन्नविषयतया सममैक्यात् द्रव्यत्वावच्छिन्नविषयतायाः एकत्वरूपप्रकारसामानाधिकरण्येन तदवच्छिन्नत्वात्। एवञ्च द्रव्यपदजन्यबोधीय-एकत्वावच्छिन्नविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यता-संसर्गेणैकत्वादिमतः द्रव्यपदवत्वात्, द्रव्यपदात् अभ्रान्तस्य पदान्तरात् अनुपस्थितेन एकत्वप्रकारेणापि शाब्दबोधप्रसङ्गः स्यात्--इति चेत्, न तादृशविशेष्यतात्वेन तस्याः सम्बन्धत्वानुपगमात्। अथवा तत्पदजन्य-तद्धर्मप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नत्वावच्छिन्नत्वेन तत्पदजन्यबोधविषयत्वप्रकारतावगाहि तादृशप्रकारता-निरूपितविशेष्यतासंसर्गकं पदप्रकारकं ज्ञानं हेतुः--इति स्वीकर्तव्यम्। तत्श्च द्रव्यपदात् द्रव्यं बोद्धव्यम् इति ईश्वरेच्छायाः स्वीकारे तस्याः ज्ञानम् ईदृशशक्तिमत्पदमितिविषयकं स्यात्। तत्र च तद्धर्मेण द्रव्यत्वेन अवच्छिन्ना या द्रव्यपदजन्यबोधविषयता तत्वेन अवच्छिन्ना या तन्निष्ठा प्रकारता तदवगाहित्वमस्ति। न तु एकत्वावच्छिन्नत्वावच्छिन्नत्वेन उक्तप्रकारतावगाहित्वम्। अतः ईदृशात् शक्तिज्ञानात् न एकत्वप्रकारक-द्रव्यत्वविशेष्यकस्य बोधस्यापत्तिः।

यदि चावगाहते किञ्चिज्ज्ञानं प्रकारतायाम् एकत्वावच्छिन्नत्वावच्छिन्नत्वं तर्हि तत् तत्र बाधितमिति कृत्वा तस्य भ्रमत्वं स्यात्।

दीधितिकृतस्तु प्रत्यक्षमणिदीधितौ शक्यतावच्छेदकमवाच्यमिति जगदुः। उपापादयन् चैवम्–तत्पदशक्यतावच्छेदकत्वमेव तदंशे तद्धर्मस्य प्रकारतायां तन्त्रम्। शक्यतावच्छेदकत्वं च प्रकृतेन बोधविषयतया सङ्केतविषयत्वरूपम्। अपि तु विशेषणविधया वाच्यत्वम्। तत्पदजन्यबोधविषयत्व-प्रकारतानिरूपितविशेष्यतावच्छेदकत्वम्। एवञ्च तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मावच्छिन्नविशिष्टतादृश-विषयतासंसर्गकज्ञानमेव कारणम्। तत्श्च द्रव्यपदात् द्रव्यत्वप्रकारकः, घटपदात् घटत्वप्रकारकः बोधः इति व्यवस्थापि उपपद्यते। अतः शक्यतावच्छेदकत्वमवाच्यमेवेति।

एवं सति शक्तिज्ञानाधुनिकसङ्केतयोः एकरूपेण हेतुत्वात् यत्र द्रव्यपदात् गुणवत्वादिना द्रव्यं बोद्धव्यमित्याकारकः आधुनिकः सङ्केतः कस्यवित् द्रव्यत्वावच्छिन्नविशेष्यतासम्बन्धेन गृहीतः तत्र तादृशसङ्केतग्रहात् द्रव्यत्वेन द्रव्यबोधापत्तेः, गुणत्वादिप्रकारकबोधानुपपत्तेश्च दुर्वारत्वत्वात्–इति पूर्वोक्तप्रकारमेव श्रेष्ठं मन्यन्ते भट्टाचार्याः।

वच्धात्वर्थविमर्शः

कृष्णन् वेङ्कटरमन्

विद्यासन्ध्योदयोद्रेकाद् अविद्यारजनीक्षये।
यदुदेति नमस्तस्मै कस्मैचित् विश्वतस्त्विषे।।

न्यायचक्रचूडामणिभूताः गदाधरभट्टाचार्याः शब्दार्थयोः मध्ये यः शक्तिरूपः सम्बन्धः वर्तते, तत्सम्बन्धस्य सूक्ष्मं विवेचनं कृतवन्तः।

ग्रन्थारम्भे सूचितं वर्तते यत् अर्थे पदं वर्तते इष्टअर्थे पदवृत्तिष्ठरिति वाक्येन। तत्पुनः यदि प्रश्नः जायते यत् पदमिदम् केन सम्बन्धेन अर्थे स्थीयते किन्नामधेयो वायं सम्बन्धः, तत्पूर्वमेव स्पष्टं कृतम् यत् तत् सम्बन्धस्य नामनी सङ्केतः, 'लक्षणा' च स्तः।

न्यायग्रन्थेषु शक्तम्पदमिति नैकत्र श्रूयते। मन्ये तत्रापि सङ्केतलक्षणयोः मध्ये यदस्मिन् ग्रन्थे ईश्वरत्वेन सावच्छिन्ना निरवच्छिन्ना वा शक्तिरूपः सङ्केतैकदेशः विस्तार्यते, तस्यैव पदस्य विशेषधर्मत्वेन स्वीकारः ध्वन्यते।

'सङ्केतो लक्षणा चार्थे पदवृत्तिः' इति वाक्येन अवगन्तव्यम् यत् अर्थे पदस्य वृत्तित्वं सङ्केतलक्षणान्यतमेन एकेन सम्बन्धेन एव अस्ति नान्यथा। ग्रन्थारम्भ एव अन्यसम्बन्धव्यवच्छेदेन, ग्रन्थकारः अनतिविलम्बेन ग्रन्थस्य मुख्यविषये शक्त्यात्मकपदपदार्थसम्बन्धे प्राप्तवान्। केचित् आक्षिपन्ति यत्कथं वृत्तेः लक्षणकरणस्य पूर्वमेवास्याः विभागः कृतः इति। परन्तु इदं ध्येयं यत् अयं ग्रन्थः नास्ति शब्दक्रमस्य जिगीषूणां कृते आरम्भिको ग्रन्थः परन्तु विशेषज्ञानां सूक्ष्मावगमनार्थं अयं ग्रन्थः रचितः इति धिया नात्रावश्यकः आसीत् शब्दलक्षणतः सर्वेषां विषयाणां ससन्दर्भः विस्तारः।

क्लृप्तवृत्तिभ्याम् सङ्केतलक्षणाभ्यामेव यत् पदेन प्रतिपाद्यं, तत् पदार्थशब्देन प्रोच्यते। अन्यथा कल्पितेन येन केनापि सम्बन्धेन यदि किमपि वस्तु पदानुयोगिकं वर्तते न तत् तत्पदार्थभूतम् इति सुस्पष्टं सूचितम्। केवलं वृत्तिभेदभूतेन एकेन सम्बन्धेन यत् पदानुयोगिकं तत् तत्पदार्थभूतम्।

भवतु नाम पदपदार्थयोर्मध्ये कश्चित् विशिष्टः सम्बन्धः, परन्तु पदं तु ओष्ठताल्वादिव्यापार–जनितः शब्दविशेषः, पदार्थश्च ब्रह्माण्डगतः द्रव्यगुणादिभूतः, इन्द्रियग्राह्यो अतीन्द्रियो वा नाना। कथन्नाम पदपदार्थयोर्मध्ये सम्बन्धः कल्प्यः?

गौणविषयभूतां लक्षणां परित्यज्य, ग्रन्थकारः सङ्केतं, पदपदार्थसम्बन्धं इच्छारूपं निरूपयति– इदम्पदमिममर्थं बोधयत्विति इच्छा, सङ्केतरूपा वृत्तिः। वस्तुतः कस्यचित् चैतन्यस्य इच्छैव पदपदार्थयोः सम्बन्धं कारयति।

कश्चित् प्रामाणिकः, ईश्वरो वा अप्रतिपन्नं; अनभिज्ञातं वस्तुनं मुखोच्चारितेन पदेन योजयति स्वेच्छया। इयं प्रामणिकी इच्छैव सर्वस्यापि लोकस्य व्यवहारानुकूलं वाक्प्रपञ्चं भावयति। विचारयन्तु, यदि वाक्व्यवहारो न स्यात् तर्हि नूनं इयं सभ्यता, परम्पराः, मनुष्यधर्मो न किञ्चित् स्यात्, सर्वं पशुतुल्यत्वमाप्नुयात् मनुष्यविवेकस्य कश्चित् अवसर एव न स्यात्। धन्याः ते प्रामाणिकाः येषाम् इच्छया सम्भूतपद–व्यवहारेण अयं मनुष्यलोकः, अस्मद्विचारश्च नीयन्ते।

ग्रन्थकारेण पुनः सूच्यते यत् सङ्केतात्मिका इच्छा अपि द्विविधा–परिभाषा शक्तिश्च।

अर्वाचीना इच्छा या पदपदार्थसम्बन्धरूपा सा परिभाषा इति उच्यते। यत्र प्रयोगे इच्छाकर्तुः प्रामाणिकस्य परम्परया साक्षात् वा प्रयोगे ज्ञानमस्ति, तत्र तदर्थबोधकं पदं पारिभाषिकमिति उच्यते। तदाधारेण केवलं संस्कृतस्य गीर्वाणभाषात्वात् तस्य ईश्वरसम्बद्धत्वात् तत्गतपदानां ईश्वरसङ्केतितत्वं सम्भवति। अन्यासां सर्वासामपि भाषाणाम् सर्वाणि पदानि पारिभाषिकानीति वक्तुं शक्यते। एषु दिवसेषु विज्ञानक्षेत्रे, अन्यत्र च अहरहः नवीनानां पदानां प्रयोगाः प्रचलिताः विद्यन्ते। तत्सर्वत्रापि कश्चित् इच्छाकारः, प्रयोगप्रणेता अन्वेष्टुं शक्यः, शक्यतावा। वेदेषु, तद्गतानेकेषु विद्यन्ते यत्र प्रमाणिकैः, अस्मद्गुरुजनैश्च अनादित्वं स्वीकृतम्। तत्र नूनं प्रयोगस्य प्रणेता नान्यः साक्षात् ईश्वर एव। वस्तुतः ईश्वरस्य जगन्नियन्त्रितत्वात्, जगदाधारत्वात्, अस्मत्भूतमन्दधीनां, ईश्वरयन्त्रत्वात्, सर्वोऽपि पदप्रयोगः परम्परया ईश्वरेच्छा जनित एव। तथापि ग्रन्थकारेण इच्छाया साक्षात्कर्तुः आधारात् द्विधा भेदः सूचितः। यत्र ईश्वरस्य साक्षात् इच्छा विद्यते, तत्पदप्रयोगे पदपदार्थयोर्मध्ये सम्बन्धः शक्तिरित्युच्यते। शक्त्या अर्थबोधकं पदं वाचकं इत्युच्यते, शक्त्या पदबोध्यो अर्थः वाच्य इत्युच्यते।

ग्रन्थकारः शक्त्यन्तर्गते वाच्यवाचकादिप्रयोगे यो वच्धातुः वर्तते, तस्य अर्थस्य, तत्सम्बन्धस्य च सूक्ष्मतया विश्लेषणं करोति। इदम्पूर्वमुक्तं यत् इच्छा एव शक्तिरिति। सा इच्छा 'इदं पदं अस्य अर्थस्य बोधजनकं भवतु' इत्याकारिका। तस्मात् ज्ञायते यत् ईश्वरेच्छायां पदे बोधजनकत्वम् अस्ति। 'पदम् अर्थं वक्ती'ति प्रयोगे पदे तादृशेच्छाया बोधजनकत्वनिष्ठप्रकारतानिरूपित– पदनिष्ठविशेष्य–तात्मिका–विषयता वच् धातोः अर्थः अस्ति। पदे या विषयता वर्तते सैव निर्वचनात्मकः वच्धातोः

अर्थः विद्यते। तस्याः विषयतायाः, तादृशधात्वर्थस्य वा अधिकरणं पदं वर्तते। यदि 'पदं गां वक्ति, इत्येतादृशः प्रयोगः–

तत्र धात्वन्तकर्तृप्रत्ययेन धात्वर्थभूतविषयतायाः पदे आश्रयत्वरूपं कर्तृत्वं बोध्यते। 'इदं पदं अमुमर्थं वक्ती'ति वाक्ये वच्धात्वर्थ क्रियाकर्तृत्वं पदे वर्तते। पदशब्दस्य प्रथमाविभक्त्यन्तत्वात् धात्वर्थाश्रयस्य विचारः पदे कृतः। पुनः धात्वर्थस्य एवं अर्थवाचकस्य कर्मप्रत्ययान्तस्य पदस्य मध्ये कः सम्बन्ध इति प्रश्ने कृते, ज्ञापितं यत् धात्वर्थभूत–("ईश्वरेच्छायाः बोधजनकत्वेन विषयता") एकदेशे, बोधे, अर्थविषयकत्वं वर्तते। अर्थवाचकपदेन कर्मप्रत्ययान्तेन पदेन, धात्वर्थभूतविषयताया एकदेशे वच्धात्वर्थभूतक्रियाकर्मत्वं बोध्यते। एवं ग्रन्थकारेण सूक्ष्मेक्षिकता दर्शितम् यत् कथं पदस्य एवं अर्थस्य मध्ये सम्बन्धः इच्छाद्वारा वर्तते। पदे इच्छानिरूपिता विषयता वर्तते एवं अर्थविषयकत्वं तादृशविषयतायाः एकदेशे बोधे अन्वेति।

'गोपदं गां वक्ती'ति प्रयोगे ज्ञापितं यत् गोविषयकबोधजनकत्वं गोशब्दे अस्तीति। या बोधजनकत्वेन पदनिष्ठा विषयता सैव वच्धात्वर्थः एवं तदर्थैकदेशे बोधे गोविषयकत्वमस्तीति ग्रन्थकारायासेन अस्माभिः सुस्पष्टं ज्ञायते।

नैयायिकाः कथं नान्विताभिधानवादिनः?

डॉ॰ महानन्दझा

महामहोपाध्यायश्रीगदाधरभट्टाचार्यविरचितेषु षष्टिवादेषु मध्ये शक्तिवादनामकं ग्रन्थरत्नं विद्वत्समवाये नितान्तं गौरवं ख्यातिञ्च लभते। विदितमेव तत्र भवतां यत्सर्वं हि व्यवहारादिकं शब्दाधीनमेव भवति। स च शब्दः किं कथं च बोधयतीति शब्दखण्डेन निरूप्यते। शब्देऽपि प्रकृतिप्रत्ययभेदेन द्वौ भागौ स्तः। तत्र प्रत्ययार्थस्य निरूपणं व्युत्पतिवादे स्वयमेव श्री गदाधरभट्टाचार्येण विहितम्, प्रकृत्यर्थस्य शक्तेश्च अत्र शक्तिवादे। अस्य च ग्रन्थस्य सामान्यकाण्डविशेषकाण्डभेदेन भागद्वये यथाऽक्रमं सामान्यकाण्डे सामान्यशब्दानां शक्तेर्विचारः अथ च विशेषकाण्डे विशेषशब्दानां शक्तेर्विचारः महता समारम्भेन कृतः।

अस्यां शास्त्रसदसि अन्विताभिधानमालक्ष्य यः अनुच्छेदविशेषः निर्धारितः तस्यैव अंशविशेष-मत्रोपस्थापयामि--तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थिति हेतुतायाः सामान्यत एव क्लृप्ततया वृत्तिज्ञानादन्वयानुपस्थितौ तस्य शाब्दबोधविषयत्वासंभवात् इत्यादिकम्।

तत्र प्रथमतया अन्विताभिधानमालक्ष्यैव किञ्चिदत्र विद्वत्समवाये प्रस्तौमि। मन्ये यत् प्रस्तुति-कालावधौ त्रुटयः सम्भाव्यन्ते ताः संशोध्य विद्वत्कदम्बः, विशेषतः उपस्थिताः अधिमञ्चं विराजमानाः गुरवः मामुद्बोधयिष्यन्ति।

मीमांसकः प्रभाकरः अन्विताभिधानवादी। तदनन्तरमयं वादः तदनुयायिभिः शालिकनाथ मिश्रप्रभृतिभिः बहुधा विवृतः समर्थितश्च। तथैव अभिहितान्वयवादसमर्थकाः कुमारिलभट्टपादाः।

अन्विताभिधानवादाभिहितान्वयवादयोः द्वयोरपि वादयोः आविर्भावस्थलं शाब्दबोधविषयको विचारः। अयं बोधः वाक्यबोधसमनन्तरं जायते इति सर्वानुभवसिद्धम्। वाक्यं च न पदसमूहरूपम् गौरश्वः पुरुषो हस्तीति परस्परं निराकाङ्क्षाणामपि पदानां समूहस्य वाक्यत्वापत्तेः किन्तु परस्पराकाङ्क्षाविशिष्टानां पदानां समूह एव वाक्यम्। अत एव शब्दशक्तिप्रकाशिकाकारः जगदीशः वदति– "मिथः साकाङ्क्षशब्दस्य व्यूहः वाक्यम्" ततश्च एवंविध वाक्यस्य बोधानन्तरं जायमानो बोधः शाब्दबोध इत्यपि जगदीशः स्वीकरोति–

वाक्यभावमवाप्तस्य सार्थकस्यावबोधतः।
सम्पद्यते शाब्दबोधो न तन्मात्रस्य बोधतः॥

अर्थात् सार्थकस्य प्रकृतिप्रत्ययादेः वाक्यतामापन्नस्यैव स्वार्थोपस्थितिद्वाराऽन्वयबोधकत्वम्, न तु प्रत्येकस्य निराकाङ्क्षस्य वा। वाक्यस्य अन्वयबोधकत्वं प्रतिपादयता जगदीशेन शाब्दबोधस्य अन्वयबोधरूपतां स्पष्टतयाऽङ्गीक्रियते। तच्च परस्पराकाङ्क्षाविशिष्टः पदसमूहो वाक्यम् तस्य बोधानन्तरं वृत्तिज्ञानसहकारेण स्वार्थोपस्थितिः, तदनन्तरं तेषामर्थानां परस्परान्वयविषयकः यो हि बोधः भवति स एव अव्यबोधापरपर्यायः शाब्दबोधः। न्यायनये स्वीकृतासु चतसृष्वपि प्रमासु इयं शाब्दबोधीया प्रमा प्रमान्तरविलक्षणा इत्यपि प्रतिपादयमज्जगदीशः स्पष्टं वदति–

साकाङ्क्षशब्दैर्योबोधस्तदर्थान्वयगोचरः।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥

शाब्दबोधेऽन्विताः परस्परं संसृष्टा पदार्थाः भासन्ते। तत्र पदार्थास्तु पदैरेव वृतिज्ञानसहकारेण उपस्थापिताः केवलं तेषां पारस्परिकोऽन्वयः संसर्गः वाक्येन बोध्यमानः अभिनवः। अस्य हि अवभिनस्याभिन्वस्य शाब्दबोधविषयतामवाप्तस्य ज्ञानं कथं भवतीति जिज्ञासायां तत्र द्विविधः समाधानप्रकारः प्रथमस्तावत् पदैरेव अन्वयबोधः द्वितीयः आकाङ्क्षादिबलेन अन्वयबोधः। तत्र पदैरेव ये अन्वयबोधं स्वीकुर्वन्ति ते अन्विताभिधानवादिनः। ये च आकाङ्क्षादिबलेन अन्वयबोधं स्वीकुर्वन्ति ते अभिहितान्वयवादिनः। एवं रीत्या प्रभाकरमते वाक्यार्थबोधं प्रति पदानां कारणत्वम्, भट्टमते च पदार्थज्ञानस्य ज्ञातपदार्थस्य वा कारणत्वमिति स्पष्टं भवति।

इदानीमन्वयस्य आकाङ्क्षाभास्यत्वं प्रतिपादयता गदाधरेण शक्तिवादे उच्यते–अन्विताभिधान-वादिभिः तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिहेतुतायाः सामान्यत एव क्लृप्ततया वृत्तिज्ञानात् अन्वयानुपस्थितौ तस्य शाब्दबोधविषयत्वासम्भवेन अन्वयांशे शक्तिग्रहः शाब्दबोधे अवश्यमपेक्षणीय इति मन्यते। परं नैतदयुक्तम् सामान्यतस्तद्विषयऽशाब्दबोधे वृत्तिज्ञानजन्यतदुपस्थितित्वेन।

विशेष्यविशेषणभावानापन्नत्वेन धेनुपोपस्थितयोः पदार्थ–पदार्थतावच्छेदकयोः पदार्थतावच्छेदक-प्रकारताकपदार्थनिष्ठ विशेष्यताकत्वेन वाक्यार्थमयदया शाब्दबोधापत्तिः स्यात्।

कारणत्वं स्यात्तदा घटघटत्वे घटपदवाच्ये इत्याकारकविशेष्यविशेषणभावरहितवृत्तिज्ञानात् विशेष्यविशेषणभावरहितयोरेव घटघटत्वयोरुपस्थितिशाब्दबोधौ भवतः न तु घटत्वप्रकारकघटविशेष्यकौ इति। अतः तद्धर्मप्रकारकतद्विशेष्यकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतद्धर्मावच्छिन्नाविषयकोपस्थितित्वेनैव-कारणत्त्वं वाच्यम्।

ग्रन्थेऽस्मिन् अन्विताभिधानवादस्य खण्डनं विद्यते नाभिहितान्वयवादस्य। तेन नैयायिकाः अभिहितान्वयवादिनः इति प्रतीयते किन्तु अत्र विचारणीयम् उपस्थितैः विद्वभिः यत् अभिहितशब्देन कोऽर्थः ग्राह्यः यदि हि अभिधवृत्तिमाश्रित्य अयं शब्दः अनुभवात्मकबोधविषयमभिधातुं प्रवृत्तः इति तदा नैयायिकमतानुकूल्ये सत्यपि अभिहितान्वयवादिभट्टमतविरोधः स्यात् अभिधावृत्या पदैरनन्विताना-मर्थानाम् अनुभवात्मकबोधस्य तैः अस्वीकारात्। यदि भट्टभतानुसारम् अभिहितपदं स्मृत्यनुभवविलक्षणबोध-विषयमर्थं स्वीक्रियते तदा नैयायिकानामभिहितान्वयवादित्वं नष्टं भवति, तैः स्मृत्यात्मकबोधस्यैव पदैः स्वीकारात्।

यद्यपि न्यायमञ्जरीकारः जयन्तभट्टः तत्र वदति–

यदि वाक्यस्य वाक्यार्थे व्युत्पत्तिः तदा अन्विताभिधानवादः, पदस्य पदार्थे व्युत्पत्तिः तदा अभिहितान्वय इति तथापि स्पष्टतया उभयोः भट्टनैयायिकयोः कथम् अभिहितान्वयवादित्वं सम्भवति?

एवञ्च नैयायिकाः पदैरनन्वितानां पदार्थानां स्मरणं मन्यमाना अपि तेषामन्वयविशेषस्य निर्धारणं पदैरेव तात्पर्यबलेन पश्चात् भवतीति मन्यन्ते तथा सति नैयायिकाः अपि कथं नान्विताभिधान वादिनः एव स्वीकार्याः?

पदार्थपदार्थैकदेशविमर्शः

एन. आर. श्रीधरन्

घटपदस्य घटे, घटत्वे (घटघटत्वयोः) समवाये च (अर्थात् त्रिषु) शक्तिरिति सिद्धान्तः। किञ्च (नीलो घटः इत्यादौ) पदार्थान्तर (नील) निष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति आश्रयत्वसंबन्धावच्छिन्नबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेनैव (घटनिष्ठ) शक्तिज्ञानं कारणम्। न तु अवच्छेदकत्वसंबन्धावच्छिन्नबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन (घटत्वनिष्ठं) शक्तिज्ञानं कारणमिति च सिद्धान्तः। तथाच "दीर्घो लोमादिमान्" इत्यत्र दीर्घत्वस्य पदार्थान्तरस्य लोमसु (पदार्थैकदेशे) अन्वयो न भवति; यतो हि लोमयु अवच्छेदकत्वेत्याद्युक्तरूपेणैव शक्तिज्ञानस्य सत्त्वात् अर्थात् आश्रयत्वसंबन्धेत्याद्युक्तरूपेण शक्तिज्ञानस्याभावात्। इत्येवं रूपेण "दीर्घो लोमादिमान्" इत्यत्र दीर्घत्वस्य लोमसु अन्वयवारणप्रकारः ज्ञेयः। अपि च यदि आश्रयत्वसंबन्धेत्याद्युक्तरूपेण शक्तिज्ञानं लोनिष्ठं इति भ्रमो भवति, तदा दीर्घत्वस्य लोमसु अन्वयः इष्टएग्व अर्थात् शक्तिभ्रमं विना न पदार्थतावच्छेदके पदार्थान्तरान्वयः इति पूर्वपरिस्थितिः।

अत्र बोधविषयतात्वावच्छिन्नप्रकारतायां आश्रयत्वसंबन्धावच्छिन्नत्वविशेषणानर्थक्यं, पदार्थैकदेशे पदार्थान्तरान्वयवारणप्रकारं च "यत्तु"मतकार एवं वदन्ति–["नीलो घटः" इत्यत्र] पदार्थान्तर [नील] निष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति सङ्केतमुख्यविशेष्यतासंबन्धेन (घटनिष्ठं) शक्तिज्ञानं कारणं इत्येवं कार्यकारणभावः कल्प्यते। तथा च "लोमादिमान् पशुपदाद्बोद्धव्यः" इत्याकारकभगवत्सङ्केते यद्यपि लोम्नां लोमत्वेन रूपेणोपस्थितिरप्यस्ति बोधविषयतानिरूपितविशेष्यतापि लोमसु अस्ति, तथापि लोमसु न सङ्केतमुख्यविशेष्यतामात्रं–अपितु अवयवनिष्ठविशेष्यतानिरूपितप्रकारतापि वर्तते। अतो "दीर्घो लोमादिमान्" इत्यत्र दीर्घत्वस्य न लोमस्वन्वयापत्तिः, किन्तु लोमादिमत्येव एवं च पदार्थान्तरनिष्ठेत्यादिरूपेण शाब्दबोधं प्रति आश्रयत्वसंबन्धावच्छिन्नेत्यादिरूपेण शक्तिज्ञानं कारणं इति यः कार्यकारणभावः कल्पितः, तत्र बोधविषयतात्वावच्छिन्नप्रकारतायां आश्रयत्वसंबन्धावच्छिन्नत्वविशेषणमनर्थकं गौरवग्रस्तस्वात् इति।

"यत्तु"मतखण्डनम्–यदि पदार्थान्तरान्वयं प्रति मुख्यविशेष्यताकशाब्दबोधं प्रति च सङ्केतमुख्यविशेष्यतासंबन्धेन शक्तिज्ञानं कारणं स्यात् तदा "लोम पशुपदजन्यबोधविषयतावच्छेदकं भवतु" इत्याकारकसङ्केतविषयकं यत् अवच्छेदकत्वसंबन्धावच्छिन्नबोधविषयतात्वावच्छिन्नप्रकारतानिरूपित- विषयताश्रयो लोमेति ज्ञान तस्माल्लोमविषयको मुख्यविशेष्यताकः शाब्दबोधएस्यादेव–उक्तसङ्केते लोम्नामेव मुख्यविशेष्यत्वात्, न च उक्तसङ्केतज्ञानात् लोमविषयको मुख्यविशेष्यताकः शाब्दबोधो जायते इति तादृशशाब्दबोधानुदयोपपादनाय तादृशशाब्दबोधविषयत्वप्रकारताया आश्रयत्वसंबन्धावच्छिन्नत्वेन रूपेण

निवेशः कर्त्तव्यः यथा—पदार्थान्तरान्वयं प्रति मुख्यविशेष्यताकशाब्दबोधं प्रति च आश्रयत्वसंबन्धावच्छिन्न-बोधविषयतात्वावच्छिन्नप्रकारता- निरूपितविशेष्यतासंबन्धेन शक्तिज्ञानं कारणमिति।

न च "लोम पशुपदजन्यबोधविषयतावच्छेदकं भवतु" इत्याकारकसङ्केतविषयकात् उक्तज्ञानादपि लोमादिविषयकमुख्यविशेष्यताकशाब्दबोधस्वीकारे न कोऽपि दोष इति वाच्यम्। उक्तसङ्केतविषयकोक्त-ज्ञानस्थले लोमावच्छिन्ना या पशुव्यक्तिस्तद्विशेष्यकबोधस्यैव सङ्केतविषयतया ग्रहेण तादृशसङ्केतग्रहेण पशुव्यक्तिविषयक एव शाब्दबोधो जायते। लोमादिविशेष्यकबोधोत्पत्तेरनुभवविरुद्धतया लोमादिविशेष्यकबोधोत् पत्ताविष्टापत्तिः न संभवतीति।

इत्थं आश्रयत्वसंबन्धावच्छिन्नबोधविषयतायाः पदार्थान्तरान्वयप्रयोजकत्वे च सिद्धे "दीर्घादिपदार्थः पदार्थेन लोमादिमदादिनैवान्वेति न तु पदार्थैकदेशेन लोमादिना" इत्यत्र बोधविषयताश्रयत्वेनैव रूपेण सङ्केतविषयत्वं पदार्थत्वम्; पदार्थैकदेशत्वं च बोधविषयतावच्छेदकत्वेन रूपेण सङ्केतविषयत्वरूपं विज्ञेयं; बोधविषयतावच्छेदकत्वमेव शक्यतावच्छेदकत्वम् इति।

ननु स्वमते लोप पशुपदजन्यबोधविषयत्वनिष्ठावच्छेदकत्वसंबन्धावच्छिन्नप्रकारतानिरूपित-सङ्केतीयमुख्यविशेष्यताकमिति ज्ञानात् लोमांश इतरपदार्थान्वयवारणेपि लोमविशिष्टांश इतरपदार्थान्वयानुपपत्तिः, तदंश आश्रत्वसंबन्धावच्छिन्नप्रकारताकविशेष्यत्वस्याभानात् इति चेत्—

न यतो लोमवतः पशुपदजन्यबोधविषयत्वनिष्ठाश्रयत्वसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्व-प्रकारकज्ञानस्य तज्जन्योपस्थितेश्च सत्त्वे उक्तज्ञानसत्त्वेपि लोमवतीतरपदार्थान्वये बाधकाभावात् तादृशबोधो भवत्येव, तादृशज्ञानजन्यलोमवदनुपस्थितौ तु तत् कारणविरहादेव न तदुत्पत्तिः।

"यत्तु"कारमतेऽपि तादृशोपस्थितिकाले एव दोषो दत्तः इति न कोऽपि दोषः।

ननु तथापि "पशुपदं पशुं बोधयतु" इत्यादिवाचकत्वज्ञानात् पश्वादावितरपदार्थान्वयो न स्यात् तदंश आश्रयत्वसंबन्धावच्छिन्नप्रकारताकविशेष्यत्वज्ञानविरहात् इति चेत्।

न—"अस्माच्छब्दादयमर्थो बोद्धव्य" इति कल्पे एय गदाधरभट्टाचार्यस्य नैर्भर्यं वर्तते। तत्त्वचिन्तामणिशब्दखण्डे मिश्रेण तथैव प्रतिपादितं चास्ति। विषयत्वसंबन्धावच्छिन्नतादृशसङ्केतीयप्रकारता-प्रकारक ज्ञानस्यापि इतरान्वयबोधप्रयोजकत्वकल्पनं च कृतं भवति।

अत्रायं निष्कर्षः—घट—घटत्वसमवायेषु त्रिषु घटपदशक्तिस्वीकारात् घटत्वादिः पदार्थैकदेश एव पदार्थस्तु घटादिरेव। तथा च आश्रयत्वसंबन्धावच्छिन्नबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितभगवदिच्छीय विशेष्यताश्रयः पदार्थः। अवच्छेदकत्वसंबन्धावच्छिन्नबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितभगवदिच्छीय-विशेष्यताश्रयः पदार्थैदेशः इति।

पदवृत्ति से सम्बद्ध गदाधर–दृष्टि

पीयूषकान्तदीक्षितः

[इस निबन्ध में गदाधर द्वारा रचित 'शक्तिवाद' के प्रारम्भिक अंशों का प्रति-पद अनुवाद के साथ-साथ ग्रन्थ के तात्पर्य को सरल रूप में विशद करने का प्रयास, अध्येताओं का ग्रन्थ में प्रवेश कराने की दृष्टि से किया गया है।]

सङ्केतो लक्षणा चार्थे पदवृत्तिः। वृत्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते। इदं पदम्, इमम् अर्थं बोधयतु इति, अस्मात् शब्दात् अयमर्थः बोद्धव्य इति वा इच्छा; सङ्केतरूपा वृत्तिः।

तत्र आधुनिकसङ्केतः परिभाषा; तया च अर्थबोधकं पदं पारिभाषिकं यथा शास्त्रकारादिसङ्केति–तनदीवृद्ध्यादिपदम्।

ईश्वरसङ्केतः शक्तिः; तया च अर्थबोधकं पदं वाचकं; यथा गोत्वादिविशिष्टबोधकं गवादिपदम्, तद्बोध्यः अर्थः गवादिः वाच्यः। स एव मुख्यार्थ इत्युच्यते।

सङ्केत एवं लक्षणा, अर्थ में पद की वृत्ति होती है। वृत्ति के द्वारा पद से प्रतिपाद्य ही, पदार्थ कहा जाता है। 'यह पद, इस अर्थ का बोध कराये' यह; अथवा 'इस पद से यह अर्थ जाना जाय' यह इच्छा; सङ्केत रूप वृत्ति होती है।

वहाँ सङ्केत में भी जो आधुनिकों का सङ्केत होता है वह परिभाषा होता है और इस परिभाषा के द्वारा अर्थ के बोधक पद पारिभाषिक होते हैं, जैसे शास्त्रकार आदि द्वारा सङ्केतित 'नदी' 'वृद्धि' आदि पद।

ईश्वर का सङ्केत, शक्ति नाम से जाना जाता है और इस शक्ति के द्वारा अर्थ के बोधक पद, वाचक होते हैं, जैसे गोत्व आदि से विशिष्ट का बोध कराने वाले गो आदि पद। शक्ति के द्वारा पद से बोध्य अर्थ वाच्य होता है, वह ही (वाच्य अर्थ ही) 'मुख्यार्थ' इस रूप में भी कहा जाता है।

मानव जीवन में हम कई प्रकार के शब्द कानों से सुनते हैं। इनमें से कुछ शब्दों के अर्थ हमें ज्ञात होते हैं तो कुछ शब्दों के अर्थ हमें ज्ञात नहीं होते हैं। कुछ शब्दों के अर्थ तत्काल समझ में आ जाते हैं परन्तु कुछ शब्दों के अर्थ देर से समझ में आते हैं। ऐसा क्यों होता है?

संसार में हम प्रति दिन विभिन्न लोगों से मिलते हैं इनमें से कुछ को देख कर किसी का हम आवश्यक रूप से स्मरण करते हैं पर कई लोगों को देख कर किसी का स्मरण नहीं होता है। क्यों?

सूक्ष्मता से विचार करने पर यह स्पष्ट होता है कि दो व्यक्तियों में जैसे सम्बन्ध विशेष होने के कारण एक व्यक्ति को देखने के अनन्तर दूसरे सम्बन्धी पुरुष का स्मरण होता है वैसे ही शब्द एवं अर्थ में अवश्य कोई विशेष सम्बन्ध होता है जिसके बल पर शब्द विशेष को सुनने के बाद शब्द के दूसरे सम्बन्धी अर्थ का स्मरणात्मक बोध नियम से होता है।

यह सम्बन्ध विशेष शक्ति लक्षणा एवं परिभाषा रूप में शास्त्रकारों द्वारा स्वीकार किया गया है। इस शक्ति, लक्षणा एवं परिभाषा रूप, पद एवं पदार्थ के बीच विद्यमान सम्बन्ध के ज्ञान से ही पदार्थ का स्मरण होता है।

मूल में ''सङ्केतो लक्षणा चार्थे पदवृत्तिः'' इस वाक्य के अन्तर्गत जो 'च' शब्द आया है, उसका अर्थ समुच्चय माना जाता है। यह समुच्चय 'धीविशेषविषयत्व' रूप द्वित्व सङ्ख्या में गतार्थ होता है। यहाँ वृत्ति शब्द का अर्थ शाब्दबोध को उत्पन्न करने वाला सम्बन्ध है। इस वाक्य का अर्थ— अर्थानुयोगिक पदप्रतियोगिक सम्बन्ध सङ्केत एवं लक्षणा दो होते हैं, यह किया जाता है। अथवा अर्थप्रतियोगिक पदानुयोगिक सम्बन्ध सङ्केत एवं लक्षणा भेद से दो होते हैं, यह अर्थ स्वीकार किया जाता है।

कुछ लोग शक्तिवाद ग्रन्थ के इस प्रथम वाक्य का अर्थ विभागपरक है यह नहीं मानते हैं। इन लोगों का मन्तव्य है कि विभागपरक यह वाक्य तभी मान्य हो सकता है जब इस वाक्य के पूर्व वृत्तित्वसामान्य का बोध होता, परन्तु ग्रन्थ में कोई भी ऐसा वाक्य पहले नहीं प्राप्त होता है जिससे सामान्य रूप में वृत्ति का परिचय मिलता हो। फलतः वृत्ति के सामान्य ज्ञान के बिना वृत्ति के विभाग को जानने की इच्छा अध्येता को नहीं हो सकती है। ऐसी स्थिति में यदि वृत्ति के विभाग को जानने की इच्छा सम्भव नहीं है तो वृत्ति का विभाग करना समुचित नहीं माना जा सकता।

शक्तिवाद की यह पङ्क्ति विभाग की प्रतिपादिका है यह इस लिये भी नहीं माना जा सकता है क्यों कि यदि ऐसा होता तो इस ग्रन्थ में शक्ति का निरूपण करने के अनन्तर लक्षणा नामक द्वितीय वृत्ति का निरूपण कहीं न कहीं अवश्य ही किया जाता। यतः इस ग्रन्थ में कहीं भी लक्षणा का निरूपण नहीं है अतः ग्रन्थ की प्रथम पङ्क्ति को विभाग परक कथमपि नहीं स्वीकार किया जा सकता है।

वास्तव में इस प्रथम पङ्क्ति में वृत्ति का विभाग बताया गया है ऐसा न मान कर, शाब्दबोध को उपपन्न करने वाले सम्बन्ध की पदार्थान्तरता या अतिरिक्त पदार्थता का निरास करते हुए न्याय दर्शन में स्वीकृत जो पदार्थ हैं उन्हीं पदार्थों में यह सम्बन्ध अन्तर्भूत है यह तथ्य स्पष्ट किया गया है, ऐसा मानते हैं। इन विद्वानों के अनुसार शक्तिवाद की इस प्रथम पङ्क्ति में 'लक्षणा च' यह अंश दृष्टान्त के लिये है।

परन्तु इन विद्वानों का मत उपयुक्त नहीं है। शाब्दबोध के जनक सम्बन्धत्व के रूप में वृत्ति का सामान्य ज्ञान विभाग से पूर्व मन से सम्भव है तथा यह आवश्यक नहीं है कि विभजनीय पदार्थ का सामान्य ज्ञान शब्द से ही हो। फलस्वरूप मानस सामान्य ज्ञान होने के कारण उपर्युक्त ग्रन्थ विभाग को बताने के उद्देश्य से लिखा गया है यह सुस्पष्ट हो जाता है।

इस ग्रन्थ को विभाग परक मानने पर जो यह प्रश्न किया गया था कि शक्ति के निरूपण के अनन्तर ग्रन्थकार द्वारा ग्रन्थ में दूसरी वृत्ति लक्षणा का भी निरूपण न करने से न्यूनता की आपत्ति होगी, वह प्रश्न भी नहीं किया जा सकता है, क्यों कि ग्रन्थकार द्वारा ग्रन्थान्तर में सङ्केत या शक्ति का निरूपण किया ही गया है। यदि कदाचित् ग्रन्थान्तर में लक्षणा का निरूपण न भी किया जाता तो भी सङ्केत या शक्ति का ज्ञान हो जाने के बाद ''शक्य सम्बन्ध'' स्वरूप लक्षणा का स्वत: ही स्फुट ज्ञान हो ही जाता। फलत: लक्षणा का निरूपण न होने के कारण प्रस्तुत सन्दर्भ में न्यूनता की आशङ्का कथमपि समुचित नहीं है।

शक्ति का ज्ञान न होने की स्थिति में शक्य के सम्बन्ध रूप लक्षणा का ज्ञान भी सम्भव नहीं है, तथा जो पदार्थ अज्ञात है उसे दृष्टन्त रूप में प्रस्तुत नहीं किया जा सकता। फलत: इस ग्रन्थ को विभाग परक न मान कर, शाब्दबोध को उपपन्न करने वाला सम्बन्ध पदार्थान्तर नहीं है, अपितु स्वीकृत पदार्थों में से ही इच्छा नाम के पदार्थ में अन्तर्भूत है ऐसा इस ग्रन्थ की प्रथम पङ्क्ति द्वारा प्रतिपादित हो रहा है, यह मानना तथा इस तथ्य को ही सम्पुष्ट करने के लिये 'लक्षणा च' इस ग्रन्थ के द्वारा दृष्टान्त प्रस्तुत किया जा रहा है यह कहना समुचित नहीं होगा।

इतनी चर्चा से यह सुस्पष्ट होता है कि 'सङ्केतो लक्षणा चार्थे पदवृत्ति:' इस ग्रन्थ के द्वारा वृत्ति का सङ्केत एवं लक्षणा के रूप में विभाग किया गया है। जैसे विधि एवं निषेध के द्वारा शेष कों निषेध एवं अभ्यनुज्ञा रूप फल प्राप्त होता है, वैसे ज्ञात सामान्य धर्म से विशिष्ट का कुछ सङ्ख्या वाले विशेष धर्म के द्वारा कथन अधिक सङ्ख्या से अवच्छिन्न उस पदार्थ का व्यवच्छेद करता है यह व्युत्पत्ति सिद्ध है। इस प्रकार प्रस्तुत ग्रन्थ द्वारा विभाजक धर्म में त्रित्व आदि सङ्ख्या का व्यवच्छेद रूप अर्थ प्राप्त होता है। लेकिन प्रस्तुत सन्दर्भ में वृत्ति का सङ्केत एवं लक्षणा रूप विशेष धर्म से दो प्रकार से उल्लेख सम्भव नहीं है, क्यों कि व्यञ्जना नाम की एक तृतीय वृत्ति भी आवश्यक है। यदि व्यञ्जना नाम की इस वृत्ति को नहीं मानेंगे तो 'मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितम्' इत्यादि श्लोक में परस्पर विभाग जनक क्रिया रूप विकास के मुख में बाधित होने से विस्तृत रूप लक्षित अर्थ का शाब्दबोध होने के अनन्तर मुख में कुसुम के सदृश सौरभवत्ता का अथवा चमत्कृत रमणीयता का बोध अनुभव सिद्ध है; जिसके अपलाप की आपत्ति होगी। ऐसी आशङ्का नहीं करनी चाहिए। मन से ही उन–उन पदार्थों की स्मृति के सहयोग से बोध सम्पन्न हो जायेगा अत: उन पदार्थों का बोध करने के लिये व्यञ्जना वृत्ति की कल्पना अनावश्यक है।

इस प्रकार 'गामानय' इस वाक्य के प्रयोग के अनन्तर उन–उन पदार्थों की उपस्थिति सहकृत मन से ही विशिष्ट बोध हो जाए, शक्ति आदि की भी वृत्ति की रूप में कल्पना क्यों की जाए? यह प्रश्न नहीं करना चाहिए। क्यों जहाँ पर पद से जन्य पदार्थ की उपस्थिति दूसरे सम्बन्ध के ज्ञान से उत्पन्न दूसरे पदार्थ की उपस्थिति रूप है, वहाँ विशिष्ट बोध में वैसे पदार्थान्तर का भान न होने से वाक्य से होने वाले बोध ा को आवश्यक रूप से नियन्त्रित विषयक अर्थात् वृत्ति ज्ञान के कारण पद से होने वाली पदार्थोपस्थित अर्थ ही वाक्य से जन्य बोध में विषय होने के कारण, वाक्य से होने वाले बोध को मानस बोध नहीं माना जा सकता है।

इसी प्रकार व्यञ्जना, स्वरूप सती कारण है अथवा ज्ञाता कारण है? अर्थात् शाब्दबोध में व्यञ्जना का स्वरूप कारण है अथवा ज्ञान का विषय व्यञ्जना कारण है। व्यञ्जना स्वरूप सती कारण है यह प्रथम पक्ष समुचित नहीं है, ऐसा मानने पर ऊपर उदाहरण के रूप में प्रस्तुत पद्य में विद्यमान 'विकसित' आदि पद से सदा सभी व्युत्पन्न पुरुषों को ऊपर प्रदर्शित रूप में शाब्दबोध की आपत्ति होने लगेगी, ऐसा बोध केवल सहृदय मात्र को ही नहीं होनी चाहिए, क्यों कि स्वरूपतः विद्यमान व्यञ्जना में व्युत्पन्न एवं सहृदय की दृष्टि से कोई भेद नहीं होता है। यदि इस आपत्ति को इष्टापत्ति के रूप में स्वीकार करें तो अनुभव विरोध उपस्थित होता है। साथ ही सहज रूप में अप्रतीयमान रूप गूढत्व की वैसी व्यञ्जना में अनुपपत्ति भी होने लगेगी।

व्यञ्जना वृत्ति, ज्ञाता कारण है यह द्वितीय पक्ष भी समुचित नहीं है। क्यों कि शक्ति के ग्राहक व्याकरण, कोश आदि की तरह एवं लक्षणा के ग्राहक प्रत्यक्ष आदि की तरह व्यञ्जना के ग्राहक कौन हैं, यह भी स्पष्ट किये जाने की अनिवार्यता की आपत्ति होने लगेगी। यदि यह कहें कि ज्ञान सामान्य की सामग्री ही व्यञ्जना की ग्राहिका है तो पुनः पूर्व दर्शित दोष वज्र–लेप होगा, अर्थात् ऐसी सामग्री के व्युत्पन्न एवं सहृदय में समान होने के कारण सदा सबको सदृश बोध की आपत्ति असमाहित ही रहेगी।

'सङ्केतो लक्षणा चार्थे पदवृत्तिः' इस वाक्य में यदि अर्थ पद का समावेश न किया जाय तो 'सङ्केतो लक्षणा च पदवृत्तिः' यह वाक्य निष्पन्न होगा। वृत्तित्व का अर्थ शाब्दबोधानुकूल ज्ञान विषय सम्बन्धत्व होता है और यह सम्बन्धत्व जैसे सङ्केत या शक्ति एवं लक्षणा आदि में रहता है वैसे ही शाब्दबोधानुकूल ज्ञान–आकाङ्क्षा आदि का ज्ञान, ले कर इस आकाङ्क्षा आदि के ज्ञान के विषय तत्तत्पदाव्यवहितोत्तरत्व रूप सम्बन्ध में भी रहेगा। फलतः इस अव्यवहितोत्तरत्व रूप सम्बन्ध में वृत्तित्व की आपत्ति का वारण करने के लिये अर्थ यह पद उपर्युक्त वाक्य में अत्यावश्यक है। अर्थ इस पद के निवेश करने के अनन्तर 'अव्यवहितोत्तरत्व' में शाब्दबोधानुकूल ज्ञानविषय सम्बन्धत्व के रहने पर भी अर्थ प्रतियोगिकत्व का अभाव होने से इस सम्बन्ध में वृत्तित्व की आपत्ति निरस्त हो जाती है। 'सङ्केतो लक्षणा चार्थे पदवृत्तिः' इस वाक्य से यदि 'पद' शब्द को हटा दिया जाय तो सङ्केतो लक्षणा चार्थे वृत्तिः' इस प्रकार सम्पूर्ण वाक्य पर्यवसन्न्

होगा। इसके अनुसार 'पचति' इस वाक्य से होने वाले शाब्दबोध का जनक ज्ञान योग्यता का ज्ञान ले कर इस ज्ञान के विषय सम्बन्धत्व—पाकादिप्रतियोगिकानुकूलत्व होने के कारण इस पाकादिप्रतियोगिकानुकूलत्व में भी वृत्तित्व की आपत्ति होने लगेगी। क्यों कि पाकादिप्रतियोगिकानुकूलत्व सम्बन्ध में शाब्दबोधानुकूल ज्ञान विषय पाक रूप अर्थ प्रतियोगिकसम्बन्धत्व स्वरूप वृत्तित्व है। इस आपत्ति का वारण करने के लिये उपर्युक्त वाक्य में 'पद' शब्द का निवेश आवश्यक है। इस प्रकार पाकादिप्रतियोगिकानुकूलत्व सम्बन्ध के पदानुयोगिक न होने के कारण वृत्तित्व की आपत्ति का निरास हो जाता है। पुन: यहाँ कुछ लोग आशङ्का करते हैं कि वृत्तित्व का अर्थ शाब्दबोध का जनक उपस्थिति जनक ज्ञान विषय सम्बन्धत्व करना चाहिए। इसी लिये 'वृत्ति: शाब्दबोधौपयिकोपस्थितिजनक: पदपदार्थयो: सम्बन्ध: कल्प्यते' इस प्रकार शब्दमण्यालोक नामक ग्रन्थ में मिश्र जी के द्वारा कहा गया है। इस प्रकार तत्तत्पदाव्यवहितोत्तरत्व रूप सम्बन्ध में पाकादिप्रतियोगिकानुकूलत्वरूप सम्बन्ध में शाब्दबोधजनक जो उपस्थिति उस उपस्थिति का जनक जो ज्ञान उसकी विषयता के न रहने से इन सम्बन्धों में वृत्तित्व की आपत्ति भी नहीं होती है। फिर भी उपस्थिति स्वरूप आकाङ्क्षा आदि के ज्ञान के जनक वाक्य विषयक अनुभव के विषय अव्यवहितोत्तरत्व आदि में वृत्तित्व की आपत्ति सम्भव है।

शाब्दबोध से निरूपित जो स्मृतित्वावच्छिन्न जनकता उससे निरूपित जो अव्यवहितोत्तरत्व—सम्बन्धावच्छिन्न अवच्छेदकता निरूपित अवच्छेदकतावत् सांसर्गिकविषयतावत्त्व ही वृत्तित्व का स्वरूप है ऐसा कहेंगे तो आकाङ्क्षा ज्ञान आदि में शाब्दबोध के प्रति निश्चयत्व रूप से ही कारणता के होने से उपस्थितित्व रूप से कारणता के न होने से, पूर्व में कहे गये दोष निरस्त हो जाते हैं; तो यह भी मानना उचित नहीं है। क्यों कि ऐसा मानने पर भी वर्ण आदि विषयक शाब्दबोध निरूपित वर्ण विषयक उपस्थितित्वावच्छिन्न जनकता से निरूपित अवच्छेदकता से निरूपित अवच्छेदकता वाली जो 'वर्णपदं शक्तिसम्बन्धेन वर्णवत्' इत्यादि ज्ञानीय वर्ण और वर्णवत्व के सम्बन्ध में रहने वाली सांसर्गिक विषयता तथा इसके आश्रय समवाय आदि में, वृत्तित्व की आपत्ति होगी ही जिसका वारण करने के लिये पूर्वोक्त पद का निवेश आवश्यक है।

वर्णत्व के भी अर्थ पद का अर्थ होने के कारण समवाय के अनैक्य मत में भी अर्थ पद के निवेश करने के बाद भी समवाय आदि में वृत्तित्व की आपत्ति का वारण नहीं हो सकेगा यह आशङ्का नहीं करनी चाहिये क्योंकि अर्थे इस पद का प्रकारतावच्छेदकतावच्छेदकत्वानवच्छिन्न तादृश सांसर्गिक विषय के वृत्तित्व में, तात्पर्य है।

इस प्रकार वैसे ज्ञान से सम्बद्ध जो आनुपूर्वी एवं पद के सम्बन्ध में विद्यमान विषयता, उस विषयता को ले कर वैसे सम्बन्ध में वृत्तित्व की आपत्ति का वारण करने के लिये प्रस्तुत ग्रन्थ के वाक्य में पद शब्द का निवेश किया गया है। इस के वैसी सांसर्गिक विषयता में 'विशेष्यतावच्छेदकता—

वच्छेदकतानात्मकत्व' में तात्पर्य होने के कारण उसका कारण होता है ऐसा प्रतीत होता है। इस प्रकार अर्थे इत्यादि का 'अवच्छेदकतावच्छेदकत्वानवच्छिन्न तादृश सांसर्गिकविषयत्व' यह अर्थ पर्यवसित होता है।

कुछ लोग शाब्दबोध के जनक अर्थ में पद का सम्बन्ध कैसा होता है इस जिज्ञासा से, सम्बन्ध के निरूपण की आवश्यकता मानते हैं। इस जिज्ञासा की निवृत्ति "सङ्केतो लक्षणा चार्थे पदवृत्तिः" इस वाक्य के द्वारा हो जाती है क्योंकि इस वाक्य में अर्थ पद से घटित उद्देश्य बोधक पद से युक्त घटित यह वाक्य है। इस प्रकार इन विद्वानों के मत में अर्थ इस पद का कोई और प्रयोजन है यह मानना तथा उस प्रयोजन के लिये अनुसन्धान करना व्यर्थ है।

कुछ लोग पुनः आशङ्का करते हैं कि सङ्केत एवं लक्षणा के रूप में वृत्ति का विभाजन उपयुक्त नहीं है। क्यों कि शाब्दबोध का नियामक ज्ञान का विषय पद एवं पदार्थों के बीच विद्यमान सम्बन्ध होता है, ऐसा प्राचीन नैयायिकों का अभिमत है। ऐसी स्थिति में पद का अर्थ अर्थात् अभिधेय ही पदार्थ होता है इस व्युत्पत्ति के अनुसार पद का शक्य अर्थ ही पदार्थ के रूप में कहा जाना चाहिए। यदि ऐसा नहीं कहेंगे तो घट आदि में भी पटादि पदार्थता की आपत्ति होने लगेगी। फलतः पद एवं लक्ष्यार्थ के बीच विद्यमान सम्बन्ध में वृत्तित्व नहीं माना जा सकता है, यह पक्ष उपस्थित होने पर गदाधर भट्टाचार्य शक्तिवाद की अगली पङक्ति में पदार्थ किसे कहते हैं यह स्पष्ट कर रहे हैं।

गदाधर भट्टाचार्य के अनुसार 'वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते' इस पङ्क्ति में गदाधर भट्टाचार्य स्पष्ट कर रहे हैं कि इस संसार में जो कोई भी पदार्थ है वह वृत्ति से प्रतिपाद्य ही होता है। इस पदार्थ के लक्षण के अनुसार लक्षणा के द्वारा प्रतिपाद्य जो अर्थ है वह भी पदार्थ के रूप में यदि मान्य है तो उसमें भी 'वृत्ति के द्वारा पद प्रतिपाद्यत्व' गदाधर की दृष्टि से अपेक्षित है और यह तभी सम्भव है जब लक्षणा को भी वृत्ति के रूप में स्वीकार किया जाय। कुछ लोग इस ग्रन्थ को, पदार्थ इस पद के व्यवहार का विषय लोक में क्या होता है, यह बताने के लिये लिखा गया मानते हैं। परन्तु ऐसा मानना उचित नहीं है।

इस ग्रन्थ को सामान्य रूप से पदार्थ इस पद के व्यवहार का विषय क्या है यह बताने के लिये लिखा जाता तो सभी वस्तुओं में पदार्थ पद के व्यवहार की विषयता होने के कारण पदार्थ पद किसी का व्यावर्तक न होने से ग्रन्थ में समाविष्ट वृत्त्या इस तृतीयान्त पद की व्यर्थता होने लगेगी। गगन–कुसुम आदि के अलीक अर्थात् अप्रसिद्ध होने के कारण धर्मी के न मिलने के फलस्वरूप गगन–कुसुम रूप अर्थ में पदार्थ इस पद के व्यवहार की विषयता सम्भव ही नहीं है। यदि इस ग्रन्थ को पद एवं पदार्थ विशेष से घटित जो पदार्थ पद है उस 'पदार्थ' पद के व्यवहार विषय का निर्वचन करने के लिये माना जायेगा तो शक्ति से जलप्रवाह आदि की तरह तथा लक्षणा से तीर आदि की तरह सभी पदार्थों के जलप्रवाह आदि के कालिक आदि सम्बन्ध रूप लक्षणा वृत्ति से नदी आदि पद से प्रतिपाद्य होने के कारण नदी आदि पद

से घटित पदार्थ पद की विषयता होने से पदार्थ पद के अव्यावर्तकता के कारण वृत्त्या इस पद की व्यर्थता का दोष तदवस्थ ही रहेगा।

यदि जिन–जिन अर्थों में आधुनिक देवदत्त आदि पदों का तात्पर्य (किसी भी पुरुष को) ज्ञात नहीं होता है , उन–उन अर्थों में उन–उन पदों के द्वारा प्रतिपाद्यत्व सम्भव होने से उन–उन पदों से घटित 'पदार्थ' इस पद के व्यवहार का वारण करने के लिये गदाधर ने वृत्त्या यह पद दिया है ऐसी भी आशङ्का नहीं करनी चाहिए। उन–उन पदार्थों में उन–उन पदों का तात्पर्य आदि न होने के कारण ही शाब्दबोध न होने के फलस्वरूप किसी प्रकार की आपत्ति न होने से वृत्त्या इस पद का वैयर्थ्य रहेगा ही। वृत्ति के स्वरूप आदि का निरूपण करने के प्रसङ्ग में 'पदार्थ' इस पद के व्यवहार के विषय का निर्वचन सर्वथा अनाकाङ्क्षित होता है और ऐसे अनाकाङ्क्षित अर्थ का निरूपण यदि गदाधर इस पङ्क्ति में कर रहे हैं तो अर्थान्तर की आपत्ति होगी ही। 'करना कुछ अभीष्ट हो तथा हो कुछ और जाय' तो उसे अर्थान्तर कहते हैं। जैसे मिट्टी से कोई भगवान् गणपति की मूर्त्ति बनाना चाहता हो और वानर की मूर्त्ति बन जाय तो यह लोक में अर्थान्तर माना जाता है। इसी तथ्य को संस्कृत में इस प्रकार कहा गया है– ''विनायकं प्रकुर्वाणः रचयामास वानरम्''।

इतनी चर्चा से घट आदि पद में गगन आदि के समवेतत्व आदि सम्बन्ध से सम्बद्ध होने का ज्ञान होने से गगन आदि की उपस्थिति होने के अनन्तर गगन को विषय करने वाला शाब्दबोध होने लगेगा, जिसका निवारण करने के लिये गदाधर ने प्रस्तुत ग्रन्थ में वृत्त्या इस पद का समावेश किया है ऐसा कुछ विद्वानों का मत भी विखण्डित हो जाता है। पद विशिष्ट से जन्य शाब्दबोध के प्रति वृत्त्या इत्यादि वाक्य (वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते) के प्रतिबन्धक न होने से भी उपर्युक्त विद्वानों का अभिमत निरस्त हो जाता है।

वृत्ति के द्वारा पदप्रतिपाद्य ही पदार्थ कहा जाता है। वृत्ति का अर्थ है सङ्केत एवं लक्षणा दोनों में से कोई एक सम्बन्ध। इस प्रकार सङ्केत एवं लक्षणा नामक सम्बन्ध से पद के द्वारा प्रतिपादित अर्थ ही पदार्थ है यह तथ्य स्पष्ट हो जाता है। पदार्थ के सम्बन्ध में यह धारणा प्राचीन नैयायिकों की है। सम्बन्ध वही होता है जो प्रतियोगी वाला होता है अर्थात् सप्रतियोगिक होता है। जो पदार्थ निष्प्रतियोगिक होता है अर्थात् बिना प्रतियोगी का होता है, वह सम्बन्ध हो ही नहीं सकता है यह तार्किकों का अभिमत है। ऐसी स्थिति में इच्छा स्वरूप सङ्केत को जिसका कोई प्रतियोगी नहीं होता है, संसर्ग कैसे माना जा सकता है, अथवा घट पद का सङ्केत घट में है पट में नहीं है, यह नियम भी कैसे बनाया जा सकता है। क्यों कि ईश्वर की इच्छा तो सभी विषयों के प्रति समान ही होती है। इस प्रकार के प्रश्नों का समाधान करने की दृष्टि से गदाधर भट्टाचार्य ने इस इच्छा को विषय विशेष से घटित होने के कारण सप्रतियोगिक एवं घट पद का सङ्केत घट रूप अर्थ में ही होने का नियामक बताया है। 'यह पद इस अर्थ को बताये' इस प्रकार की ईश्वरेच्छा शक्ति है। संस्कृत में 'इदं पदम् इमम् अर्थं बोधयतु' यह ईश्वर की इच्छा का आकार होता है। यहाँ पर 'बोधयतु'

पद में विद्यमान 'णिच्' प्रत्यय का अर्थ बोध में अन्वित होने वाला जनकत्व माना जाता है। फलतः एतत् पद विशेष्यक जो एतत् पदार्थ विषयक बोधजनकत्व प्रकारक इच्छा, वही 'इदं पदम् इमम् अर्थं बोधयतु' इस प्रकार के वाक्य के द्वारा बोधित होती है। जैसे पदविशेष्यक इच्छा शक्ति के रूप में स्वीकार्य है वैसे ही अर्थ विशेष्यक इच्छा भी शक्ति है यह मानना पड़ेगा, क्यों कि पद विशेष्यक इच्छा ही शक्ति है अर्थ विशेष्यक इच्छा शक्ति नहीं है; इस प्रकार मात्र एक पक्ष को स्वीकार करने में कोई युक्ति अर्थात् विनिगमना नहीं है। इसी लिये गदाधर भट्टाचार्य ने "अस्मात् शब्दात् अयमर्थो बोद्धव्यः" इस प्रकार की अर्थ विशेष्यक इच्छा को भी सङ्केत रूप वृत्ति माना है। इस अर्थ विशेष्यक इच्छा के बोधक वाक्य में 'शब्दात्' इस पद में जो पञ्चमी विभक्ति है, उसका अर्थ जन्यत्व माना जाता है। और इस जन्यत्व का अन्वय इस वाक्य में आगे आये 'बोद्धव्य' इस पद में विद्यमान जो 'बुध्' धातु, उसके अर्थ बोध में होता है। बोद्धव्य इस पद में 'तव्य' प्रत्यय का अर्थ विषय रूप कर्म होता है। इस प्रकार इस वाक्य से 'एतत् शब्द जन्य बोध विषयत्व प्रकारक अर्थ विशेष्यक इच्छा' का लाभ होता है।

यहाँ यह विशेष रूप से समझना चाहिए कि जहाँ पर एक प्रकार के सङ्केत को ही स्वीकार करने के लिये युक्ति अर्थात् विनिगमना है वहाँ पद से शाब्दबोध को उत्पन्न करने में एक प्रकार का सङ्केत ही प्रयोजक होता है। जैसे 'पुष्पवन्त' आदि पद में पदविशेष्यक सङ्केत ही शाब्दबोध में उपयोगी माना जाता है। 'पुष्पवन्त' पद में एक ही शक्ति होती है जिसके बल पर 'पुष्पवन्त' पद दिवाकर एवं निशाकर का बोध कराता है। दिवाकर का अर्थ होता है सूर्य तथा निशाकर का अर्थ होता है चन्द्रमा। प्रसङ्गानुसार एक ही पुष्पवन्त पद कभी सूर्य का तो कभी चन्द्र का बोध कराता है। इसी प्रकार जिस जगह पद विशेष्यक एवं अर्थ विशेष्यक सङ्केत नहीं होते हैं वहाँ पर शाब्दबोध को उत्पन्न करने वाला सङ्केत बोध आदि विशेष्यक भी मान लिया जाता है। इस सन्दर्भ में 'तत्' आदि पद उदाहरण के रूप में प्रसिद्ध हैं।

परिभाषा की चर्चा करते हुए गदाधर भट्टाचार्य कहते हैं कि 'आधुनिकों का सङ्केत' ही परिभाषा नाम की वृत्ति है। इस आधुनिक सङ्केत रूप परिभाषा के द्वारा किसी भी अर्थ का बोध कराने वाला पद पारिभाषिक पद माना जाता है। इस सन्दर्भ में उदाहरण प्रस्तुत करते हुए गदाधर भट्टाचार्य, व्याकरण शास्त्र के रचयिता पाणिनि द्वारा परिभाषित 'नदी' 'वृद्धि' आदि पद का उल्लेख करते हैं। इस ग्रन्थ के आधार पर यह स्पष्ट होता है कि सङ्केत का भी शक्ति एवं परिभाषा रूप में दो विभाग है। इस चर्चा से सभी सङ्केत शक्ति है तथा उभयावृत्ति धर्म से अवच्छिन्न सङ्केत रूप शक्ति विशेष ही परिभाषा है, यह मत गदाधर भट्टाचार्य को अभिप्रेत नहीं है यह भी सूचित होता है।

यदि यहाँ कोई सन्देह करे कि आधुनिक सङ्केत परिभाषा पद का अर्थ है यह नहीं कह सकते हैं क्यों कि उभय में अवृत्ति धर्म से अवच्छिन्न सङ्केतवत् पद ही पारिभाषिक होता है तथा इस पद के सङ्केत को ही परिभाषा माना जाता है, तो ऐसी आशङ्का नहीं करनी चाहिए क्यों कि ऐसी परिभाषा द्वारा अर्थ के बोधक पद को निर्विवाद रूप में पारिभाषिक माना जाता है। इस प्रकार उपर्युक्त मत सिद्धान्त विशेष में सिद्ध

होने के कारण इस मत में दोष का उद्भावक नहीं हो सकता है। परिभाषा के द्वारा जाना जाने वाला अर्थ पारिभाषिक या पारिभाष्य माना जाता है।

शक्तिवाद में गदाधर ने 'ईश्वर सङ्केतः शक्तिः' इस रूप में शक्ति का निर्वचन किया है। यहाँ पर ईश्वर यह पद नित्यता का परिचायक है। फलस्वरूप 'नित्य सङ्केत' ही शक्ति है यह इस वाक्य का अर्थ प्रतिफलित होता है। इस वाक्य का ऐसा अर्थ स्वीकार करने के कारण ईश्वरत्व; नित्यज्ञानवत्त्व या जगत्कर्तृत्व रूप है, फलस्वरूप नित्यज्ञानवत्व या जगत्कर्तृत्व से घटित सङ्केतत्व को वच् आदि धातु के शक्यतावच्छेदक के रूप में स्वीकार करने पर बड़े गौरव की आपत्ति होती है; जिसका निवारण करने के लिये 'नित्य सङ्केतः शक्तिः' यह कथन ही समुचित है, इस प्रकार का विवेचन भी अनावश्यक सिद्ध होता है। यदि 'ईश्वर सङ्केतः शक्तिः' इस कथन का तात्पर्य 'नित्य सङ्केतः शक्तिः' इस अर्थ में है तो शक्तिवाद में आगे चल कर 'न चेश्वरीयत्वमनुपादेयमेव' इस प्रकार गदाधर का कथन विरुद्ध होगा, क्यों कि जब आरम्भ में ईश्वरीयत्व का अर्थ नित्यत्व कर दिया तो आगे चलकर वह ईश्वरीयत्व अनुपादेय है यह कथन परस्पर दोनों ग्रन्थों का विरोध ही है परन्तु इस प्रकार के विरोध की आशङ्का ठीक नहीं है, क्योंकि इस ग्रन्थ में ईश्वरीयत्व का तात्पर्य नित्यत्व में ही है। इस प्रकार नित्य सङ्केत रूप शक्ति के द्वारा अर्थ का बोध कराने वाला जो पद होता है उसे वाचक कहते हैं। उदाहरणार्थ— गोत्व आदि से विशिष्ट अर्थ का बोध कराने वाला 'गो' आदि पद वाचक होता है और इस प्रकार के 'गो' आदि पद से बोध्य जो गो आदि अर्थ होता है उसे वाच्य कहते हैं। इस वाच्य अर्थ को ही मुख्यार्थ भी कहा जाता है।

वाच्यवाचकादिपदे ईश्वरेच्छाया बोधजनकत्वेन या विषयता सैव धात्वर्थः; तस्या आश्रयत्वरूपं कर्तृत्वं पदे कर्तृप्रत्ययेन बोध्यते पदं गां वक्ति, गां ब्रूते, गोर्वाचकमित्यादौकर्मप्रत्ययान्तेनार्थवाचकपदेन तत्तदर्थविषयकत्वरूपतत्तत्कर्मकत्वं धात्वर्थैकदेशे बोधे बोध्यते; पदेन गौरुच्यते, पदस्य गौर्वाच्य इत्यादौ पदनिष्ठधात्वर्थीभूततादृशविषयतायाः परम्परया निरूपकत्वं तच्च धात्वर्थीभूततादृशविषयतानिरूपक–बोधजनकत्वप्रकारतान्तःपातिबोधनिष्ठविषयतानिरूपकविषयितासम्बन्धावच्छिन्नप्रकारताश्रयत्वरूपं तादृशक्रियाकर्मत्वं गवादौ कर्मप्रत्ययेन बोध्यते।

'वाच्य' एवं 'वाचक' आदि पद में ईश्वरेच्छा की बोध जनकत्व रूप से जो विषयता है वही 'वच्' धातु का अर्थ है। इस विषयता का आश्रयत्व रूप कर्तृत्व, पद में, कर्त्ता में हुए प्रत्यय (कर्तृप्रत्यय) से बताया जाता है। पदं गां वक्ति, पदं गां ब्रूते, पदं गोर्वाचकम्; इत्यादि उदाहरणों में कर्मप्रत्ययान्त (कर्मप्रत्यय है अन्त में जिसके ऐसा पद) अर्थ वाचक पद से, तत्तद् अर्थ विषयकत्व रूप तत्तत्कर्मकत्व, धातु के अर्थ के एक देश बोध में ज्ञात होता है।

पदेन गौः उच्यते, पदस्य गौः वाच्यः, इत्यादि उदाहरणों में पद में रहने वाली धात्वर्थ रूप वैसी विषयता का (ईश्वरेच्छा की बोध जनकत्व रूप से विषयता के) परम्परा सम्बन्ध से निरूपकत्व, जो धात्वर्थ

भूत बोध जनकत्वनिष्ठ प्रकारता निरूपित विशेष्यता निरूपक बोध जनकत्व प्रकारता के भीतर रहने वाली बोध निष्ठ विषयता उस विषयता का निरूपक विषयित्वसम्बन्धावच्छिन्न जो बोध निष्ठ प्रकारता उस प्रकारता का आश्रयत्व रूप तादृश क्रियाकर्मत्व गो आदि पदार्थ में कर्म–प्रत्यय (त) से बताया जाता है।

उपर्युक्त शक्तिवाद ग्रन्थ के 'वाच्यवाचकादिपदे' इस शब्द मे आयी सप्तमी विभक्ति का अर्थ घटकत्व माना जाता है, और इस घटकत्व का धात्वर्थ इस पद के घटक धातु में अन्वय होता है। वाच्यवाचकादिपदे के बाद 'ईश्वरेच्छाया:' यह जो पद ग्रन्थ में आया है इस पद में विद्यमान षष्ठी विभक्ति का अर्थ निरूपितत्व मान जाता है। 'बोधजनकत्वेन' इस पद में जो तृतीया विभक्ति है उसका प्रकारता निरूपितत्व रूप वैशिष्ट्य अर्थात् सम्बन्ध अर्थ होता है और दोनों का अन्वय 'विषयता' इस पद के अर्थ में होता है। इस प्रकार ईश्वरेच्छा से निरूपित जो बोधजनकत्व निष्ठ प्रकारता से निरूपित विषयता वही 'वाच्य' 'वाचक' आदि पदों के घटकीभूत 'वच्' आदि धातु का अर्थ होता है। यह शाब्दबोध ''वाच्यवाचकादिपदे ईश्वरेच्छाया: बोधजनकत्वेन या विषयता सैव धात्वर्थ:'' इस ग्रन्थ से होता है। 'तस्या:' इस पद का अर्थ, वच् धातु के अर्थ तादृश विषयता का, यह माना जाता है। 'कर्तृत्वं' इस पद का, कर्त्तृविहित प्रत्यय से विवक्षित है, यह अर्थ किया जाता है। पुन: अगले शब्द 'पदे' में जो सप्तमी विभक्ति है उसका अर्थ विशेष्यत्व माना जाता है। इस विशेष्यत्व का अन्वय 'बुध्' धातु के अर्थ 'बोध' में माना जाता है। पुन: इस विशेष्यत्व का पारतन्त्र्येण अख्यात के अर्थ प्रकारता में भी अन्वय होता है। कर्माख्यात का अर्थ प्रकारत्व कर्त्तृत्व में अन्वित होता है। इस प्रकार वैसी विषयता से निरूपित आश्रयत्व स्वरूप कर्त्तृप्रत्यय के द्वारा विवक्षित पदनिष्ठ विशेष्यता से निरूपित कर्त्तृप्रत्यय से जन्य बोध की प्रकारता का आश्रय है ऐसा शाब्दबोध होता है। इस वाक्य में आया आश्रयत्व रूप यह पद उपलक्षण है। ऐसा मानने से कर्त्तृविहित कृत्याश्रय रूप कर्त्ता का बोध होने पर भी कोई क्षति नहीं होती है। 'कर्मप्रत्ययान्तेन' इसका अर्थ गां इत्यादि पद से करना चाहिए। आगे पुन: 'बोधे' इस पद में जो सप्तमी विभक्ति है उसका अर्थ विशेष्यत्व मानते हैं और इस विशेष्यत्व का बोध्यते इस पद में आये बुध् धातु के अर्थ में अन्वय होता है। इस प्रकार पदं गां वक्ति, इत्यादि वाक्य से ''गो विषयक बोधजनकत्वप्रकारता निरूपित ईश्वरेच्छीयविषयताश्रयत्ववत् पदम्'' इत्यादि रूप में अन्वय बोध अर्थात् शाब्दबोध होता है। पुन: आगे समागत 'तच्च' इस पद का अर्थ ''तादृशविषयताया: परम्परया निरूपकत्वञ्च'' इस प्रकार करना चाहिए। इस वाक्य में समाविष्ट 'तादृश' शब्द का अर्थ ''बोधजनकत्वनिष्ठप्रकारतानिरूपित ईश्वरेच्छीय'' यह किया जाता है। 'बोधजनकत्वप्रकारता' का अर्थ ''बोधजनकतात्वावच्छिन्नप्रकारता'' करते हैं। यहाँ कुछ लोग सन्देह करते हैं कि जनकत्वप्रकारता यह कहने से ही सब कुछ चरितार्थ होने से बोध यह पद व्यर्थ है। इस आशङ्का का समाधान करते हुए कुछ लोग प्रस्तुत सन्दर्भ में बोध यह पद सम्पात से समाविष्ट हो गया है ऐसा कहते हैं। इस सन्दर्भ में कुछ अन्य लोगों का मानना है कि जनकत्व ''नियताव्यवहितपूर्ववर्त्तित्वरूप'' होता है और यह नियत पूर्व अव्यवहितपूर्ववर्त्तित्व सामान्य रूप से अप्रसिद्ध होता है। फलत: 'बोध' इस पद का समावेश अत्यावश्यक

है। पुनः अग्रिम मूल ग्रन्थ में ''तादृशप्रकारतान्तःपातित्व'' यह पद आया है जिसका अर्थ ''तादृशप्रकारतात्वावच्छिन्न– विशेष्यतानिरूपकत्व'' करते हैं। इस सन्दर्भ में कुछ लोग 'तादृश अन्तःपातित्व' का अर्थ तादृशप्रकारताव्यापकत्व बोधाव्यवहितपूर्ववर्त्तित्वप्रकारताव्यापकत्व बोधविषयता में अक्षत है ऐसा करते हैं।

इस प्रकार 'पदेन गौः उच्यते' इस वाक्य में स्थित 'पदेन' इस पद में विद्यमान तृतीयादि विभक्ति का अर्थ वृत्तित्व माना जाता है जिसका अन्वय धातु के अर्थ ऊपर चर्चित विषयता में होता है। इस प्रकार पद– निष्ठ जो बोधजनकत्वनिष्ठ प्रकारता से निरूपित ईश्वरेच्छीय विशेष्यता इस विशेष्यता का निरूपक जो जनकत्वनिष्ठ प्रकारतान्तःपाति बोध निष्ठ विषयता इस विषयता का निरूपक विषयत्वसम्बन्धावच्छिन्न यद्विषयत्व उस विषयता का आश्रय गौ है इस प्रकार 'पदेन गौः उच्यते' इस वाक्य से शाब्दबोध होता है।

'पदस्य गौः वाच्यः' इत्यादि वाक्य से तो ''पदनिष्ठ जो बोधजनकत्वप्रकारताक ईश्वरेच्छीय विशेष्यता तन्निरूपक जनकत्वनिष्ठ विषयत्वावच्छिन्न विषयता निरूपक विषयत्वसम्बन्धावच्छिन्न विषयताश्रयाभिन्ना गौः'' इस प्रकार का अन्वय बोध या शाब्दबोध होता है।

द्वितीयेच्छायाः सङ्केतरूपत्वे वैपरीत्यमूह्यमिति न्यायसिद्धान्तः।

द्वितीय इच्छा के अर्थात् 'अस्मात् पदात् अयमर्थो बोद्धव्यः' इस प्रकार की ईश्वर की इच्छा को सङ्केत या शक्ति रूप मानने पर वैपरीत्य की ऊहा (तर्क) स्वयं कर लेनी चाहिए यह न्याय दर्शन का सिद्धान्त है।

इस दूसरी इच्छा के अनुसार 'पदं गां वक्ति' इस वाक्य में आये 'वच्' धातु का अर्थ 'जन्य बोधविषयत्व निष्ठ प्रकारताक इच्छीय विशेष्यता' ही होगा। 'वैपरीत्यम् ऊह्यम्' इसका तात्पर्य है कि वैसी विशेष्यता के परम्परा सम्बन्ध से निरूपकत्व रूप कर्तृत्व वैसी विशेष्यता के निरूपक 'विषयत्व निष्ठ प्रकारत्वावच्छिन्न विशेष्यता निरूपक बोध निष्ठ प्रकारत्वावच्छिन्न विशेष्यता निरूपक जन्यतासम्बन्धावच्छिन्न प्रकारताश्रयत्व' रूप अर्थ कर्तृ प्रत्यय से (कर्त्ता में किये गये प्रत्यय से) बोधित होता है। वैसी विशेष्यताश्रयत्व रूप कर्मत्व कर्म प्रत्यय से बोधित होता है ऐसा आशय समझना चाहिए।

मूल ग्रन्थ में जो न्याय सिद्धान्त पद आया है उसका तात्पर्य न्याय के ग्रन्थकारों द्वारा अभ्युपगत अर्थ मानना चाहिए।

अत्र मीमांसकानुयायिनः – अपभ्रंशादपि शक्तिभ्रमेणार्थप्रत्ययात् सन्मात्रविषयके भगवत्सङ्केते तस्यापि बोधकत्वेन विषयत्वमिति नैयायिकैरभ्युपगमात् तस्यापि वाचकत्वं साधुत्वञ्च स्यात्?

एवं लाक्षणिकगङ्गादिपदस्योक्तयुक्त्या तीरादिवाचकत्वापत्ति:?

यत्तु तादृशेच्छया भगवदुच्चरितत्वं वाचकत्वम्, अपभ्रंशादयश्च नार्थप्रत्यायनेच्छया भगवदुच्चरिता इति नातिप्रसङ्ग इति।

तन्न—अस्मदुच्चरितपदेष्वव्याप्त्यापत्ते:, तज्जातीयत्वनिवेशेऽपि वेदस्थलाक्षणिकेष्वतिव्याप्ते: सादिदेवदत्तादिपदेऽव्याप्तेश्च द्वादशेऽह्नि पिता नाम कुर्यादिति वेदे नामपदस्य देवदत्तादिपदपरत्वेऽपि देवदत्त इत्यादिस्वरूपाणां भगवदनुच्चरितत्वात्।

शक्ति पद का अर्थ क्या है? इस सम्बन्ध में मीमांसकों के अनुयायी मानते हैं कि अपभ्रंश शब्द से भी शक्ति भ्रम से अर्थ का प्रत्यय होने के कारण भगवान् के सङ्केत अर्थात् इच्छा के सत् मात्र विषयक होने के कारण बोधकत्व रूप से विषयता अपभ्रंश में भी नैयायिकों द्वारा स्वीकार करने से अपभ्रंश के भी वाचकता अथवा साधुता की आपत्ति होगी। इसी प्रकार लाक्षणिक गङ्गादि पद के भी उपर्युक्त युक्ति से तीर आदि के वाचकता की आपत्ति होगी।

यत्तु मत को मानने वाले कुछ लोग वैसी इच्छा से अर्थात् ''वैसे बोध की इच्छा से भगवदुच्चरितत्व'' ही वाचकत्व है ऐसा मानते हैं। अपभ्रंश आदि पद तो अर्थ बोध कराने की इच्छा से भगवदुच्चरित नहीं होते हैं, अत: अपभ्रंश आदि पद में वाचकता का अतिप्रसङ्ग सम्भव नहीं है।

परन्तु यह कुछ लोगों का अभिमत समीचीन नहीं है,क्यों कि हम लोगों द्वारा उच्चरित पदों में भगवदुच्चरितत्व रूप वाचकत्व का समन्वय न होने से अव्याप्ति की आपत्ति होने लगती है। यदि ये लोग अव्याप्ति का निवारण करने के लिये वाचकत्व का अर्थ भगवदुच्चरित सजातीयत्व करेंगे तो अव्याप्ति का वारण तो अवश्य हो जायेगा परन्तु इस प्रकार तज्जातीयत्व का निवेश करने पर भी वेद में स्थित लाक्षणिक पदों में अतिव्याप्ति की आपत्ति होने लगेगी। इसी प्रकार सादि अर्थात् आदिमान् देवदत्त आदि पद में अव्याप्ति की भी आपत्ति होगी। यद्यपि ''द्वादशेऽह्नि पिता नाम कुर्यात्'' इत्यादि वेद में आये नाम पद के देवदत्त आदि देवदत्त आदि नाम परक होने पर भी देवदत्त आदि स्वरूप के भगवदनुच्चरित होने के कारण भगवदुच्चरितत्व या भगवदुच्चरितसजातीयत्व रूप वाचकत्व की अव्याप्ति स्पष्ट ही है। इसी प्रकार ईश्वर सङ्केत को शक्ति मानने पर जो लोग ईश्वर को नहीं मानते हैं उनके मत में शाब्दबोध की अनुपपत्ति होने लगेगी। फलत: शाब्दबोध की उपयोगिता में ईश्वरीयत्व नहीं ही देना चाहिए। ऐसा करने से आधुनिकों के सङ्केत ज्ञान से भी शाब्दबोध की उपपत्ति होती है तथा आधुनिक सङ्केत में ही वृत्तिता का निर्वाह हो जाता है।

''अत्र मीमासकानुयायिन:'' इस ग्रन्थ का कुछ आगे कहे गये 'वदन्ति' इस पद के साथ अन्वय या सम्बन्ध करके सम्पूर्ण ग्रन्थ का अर्थ समझना अपेक्षित है। शक्ति नामक पदार्थ पद एवं पदार्थ से अतिरिक्त

सम्बन्ध रूप है ऐसी स्थापना करने से पूर्व चर्चित न्याय मत में दोष दिखाते हुए 'अपभ्रंशादपि' इत्यादि ग्रन्थ का अवतरण होता है। 'अपभ्रंशात्' शब्द का अर्थ है– शक्ति से रहित होते हुए लोक व्यवहार के अधीन ज्ञात शक्ति वाले गाच माच (गाछ माछ, सम्भवतः यहाँ गाछ का अर्थ वृक्ष एवं माछ का अर्थ मछली है) आदि शब्द।

भगवत् सङ्केत सन्मात्र विषयक होता है यहाँ पर मात्र शब्द का अर्थ कात्स्न्र्य अर्थात् समग्र होता है। इस प्रकार वस्तुत्व की व्यापक विषयता के निरूपक भगवत् सङ्केत रूप अर्थ का लाभ प्रस्तुत सन्दर्भ में होता है। ग्रन्थ में 'सङ्केते' इस शब्द में जो सप्तमी विभक्ति है उसका अर्थ विषयता में अन्वित होने वाला निरूपितत्व माना जाता है।

अग्रिम ग्रन्थ में आये 'अभ्युपगमात्' इस वाक्य का अर्थ अवश्यं स्वीकरणीयत्वात् करते हैं, अर्थात् अपभ्रंश शब्द में बोध विषयता का अपह्नव अर्थात् निरास अशक्य है। यहाँ यह आशङ्का होती है कि अपभ्रंश शब्द को वाचक मान लेने पर क्या क्षति है? जिसका समाधान करते हुए साधुत्वञ्च इस शब्द का उल्लेख किया गया है। साधुत्व शब्द का अर्थ 'शक्तिभ्रमानधीनशाब्दबोधजनकत्व' माना जाता है, अर्थात् बिना शक्तिभ्रम के जो शाब्दबोध को पैदा करते हैं वे शब्द ही शाब्दबोध कहे जाते हैं। कुछ विद्वानों के अनुसार साधुत्व का अर्थ व्याकरण निष्पादितत्व होता है अर्थात् इनलोगों के मत में जो शब्द व्याकरण शास्त्र के द्वारा निष्पन्न या व्युत्पन्न होते हैं उनमें ही साधु शब्द का व्यवहार होता है। इस प्रकार 'साधुभिर्भाषितव्यम्' साधु शब्दों के द्वारा ही भाषण करना चाहिए इत्यादि विधि विषयत्वेन यज्ञ के अनुष्ठान में साधु शब्दों का प्रयोग करने से अनिष्ट नहीं होगा और प्रायश्चित्त विधि का वैफल्य भी नहीं होगा। अपभ्रंश को वाचक मान लेने पर जैसे अपभ्रंश के साधुत्व की आपत्ति होती है वैसे ही गङ्गा आदि पदों में तीर आदि मुख्य अर्थ की वाचकता की आपत्ति होने से लक्षणा मात्र के समुच्छेद का भी प्रसङ्ग होता है। फलस्वरूप अपभ्रंश में वाचकता को मानना कथमपि सम्भव नहीं है।

'यत्तु' इत्यादि ग्रन्थ से मिश्र के मत को दूषित करने का उपक्रम किया जा रहा है। यहाँ पर तादृशेच्छया का अर्थ 'अस्मात् शब्दात्, अयमर्थो बोद्धव्यः' इत्याकारकेच्छया है, अर्थात् तादृशेच्छा शब्द से 'इस शब्द से इस अर्थ को जाना जाना चाहिए' इस प्रकार की इच्छा को समझना चाहिए। इस प्रकार जैसे शब्द से जन्य बोधविषयत्व निष्ठ प्रकारता से निरूपित जिस–जिस अर्थ में रहने वाली विशेष्यता के निरूपक इच्छा से भगवान् के द्वारा उच्चरितत्व अर्थात् भगवदुच्चरितत्व, जिन–जिन पदों में है उन–उन पदों को उस–उस अर्थ का वाचक माना जायेगा। ऐसा मानने से घट आदि शब्द में पट आदि अर्थ के वाचकता की आपत्ति नहीं होगी, और न ही 'गाच' शब्द, जो गम् अञ्चतीति अर्थ में क्विप् प्रत्यय करने पर निष्पन्न गणपति प्रापक आदि अर्थ का बोधक होता है; उसमें वृक्ष रूप अर्थ के वाचकता की आपत्ति होगी। 'उच्चरितत्व' शब्द का अर्थ कण्ठताल्वादि अभिघातजन्यत्व अर्थात् कण्ठ तालु आदि के अभिघात नामक

संयोग से जन्य होना ही है। ईश्वर तो सृष्टि के आरम्भ में नियोज्य एवं नियोजक का शरीर धारण करके संसार को शब्द का सङ्केत बताने के लिये पूर्व—निर्दिष्ट आकार वाली इच्छा से साधु शब्दों का ही प्रयोग करते हैं ऐसा न्याय सिद्धान्त यहाँ विशेष रूप से अवधेय है। 'अपभ्रंशादयश्च' इस पद में आदि शब्द से लाक्षणिक आदि का ग्रहण करना चाहिए। 'तज्जातीयत्वनिवेशेऽपि' इस ग्रन्थ में 'तज्जातीयत्व' शब्द का का अर्थ, जैसे शब्द से जन्य बोध विषयत्व निष्ठ प्रकारता निरूपक इच्छा से भगवान् के द्वारा उच्चरित जैसे आनुपूर्वी वाले शब्द हैं, वैसी आनुपूर्वीमत्त्व है। ऐसा आनुपूर्वीमत्त्व रूप तज्जातीयत्व ही तदर्थवाचकत्व है यह अब तक की चर्चा से प्रतिफलित होता है। ऐसी आनुपूर्वी; अव्यवहितोत्तरत्व सम्बन्ध से 'घ' विशिष्ट जो अकार उस अकार से विशिष्ट जो टकार उस टकार से विशिष्ट जो अकार उस अकार में रहने वाले अत्व या अकारत्व रूप है। यह 'घ' तदुत्तर 'अ' तदुत्तर 'ट' तदुत्तर 'अत्व' रूप आनुपूर्वी जैसे भगवदुच्चरित घटादि पद में है वैसे ही हम मानवों द्वारा उच्चरित घटादि पद में भी रहती है।

यहाँ कुछ लोग संदेह करते हैं कि ऐसी आनुपूर्वी भी यत: पूर्व—पूर्व वर्ण से घटित है अत: ईश्वर द्वारा उच्चरित आनुपूर्वी हमलोगों द्वारा उच्चरित पद में सम्भव नहीं है। पर ऐसी आशङ्का नहीं करनी चाहिए। अव्यवहितोत्तरत्व सम्बन्ध से घत्व से अवच्छिन्न—विशिष्ट अत्व से अवच्छिन्न—विशिष्ट टत्व से अवच्छिन्न—विशिष्ट अत्व आदि रूप आनुपूर्वी के भगवान् के द्वारा उच्चरित पद की तरह हमलोगों के द्वारा उच्चरित पद में भी होने से कोई बाधा नहीं होती है, अथवा इस आनुपूर्वी के स्वाश्रय अव्यवहित उत्तर वृत्ति वृत्तित्व सम्बन्ध से घत्व आदि से विशिष्ट अत्व आदि रूप होने से कोई बाधा नहीं है यह समझना चाहिए।

पुन: यहाँ यह सन्देह नहीं करना चाहिए कि वैसी आनुपूर्वी तो चरम अर्थात् अन्तिम वर्ण में ही है, फलत: पूर्व वर्ण में अर्थ वाचकत्व की अनुपपत्ति होगी; क्यों कि वैसे—वैसे उत्तर वर्ण को ही वाचक माना जाता है। जैसे पूर्व—पूर्व वर्ण से विशिष्ट उत्तर—उत्तर वर्ण में विद्यमान वर्णत्व को आनुपूर्वी मानते हैं, उसी तरह उत्तर—उत्तर वर्ण से विशिष्ट पूर्व—वर्ण में रहने वाले वर्णत्व को भी आनुपूर्वी रूप में स्वीकार किया जाता है।

इतने के बाद भी वैसी आनुपूर्वी के एक ही वर्ण में होने से 'ट' शब्द घट का वाचक है' इस प्रकार के व्यवहार की आपत्ति होगी, ऐसी आशङ्का नहीं करनी चाहिए। वाचक पदार्थतावच्छेदक रूप वैसी आनुपूर्वी के पारतन्त्र्य रूप में अभेद सम्बन्ध से उद्देश्यता के अवच्छेदक में भान माना जाता है। ऐसी स्थिति में शुद्ध टत्व में वैसी आनुपूर्वी के अभेद का बाध होने से उपर्युक्त व्यवहार की आपत्ति नहीं दी जा सकती है। अथवा स्वावच्छिन्नप्रकारतावच्छेदकत्व सम्बन्ध से वैसी आनुपूर्वी के उद्देश्यतावच्छेदक में भान मानने से भी वैसे व्यवहार की आपत्ति का वारण सम्भव है। ऐसे परिष्कार के बाद भी जो सूक्ष्म दोष होते हैं उनका निवारण पर्याप्ति के निवेश से करना चाहिए।

वेदस्थलाक्षणिकेषु अतिव्याप्तिः इस ग्रन्थ में वेदस्थ लाक्षणिक शब्द से 'आयुर्घृतम्' 'आदित्यो यूपः' इत्यादि वाक्यों में वायु एवं आदित्य पद का ग्रहण करना चाहिए। वेद में स्थित लाक्षणिक पदों में अतिव्याप्ति का तात्पर्य ; आयु जनक, आदित्य सदृश का बोध कराने की इच्छा से उन–उन पदों के भगवान् के द्वारा उच्चरित होने से उन उन अर्थों में उन–उन पदों की वाचकता की आपत्ति से है।

वैसी इच्छा से भगवान् के द्वारा उच्चरितत्व में, इच्छा अंश में विषयता सम्बन्ध से विशेषण पद–निष्ठ जनकत्व उपस्थिति रूप व्यापार द्वारा मानना चाहिए। अन्यथा आकाङ्क्षा ज्ञान द्वारा वाक्य आदि में रहने वाली जनकता को ले कर न्याय सिद्धान्त में भी वाक्य में अतिव्याप्ति की आपत्ति होगी यह तथ्य आगे स्पष्ट किया जायेगा।

इस प्रकार तद्घटकीभूत उपस्थिति में शक्य विषयता से निरूपित सम्बन्ध विषयता के अप्रयोज्यत्व का निवेश करने पर लाक्षणिक पदों में अतिव्याप्ति दोष नहीं होगा, यदि ऐसा मानते हैं तब भी अव्याप्ति दोष सादि देवदत्त आदि पद में होता है यह आचार्य गदाधर ने स्पष्ट किया है। यहाँ सादित्व का अर्थ 'उस–उस अर्थ के बोधक उस–उस पद के सजातीय पद के असमान कालीन प्रागभाव का प्रतियोगित्व' है। सादि देवदत्त पद में अव्याप्ति का तात्पर्य– देवदत्त आदि पदों का पुत्र आदि के बोध को पैदा करने की इच्छा से पिता आदि के द्वार ही उच्चारण किया जाता है न कि ईश्वर के द्वारा अतः पूर्व दर्शित इच्छा से भगवदुच्चरितत्व रूप वाचकत्व की देवदत्त आदि पद में अव्याप्ति से समझना है।

यहाँ कुछ लोग जिज्ञासा करते हैं कि 'द्वादशेऽह्नि पिता नाम कुर्यात्' इस नामकरण के विधायक श्रुति में नाम पद देवदत्त आदि संज्ञा का बोधक है। यदि ऐसा मानेंगे तो देवदत्त आदि पदों के वाचकत्व लक्षण का अलक्ष्य होने के कारण अव्याप्ति की शङ्का नहीं ही की जा सकती है। इस प्रकार नाम पद को देवदत्त आदि अर्थ को बताने वाला मान लेने पर देवदत्त आदि पदों में ईश्वर के द्वारा उच्चरितत्व क्यों नहीं है? इस आशङ्का का निरास करने के लिए मूलकार श्रीगदाधर ने 'द्वादशेऽह्नि' इत्यादि ग्रन्थ को समाधान के रूप में प्रस्तुत किया है। यहाँ यह सन्देह होता है कि आधुनिक 'देवदत्त' आदि पदों में 'इदं पदम् इमम् अर्थं बोधयतु' इस आकार वाले पिता के सङ्केत की विषयता होने के कारण ईश्वर के सङ्केत की विषयता के न होने से तदुच्चरितत्व के अनिवेश के पक्ष में भी अव्याप्ति का तादवस्थ्य होगा। यदि कहें कि वाक्य के उच्चारण के प्रति बुबोधयिषा अर्थात् बोध कराने की इच्छा के हेतु होने से 'द्वादशेऽह्नि पिता नाम कुर्यात्' यह वाक्य इष्टसाधनभूत द्वादश दिन रूप अधिकरण में पुत्र को विषय करने वाले बोध की जनकता वाले अर्थात् पुत्र के बोध को कराने वाले नाम विषयक कृति–प्रयास वाला पिता, इस प्रकार के बोध को पैदा करे ऐसी तात्पर्य रूप इच्छा परमेश्वर को है। क्यों कि 'द्वादशेऽह्नि पिता नाम कुर्यात्' इस वाक्य में 'पुत्रस्य' यह पद अध्याहृत अर्थात् जोड़ा जाता है। इस पद में आयी षष्ठी विभक्ति के द्वारा बोध जनकत्व रूप सम्बन्ध का ज्ञान कराया जाता है। इस प्रकार अध्याहृत 'पुत्रस्य' इस पद का पुत्र विषयक बोध जनकत्व

अर्थ होता है। इसी प्रकार उपर्युक्त वाक्य में 'नाम' पद देवदत्त आदि संज्ञा परक है। 'द्वादशेऽह्नि पिता नाम कुर्यात्' इस इच्छा में नाम में पुत्र विषयक बोधजनकत्व का भान होने से 'देवदत्त' आदि पदों का वाचकत्व सम्भव है, तो यह कहना उचित नहीं है। क्यों कि ऐसा मानने पर पितृसङ्केत में वैसी विषयता के रूप में सङ्केत के बिना भी पिता के द्वारा वैसे नाम के प्रयोग से ही कृतकृत्यता की आपत्ति होगी। इसी प्रकार जहाँ बारहवें दिन से पहले किसी दूसरे पुरुष ने 'यह पद भी उस पुत्र का बोध कराये' इस प्रकार सङ्केतित पुत्र बारहवें दिन में भी पिता के द्वारा 'पुत्र के बोध का जनक देवदत्त पद है' इस प्रकार वाक्य के प्रयोग मात्र करने से भी वेद के अर्थ की सिद्धि हो जाने पर तथा भगवान् के तात्पर्य की उपपत्ति हो जाने से, वैसे शब्द के वाचकता की आपत्ति होगी।

नाम पद 'पद जन्य बोध विषतावत् इच्छा' का बोधक है और व्युत्पत्ति के वैचित्र्य से इस इच्छा के एक देश वैसी विषयता में अध्याहार्य पुत्रस्य इस पद के अर्थ पुत्रनिष्ठतव का अन्वय होता है। कुर्यात् में 'कृ' धातु का अर्थ आश्रयत्व माना जाता है। इस प्रकार इष्टसाधनीभूत जो पुत्र निष्ठ पद जन्य बोध विषयतावत् इच्छाश्रयता उसका आश्रय पिता है ऐसा बोध होता है। इस प्रकार ईश्वर के वैसे बोध कराने की इच्छा से पद जन्य बोध विषयता के रूप में पुत्र का अवबोध होने से सङ्केत रूपता सिद्ध होती है। यह सब कथन युक्ति युक्त नहीं है। क्यों कि नाम पद के देवदत्त आदि पद रूपता स्वीकार करने पर भी ग्रन्थ की असङ्गति यथावत् बनी ही रहती है।

यहाँ कुछ लोगों का कहना है कि 'नाम पदस्य' इत्यादि ग्रन्थ गदाधर भट्टाचार्य ने आपाततः कहा है। वास्तव में नाम पद तो वैसी इच्छा का बोधक ही है। इस सन्दर्भ में कुछ लोग आशङ्का करते हैं कि जैसी आनुपूर्वी वाले पद तथा जैसे स्वरूप वाला अर्थ सङ्केत या इच्छा के बल पर जाने जाते हैं वैसी आनुपूर्वी वाले पद और वैसे रूप वाले अर्थ में ही परस्पर वाच्य—वाचक भाव आवश्यक होता है। पूर्वोक्त सङ्केत में तो पदत्वेन देवदत्त आदि शब्द का उल्लेख है तथा पुत्रत्व रूप से उन—उन अर्थों का अवगाहन होने से देवदत्तपदत्व रूप से पुत्र में रहने वाले तत्तत् जाति रूप से पद और पदार्थ का वाच्य—वाचक भाव कैसे हो सकता है?

परन्तु यह आशङ्का समुचित नहीं है। क्यों कि नाम पद नामत्वसामानाधिकरण्य से उपलक्षित धर्म से अवच्छिन्न का बोधक होता है। इसी प्रकार पुत्र पद पुत्रत्व आदि के सामानाधिकरण्य से उपलक्षित धर्मावच्छिन्न का बोधक माना जाता है। फलतः उन—उन रूपों से वाच्यत्व एवं वाचकत्व की सिद्धि हो जाती है।

वास्तव में नाम पद इच्छा विशिष्ट पदत्वसमानाधिकरण धर्मावच्छिन्न का बोधक है। यहाँ पुत्रस्य यह पद अध्याहार्य है। इस प्रकार एकादशेऽहनि पिता पुत्रस्य नाम कुर्यात् यह ईश्वर की इच्छा का स्वरूप प्रसिद्ध होता है। यहाँ 'पुत्र' पद पुत्रत्वसमानाधिकरण धर्मावच्छिन्न का बोधक है। तथा पुत्र में जो षष्ठी विभक्ति

है उस षष्ठी विभक्ति का अर्थ बोध जनकत्व रूप सम्बन्ध माना जाता है। इस प्रकार इष्ट साधनीभूत जो पुत्रत्व के समानाधिकरण धर्म से विशिष्ट के बोधजनकता वाली इच्छा उस इच्छा से विशिष्ट जो पदत्व समानाधिकरणधर्मावच्छिन्न विषयिणी कृति उस कृति वाला पिता है, इस प्रकार का शाब्द बोध होता है। इच्छावत्ता यहाँ पर स्वसमानाधिकरण कृति प्रयोज्य उच्चारणकत्व, स्वसमानाधिकरण वृत्तित्व निरूपित पुत्रत्व समानाधिकरणधर्मावच्छिन्न विषयित्वसम्बन्धावच्छिन्न प्रकारता निरूपित बोधत्वावच्छिन्न जनकत्वावच्छिन्न–विषयताकपदत्वसमानाधिकरण धर्मावच्छिन्नविशेष्यताकत्व इन दो सम्बन्धों से ग्राह्य है। इन दोनों सम्बन्धों में आये 'स्व' पद से इच्छा का ग्रहण करना है।

कुछ विद्वानों के अनुसार पदत्व में इच्छावत्ता स्वसमानाधिकरणकृतिजन्य उच्चारणकत्व, स्वावच्छेदक शरीरावच्छिन्नपितृत्व निरूपित जन्यतावत् शरीरवत्त्व उभय सम्बन्ध से ग्राह्य है। इन दोनों सम्बन्धों में आये 'स्व' पद से भी इच्छा का ही ग्रहण करना है। शरीरवत्ता तो पदत्व में स्वोत्पत्यधिकरणदिनावधिक द्वादशदिनाधिकरणकत्व स्ववृत्तिपृथ्वीत्वव्याप्यजात्यवच्छिन्नविषयित्व सम्बन्धावच्छिन्न जो प्रकारत्व उससे निरूपित बोधत्वावच्छिन्न विषयताक जनकत्वनिष्ठ विषयताक तादृशविशेष्यतावत्त्व उभय सम्बन्ध से अभिमत है। इन दोनों सम्बन्धों में 'स्व' शब्द से शरीर का ग्रहण करना है। इस प्रकार इच्छा से विशिष्ट नाम को विधेय मानने के कारण पिता का भी वैसा सङ्केत आवश्यक है। ऐसा मानने से पितृत्व एवं पुत्रत्व के अनुगत न होने के कारण वाक्यभेद की आपत्ति, अनुगत होने पर दूसरे के पुत्र का दूसरे के द्वारा नामकरण करने पर भी वेद के अर्थ का बाध नहीं होता है, इस प्रकार की आशङ्काएँ भी निरस्त हो जाती हैं। भगवान् की बोध कराने की इच्छा से पुत्रत्वसमानाधिकरण धर्म से अवच्छिन्न विषयक बोध जनकत्व के वैसे आत्मत्व के समा– नाधिकरण अवच्छिन्न अंश में अवगाहन होने से उनके वाच्य–वाचक भाव की सिद्धि भी होती है यह समझना चाहिए।

'द्वादशेऽहनि पिता नाम कुर्यात्' इस विधि वाक्य में द्वादश की जगह एकादश ऐसा पाठ है ऐसा कुछ लोगों का यहाँ अभिमत है। ईश्वर सङ्केत को शक्ति मानने पर दूसरे दोष का उद्भावन अग्रिम ग्रन्थ में गदाधर भट्टाचार्य कर रहे हैं।

एवमीश्वरसङ्केतस्य शक्तित्वे ईश्वरानङ्गीगकर्तृमते शाब्दबोधानुपपत्तिः।

जो लोग ईश्वर को नहीं मानते हैं उनके मत में ज्ञान में नित्यत्व अथवा कृति में जगत्–जनकत्व के बाधित होने से अथवा नित्यज्ञानादिमत्त्व रूप ईश्वरत्व से घटित ज्ञान की इच्छा में नित्यत्व का बाध होने से नित्य सङ्केत ज्ञान के असम्भव होने के कारण व्युत्पन्न लोगों को शाब्दबोध की अनुपपत्ति होने लगेगी। ऐसा गदाधर भट्टाचार्य का यहाँ आशय है।

यहाँ कुछ लोग सन्देह करते हैं कि ईश्वर सङ्केत को शक्ति मानने पर भी शाब्दबोध के प्रति सङ्केत ज्ञानत्व रूप से कारणता माननी चाहिए। इस कारणता में ईश्वरीयत्व का प्रवेश नहीं किया जाता है। क्यों

कि ऐसा प्रवेश करने में गौरव है और कोई प्रयोजन भी नहीं है। फलतः ईश्वर सङ्केत को शक्ति मानने पर शाब्दबोध की अनुपपत्ति की आशङ्का कैसे कर सकते हैं?

अथ शाब्दबोधोपयोगितायामीश्वरीयत्वमनुपादेयमेव, एवञ्चाधुनिकसङ्केतज्ञानादपि शाब्दबो–धस्तादृशसङ्केतस्य वृत्तित्वञ्च निर्वहति। न चाधुनिकसङ्केतस्य वृत्तित्वे तात्पर्यस्यापि तथात्वप्रसङ्गः; तस्यापि बोधकत्वेन पदविषयकतया सङ्केतरूपत्वाद्, न चेष्टापत्तिः; तथा सति लक्षणास्थलेऽपि तात्पर्यस्य वृत्तितया लक्षणाया वृत्तित्वोच्छेदप्रसङ्गादिति वाच्यम्?

यतः पदार्थोपस्थितिव्यापारकः सङ्केतो वृत्तिः, तात्पर्यज्ञानञ्च साक्षादेव शाब्दबोधोपयोगि, न तु पदार्थोपस्थितिद्वारा, वृत्त्युपस्थापितपदार्थ एव प्रकरणादिना वक्तृतात्पर्यावधारणात्, तथा च लक्षणाया वृत्तित्वानभ्युपगमे गङ्गादिपदात्तीराद्यनुपस्थितौ तत्र तत्पदव्यक्तेस्तात्पर्याग्रहाच्छाब्दबोधानुपपत्तिरिति तस्या वृत्तित्वमावश्यकम्।

न च तात्पर्यग्रहार्थं लक्षणाऽधीनोपस्थितेरपेक्षितत्वेऽपि तदधीनोपस्थितत्वेन शाब्दबोधहेतुत्वे मानाभावात् तस्या वृत्तित्वासिद्धिः लक्षणास्थले तात्पर्यात्मकसङ्केताधीनोपस्थितित एव शाब्दबोधनिर्वाहादाधुनिकसङ्केतस्थले तात्पर्याधीनोपस्थितेः शाब्दबोधप्रयोजकतायाः क्लृप्तत्वादिति वाच्यम्?

लक्षणाधीनपदार्थोपस्थितिसत्वे मुख्यार्थबाधादिना तत्तदर्थे तत्तत्पदव्यक्तेस्तात्पर्यग्रह उपस्थित्यन्तरमन्तरेणैव तत्तदर्थानुभवस्य सर्वानुभवसिद्धत्वाद्, आधुनिकसङ्केतस्थले पूर्वसङ्केतकर्तृपुरुषवाक्यतोऽर्थविशेषे डित्थादिपदस्य सङ्केतग्रहात्तत्तत्पदेनार्थविशेषोपस्थितौ प्रकरणादिना तत्तत्पदव्यक्तेस्तत्र तात्पर्यग्रहे सति शाब्दबोधस्य वृत्त्यन्त–राधीनोपस्थितिमन्तरेणैवोत्पत्त्या आधुनिकसङ्केतस्य वृत्तित्वमिति चेद्?

एवमपि सङ्केतस्य सम्बन्धत्वे मानाभावेन निष्प्रतियोगिकतया तदसम्भवेन च पदार्थोपस्थापकत्वासम्भवेन वृत्तित्वानिर्वाहाद्, एतेन शाब्दबोधौपयिकसम्बन्धत्वेनेश्वरसङ्केतज्ञानं हेतुः, तच्च मीमांसकानामपि सम्भवति तादृशज्ञानविरोधिविपरीतज्ञानाभावदित्यपि निरस्तम्।

शाब्दबोध की कारणता में ईश्वरीयत्व का उपादान न करने से आधुनिकों के सङ्केत के ज्ञान से भी शाब्दबोध निराबाध होता है साथ ही वैसे सङ्केत की वृत्तिता का भी निर्वाह हो जाता है। आधुनिक सङ्केत को वृत्ति मानने पर तात्पर्य में भी वृत्तित्व का प्रसङ्ग होगा। क्यों कि तात्पर्य के भी बोधकत्व रूप से पदविषयक होने के कारण सङ्केत रूपता हो जाती है। यदि यहाँ कहें कि तात्पर्य की सङ्केत रूपता होने के कारण वृत्तिता की आपत्ति इष्ट है तो लक्षणा स्थल में भी तात्पर्य की वृत्तिता मानने से लक्षणा में वृत्तिता के उच्छेद की आपत्ति होने लगेगी। इस प्रकार की आशङ्का नहीं करनी चाहिए। क्यों कि वैसे सङ्केत को वृत्ति कहा जाता है जिस सङ्केत में पदार्थोपस्थिति व्यापार के रूप में प्रसिद्ध होती है। तात्पर्यज्ञान तो सीधे शाब्दबोध में उपयोगी होता है। तात्पर्यज्ञान एवं शाब्दबोध के बीच में पदार्थोपस्थिति व्यापार के रूप

में नहीं होती है। वृत्ति के द्वारा उपस्थापित जो पदार्थ होते हैं, उन पदार्थों में से ही किन्हीं पदार्थों में प्रकारण आदि के सहयोग से वक्ता के तात्पर्य का निश्चय किया जाता है। इस प्रकार यदि लक्षणा को वृत्ति के रूप में नहीं स्वीकार करेंगे तो गङ्गा आदि पद को सुनने के बाद तीर आदि पदार्थ की उपस्थिति न होने पर तीर आदि पदार्थ में गङ्गा पद व्यक्ति के तात्पर्य का ग्रह न हो पाने के कारण शाब्दबोध की अनुपपत्ति होने लगेगी इस लिये लक्षणा को वृत्ति के रूप में स्वीकार करना अत्यावश्यक है।

पुनः कुछ लोग यहाँ कहते हैं कि तात्पर्यज्ञान के लिये लक्षणा के अधीन पदार्थोपस्थिति के अपेक्षित होने पर भी लक्षणा के अधीन पदार्थोपस्थितित्व के रूप में लक्षाणाधीन पदार्थोपस्थिति के शाब्द–बोध के प्रति हेतुता में कोई प्रमाण न होने के कारण लक्षणा की वृत्तिता असिद्ध होगी। लक्षणा स्थल में तात्पर्य रूप सङ्केत के अधीन उपस्थिति से ही शाब्दबोध का निर्वाह हो जायेगा। आधुनिक सङ्केत स्थल में तात्पर्य के अधीन होने वाली पदार्थोपस्थिति की शाब्दबोध में प्रयोजकता क्लृप्त होने से ऐसा मानने में कोई विशेष कल्पना का भी अवसर नहीं होता है। परन्तु यह शङ्का भी समुचित नहीं है। क्यों कि लक्षणा के अधीन होने वाली पदार्थ की उस्थिति रहने पर मुख्य अर्थ के बाध आदि से उस उस अर्थ में उस–उस पद व्यक्ति के तात्पर्य ग्रह होने पर किसी दूसरी उपस्थिति के बिना ही उस–उस अर्थ का अनुभव सर्वमान्य है। आधुनिक सङ्केत वाले स्थल में पूर्व में सङ्केत करने वाले पुरुष के वाक्य से अर्थ विशेष में डित्थ आदि पद का सङ्केत ग्रह होने से उस–उस पद से अर्थ विशेष की उपस्थिति होने पर प्रकरण आदि के द्वारा उस–उस पद व्यक्ति के अर्थ में तात्पर्य ग्रह होने पर किसी दूसरी वृत्ति के अधीन होने वाली उपस्थिति के बिना ही शाब्दबोध के उत्पन्न होने से आधुनिक सङ्केत में वृत्तित्व है, यदि ऐसा कहें तो ऐसा मान लेने के बाद भी सङ्केत के सम्बन्धत्व में प्रमाण न होने से सङ्केत के निष्प्रतियोगिक होने के कारण सङ्केत में सम्बन्धत्व के असम्भव होने से सङ्केत में पदार्थोपस्थाकत्व असम्भव होने के फलस्वरूप सङ्केत में वृत्तित्व का निर्वाह नहीं हो सकता है।

इतनी चर्चा से शाब्दबोधौपयिक सम्बन्धत्व के रूप में ईश्वर सङ्केत का ज्ञान हेतु है और ऐसा ज्ञान मीमांसकों को भी सम्भव है क्योंकि ऐसे ज्ञान के विरोधी विपरीत ज्ञान का अभाव है, ऐसा कुछ विद्वानों का अभिमत भी निरस्त हो जाता है।

'अथ शाब्दबोधोपयोगितायां ईश्वरीयत्वम् अनुपादेयमेव' गदाधरभट्टाचार्य का ऐसा कथन वदतो व्याघात की आशङ्का मात्र है। ऐसा मानने से पूर्व में कहे गये अन्य दोषों के होने पर भी कोई क्षति नहीं होती है। मूल में स्थित 'शाब्दबोधोपयोगितायाम्' इस ग्रन्थ का अर्थ शाब्दबोध की कारणतावच्छेदक कोटि में है। मूल में समागत 'एवं च' इस वाक्य का अर्थ कारणता के अवच्छेदकत्व रूप में ईश्वरीयत्व का प्रवेश न करने पर है। 'आधुनिकसङ्केतज्ञानादपि' इस ग्रन्थ का तात्पर्य, वैसे सङ्केतज्ञान के अर्थविषय–कबोधजनकत्वप्रकारक इच्छीयविशेष्यताप्रकारक पद निष्ठ जो विशेष्यता तादृशविशेष्यताशालिनिश्चयत्वरूप

कारणता के अवच्छेदक धर्म से आक्रान्त अर्थात् युक्त होने के कारण आधुनिकों के सङ्केतज्ञान से भी शाब्दबोध होगा, ऐसा माना जाता है। ग्रन्थ में आगत 'वृत्तित्वञ्च' में वृत्तित्व का अर्थ शाब्दबोधौपयिक सम्बन्ध है। इस प्रकार इस ग्रन्थ में गदाधर यह बताने का प्रयास कर रहे हैं कि परिभाषात्व रूप से सङ्केत का विभाग भी असङ्गत नहीं है। ग्रन्थ में आये 'तात्पर्यस्यापि' का अर्थ तात्पर्यसमुदायस्यापि करना चाहिये। ऐसा अर्थ करने से शक्तिज्ञानत्वरूप से कारणता के पक्ष में भी ईश्वर के तात्पर्य में वृत्तिता की आपत्ति होने पर भी कोई क्षति नहीं होती है। ग्रन्थ में आये 'तथा सति' शब्द का अर्थ तात्पर्य में वृत्तिता के न स्वीकार करने से है। 'वृत्तित्वोच्छेद' का तात्पर्य; गङ्गायां घोषः इत्यादि स्थल में 'गङ्गा पद तीर का बोध कराये' इस आकार वाले वक्ता के तात्पर्य को वृत्ति रूप मान लेने से, इस ज्ञान के द्वारा उपस्थित तीर आदि के शाब्द–बोध का निर्वाह होने के फलस्वरूप लक्षणा में अलग से वृत्तित्व की कल्पना क्यों की जाय? परिणामस्वरूप लक्षणा रूप वृत्तित्व के उच्छेद रूप अनिष्ट की आपत्ति से है। ऐसी अनिष्ट की आपत्ति के होने के कारण तात्पर्य में वृत्तित्व मानने की आपत्ति को इष्टापत्ति के रूप में नहीं स्वीकार किया जा सकता है।

तात्पर्यज्ञान के सङ्केत रूप वृत्ति ज्ञान रूप होने पर भी तात्पर्य ज्ञान के, बिना किसी व्यवधान के शाब्दबोध का जनक होने के कारण पदार्थोपस्थिति द्वारा शाब्दबोध के जनक वृत्तिज्ञान में कारणत्व के चरितार्थ न होने से स्वतन्त्र रूप में कारणता आवश्यक है। इस प्रकार का समाधान 'यतः पदार्थोपस्थितिकः व्यापारः सङ्केतो वृत्तिः' इस ग्रन्थ से गदाधर भट्टाचार्य दे रहे हैं। इस पङ्क्ति का तात्पर्य यतः पदार्थोपस्थिति रूप व्यापार वाला सङ्केत वृत्ति है अर्थात् शाब्दबोध का जनक है यह माना जाता है। इस प्रकार आरम्भ में पद एवं पदार्थ के सम्बन्ध रूप सङ्केत का ज्ञान होता है। इसके अनन्तर इस सङ्केत के ज्ञान से उत्पन्न होने वाला पदार्थ स्मरण होता है तथा इस पदार्थ स्मरण के बाद शाब्दबोध रूप फल की प्राप्ति होती है। यहाँ पर कुछ लोग सन्देह करते हैं कि तात्पर्य ज्ञान भी पदार्थोपस्थिति द्वारा शाब्दबोध में कारण क्यों नहीं होता है? ऐसा मानने से लाघव भी होता, क्षण मात्र का विलम्ब तो शपथ मात्र से निर्णीत होता है। ऐसी जिज्ञासा के होने पर अग्रिम ग्रन्थ 'वृत्त्युपस्थापितपदार्थ एव' अवतरित होता है। इस वाक्य में एवकार का अर्थ दूसरे सम्बन्ध के ज्ञान से उपस्थापित पदार्थ का व्यवच्छेद है। इस प्रकार तात्पर्य ज्ञान के पहले वृत्ति ज्ञान से जन्य उपस्थिति के आवश्यक होने से तात्पर्य ज्ञान द्वारा शाब्दबोध का जनकत्व सम्भव नहीं है, ऐसा यहाँ आशय समझना चाहिये। 'प्रकरणादिना' इस पद में प्रकरण शब्द का अर्थ भोजन परिधान आदि व्यापार विशेष माना जाता है। इस प्रकार घटं आनय इत्यादि स्थल में शक्य घट आदि के साहचर्य रूप सम्बन्ध रूप लक्षणा के ग्रह से पट आदि की उपस्थिति होने पर, यह घट पद वक्ता के पटविषयकबोधजनकत्वेन जो इच्छा, उस इच्छा की विषयता वाला है, पट के आनयन द्वारा निर्वाह्य परिधान को उद्देश्य करने वाली जो प्रवृत्ति, उस प्रवृत्ति से प्रयोज्य उच्चारण वाला होने के कारण इस प्रकार के अनुमान आदि से, यह अर्थ प्रकरण का होता है। 'प्रकरणादिना' में आदि शब्द से मुख्यार्थ बाध का परिग्रह किया जाता है। यहाँ पुनः कुछ लोग सन्देह करते हैं कि सङ्केत एवं लक्षणा इन दोनों में से किसी एक सम्बन्ध के ज्ञान के अधीन उपस्थित अर्थात् स्मृत पदार्थ

विषयक तात्पर्य–ज्ञान के शाब्दबोध में हेतुता मानने पर विशिष्ट बुद्धि रूप तात्पर्य ज्ञान के सम्पादक विशेषण रूप पदार्थ के लक्षणा के अधीन उपस्थिति की अपेक्षा करने पर भी शाब्दबोध के प्रति लक्षणा के अधीन उपस्थिति रूप से कारणता की कल्पना नहीं की जाती है। फलस्वरूप लक्षणा में शाब्दबोध जनक उपस्थिति प्रयोजकत्व रूप वृत्तित्व नहीं सम्भव है। और तात्पर्य ज्ञान के बाद तात्पर्य रूप सङ्केत ग्रह के अधीन उपस्थिति से शाब्दबोध होता है, ऐसी आशङ्का करते हैं। इस आशङ्का का समाधान करने के लिये 'न च' इत्यादि ग्रन्थ का अवतरण होता है। यहाँ कुछ लोग अशङ्का करते हैं कि तात्पर्य ज्ञान के अधीन उपस्थिति से शाब्दबोध के कहीं भी उत्पन्न न होने के कारण अनुभव विरोध होने से तात्पर्य ज्ञानाधीन उपस्थिति से शाब्दबोध होता है ऐसी कल्पना कैसे कर सकते हैं? इस शङ्का का समाधान करते हुए 'आधुनिकसङ्केतस्थले' इत्यादि ग्रन्थ का उपन्यास होता है। तात्पर्यज्ञान के ठीक बाद शाब्दबोध का जनन होता है यह सभी लोगों के अनुभव का विषय है। फलस्वरूप गङ्गायां घोषः इत्यादि स्थल में तात्पर्यज्ञान के अनन्तर तीर आदि की उपस्थिति की कल्पना कर के शाब्दबोध की कल्पना में सभी विद्वानों के अनुभव का विरोध होगा। जहाँ सर्वानुभव विरोध नहीं होता है वहाँ पर एक क्षण का विलम्ब स्वीकार करने में कोई दोष नहीं होता है। वास्तव में लाघव भी वहीं साधक होता है जहाँ सभी विद्वानों के अनुभव का विरोध न हो। इस प्रकार सर्वानुभव विरोध के परिहार करने की दृष्टि से लक्षणा में वृत्तिता आवश्यक है।

यहाँ पुनः कुछ विद्वानों का प्रश्न होता है कि यदि तात्पर्य में वृत्तिता नहीं मानेंगे तो आधुनिक सङ्केत की वृत्तिता कैसे सिद्ध होगी? इस प्रश्न का समाधान करने के लिये 'आधुनिकसङ्केतस्थले पूर्व सङ्केत कर्तृवाक्यतः' इत्यादि ग्रन्थ उपस्थित होता है। 'डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः' इस वाक्य से 'यूस्त्र्याख्यो नदी' इत्यादि वाक्य से यह 'वाक्यतः' इस पद का अर्थ है। 'अर्थविशेषे' इस पद का अर्थ काष्ठमय हस्ती आदि है। यहाँ यह शङ्का होती है कि शाब्दबोध की कारणता में ईश्वरीयत्व का उपादान न करने पर ईश्वर को न मानने वाले के मत में सङ्केत करने वाले पुरुष के वाक्य से डित्थ आदि पदों का सङ्केत ग्रह होने से शाब्दबोध हो जाये, पर गो आदि पदों का तथा वेद में विद्यमान अन्य पदों का सङ्केत करने वाला कोई पुरुष न होने के कारण इन पदों से कैसे शाब्दबोध होगा? परन्तु ऐसी आशङ्का नहीं करनी चाहिए, क्यों कि उन–उन सङ्केतों को करने वाले पूर्वाचार्य कपिल कमलासन आदि के वाक्यों से अथवा उनके सङ्केत ग्रह से उन–उन पदों से शाब्दबोध उत्पन्न कर लिया जायेगा। ऐसा यहाँ का हृदय समझना, ईश्वर को न मानने वाले के मत में शाब्दबोध सम्भव होने पर भी, यह है।

सङ्केत के सम्बन्धत्व की कल्पना में प्रमाण सम्भव है, ऐसा मानने वाले कुछ विद्वानों का कथन है कि शाब्दबोध के पूर्वोक्त कादाचित्कत्व के अन्यथा अनुपपन्न होने के कारण क्लृप्त जो सङ्केत है उस को शाब्दबोध के प्रयोजक सम्बन्धत्व के रूप में स्वीकार करना आवश्यक है। इसके अतिरिक्त कल्पना में धर्मी के कल्पना की अपेक्षा औचित्य भी है, क्योंकि धर्म की कल्पना की अपेक्षा धर्मी की कल्पना में गौरव मानने की आप्त परम्परा है। सङ्केत के स्थान पर ज्ञान आदि को शाब्दबोध के प्रयोजक सम्बन्ध के रूप में

स्वीकार करने पर अतिप्रसङ्ग होता है अत: लाघवादि सहकृत पूर्व दर्शित अन्यथानुपपत्ति ही सङ्केत के सम्बन्धत्व की कल्पना में प्रमाण है। इस पक्ष के उपस्थित होने पर 'निष्प्रतियोगिकतया' इस ग्रन्थ का अवतरण होता है। इस प्रकार सङ्केत के सम्बन्धत्व की कल्पना में सम्बन्धत्वाभाव के व्याप्य के रूप में निष्प्रतियोगिकत्व का सङ्केत में निश्चयात्मक ज्ञान ही बाधक है। यह ग्रन्थकार का आशय स्पष्ट होता है।

निष्प्रतियोगिकत्व शब्द का अर्थ प्रतियोगिता निरूपकत्व का अभाव होता है। प्रतियोगिता तो प्रामाणिक अनुभव द्वारा सिद्ध स्वरूपसम्बन्ध विशेष होती है। घट आदि की तरह सङ्केत में भी सप्रतियोगिकत्व प्रामाणिकों के अनुभव से सिद्ध नहीं है। ग्रन्थ में आये 'एतेन' शब्द का अर्थ, सङ्केत में सम्बन्धत्वाभाव होने से, है और इस पद का अन्वय इस वाक्य के अन्त में आये 'निरस्तम्' इस पद से है। 'तच्च' इस शब्द का अर्थ शाब्दबोधौपयिक अर्थात् शाब्दबोध को पैदा करने वाले, सम्बन्धत्वेन ज्ञानञ्च, होता है। इस अनुच्छेद में आये 'मीमांसकानाम्' इत्यादि ग्रन्थ का तात्पर्य, न्याय मत में धर्मी रूप ईश्वर–सङ्केत में मीमांसक मत में पद एवं पदार्थ के बीच विद्यमान अतिरिक्त सम्बन्ध में, इस प्रकार धर्मी में विवाद होने पर भी अतिरिक्त सम्बन्ध रूप धर्म में विवाद न होने के कारण मीमांसक मत का साधारण्य है, ऐसा आशय है। इस आशय को स्थिर करने की दृष्टि से बाधकाभाव रूप हेतु का उपन्यास 'तादृश ज्ञाने' इत्यादि ग्रन्थ द्वारा किया गया है। 'तादृश ज्ञान' इस पद का अर्थ शाब्दबाधौपयिकसम्बन्धत्वज्ञाने है।

यत्तु– स्वजन्यज्ञानविषत्वप्रकारकेच्छाविशेष्यत्वमर्थे पद सम्बन्धः, पदे चार्थस्य विपरीतः, अस्य सम्बन्धत्वमन्यथानुपपत्त्या कल्प्यते, एतादृशपरम्परया अपभ्रंशादिस्थले सम्बन्धत्वं न स्वीक्रियत इति तत्र तत्सम्बन्धावगाहिज्ञानं भ्रम एवेति; तदपि तुच्छम्– अक्लृप्तस्य तादृशेच्छाविषयत्वस्य सम्बन्धतोपगमे तादृशज्ञानविषयत्वस्वसमानकालीनविषयत्वादिपरम्पराया अपि विनिगमनाविरहेण सम्बन्धताप्रसङ्गात्, तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव वाच्यवाचकभाव इति वदन्ति।

'स्व जन्यज्ञानविषयत्वप्रकारक इच्छाविषयत्व' अर्थ में पद का सम्बन्ध है तथा पद में अर्थ का सम्बन्ध इसका विपरीत माना जाता है । इस विशेष्यता का सम्बन्धत्व अन्यथानुपपत्ति के कारण अर्थात् अन्य किसी प्रकार से शाब्दबोध के न उपपन्न होने के कारण कल्पित होता है। ऐसी परम्परा में अपभ्रंश आदि स्थल में सम्बन्धत्व नहीं स्वीकार किया जाता है। फलत: अपभ्रंश आदि स्थल में इस प्रकार के सम्बन्ध का अवगाहन करने वाला ज्ञान भ्रम ही होता है। यह कुछ विद्वानों का मानना भी तुच्छ ही है क्यों कि अक्लृप्त वैसी इच्छाविषयत्व के सम्बन्धत्व को स्वीकार करने पर वैसी ज्ञान विषयता समानकालीनविषयत्वादि परम्परा को भी विनिगमना के विरह वश सम्बन्धता की प्रसक्ति होने लगेगी। इस लिये पद एवं पदार्थ के बीच वाच्यवाचक–भाव रूप दूसरा ही सम्बन्ध है ऐसा इन विद्वानों का अभिमत है।

ग्रन्थ में आये तादृशज्ञान विषयत्व का अर्थ स्वजन्यबोधीयविषयत्वप्रकारताकज्ञानीयविशेष्यत्व है। वैसे ज्ञानविषयत्व रूप संसर्ग के किसी प्रकार पद–पदार्थ के बीच सम्बन्ध मानने में किसी तरह इष्टापत्ति

होने पर समानकालीन विषयत्व को विभन्न काल में विद्यमान पद एवं पदार्थ के बीच संसर्गत्व के असम्भव होने से 'आदि' शब्द कहा गया है। यहाँ आदि शब्द से 'स्ववृत्तिअभावकालीनविषयत्व' आदि सम्बन्धों का परिग्रह अभीष्ट है। इस प्रकार पहले पक्ष में लाघव रूप विनिगमना के रहने पर भी कोई क्षति नहीं है। यद्यपि वैसा विषयत्व अवाचक में भी है फिर भी उसमें रहने वाली विषयता के अपभ्रंश निष्ठ विषयता की तरह संसर्गता के रूप में न स्वीकार करने के कारण कोई अतिप्रसङ्ग नहीं होता है।

यस्तु ज्ञाने पदानां शक्तिः, न त्वर्थे, तथा च तज्ज्ञानशक्तत्वं तद्वाचकत्वं, तच्च तद्विषयकशाब्द–धीजनकताऽवच्छेदकधर्मवत्त्वम्, सच धर्मो वह्न्यादिनिष्ठदाहानुकूलशक्तिरिव पदार्थान्तरमेव, लाक्षणिकं नानुभावकमेवेति न तत्र शक्तिः, घटादिपदस्य मितिमातृविषयकधीजनकत्वेऽपि न तद्वाचकत्वं, तद्विषयकत्वावच्छिन्नज्ञानशक्तपदस्यैव तद्वाचकत्वाद्, मितिमातृविषयकत्वेन ज्ञानस्य न किञ्चित्पदशक्यता, ज्ञानसामान्यसामग्र्या एव मितिमातृभासकतया पदान्तरस्य च तदर्थभासकतया तद्विषयकत्वस्य तत्पदजन्यतावच्छेदकत्वे मानाभावात्।

कुछ लोग तो ज्ञान में पद की शक्ति है न कि अर्थ में ऐसा मानते हैं। इस प्रकार तज्ज्ञानशक्तत्व ही तद्वाचकत्व है यह इनके मत में सिद्ध होता है। और यह तद्वाचकत्व 'तद्विषयकशाब्दधीजनकता–वच्छेदकधर्म' रूप सिद्ध होता है। और वह धर्म वह्नि आदि में रहने वाली दाह को पैदा करने वाली शक्ति की तरह स्वीकृत पदार्थों से अतिरिक्त ही पदार्थ सिद्ध होता है। लाक्षणिक पद तो अनुभावक नहीं ही होते हैं इस लिये लाक्षणिक पदों में शक्ति नहीं मानी जाती है। घट आदि पद के मिति अर्थात् प्रमिति, मातृ अर्थात् प्रमाता विषयक ज्ञान के जनक होने पर भी मिति एवं मातृ का वचक नहीं माना जाता है, क्यों कि तद्विषयकत्वावच्छिन्न ज्ञान शक्त पद को ही तद्वाचक माना जाता है। मिति एवं मातृ विषयकत्व के रूप में ज्ञान तो किसी भी पद का शक्य नहीं होता है। ज्ञान सामान्य की सामग्री से ही मिति और मातृ का ज्ञान होने से किसी दूसरे पद के उस अर्थ के भासक के रूप में तद्विषयकत्व के तद्पदजन्यतावच्छेदकता में कोई प्रमाण नहीं होता है।

यस्तु इत्यादि ग्रन्थ से दूसरे मत का उत्थापन करते हैं। इस ग्रन्थ में आये 'ज्ञाने' इस शब्द का अर्थ, अर्थ ज्ञान में करते हैं। इस प्रकार अर्थ विषयक शाब्दबोध में यह अर्थ, 'ज्ञाने' का पर्यवसित होता है। यहाँ पर सप्तमी विभक्ति का अर्थ अनुकूलत्व माना जाता है तथा उसका अन्वय शक्ति में किया जाता है। 'नत्वर्थे' इस शब्द का अर्थ, अर्थानुकूला शक्ति पद में नहीं मानी जाती है यह करते हैं।

यहाँ कुछ लोग प्रश्न करते हैं कि यदि तद्विषयकज्ञानानुकूलशक्तिमत्त्व ही तद्वाचकत्व है तो चक्षु आदि में भी घट आदि की वाचकता की आपत्ति होगी। इस प्रश्न का समाधान करने के लिये 'तच्च' इत्यादि ग्रन्थ सामने आता है। 'तद्विषयकशाब्दधीजनकतावच्छेदकधर्मवत्त्व' शब्द का अर्थ तद्विषयकत्व, शाब्दत्व उभय धर्म से अवच्छिन्न जन्यता से निरूपित जनकता का अवच्छेदक धर्मवत्त्व माना जाता है।

इस प्रकार पट विषयक समूहालम्बन रूप घटविषयक शाब्दबोध के अनुकूल शक्ति को लेकर घट आदि पद में पट आदि अर्थ की वाचकता की आपत्ति नहीं होती है। 'वह्न्यादिनिष्ठदाहानुकूलशक्तिरिव पदार्थान्तरमेव' इस ग्रन्थ का आशय इस प्रकार समझना चाहिये— मीमांसकों द्वारा सभी कारणों में रहने वाली कार्यानुकूल सामर्थ्य रूप शक्ति पदार्थान्तर के रूप में सहज रूप में स्वीकृत है फिर भी वह्नि आदि में यह सामर्थ्य रूप शक्ति प्रसिद्ध होने के कारण दृष्टान्त रूप में इसका उपन्यास गदाधर भट्टाचार्य ने किया है। दाह आदि के प्रति वह्नि में कार्य कारणभाव तो तत्तद् (दाह आदि) अनुकूल शक्तिमत्त्वेन समझना चाहिए। इस प्रकरण में कार्यता का अवच्छेदक दाहत्व आदि होता है। तथा कारणता का अवच्छेदक वह—वह शक्ति विशेष ही स्वीकार किया जाता है। यहाँ शक्ति में तत्तत्कार्यानुकूलत्व तो परिचायक मात्र है ऐसा समझना चाहिये।

कुछ लोग पुन: यहाँ आशङ्का करते हैं कि 'गङ्गायां घोष:' इत्यादि स्थल में गङ्गा आदि पद तीर आदि का प्रतिपादक होने के कारण गङ्गा आदि पद में तीर आदि के बोध के अनुकूल शक्ति को आवश्यक रूप में मानने से गङ्गा पद में तीर आदि अर्थ की वाचकता की आपत्ति होगी। इस प्रश्न का समाधान करते हुए 'लाक्षणिकञ्च नानुभावकं' यह अग्रिम ग्रन्थ उपस्थित होता है। इस ग्रन्थ का अर्थ गङ्गा आदि पद तीर आदि अर्थ के अनुभव का जनक नहीं ही है अपितु तीर आदि अर्थ का स्मारक ही है, यह होता है, यह तथ्य आगे और अधिक स्पष्ट होगा। 'मितिमात्रविषयकत्वेन' आदि ग्रन्थ का तात्पर्य इस प्रकार समझना चाहिए— मीमांसकों के मत में सभी ज्ञान में मिति और माता दोनों ही भासित होते हैं। मिति शब्द का अर्थ ज्ञान होता है और माता शब्द का अर्थ आत्मा माना जाता है। इस प्रकार घट: अस्ति इत्यादि वाक्य से 'अस्तितावान् घट:' अर्थात् अस्तिता वाला घट है एवं अस्तित्वेन घटमहं जानामि अर्थात् अस्तित्व रूप में घट को मैं जानता हूँ इस आकार वाला समूहालम्बन ज्ञान उत्पन्न है। इस प्रकार के समूहालम्बनात्मक ज्ञान में मिति प्रकार रूप में तथा आत्मा विशेष्य रूप में भासित होता है।

ग्रन्थ में स्थित 'तद्विषयकत्वावच्छिन्नज्ञानशक्तपदस्यैव' ग्रन्थ का अर्थ तद्विषयकत्वावच्छिन्न जन्यता से निरूपित जो जनकता उस जनकता का अवच्छेदक शक्ति वाला पद ही है। पुन: 'तद्वाचकत्वात्' इस पद का अर्थ तद्वाचकत्व रूप से विवक्षित होने के कारण करते हैं।

ईश्वर सङ्केत को शक्ति मानने के सिद्धान्त में अपभ्रंश शब्दों में तथा लक्ष्य तीर आदि के बोधक गङ्गा आदि पदों में वाचकता की होने वाली आपत्ति का परिहार उपर्युक्त ग्रन्थ में किया जा रहा है।

यहाँ कुछ लोग सन्देह करते हैं कि घट आदि पद से जन्य ज्ञान के मिति एवं मातृ विषयक नियम से होने के कारण घटादि पदजन्य ज्ञान में रहने वाली जन्यता मिति एवं मातृ विषयकत्व से अवच्छिन्न क्यों नहीं मानी जाती है? यदि ऐसा नहीं मानते हैं तो घट आदि पद से जन्य ज्ञान में रहने वाली जन्यता घटादिविषयकत्व से भी अवच्छिन्न न हो। इस प्रश्न का समाधान करते हुए

अग्रिम ग्रन्थ **ज्ञान सामान्य सामग्रया** एव... इत्यादि अवतरित होता है। सभी ज्ञानों में ही मिति और मातृ का भान होने से व्यभिचार आदि दोष के कारण विशेष सामग्री को मिति मातृ के भान में प्रयोजक नहीं माना जा सकता है। 'पदान्तरस्य' इस शब्द का अर्थ पटादि पदान्तर का होता है। 'तदर्थभासकतया' इस शब्द का अर्थ मितिमातृभानप्रयोजकव्याप्यतया करते हैं। इस प्रकार घटादि पद को मितिमातृ के ज्ञान का जनक मानने पर पट आदि पद को लेकर व्यभिचार की आपत्ति होगी। दूसरे प्रकार से इस व्यभिचार का वारण करने का यदि प्रयास करते हैं तो बहुत बड़े गौरव की आपत्ति होगी, ऐसा इस ग्रन्थ में सूचित किया गया है।

कार्यान्वित स्वार्थे.... तन्मते पदानां नित्यत्वात्।

कार्य अर्थात् क्रिया में अन्वित जो स्वार्थ है उस स्वार्थ में पदों की शक्ति है। ऐसा मानने वाले गुरु के मत में साक्षात् परम्परा साधारण कार्यत्व विषयता से निरूपित घट आदि की विषयता के घट आदि पद की जन्यता का अवच्छेदक होने पर भी घट आदि पद को कार्यता या क्रिया का वाचक नहीं माना जा सकता है। अपितु इस कार्यता या क्रिया का वाचक लिङ्, लोट्, तव्यत् आदि पद ही होते हैं। "तद्विषयकत्वावच्छिन्नज्ञानशक्तपदस्यैव तद्वाचकत्वम्" यहाँ पर साक्षात् परम्परा साधारण निरूपित्व अंश में विशेषण न होने वाली अवच्छेदकता का ही निवेश होने से उपर्युक्त तथ्य संपुष्ट होता है। यहाँ कुछ लोग कहते हैं कि कार्यानुकूल शक्ति के स्वरूपतः ही कार्य के अनुकूल होने के कारण पदार्थ की उपस्थिति और शाब्दबोध में ज्ञात होकर उपयोगी होने वाले अर्थ में पद की वृत्ति रूप दूसरी शक्ति को स्वीकार करना आवश्यक है। परन्तु यह कथन समुचित नहीं है।

दाह आदि कार्य में वह्नि आदि में रहने वाली शक्ति के स्वरूपतः ही उपयोगी होने पर भी शाब्दबोध की जनकशक्ति को शाब्दबोध और पदार्थोपस्थिति में ज्ञातोपयोगी मानने में कोई बाधक नहीं है। अतीत एवं अनागत पद के ज्ञान से भी शाब्दबोध की उत्पत्ति होने के कारण पदों के हेतु न होने से उन पदों में हेतुता की अवच्छेदक शक्ति का अस्तित्व संभव नहीं है, ऐसी शंका तो नहीं करनी चाहिए। क्योंकि उनके मत में पदों को नित्य माना जाता है।

'कार्यानुमति स्वार्थे' इस ग्रन्थ से गुरु (प्रभाकर) के मत का उपन्यास किया गया है। इनका यह आशय है गाम् आनय, गाम् बधान अर्थात् गाय को ले आओ, गाय को बाँधो इत्यादि वृद्धों के व्यवहार के प्रयोजक सभी वाक्य प्रवर्तक होने के कारण लिङ् आदि पद से घटित होते हैं और इन वाक्यों से होने वाले व्यवहार को देखने वाले शिशु भी कार्य अर्थात् क्रिया विषयक गो आदि अर्थ के बोध के प्रति ही गो आदि पदों में सामर्थ्य या शक्ति का निश्चय करते हुए बाद में भी कार्यान्वित गो आदि में शक्ति ज्ञान के द्वारा ही वैसे गो आदि का बोध करते हैं।

साक्षात् परम्परा साधारण इत्यादि ग्रन्थ का आशय इस प्रकार समझना चाहिए–गुरु मत में सभी जगह शब्दबोध में कार्यत्व अर्थात् क्रिया के भान को उत्पन्न करने के लिए कार्यत्व विषयता से निरूपित घटादि अर्थनिष्ठ विषयताशाली शाब्दबोधत्वावच्छिन्न शाब्दबोध के प्रति ज्ञान के विषयभूत घटादिपदत्वरूप से कारणता है। घटम् आनय इत्यादि स्थल में आनय आदि में रहने वाली विषयता में कार्यत्व विषयता के साक्षात् निरूपित होने के कारण ग्रन्थ में साक्षात् यह शब्द आया है। घट आदि में रहने वाली विषयता में कार्यत्व विषयता के परम्परा संबंध से निरूपित होने के कारण ग्रन्थ में परम्परा यह शब्द उपन्यस्त है। ग्रन्थ में आये 'निरूपितत्वेन' इस शब्द में आये तृतीया विभक्ति का अर्थ घट आदि विषयता में अन्वित होने वाला वैशिष्ट्य अर्थात् संबंध माना जाता है। इस प्रकार कार्यता निष्ठ विषयता निरूपितत्व के, जो घट आदि में रहने वाली विषयता में विशेषण है, घट आदि पद निरूपित जन्यतावच्छेदकता का अवच्छेदक होने से घटादिपदजन्यताऽवच्छेदकताऽच्छेद-कताऽच्छेदकत्व कार्यत्व-विषयता में आवश्यक है। फलस्वरूप तद्विषयत्वनिष्ठ अवच्छेदकतानिरूपक शाब्दबोधनिष्ठजन्यता निरूपित जनकत्व ही तद्वाचकत्व का सामान्य लक्षण है, ऐसा स्वीकार करने पर घटादि पदों में कार्यतावाचकत्व की आपत्ति होगी।

कार्यत्व विषयता निष्ठ अवच्छेदकता का निवारण करने के लिये 'साक्षात्' यह शब्द ग्रन्थ में दिया गया है। कार्यत्वत्व विषयतानिष्ठ अवच्छेदकता का वारण करने के लिये परम्परा इस शब्द का निवेश है। ऐसा कुछ लोगों का अभिमत है। "अपितु लिङादि पदस्यैव" इस वाक्य में आदि पद से लोट्-तव्यत् आदि प्रत्ययों का संग्रह अभीष्ट है। लिङ् आदि पद तो कार्यतानिष्ठ विषयता वाले शाब्दबोध के प्रति हेतु होने के कारण वैसी विषयतानिष्ठ अवच्छेदकता में वैसी अवच्छेदकता से भिन्नत्वं एवं निरूपकत्वनिष्ठ अवच्छेदकताऽनिरूपकत्व के होने से वाचकत्व लक्षण की अव्याप्ति नहीं होती है। 'निरूपितत्वांशे विशेषणतया' इस ग्रन्थ का तात्पर्य निरूपितत्वनिष्ठ अवच्छेदकताऽनिरूपकत्व वाचकत्वलक्षणघटकतत्निष्ठ अवच्छेदकता में विशेषण के रूप में देय है, यह समझना चाहिये। यहाँ पुनः प्रश्न होता है कि घट आदि में रहने वाली विषयतानिष्ठ अवच्छेदकता में भी कार्यता विषयतानिष्ठ अवच्छेदकता निरूपकत्व के रहने से घटादि पदों में घटादि अर्थ की वाचकता की अनुपपत्ति होगी। परन्तु ऐसा प्रश्न समुचित नहीं है।

विशेष्य निष्ठ अवच्छेदकता आदि में विशेषण निष्ठ अवच्छेदकता आदि निरूपितत्व को ही स्वीकार किया जाता है। विशेषण निष्ठ अवच्छेदकता का निरूपकत्व नहीं स्वीकार किया जाता है। विशेषण निष्ठ अवच्छेदकता आदि में तो विशेष्य निष्ठ अवच्छेदकता आदि का निरूपकत्व ही स्वीकार किया जाता है। यहाँ पर ऐसा प्रश्न नहीं करना चाहिए कि विनिगमना विरह अर्थात् किसी एक पक्ष में युक्ति विशेष का अभाव होने के कारण दोनों में अर्थात् विशेष्यनिष्ठ अवच्छेदकता एवं विशेषणनिष्ठ अवच्छेदकता में, परस्पर निरूप्य-निरूपक भाव आवश्यक है। क्योंकि ऐसा स्वीकार

करने पर प्रकारतावच्छेदकत्व आदि में निरवच्छिन्नत्व के दुर्वचत्व की आपत्ति होगी। प्रकारतावच्छेदकत्व आदि में निरवच्छिन्नत्व के दुर्वच होने पर तो भूतलं न दण्डिमत् इत्यादि बुद्धि के प्रति भूतलं दण्डिमत् इत्यादि निर्णयों में दण्डत्वनिष्ठ निरवच्छिन्न अवच्छेदकता से निरूपित दण्ड निष्ठ प्रकारताकत्व आदि रूप से ही प्रतिबन्धकता होती है, जिसकी अनुपपत्ति होने लगेगी। अर्थात् उपर्युक्त परस्पर निरूप्य–निरूपक भाव की अनुपपत्ति होने लगेगी। अन्यथा 'भूतलं दण्डत्वजातिमत्–वत्' इत्यादि निश्चयों में भी प्रतिबन्धकता की आपत्ति होगी।

विशेष्यत्वानवच्छिन्नत्व रूप में निरवच्छिन्नत्व का निर्वचन करें तो कारणतावच्छेदकत्वादि में स्वत: ही वैसा होने से अवच्छिन्न अवच्छेदकत्व के निरवछिन्नत्व की आपत्ति होने लगेगी। इस सन्दर्भ में इतना विस्तार पर्याप्त है।

यदि लाघव को ध्यान में रखते हुए निरूपितत्व सम्बन्ध से कार्यता विषयता विशिष्ट घटत्वावच्छिन्न विषयताशालि शाब्दबोधत्वावच्छिन्न के प्रति घटादि पदत्व रूप से कारणता की कल्पना करते हैं तो निरूपितत्व संबंध में रहने वाली जो सांसर्गिक अवच्छेदकता उससे निरूपित अवच्छेदकता की अनिरूपिका जो तद्विषयत्वनिष्ठ अवच्छेदकता उससे निरूपित शाब्दत्वावछिन्न जन्यताक जनकत्व ही तद्वाचकत्व होता है। यदि यहाँ यह प्रश्न करें कि जैसे कार्यत्वविषयता से निरूपित घट आदि में रहने वाली विषयताशाली शाब्दबोधत्वेन कार्यता है वैसे ही विनिगमना विरह के कारण घट निष्ठ विषयता निरूपित कार्यता में रहने वाली जो विषयता उस विषयताशाली शाब्दत्व रूप से भी कार्यत्व का निर्वचन किया जा सकता है। इस प्रकार कार्यत्व विषयता में रहने वाली अवच्छेदकता के निरूपकत्व में रहने वाली अवच्छेदकता से अनिरूपक होने के कारण घट आदि पदों में कार्यता की वाचकता की आपत्ति दुर्वार होगी। तो इस प्रकार का प्रश्न करना समुचित नहीं है।

क्योंकि विषयतात्व से अवच्छिन्न अवच्छेदकता से निरूपित, निरूपितत्व में रहने वाली अवच्छेदकता से निरूपित कार्यताविषयतात्व से अवच्छिन्न अवच्छेदकता से भिन्न होते हुए, निरूपितत्वनिष्ठ अवच्छेदकता की अनिरूपिका जो यत् निष्ठ विषयतात्वावच्छिन्न अवच्छेदकता तन्निरूपित शाब्दत्व से अवच्छिन्न जन्यतानिरूपक जनकत्व ही तद्वाचकत्व है। ऐसा करने पर घट विषयता से निरूपित कार्यता में रहने वाली विषयताशाली शाब्दत्व से अवच्छिन्न जो जन्यता उससे निरूपित कार्यताविषयतानिष्ठ अवच्छेदकता में वैसे भेद के न रहने से दोष नहीं होता है। पशु पद आदि तो लाङ्गूलत्व से अवच्छिन्न अवच्छेदकताक विषयताशाली शाब्दबोध के प्रति हेतु होने के कारण वहाँ पर पशुत्व आदि की वाचकता की आपत्ति नहीं होती है।

नव्य नैयायिक तो घटादि पदों में कार्यता वाचकता की आपत्ति रूप विनिगमना के रहने से घटादि पदों में घटविषयता निरूपित कार्यता विषयतावत्त्व रूप से कार्यता की कल्पना का अयोग होने से उपर्युक्त आपत्ति नहीं होती है, ऐसा मानते हैं।

इस सन्दर्भ में कुछ विद्वान् तो कार्यता विषयता के अन्तःपाती विषयता निरूपितत्वातिरिक्त निरूपितत्व से अनवच्छिन्नत्व जन्यतावच्छेदकता में अधिक निवेश करना चाहिए। ऐसा करने से घटविषयतानिष्ठ अवच्छेदकताक निरूपितत्वनिष्ठ अवच्छेदकताक कार्यतात्व से अवच्छिन्न विषयतानिष्ठ अवच्छेदकताक जन्यतानिरूपित जनकता को लेकर घटादि पदों में कार्यता के वाचकता की आपत्ति नहीं होगी। इसी प्रकार पदार्थतावच्छेदक विषयता के अन्तःपाती विषयतानिरूपितत्व से अतिरिक्त निरूपितत्व से अनवच्छिन्नत्व भी जन्यतावच्छेदकता में देना चाहिए। ऐसा करने से घट, पशु, आदि पद से निरूपित जो जन्यता उससे निरूपित घट, पशु, आदि विषयतानिष्ठ अवच्छेदकता में घटत्व लाङ्गूलादि विषयतानिष्ठ अवच्छेदकतानिरूपितत्वनिष्ठ अवच्छेदकताकत्व के होने पर भी तत्तद् वाचकत्व की अनुपपत्ति नहीं होती है, ऐसा कहते हैं।

ग्रन्थ में आये 'स्वरूपसत्याः' इस शब्द का अर्थ ज्ञानविषयतापन्नायाः करते हैं। आगे पुनः ग्रन्थ में आये 'ज्ञातोपयोगिनः' इस पद का अर्थ ज्ञातानुकूलस्य करते हैं। पुनः आगे 'ज्ञातोपयोगित्वोपगमे' इत्यादि ग्रन्थ का भाव, शक्ति प्रकारक ज्ञान विषयतावत् पदत्व रूप में स्वाश्रयत्व स्वप्रकारकज्ञान-विषयत्व उभय संबंध से अथवा अन्तिम मात्र संबंध से अर्थात् स्वप्रकारकज्ञानविषयत्व संबंध से शक्तिमत्त्वरूप में पदों की कारणता होती है, इस रूप में स्पष्ट होता है।

'बाधकाभावात्' शब्द का तात्पर्य है कि फल के अनुरोध से कल्पित दृष्टान्त में वैशम्य होने पर भी कोई क्षति नहीं होती है। 'तन्मते पदानां नित्यत्वात्' इस वाक्य में गदाधर भट्टाचार्य ने स्पष्ट किया है कि मीमांसकों के मत में पद के नित्य होने के कारण हर समय सुलभ होने से व्यभिचार नहीं होता है। इन मीमांसकों के मत में पदों के नित्य होने पर भी इनका हर समय प्रत्यक्ष इस लिये नहीं होता है, क्योंकि ये पद कण्ठ तालु आदि के अभिघात से व्यङ्ग्य माने जाते हैं

यह मीमांसको का मत बहुत विद्वानों के द्वारा मान्य नहीं होता है। क्योंकि वैसे कण्ठ तालु आदि के अभिधातों में जो पद व्यञ्जकता है, वह प्रत्यक्ष-प्रतिबन्धक-अपसारकत्व रूप है ऐसा नहीं माना जा सकता है। क्योंकि यहाँ प्रत्यक्ष प्रतिबन्धक का निर्वचन कथमपि नहीं किया जा सकता है। न ही इस व्यञ्जकत्व को पद के प्रत्यक्ष में सहकारी कारणत्व के रूप में स्वीकार कर सकते है। क्योंकि शब्द के श्रोताओं में कण्ठ तालु आदि के अभिघात के न रहने पर कण्ठ तालु आदि के अभिघात के नाश की स्थिति में भी शब्द का श्रवण देखा जाता है।

अस्तुवा तज्ज्ञानशक्त्या......................निर्युक्तिकत्वात्।

अनेक दोषों के होने के कारण बहुत से लोग उपर्युक्त कथन को नहीं मानते। फलतः उपर्युक्त मत को न मानने वाले मीमांसकों का मत विशेष 'अस्तु वा' इत्यादि ग्रन्थ में प्रस्तुत किया जा रहा है। तज्ज्ञानशक्त्या इत्यादि ग्रन्थ का तात्पर्य इस प्रकार है–उन-उन अर्थों को विषय करने वाले शाब्दबोध के प्रति शाब्दबोध में अनुकूल शक्ति प्रकारक पद विशेष्यक ज्ञानत्व रूप से हेतुता समझनी चाहिऐ। यहाँ पर शक्ति में रहने वाली प्रकारता स्वाश्रय विषयत्व संबन्ध से अवच्छिन्न होती है। इन मीमांसकों के मत में घटादि वाचकत्व जो पद में है वह घट आदि विषयक शाब्दबोध-जनकतावच्छेदकीभूतशक्तिप्रकारतानिरूपकज्ञानीयविशेष्यतावत्पदत्व होता है।

घटादि शाब्दबोधजनकतावच्छेदकीभूतशक्तिमत् जो ज्ञान उस ज्ञान का विषयत्व वाचकत्वरूप में नहीं स्वीकार किया जाता है। जिससे समूहालम्बन ज्ञान को लेकर उदासीन में वाचकत्व का स्वरूप अतिव्याप्त नहीं होता है। घटादिशाब्दबोधजनकतावच्छेदकीभूतशक्तिनिष्ठप्रकारतानिरूपक-ज्ञानीयविशेष्यतावत् पदत्वरूप में वाचकता का निर्वचन करने पर उदासीन में ऐसी ज्ञानीय विशेष्यता का अभाव होने से वाचकता की आपत्ति नहीं होती है। अथवा यद्विषयकशाब्दानुकूलशक्तिमत्त्व जैसी आनुपूर्वी से अवच्छिन्न विशेष्यताकत्व का व्यापक होता है, वैसी अनुपूर्वीमत्व वाचकत्व है ऐसा कुछ लोगों का मानना है। यद् विषयकशाब्दानुकूलशक्तिमत्व में जैसी आनुपूर्वी से अवच्छिन्न विशेष्यताकत्व व्यापकत्व का निवेश करने से समूहालम्बन ज्ञान को लेकर उदासीन में वाचकत्व के स्वरूप की अतिव्याप्ति नहीं होती है। यदि यहाँ कोई संशय करता है कि 'क' आदि शब्द घटित 'बक्' आदि शब्दो के ज्ञान में प्राजापत्य आदि विषयक शाब्दबोधानुकूल शक्ति के होने के कारण प्राजापत्य आदि के वाचकत्व की आपत्ति दुर्वार होगी तो इस संशय का निवारण करने के लिये वैसी शक्ति में जैसी अनुपूर्वी घटक विशिष्टान्तररूप से अवच्छिन्न विशेष्यताकत्व के व्यापकत्व का भी निवेश कर देना चाहिए। इस प्रकार प्राजापत्य आदि के बोधानुकूल शक्ति में बकत्वरूप आनुपूर्वी घटक विशिष्टान्तर जो कत्वादिरूप उस रूप में अवच्छिन्न विशेष्यकत्व के अव्यापकत्व का अभाव होने से प्राजापत्यादि वाचकत्व की आपत्ति वारित हो जाती है। जहाँ पर एक ही रूप अर्थात् धर्म वाचकता का अवच्छेदक होता है वहाँ पर अन्तिम विशेषण नहीं देना चाहिए। अवच्छेदक के भेद होने से लक्षण भिन्न–भिन्न होता है यह तत्त्व यहाँ विशेषरूप से अवधेय है।

यत्तु मत को मानने वाले कुछ विद्वान् वैसे शक्तिमत् ज्ञान में शक्तिविशिष्ट-शक्तिमदन्यत्व का निवेश करना चाहिऐ ऐसा मानते हैं। यहाँ पर शक्ति का वैशिष्ट्य–स्वसामानाधिकरण्य, स्व-भिन्नत्व, स्व व्यापकत्व, इन तीन संबंधों से अभीष्ट है। इन तीनों संबन्धो में 'स्व' शब्द से शक्ति का ही ग्रहण करना है। यहाँ पर दूसरे ज्ञान में रहने वाली शक्ति के वैशिष्ट्य का शक्ति मात्र में होने के कारण असंभव दोष की आपत्ति होती है। शक्तिमात्र में स्वस्वरूप शक्ति के वैशिष्ट्य के

होने से वह दोष होता है अत: शक्ति का वैशिष्ट्य बताने के लिए प्रथम एव द्वितीय संबन्ध का निवेश आवश्यक है। घटादि पद ज्ञान के घट पद घटक वासुदेव आदि के वाचक अकारादि पद विषयक होने के कारण अव्याप्ति की आपत्ति होने लगती है। इस अव्याप्ति की आपत्ति का निरास करने के लिये शक्ति वैशिष्ट्य को उपपन्न करने वाले तीसरे संबन्ध का निवेश किया गया है। घटपद आदि पद विषयक समूहालम्बन ज्ञान के शक्तिविशिष्ट शक्तिमत् होने के कारण पटादि पद में घटादि वाचकता की आपत्ति नहीं होती है।

परन्तु यह कथन उपयुक्त नहीं है। क्योंकि घट आदि विषयक शाब्दबोध के अनुकूल शक्ति के घट, कलश, आदि पदों के ज्ञान में रहने से पूर्वोक्त तीनों संबन्धो से पितामह आदि विषयक शाब्दबोध के अनुकूल कलश आदि पद घटक ककार आदि पद ज्ञान में रहने वाली शक्ति का वैशिष्ट्य होने से अव्याप्ति दुर्वार होती है। ज्ञान के भेद से शक्ति में भेद स्वीकार करने पर तत्तद् विषयक शाब्दबोधानुकूल अखण्ड शक्तित्व के आवश्यक होने से गौरव की आपत्ति होती है, तथा पूर्व दर्शित अतिव्याप्ति का तादवस्थ्य भी होता है।

मीमांसक मत विशेष को दूषित करने के लिये 'न चासौ विचार सह:' इत्यादि ग्रन्थ अवतरित होता है। 'विचारसह:' इस शब्द का अर्थ विचार सिद्ध है। 'तत्रापि' शब्द का अर्थ लाक्षणिक गङ्गा आदि पद में भी, यह किया जाता है। 'पदार्थोपस्थित्या' इत्यादि ग्रन्थ का तात्पर्य शाब्दबोध से पूर्व पदार्थ की उपस्थिति के आवश्यक होने से सब कुछ चरितार्थ हो जाने के कारण शाब्दबोधजनक–जनक के रूप में शाब्दबोध के प्रति पद ज्ञान अन्यथासिद्ध हो जाता है, यह समझना चाहिए। 'वाक्यार्थ' इत्यादि ग्रन्थ का अर्थ वाक्यार्थ घटकी भूत जो दूसरा अर्थ उसका वाचक घोषादि पद है। 'स्वार्थस्य इव' इत्यादि ग्रन्थ का अर्थ, तीर में अन्वित घोष आदि विषयक शाब्दबोध के प्रति वृत्तिज्ञानजन्य तीर की उपस्थिति के सहयोग से ज्ञान के विषय घोष पदत्व के रूप में अथवा घोषपदज्ञानत्व के रूप में कारणत्व की कल्पना करनी चाहिए, ऐसा मानना अपेक्षित है। 'तद्वाचकत्वापत्ते:' इस ग्रन्थ का अर्थ तीर में अन्वित घोष के वाचकत्व की आपत्ति है।

कुछ लोग सन्देह करते हैं कि दूसरे पद से जन्य उपस्थिति अप्रयोज्य उस–उस अर्थ में रहने वाली विषयता वाले शाब्दबोध की जनकता का अवच्छेदक शक्तिमत्त्व ही तद्वाचकत्व कहा जाना चाहिऐ। इस प्रकार तीर में रहने वाली विषयता के गङ्गा आदि दूसरे पद से जन्य उपस्थिति से प्रयोज्य होने के कारण तीर अर्थ की वाचकता की आपत्ति गङ्गा पद में नहीं होती है।

अन्विताभिधानसमीक्षा

प्रभाकरप्रसादः

वेदवाक्यैकवेद्याय कुतर्काणामभूमये।
सत्सुखाद्वैतबोधात्मस्वभावहरये नमः॥

"आप्तोपदेशः शब्द" इति नैयायिकाः, "शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्" इति मीमांसकाः शब्दस्य स्वतन्त्रं प्रामाण्यं वर्णयन्ति। अत्र शब्दप्रमाणं नाम वाक्यप्रमाणमेव। एवञ्च वाक्यं प्रमाणं वाक्यार्थबोधश्च शाब्दबोध इति फलितम्। तस्य च वाक्यार्थबोधस्य किं निमित्तमिति विशये–

अनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकवर्णपदविभागं वाक्यार्थबोधनिमित्तमिति वैयाकरणाः। पदैरेव समभिव्याहारवद्भिरभिहिताः स्वार्था आकाङ्क्षासन्निधियोग्यतासध्रीचीना वाक्यार्थबोधहेतव इति भाट्टाः। प्रत्येकवर्णपदपदार्थानुभवभावितभावनानिचयलब्धजन्मस्मृतदर्पणारूढा वर्णमालेति उपवर्षप्रभृतयो मीमांसकाः। पदानामेव संसृष्टस्वार्थप्रतिपादननिमित्तत्वमिति प्राभाकराः। पारमार्थिकपूर्वपूर्ववर्णपदपदार्थानुभवजनितसंस्कारसहितान्त्यवर्णविज्ञानं वाक्यार्थबोधनिमित्तमिति नैयायिकाः। अयं विशेषः–पदैः पदार्थबोधः, पदार्थैश्च वाक्यार्थबोधः इतिअभिहितान्वयवादे न्यायनये चैकरूपतैव।

पदज्ञानन्तु करणं द्वारं तत्रपदार्थधीः।
इति न्यायनये स्वीकारात्। **भाट्टैरपि–**

साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥

वाक्यार्थमितये तेषां प्रवृतौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥ इति।

पदानां स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थपरतया एकवाक्यता, तेन च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्ययः उपपन्नो भवति। एवञ्च अत्राभिहितान्वयेऽपि पदैः पदार्थबोधः, पदार्थैः वाक्यार्थबोधः, तत्र पदार्थज्ञानन्तु द्वारमेवेति भाट्टनये न्यायनये च न कोऽपि भेदः इति भाति। परन्तु भाट्टैः पदार्थः वाक्यार्थश्चेति द्वयोरपि वृत्तिवेद्यत्वं स्वीक्रियते, नैयायिकैश्च पदार्थ एव वृत्तिवेद्यः, वाक्यार्थश्च वृत्तिवेद्यो नास्तीति स्वीक्रियते। भाट्टमते–विभक्त्यन्ताभ्यां पदाभ्यां प्रथमं स्वार्थानुभवावैव जन्येते।

एतादृशानुभव- विषयत्वमेव पदार्थानामभिहितत्त्वमित्युच्यते। तदनन्तरमेतादृशानुभवाभ्यां विभक्त्यन्तपदार्थयोः संसर्गानुभवो जायते। पदार्थयोः संसर्गानुभव एव वाक्यार्थबोधः, तस्य च निमित्तत्वं विभक्त्यन्तपदजन्यस्वार्थानभवेषु स्वीक्रियते। पदेन यद् बोध्यते तच्छक्यम्, पदार्थेन यद् बोध्यते तल्लक्ष्यमिति नियमः स्वीक्रियत इत्यभिप्रायेणैव वाक्यार्थस्य सर्वत्र लक्ष्यत्वमुक्तम्–"वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति नः स्थिति"रिति। वाक्यतात्पर्यानुपपत्त्या कल्प्यमानेयं लक्षणा पदानां समभिव्याहारगम्या समभिव्याहृतसकलपदवृत्तिः, प्रधानपदमात्रवृत्तिर्वेति मतद्वयम्। एवञ्च वृत्त्या पदजन्यो वाक्यार्थबोधः, वृत्तिश्चात्र लक्षणात्मिका, शक्तिलक्षणान्यतरसम्बन्धो वृत्तिरिति नैयायिकैरपि स्वीकारात्।

नैयायिकास्तु पदजन्यो वाक्यार्थबोध इति तु सत्यम्, किन्तु वृत्त्या तज्जन्य इति तु युक्तं नास्तीति मन्यन्ते। पदार्थबोधस्तु वृत्त्या पदजन्यः शाब्दबोधेऽपेक्षितः। पदार्थानां पदार्थयोर्वा संसर्गबोधः वाक्यार्थबोधाभिधः वृत्त्या पदजन्य इति तत्र वृत्तिकल्पना न युक्ता। शाब्दबोधे एकपदार्थेऽपरपदार्थस्य संसर्गः आकाङ्क्षयैव लभ्यते। पदान्यन्वितं प्रत्याययन्ति न तमभिदधति अर्थात् पदार्थस्वरूपमात्रे पदानां शक्तिरभिधात्री। संसर्गांशे तु शक्तिर्लक्षणा वा नास्ति। पदानां संहत्यकारित्वादेव संसर्गावगमः। पदानां संहत्यकारित्वं स्वाभाविकम्, यतोऽसंहत्य पदं क्वचिदपि न प्रयुज्यते। प्रातिपदिकं प्रत्ययमाकाङ्क्षते, पत्ययश्च प्रातिपदिकम्, कारकपदं क्रियामाकाङ्क्षते क्रिया च कारकपदम् इति सर्वत्र संहत्यकारित्वमेव पदानां दृश्यते। न हि क्वचित् करणेषु संहतिः कार्येषु संहत्यभावो दृश्यते। करणेषु संहतेः सत्वात् कार्येष्वपि संहतिरवश्यम्भाविनी। संहत्यकारित्वादेव पदानान्तैः समुदितो वाक्यार्थः संसृष्टो भवत्यतः पदानां वृत्तिः संसर्गे नापेक्षते। तदुक्तम् जयन्तभट्टै–"अयमेव च पक्षः श्रेयान् यत् संहत्यकारित्वं पदानामसङ्कीर्णार्थत्वञ्च" इति। अत्र संहत्यकारित्वकथनेन वाक्यार्थः लाक्षणिक इति वदतां भाट्टानामभिहितान्वयवादाद्भेदः, असङ्कीर्णार्थत्वकथनेन चान्विते पदार्थे पदानां शक्तिरिति वदतामन्विताभिधानवादाद्भेदश्चास्तीति ज्ञायते। मणिकारैरपि–"यद्यपि पदजन्योऽनुभवः अन्वितार्थविषयकः तथापि नान्वितस्वार्थशाब्दधीत्वेन पदजन्यता किन्तु स्वार्थशाब्दत्वेने" त्युक्तम्। एवञ्च पदार्थयोः संसर्गे पदानां शक्तिर्न स्वीक्रियते न्यायमते, भाट्टमते तु पदाभिहितपदार्थेभ्यः सन्निधानादिसहकारिवशात् पदार्थानामन्योन्यान्वयप्रतिपत्तिर्लक्षणया सिद्ध्यतीति प्रतिपाद्यत इति विशेषः।

अन्विताभिधानवादे पुनः संसृष्टार्थाभिधानसमर्थेभ्यः पदेभ्यः एव संसर्गप्रत्ययः शक्तिग्रहणकाले अन्वित एव शक्तिः पदानां निश्चीयत इति शक्तिग्रहणपरिपाट्या स्पष्टमवगम्यते। शक्तिग्रहणपरिपाटी च गामानयेति उत्तमवृद्धवचनश्रवणसमनन्तरं मध्यमवृद्धस्य गवानयनं दृष्टवा व्युत्पित्सुर्बाल इत्थमाकलयति ज्ञानपूर्विकेयमस्य प्रवृत्तिः स्वतन्त्रप्रवृत्तित्वान्मदीयस्वतन्त्रप्रवृत्तिवदिति। तदनन्तरमस्य प्रवृत्तेः प्रवर्तकं किमिति जिज्ञासायां स्वात्मदृष्टान्तेन "इदं मम कार्यम्" इति कार्यत्वबुद्धिरेव प्रवर्तिकेति निश्चिनोति। तस्याश्च कार्यत्वबुद्धेः प्रवर्तकप्रत्ययघटितशब्दश्रवणसमनन्तरभावित्वात् तत्र शब्दस्य शक्तिं गृह्णाति। अतः कार्यत्वबुद्धिः विधिप्रत्ययेन ज्ञायत इति कार्यमेव विध्यर्थः। लोके च सर्वेषामनुभवसिद्धमेतत् यद् यावदिदं कार्यमिति बोधो न भवति तावत् सत्यपि इष्टसाधनत्वज्ञाने न प्रवर्तते सति तु कार्यत्वबोधे इष्टसाधनत्वज्ञानाभावेऽपि प्रवर्तत इति। एवञ्च विधिप्रत्ययस्य कार्यत्वबोधे सामर्थ्यमस्तीति निश्चिते सति

प्रयोगान्तरेतु "गां बधानाश्वमानये" त्यादिषु आनयनगोशब्दयोरुद्धारे तदर्थयोरुद्धारात् प्रक्षेपे च प्रक्षेपदर्शनाद् अन्वयव्यतिरेकाभ्यां गवादिविशेषेषु पदविशेषस्य सामर्थ्यं निश्चीयते बालेन। सर्वत्र च कार्यान्वयाव्यभिचारात्तदन्वितपदार्थेषु सामर्थ्यं निश्चीयते न तु पदार्थमात्रे न वान्यमात्रान्वितेषु; प्रथमावगताव्यभिचारिकार्यान्वयपरित्यागे प्रमाणाभावात्। यद्यपि पश्य, आनय, बधान इत्यादावन्यदन्यत्कार्यं प्रतीयतेऽतो व्यभिचाराद्गवादिवदेव शब्दविशेषाभिधेयत्वमेव कार्यस्य युक्तम्, न तु सर्वशब्दसामर्थ्यप्रतियोगित्वमिति भाति तथापि पश्य, आनय, बधान इत्यादौ प्रकृतिः प्रत्ययश्चेति यदंशद्वयं ज्ञायते तत्र प्रकृत्यभिधेयदर्शनानयनबन्धनादिव्यभिचारेऽपि प्रत्ययाभिधेयानुगतकार्यमात्रं न व्यभिचरतीति कार्यान्वितस्वार्थेषु पदानां सामर्थ्यमधिगम्यते।

एवञ्च व्यवहारनिबन्धनप्राथमिकशक्तिग्रहणवेलायामन्वित एव पदानां शक्तिर्निश्चीयत इति वाक्यार्थवेलायामपि पदार्थयोः पदार्थानां वा संसर्गः पदैरेव बोध्यते। "श्रौतसम्भवे लक्षणा न न्याय्या" इति न्यायेन च पदार्थानामन्वितावस्थापि पदैरभिधेयेति संसर्गांशेऽपि पदानां शक्तिः अन्विताभिधानवादिनां मते स्वीक्रियते। अत्र यद्यपि संसर्गानुभवं प्रति पदस्य जनकत्वेन संसर्गांशेऽपि शक्तिरस्त्येव तज्जनकस्यैव तच्छक्तत्वात् तथापि संसर्गबोधे सवरूपसती सा व्याप्रियते न तु ज्ञातेति। स्वीकारात् वाक्यार्थभूतः संसर्गः पदस्मारितो नास्ति अपि तु अनुभाव्य इति शाब्दबोधस्य प्रमात्वं सङ्गच्छते। अन्वयांशे स्वरूपसती शक्तिर्न तु ज्ञातेति स्वीकारादन्विताभिधानवादिनः कुब्जशक्तिवादिन इत्युच्यते।

एतावता प्रबन्धेन प्रतिपादितमेतत् यन्न्याययनये मीमांसानये च शाब्दबोधविषयेऽयमेव भेदः एकत्र न्यायनये एकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते अपरत्र मीमांसानये च स संसर्गः पदवृत्तिभास्य इति।

सम्प्रति शक्तिवादग्रन्थदिशा अन्विताभिधानस्य औचित्यं किमिति विविच्यते। तथा हि शक्तिवादस्य अन्विताभिधानवादनिरूपणपरः ग्रन्थसन्दर्भः-"तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिहेतुतायाः सामान्यत एव क्लृप्ततया वृत्तिज्ञानादनुपस्थितौ तस्य शाब्दबदोधविषयत्वासम्भवाद्, अन्वयांशे शक्तिग्रहस्य शाब्दबोधेऽवश्यापेक्षणीयत्वात् संसर्गताभिन्नविषयतायास्तादृशोपस्थितिजन्यतावच्छेदकत्वे गौरवात्" इति। शाब्दबोधे पदार्थोपस्थितिः कारणमिति तु सर्वसम्मतम्। तत्र शाब्दबोधे पदार्थोपस्थितिः कारणम् इत्येतावन्मात्रोक्तौ प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तिः। अतः पदजन्यपदार्थोपस्थितिः शाब्दबोधे कारणमिति स्वीकार्यम्। एतच्च मीमांसकानां नैयायिकानां सम्मतमेव। एतावन्मात्रोक्तौ एकसम्बन्धि-ज्ञानमपरसम्बन्धिस्मारकमिति रीत्या घटादिपदात् समवायसम्बन्धेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तिः। आकाशपदादाकाशस्य शाब्दबोधस्तु भवत्येव घटादिपदादाकाशस्य शाब्दबोधः न कथमपि केनापि स्वीक्रियते व्यवहारविप्लवापत्तेः। एतद्वारणाय वृत्त्या पदजन्यपदार्थोपस्थितिः शाब्दबोधे कारणमिति स्वीकार्यम्। वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः। घटादिपदानामाकाशे शक्तिर्नास्तीति वृत्त्या घटादिपदात् आकाशस्योपस्थितिर्नास्तीति आकाशस्य शाब्दबोधीयविषयतापत्तिर्न भवति। "गाङ्गायां घोषः" इत्यत्र लक्षणया गङ्गापदेन तीरस्य बोधो भवतीति तीरस्य शाब्दबोधीयविषयतायां न काप्यनुपपत्तिः। वृत्त्या पदजन्यपदार्थोपस्थितिः शाब्दबोधे कारणमित्युक्तौ घटपदात् पटविषयकशाब्दबोधापत्तिः, अतः-उक्तम्-

"तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्य तदुपस्थितिहेतुतायाः सामान्यत एव क्लृप्ततयेति" घटविषयकशाब्दबोधं प्रति वृत्त्या घटपदजन्यघटपदार्थोपस्थितिः कारणम्, पटविषयकशाब्दबोधं प्रति पटजन्यपटपदार्थोपस्थितिः कारणम् इत्येवं रीत्या तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिः कारणमिति कार्यकारणभावः अवश्यमभ्युपेयः। एवञ्चान्वयव्यतिरेकाभ्यां–घटपदजन्यघटपदार्थोपस्थितौ सत्यां घटविषयकशाब्दबोधः, घटपदजन्यघटपदार्थोपस्थित्यभावे घटविषयकशाब्दबोधाभावः इति, तत्तद्व्यक्तिविशेषाणामन्वयव्यतिरेकयोर्दर्शनात् "यद्विशेषयोः कार्यकारणभावौ तत्सामान्ययोरपि" इति न्यायेन शाब्दबोधं प्रति वृत्तिज्ञानजन्यपदार्थोपस्थितिः कारणमिति सिद्ध्यति। एतच्च मीमांसकानां नैयायिकानां च सम्मतमेव। पदार्थयोः संसर्गबोध एव वाक्यार्थबोधः, पदार्थबोधस्तु स्मरणात्मक एवेति च उभयसम्मतम्। स च संसर्गः कथं वाक्यार्थबोधे भासते इति विशये मीमांसकाः उपर्युक्तसामान्यकार्यकारणभावनियमेन संसर्गोऽपि वृत्तिभास्य इति स्वीकार्यम्, उक्तकार्यकारणभावे कार्यतावच्छेदके संसर्गभिन्नत्वविशेषणे गौरवं मन्यन्ते। एवञ्च मीमांसकानां मते सामान्यतः क्लृप्तकार्यकारणनियमः संसर्गविषयेऽपि स्वीक्रियतेऽन्यथा प्रकृत्यादिपदार्थवत्संसर्गः शाब्दबोधीयविषयो न स्याद्। किञ्च शाब्दबोधं प्रति वृत्तिज्ञानजन्यपदार्थोपस्थितिः कारणमिति नियमः संसर्गविषये न स्वीक्रियते चेत् पदार्था एव आकाङ्क्षासन्निधियोग्यतावन्तः वाक्यार्थीभवन्ति न पुनर्वाक्यार्थमेव बोधयन्तीत्युक्तं भवति, तथा सति वाक्यार्थावगतिरकारणिकैव स्यात्। ननु अकारणिकैवास्तु का हानिरिति चेन्न शाब्दबोधे नियामकाभावात् कर्मत्वं घटप्रातिपदिकमित्युक्तावपि घटकर्मकशाब्दबोधापत्तिः। ननु पूर्वपदार्थे साकाङ्क्षेऽभिहिते यत् पदान्तरमुच्चरितम्, तत्तत्सम्बन्धितयैव स्वार्थं बोधयति प्रत्ययवत्। यथा प्रकृत्यर्थे पूर्वप्रतीते प्रत्यय उच्चार्यमाणः स्वार्थं तद्विशिष्टमेवाभिधत्ते। उक्तञ्चाभियुक्तैः–"प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः"इति।

"नित्यं विशिष्ट एवार्थे प्रत्ययो यत्प्रयुज्यते।
तत्पूर्वतरविज्ञातप्रकृत्यर्थविशेषणाद्॥"इति च।

अतः समभिव्याहारविशिष्टपदजन्यपदार्थोपस्थितेरेव शाब्दबोधे हेतुत्वस्वीकारेणैवोपपत्तेः इति चेदुच्यते एवं प्रत्ययः प्रकृत्यर्थविशिष्टस्वार्थमभिधत्त इति स्वीकारे अन्विताभिधानमेव स्वीकृतं भवति। किञ्च पदान्यभिधायकानि, पदेष्वभिधानशक्तिरस्तीति स्वीक्रियत एव सर्वैः, तस्याः शक्ते अन्वयपर्यन्ततामात्रं कल्पनीयमन्विताभिधानवादे। पदार्थैरेव वाक्यार्थबोध इति मते तु पदार्थानां बोधनशक्तिः कल्पनीया, अत्र "धर्मिकल्पनातो वरं धर्मकल्पना" इति न्यायेन पदानामेवान्विताभिधानशक्तिः कल्पयितुमुचिता। अन्वयवानेवान्वित इत्युच्यते, तस्मादन्वयं प्रतिपद्यमान एवान्वितं प्रतिपद्यते यथा व्यक्तिं प्रतिपद्यमान एव जातिम्। तथा चान्वयांशेऽपि शक्तिग्रहः शाब्दबोधेऽवश्यमभ्युपेय इति पूर्वपक्षस्य प्रघट्टकस्यार्थः।

एव पूर्वपक्षे प्राप्ते शक्तिवादग्रन्थस्य सिद्धान्तनिरूपणपरः ग्रन्थभागः।

अत्र वदन्ति–सामान्यतस्तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतदुपस्थितित्वेन न हेतुता, स्वतन्त्र-वृत्तिज्ञानाद् विशृङ्खलभावैनैकदोपस्थितयोः पदार्थतत्त्वावच्छेदकयोर्विशेष्यविशेषणभावक्रमेण शाब्दबोधापत्तेः, किन्तु तद्धर्मप्रकारेण तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतद्धर्मावच्छिन्नतद्विषयकोपस्थितित्वेनैव हेतुता वाच्या;

एवञ्च तत्संसर्गकबोधस्य किञ्चिद्धर्मप्रकारेण तद्विषयकत्वाभावाद् वृत्तिज्ञानात्तदनुपस्थितावपि तत्संसर्गकशाब्दबोधः सम्भवत्येव इति।

अयमाशयः--तद्विषयकशाब्दबोधे वृत्तिजानजन्यतदुपस्थितिः कारणमिति नियमो वक्तुं न शक्यते यतः घटः कर्मत्वमित्येवं स्वतन्त्रवृत्तिज्ञानात् पदजन्यपदार्थोपस्थितौ शाब्दबोधापत्तिः। अतः तद्धर्मप्रकारेण तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतद्धर्मावच्छिन्नतद्विषयकोपस्थितिः कारणमिति नियमः स्वीकार्यः। एवञ्च प्रकारविशेष्यमर्यादया शाब्दबोधे एव पदजन्यपदार्थोपस्थितिः कारणम्। संसर्गे संसर्गतावच्छेदके च प्रकारताख्यविषयत्वं न स्वीक्रियते अपि तु विशेषणतात्मकविषयतैवेति संसर्गभानं पदद्वयसमभिव्याहार-रूपविशेषाकाङ्क्षानियम्यमेवेति न तत्र नियमः। "अनन्यलभ्यः शब्दार्थ" इति न्यायोऽप्यत्र सङ्गच्छते, संसर्गस्याकाङ्क्षालभ्यत्वान्न तत्र पदस्य वृत्तिः कल्पनीयेति। ननु प्रमाकरणप्रत्यासत्तिमन्तरेण संसर्गरूपस्यापि प्रमेयस्य भानं कथं स्यात्? प्रत्यक्षस्थले घटवद्भूतलमित्यादौ प्रकारविशेष्ययोरिव संसर्गांशेऽपि सन्निकर्षापेक्षादर्शनादन्यथा प्रमाणसन्निकर्षमन्तरेण प्रमेयं सिद्ध्यति चेत् सप्तमरसस्यापि सिद्धिः प्रसज्येत, इति चेद् उच्यते प्रमाणमन्तरेण प्रमेयसिद्धेः प्रसक्तिरेव नास्तिः यतः "पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीरिति" स्वीक्रियते, तत्र पदज्ञानरूपप्रमाणस्यैव संसर्गरूपपदार्थस्यापि साधकत्वात्। शाब्दत्वञ्च न शब्दवृत्तिविषयत्वं किन्तु शब्दजन्यप्रतीतिविषयत्वमतः वृत्त्यविषयस्यापि संसर्गस्य शाब्दत्वमुपपद्यते। किञ्च ज्ञायमानं लिङ्गमनुमितिकरणमिति मते अनुमितिकरणे धूमे वह्निव्याप्तिसत्त्वमात्रेण पर्वतसम्बन्धिवह्न्यनुमितिदर्शनात् पक्षधर्मताबलात् साध्यस्य पक्षसम्बन्धभानमिति स्वीक्रियत एव तद्वदेव शाब्दबोधस्थलेऽपि आकाङ्क्षादिबलात् संसर्गस्य भानं भवतीति स्वीकारेणैवोपपत्तेः, संसर्गेऽपि वृत्तिकल्पनाप्रयासेन कृत्यं किमपि नास्तीति संसर्गः आकाङ्क्षाभास्य इत्येव स्वीक्रियते। अन्विताभिधानवादे च स्मृतपदार्थानामन्वयबोधे पदानां सामर्थ्यं कल्प्यमिति गौरवम्। तदुक्तं न्यायचन्द्रिकायाम्--

अन्विते गौरवाच्छक्तेरन्वयस्यान्यतो गतेः।
पदार्थैरेव तत्सिद्धेर्नान्विते शक्तिमत्पदम्।। इति।[1]

मणिकारादिभिश्चोक्तम्--यद्यपि पदजन्योऽनुभवः अन्वितार्थविषयकः, तथाप्यन्वितस्वार्थधीत्वेन न पदजन्यता किन्तु स्वार्थशाब्दत्वेनेति नान्विताभिधानं युक्तमिति। एवञ्च संसर्गांशे शक्तिकल्पनागौरवाद-नन्यलभ्यः शब्दार्थ इति न्यायानुरोधेन संसर्गस्याकाङ्क्षालभ्यत्वात् शब्दवृत्तिभास्यत्वानुपपत्तेः मीमांसकमतं न युक्तमिति नैयायिकानां सिद्धान्तः सिद्धः।

सिद्धान्तरीतिषु मया भ्रमदूषितेन स्यादन्यथापि लिखितं यदि किञ्चिदत्र।
संशोधने सहृदया सदया भवन्तु सच्छास्त्रतत्त्वपरिशीलननिर्विशङ्काः।

---

१. न्यायचन्द्रिका पृ.--१८२

वृत्तिस्वरूपसमीक्षा

डॉ॰ रमाकान्तपाण्डेयः

''नहि सर्वे शब्दाः सर्वानर्थान् जनयन्त्यपितु कमपि विशिष्टमेवार्थं प्रत्यायन्ति। तत्र विशिष्टार्थोपस्थापने किं बीजमित्यन्वयव्यतिरेकद्वारा, किञ्च नहि गुड इत्युक्तेमधुरत्वं प्रकारतया गम्यते'' इति समर्थसूत्रभाष्य-प्रामाण्याच्च कश्चन कार्यकारणभावः प्रकल्पितस्तत्तदाचार्यैः।

तत्पदजन्यतद्धर्मावच्छिन्नप्रकारताशालिशाब्दबोधं प्रति, वृत्तिज्ञानाधीनतत्पदजन्यपदार्थोपस्थितिरिति हेतुः। अत्र कारणकुक्षिप्रविष्टा पदनिष्ठा वृत्तिः केत्यादौ तार्किकमतमुपस्थाप्यते।

नैयामिकमते वृत्तिस्वरूपम्–शक्तिवादग्रन्थस्य प्रतिज्ञावाक्ये नैयायिकशिरोमणिना गदाधर-भट्टाचार्येण=सङ्केतो लक्षणा चार्थे पदवृत्तिरित्युपन्यसता शक्तिलक्षणान्यतरत्वं वृत्तित्वमित्यभिप्रेतम्। तस्येदं तात्पर्यम् अर्थनिरूपिता पदनिष्ठा या वृत्तिः सा सङ्केतो लक्षणा चेत्यर्थः।

यद्यपि शक्तिवादग्रन्थस्यादर्शटीकायां श्रीमता सुदर्शनाचार्येण वृत्तेः सामान्यस्वरूपं निगदितम्। तच्चेदम्–वृत्तित्वन्नाम–वृत्तिपदव्यवहार्यत्वम् पदपदार्थसम्बन्धत्वं वेति। लक्षणद्वयमपि समीचीनत्वं नैव भजते, यतोऽहि लक्षणस्य प्रयोजनं व्यावृत्तिः व्यवहारज्ञानमिति सिद्धान्तः। अत्र लक्षणे अस्य पदस्यास्मिन्नर्थे वृत्तिरिति व्यवहारो न सम्भवति। किञ्च, लक्षणज्ञानाधीनं व्यवहारज्ञानं, व्यवहारज्ञानाधीनं लक्षणज्ञानमित्यन्यो-न्याश्रयदोषोऽपि भवति।

अत एव तार्किकशिरोमणिना श्रीमता भट्टहरिनाथेन तथैव विवृतिटीकायां तत्स्वरूपं परिष्कृतम्–

शाब्दबोधनिरूपिता योपस्थितित्वावच्छिन्ना जनकता तन्निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छे-दकतानिरूपितावच्छेदकता तद्वती या सांसर्गिकी विषयता तद्वत्त्वं वृत्तित्वमिति।

समन्वयस्तु–स्मृतिरूपा या उपस्थितिः सा साक्षात् बोधं जनयति। तस्मादुपस्थितौ शाब्दबोधनिरूपिता जनकता जाता। तस्यां पदार्थोपस्थितौ पदज्ञानमव्यहितोत्तरत्वसम्बन्धेन विशेषणमिति कृत्वा जनकता निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकता पदज्ञाने जाता। एवञ्च तस्मिन् पदज्ञाने वृत्तिज्ञानमपि-

---

१. समर्थ परविधिः।

२. श॰ वाद पृ॰–३।

विशेषणमितिकृत्वा, अव्द्देदकतानिरूपितावच्छेदकता, घटपदं घटत्वावच्छिने वृत्तिसम्बन्धेन वृत्तमित्याकारक-वृत्तिज्ञाने अवच्छेदकता, तदवती सांसर्गिकी विषयता सम्बन्धे, तद्वत्त्वं वृत्तिरेवेति समन्वयः।

शाब्दिकमते वृत्तिः–शब्दिकैः भट्टहरिनाथकृतवृत्तिलक्षणं नैवाङ्गीक्रियते। यतोऽहि वृत्तिलक्षणघटको यो कार्यकारणभावः स वृत्ति ज्ञानाधीनः, वृत्तिज्ञानं, कार्यकारणभावज्ञानाधीनमित्यन्योन्याश्रय-दोषसत्वात्। तस्मात् वृत्तेः अन्यत्स्वरूपं वक्तव्यमितिकृत्वा, शाब्दिकैरुच्यते।

पदपदार्थमध्येऽस्ति कश्चन विजातीसम्बन्धविशेषः, स एव वृत्तिपदवाच्यः। तत्र प्रमाणमाह– [१]"हलोनन्तराः संयोगः" भगवता भाष्यकृता निगदितं यत् "ग्राम[२]शब्दो बह्वर्थकोऽस्ति शाला समुदाये वर्तते, तद्यथा ग्रामो दग्ध इति" "तत्रास्ति शालासमुदाये वर्तते," इति वाक्यप्रतीकमादाय श्रीमता महावैयाकरणेन कैयटेनाख्यातं यत् "वर्तते" इत्यत्र लडर्थः अविवक्षितः प्रकृत्यर्थ एव विवक्षित इति, तस्मात् प्रकृत्यर्थः वृत्तिः, एवञ्च शालासमुदाये ग्रामशब्दस्य वृत्तिरस्तीति वाक्यार्थ आगतः। अत एवं भाष्येऽस्तिपदोपादानं सार्थकं भवति। अनेन भाष्येणापि, पदपदार्थविजातीयसम्बन्धविशेषो वृत्तिरितिलक्षणं ध्वनितम्। सम्बन्धगतं वैजात्यन्तु शाब्दबोधानुकूलोपस्थित्यनुकूलज्ञानविषयत्वमेव। तेनान्यस्य सम्बन्धस्य व्यावृत्तिः सिध्यति।

सा च वृत्तिः द्विधेति नैयायिकाः प्राचीनवैयाकारणाः मन्यन्ते। नव्यास्तु वृत्तिस्त्रिधेति स्वीकुर्वन्ति। शक्तिः, लक्षणेति, शक्तिः, लक्षणा व्यञ्जनेति भावः।

तत्र शक्तिः केत्यत्र दार्शनिकानां मतभेदो वरीवर्तते। तत्रादौ न्यायमतं प्रस्तौमि।

न्यायमते, सङ्केत एव शक्तिः, स च ईश्वरकर्तृकः अतएव भट्टपादेनोक्तम् "सङ्केतो लक्षणा चार्थे पदवृत्तिः" स च सङ्केतः नानाविधस्तद्यथा "अस्मात्पदादयमर्थो बोधव्य इति" इदं पदममुर्थं बोधयतु "इत्याकारको वेति। किञ्चैतदविषयको बोधः एतद्पदजन्यो भवतु" इत्याकारकोऽपि सङ्केतः न्यायमतेऽभ्युपेयते। तत्रादौ–अर्थविशेष्यकेश्वरीयसङ्केतस्य वैशद्येन विचारः क्रियते। तत्र "बोद्धव्य" इत्यत्र बुधधात्वर्थः बोधः विषयत्वं "तव्य" प्रत्ययस्यार्थः। प्रत्ययार्थविषयतायाः स्वरूपसम्बन्धेनाऽर्थेऽन्वयः। पदोत्तर पञ्चम्याः जन्यत्वमर्थः। एवं क्रमेण, पदजन्यबोधविषयत्वप्रकारकार्थविशेष्यकः सङ्केतः। एवमेव अर्थनिष्ठबोधविषयत्वप्रकारकपदविशेष्यकः द्वितीयः सङ्केतः। एवं रीत्या, नानाविधेश्वरेच्छा न्यायमते स्वीकृता वर्तते।

यदि पदजन्यबोधविषयत्वप्रकारिकेच्छा शक्तिः स्वीक्रियते तदा, वाच्यवाचकव्यवस्थानापत्तिः। यतोऽहि विषयतासम्बन्धेन सङ्केतः पदेऽर्थे बोधे सर्वत्र विद्यते। तस्मात् विषयतया इच्छावत्वं वाचकत्वमिति स्वीकृते वाच्यादौ सर्वत्रातिप्रसङ्गः। अतस्तद्वारणाय, बोधकत्वेनेच्छाविषयत्वं वाचकत्वं, बोध्यत्वेनेच्छाविषयत्वं वाच्यत्वमवश्यमेवाभ्युपेयम्।

---

१. पा० सू०।

२. म० भाष्य।

लाक्षणिकानां वाचकत्वनिरासः—अत्र मीमांसका आक्षिपन्ति, यत् ईश्वरीयसङ्केतस्वीकर्तृणां मते, ईश्वरसङ्केतस्य सन्मात्रविषयत्वात् "गगरीपदं घटार्थं बोधयतु" इत्याकारकं सङ्केतस्य गगरीपदेऽपि सत्वात् शक्त्यैवापभ्रंशात् बोधो भविष्यति। किमर्थं नैयायिकैः, अपभ्रंशेषु शक्तिभ्रमात् बोधः स्वीक्रियते। तस्मात् अपभ्रंशानामपि, वाचकत्वं साधुत्वं तैः स्वीकर्तव्यमेव। इति प्रथमाक्षेपः।

किञ्च भगवत्सङ्केतस्य सन्मात्रविषयकत्वेन तर्कमते "गङ्गापदं तीरं बोधयतु" किम्वा", "गङ्गापदात् तीरार्थो बोद्धव्यः" इति इत्याकारकगङ्गापदजन्यबोधविषयत्वप्रकारकतीरविशेष्यकभगवदीय-सङ्केतस्य गङ्गापदेऽपि सत्वात् गङ्गादिपदानां तीरवाचकत्वापत्तिरिति द्वितीयाक्षेपः।

यदि लक्षणास्थले तादृशभगवत्सङ्केतो नाभ्युपेयते तदा, भगवदीयसङ्केतः सन्मात्रविषय इति न्यायसिद्धान्तो व्याकुप्यते। तस्मात् सङ्केतस्य सन्मात्रविषयकत्वं स्वीकर्तव्यमेव। तत्स्वीकृते लाक्षणिकानां वाचकत्वमापतत्येव।

अत एव शक्तिवादग्रन्थे भट्टगदाधरः—"इदन्तु तत्त्वं" इत्यादिग्रन्थेन तद्दोषवारणाय प्रयतते। तद्ग्रन्थस्येदमेव हार्दम्—यदि गङ्गापदजन्यबोधविषयत्वं तीरेऽङ्गीक्रियते, तदा तत्पदजन्यबोधविषयत्वप्रकारक भगवत्सङ्केतविषयत्वं, गङ्गादिपदे स्वीकर्तव्यमेव, सङ्केतस्य सन्मात्रविषयत्वात्। एवञ्च तीरादिबोध-कत्वेनेश्वरीयसङ्केतविषयत्वस्य सत्वात् प्राप्ततीरादिवाचकत्वव्यावृत्त्यर्थं भट्टपादः भगदीयसङ्केतस्य स्वरूपं विशदयति।

तेषामयमाशयः—यत् भगवत्सङ्केतो द्विविधो वर्तते। "विशिष्टवैशिष्यावगाही" इत्येकः, शुद्धबोधविषयो विशकलितोऽपरः "घट पदं घटत्वाच्छिन्नं बोधयतु" इत्याकारक विशिष्टवैशिष्ट्यावगाही यो भगवत्सङ्केतः स एव घटत्वावच्छिन्नार्थनिष्ठबोधविषयत्वप्रकारकभगवदीयसङ्केतविशष्यको घट इति वाच्यवाचकभावप्रयोजकः।

"गङ्गापदं बोधयतु" तीरञ्च बोधविषयतावद्भवतु इत्याकारिका या विशकलिता ईश्वरेच्छा वर्तते, सा केवला, बोधविषयतात्वावच्छिन्नप्रकारतानिरूपितेश्वरेच्छा विशेष्यतया तीरे वर्तते। तस्यामिच्छायां तीरमेव विशेष्यम् बोधविषयत्वञ्च तीरप्रकारतया भासते। तच्च प्रकारभूतं बोधविषयत्वं शुद्धबोधविषयत्वरूपमेव, नहि केनचित् विशेषणेन विशिष्टम्। गङ्गापदजन्यबोधविषयत्वावच्छिन्नप्रकारतानिरूपकत्वं तस्यां विशकलिता-यामीश्वरेच्छायां नास्ति।

अत एव, तीरवाचकत्वं गङ्गादिपदस्य नैवास्ति। तत्र गङ्गापदजन्यबोधविषयत्वावच्छिन्नप्रकारता निरूपकत्वमीश्वरेच्छायाः नोपगम्यते। येन गङ्गापदस्य तीरवाचकत्वं स्यात्।

तत्र गङ्गापदजन्यबोधविषयत्वावछिन्नप्रकारता इच्छीयविशेष्यता तीरे नास्त्यत्र किम् बीजमिति जिज्ञास्यमाने वदति भट्टपादः "मानाभावात्" तत्र "मानाभावात्" इति प्रतीकमादाय हरिनाथतर्काचार्यः स्वविवृतौ वदति—यत् "तस्यतीन्द्रियत्वेन[१] प्रत्यक्षागोचरत्वम्" "गङ्गापदात् तीरार्थो बोद्धव्य"

१. श० वाद—विवृतिः

इत्याकारकस्येश्वरीयसङ्केतस्यातीन्द्रियत्वेनाप्रत्यक्षतया, गङ्गापदस्य तद्वाचकत्वं ग्रहीतुमशक्यमिति भावः।

न वा केनचिदाप्तपुरुषेण, तादृशव्यवहारः कृतः स्वानुभवेन, येन तदुच्चरितशब्दप्रमाणेन तीरार्थवाचकत्वं गङ्गापदस्य स्यात्, अपितु गङ्गापदात् प्रवाहरूप एवार्थो बोद्धव्य इत्याकारक एव, व्यवहारः सर्वत्र प्राप्यते। अत एव लक्षणायाः उच्छेदो न भवति।

नच गङ्गापदजन्यबोधविषयत्वस्य तीरेऽनवगाहनात् ईश्वरेच्छायाः सर्वविषयकत्वानापत्तिः। तदुत्तरयति—यत् "गङ्गापदजन्यबोधविषयो तीरं भवतु" इत्याकारकविशिष्टेच्छायाः अनभ्युपगमेऽपि, तस्याः सर्वविषयकत्वव्याघातः नास्ति। यतोऽहि विशकलितेच्छास्वीकारपक्षेऽपि, प्रथक्तया तीरे बोधविषयत्वं, एवं बोधे गङ्गापदजन्यत्वावगाहनं भवत्येव। तदेव विशिष्टेच्छायामवगाहते। ततोऽधिकं किमपि नास्ति। यस्यावगाहनं नैव जातम्। तस्मात् सर्वविषयकत्वं सुतरां सिद्धम्।

किञ्च तीरनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदकघटकतया बोधे गङ्गापदजन्यत्वानवगाहनेऽपि, "गङ्गापदं बोधयतु" इति स्वातन्त्रेण बोधेऽपि तत्तत्पदजन्यत्वागाहनमस्त्येवेति कृत्वा न क्षतिः।

एवंरीत्या, लाक्षणिकानां वाचकत्वनिरासः कृतः गदाधरभट्टपादैः।

शाब्दिकमतम्—शाब्दिकैः ईश्वरेच्छाशक्तिर्नैव मन्यते। यतोऽहि प्रयोज्यप्रयोजकवृद्धव्यवहारबलेन वाक्य एव ज्ञानजनकत्वं निश्चीयते। तस्यायमाशयः प्रयोजकवृद्धेन "घटमानय" इत्युक्ते, प्रयोज्यवृद्धः "घटमानयति" घटमानयन्तं प्रयोज्यवृद्धं दृष्ट्वा जिज्ञासुर्बालः अनुमिनोति। अयं प्रयोज्यवृद्धः घटकर्मकानयन-विषयकज्ञानवान् तद्विषयकचेष्टावत्वात् ततः प्रयोज्यवृद्धज्ञानं, घटमानयमिति वाक्यजन्यं तदानयनप्रवृत्तेः सत्वात्। इत्यनुमानेन वाक्य एवं बोधजनकत्वं निश्चीयते। तदनन्तरं अवापोद्वापाभ्यां, पदेष्वपि पदार्थविषयक-बोधजनकत्वं निधार्यते। तच्च पदे वाक्ये वा, बोधजनकत्वं सम्बन्धमन्तरा नैवोपद्यते। अतः बोधजन-कत्वान्यथानुपपत्या, पदपदार्थयोर्मध्ये, शक्तिरूपः सम्बन्धः कल्प्यते। सा शक्तिः जनकताघटितेश्वरच्छारूपा स्वीक्रियते, तदा बोधात् प्राक् बोधजनकत्वाभाववदिदं पदमिति निश्चयस्य प्रतिबन्धकत्वेन सत्वात् बोधजनकत्वघटितेश्वरेच्छारूपस्य शक्तिपदार्थस्य ज्ञानं कथं सम्भविष्यति।

किञ्च परस्परावच्छेद्यावच्छेदकभावो न सङ्गच्छते। यतोऽहि शब्दनिष्ठजनकतायाः अवच्छेदकः जनकताघटितसम्बन्धः कथं भविष्यति, सति भेदे अवच्छेद्यावच्छेदकभावः। किञ्च जनकतावच्छेदिका जनकतैव स्वीकारे, आत्माश्रयदोषः, स्वस्य स्वावच्छेदकत्वात्। तस्मात् सम्बन्धान्तरमेव शक्तिस्वरूपः कल्पनीय इति दिक्।

इच्छाशक्तिः

डॉ॰ रामसलाही द्विवेदी

न्यायनये शाब्दबोधे पदविषयकं ज्ञानं करणं भवति। पदज्ञानजन्यपदार्थोपस्थितिः (स्मरणात्मकं ज्ञानं) व्यापारो भवति। शब्दसमूहात्मकवाक्यजन्यः यः वाक्यार्थबोधः सः प्रमा (फलम्) उच्यते। पदजन्यपदार्थस्मरणात्मकव्यापारे शक्तिज्ञानं सहकारिकारणं भवति। अत एव विश्वनाथभट्टाचार्येणोक्तम्

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं, तत्र शक्तिधीः सहकारिणी॥

पदेन सह अर्थस्य सङ्केतरूपा शक्तिर्भवति। शक्तिवादे गदाधरः वदति ईश्वरसङ्केतः शक्तिः तया च अर्थ बोधकं पदं वाचकम् "अर्थात् अस्मात् पदादयमर्थो बोद्धव्यः" वा "इदं पदममुमर्थं बोधयतु" इति ईश्वरस्य इच्छा एव शक्तिरिति। प्रथमसङ्केतानुसारम् एतत्पदजन्यबोधविषयतावानर्थः भवतु इति पदप्रकारक अर्थविशेष्यकेश्वरेच्छा शक्तिः तस्याः ज्ञानं शाब्दबोधे सहकारिकारणं भवति। द्वितीयसङ्केतदृष्ट्या अर्थविषयकबोधजनकतावत् पदं भवतु इति अर्थप्रकारक पदविशेष्यक-ईश्वरेच्छा शक्तिर्भवति। अत्र केचन आशङ्कन्ते यदि ईश्वरेच्छा शक्तिः तर्हि पाणिनिना उक्तं "अदेङ् गुणः" अ, ए, ओ इत्यस्य गुण संज्ञा भवति अर्थात् पाणिनिमहर्षिदृष्ट्या गुणपदस्य सङ्केतः अ,ए,ओ इत्येषु वर्णेषु विद्यते। तत्र ईश्वरेच्छा नास्ति अतः गुणपदेन अ,ए,ओ इत्यस्य बोधो न स्यात् परन्तु स च बोधः भवति। अपरञ्च ये दार्शनिकाः वा विद्वांसः ईश्वरं न स्वीकुर्वन्ति तेषां नये ईश्वरेच्छायाः अभावात् पदात् अर्थस्य बोधः न स्यात्। पदादर्थस्य वा वाक्यात् शाब्दबोधस्य बोधस्तु तेषां नयेऽपि भवत्येव। अतः इच्छाशक्तिः न तु ईश्वरेच्छा शक्तिः इति नव्याः वदन्ति। अत्र गदाधरैरुक्तम् "अथ शाब्दबोधोपयोगितायामीश्वरीयत्वमनुपादेयम्, एवञ्चाधुनिकसङ्केतज्ञानादपि शाब्दबोधः तादृशसङ्केतस्य वृत्तित्वञ्च निर्वहति"। प्राचीनानां नये तु शाब्दबोधं प्रति ईश्वरेच्छा ज्ञानं कारणं, नव्यानां नये तु शाब्दबोधं प्रति इच्छाकारणम्। तथाच समवायसम्बन्धेन शाब्दबोधं प्रति समवायसम्बन्धेन ईश्वरीयेच्छाज्ञानं कारणं, अथ च समवायसम्बन्धेन शाब्दबोधं प्रति समवायसम्बन्धेन इच्छा कारणं भवति इति द्विविधः कार्यकारणभावः सम्प्रदानव्यमतयोः भवति। तत्र गदाधरस्य अभिप्रायो विद्यते। ये तु ईश्वरसङ्केतस्य शक्तिं स्वीकुर्वन्ति तेषां नयेऽपि यः कार्यकारणभावो भवति तत्र ईश्वरीयत्वं न देयम्। शाब्दबोधं प्रति सङ्केतज्ञानत्वेनैव

कारणत्वं वाच्यं न तु ईश्वरीयत्वेन। तस्मिन् कार्यकारणभावे ईश्वरीयत्वस्य प्रवेशे न किमपि प्रमाणं विद्यते। प्रयोजनमपि नास्ति अथ च गौरवमापतति। यदि कार्यकारणभावे कारणतावच्छेदकतया ईश्वरीयत्वस्य निवेशो न क्रियते तदा आधुनिकसङ्केतज्ञानादपि शाब्दबोधः भवितुमर्हति। आधुनिकसङ्केतस्यापि वृत्तिर्निर्वाहे न काप्यनुपपत्तिः सम्भवति। आधुनिकसङ्केतज्ञानस्य अर्थविषयकबोधजनकत्वप्रकारताकेच्छीय-विशेष्यताप्रकारकपदनिष्ठविशेष्यताशालिनिश्चयत्वरूपकारणतावच्छेदकाक्रान्तत्वात् न कोऽपि दोषः तत्र आपतति। यदि आधुनिकसङ्केतस्य वृत्तित्वं स्वीक्रियते तदा तात्पर्यस्यापि वृत्तित्वं स्यात्। यतोहि तात्पर्यमपि अर्थबोधकतया पदविषयकतया सङ्केतरूपत्वाद्। भवतु तावत् तात्पर्यमेव वृत्तिः इति चेन्न, तात्पर्यस्य वृत्तित्वस्वीकारे सति "गङ्गायां घोषः इत्यत्र गङ्गापदं तीरं बोधयतु इत्याद्याकारकवक्तुतात्पर्यस्य वृत्तिरूपतया तात्पर्यज्ञानोपस्थापितस्य तीरादेः शाब्दबोधनिर्वाहेण किमर्थं लक्षणायाः वृत्तित्वं कल्पनीयमिति। तथाच लक्षणोच्छेदरूपस्य अनिष्टस्य आपत्तिर्दुर्वारैव। इति चेन्न "पदार्थोपस्थितिव्यापारकः सङ्केत एव वृत्तिरिति। अर्थात् आदौ पदपदार्थयोः सङ्केतज्ञानं भवति तदनन्तरं तज्जन्यपदार्थस्य स्मरणात्मकं ज्ञानं भवति तदनन्तरं शाब्दबोधो जायते तदेव फलमिति। अनया रीत्या यदि कार्यकारणभावः स्वीक्रियते तर्हि तात्पर्यज्ञाने न वृत्तित्वापत्तिः सम्भवति। तात्पर्यज्ञानं तु साक्षादेव शाब्दबोधे कारणं भवति। वृत्त्युपस्थापितपदार्थ एव प्रकरणादिना वक्तुः तात्पर्यावधारणात्।

न्यायाभिमतशक्तिस्वरूपविचारः आकाशपदशक्तिविचारश्च

डॉ॰ रामचन्द्रशर्मा

परमसम्मान्याः! संस्कृत–संस्कृति–संरक्षणतत्पराः दिग्दिगन्तविश्रुतकीर्त्तयः सर्वतन्त्रस्वतन्त्रा आचार्याः कुलपतिमहोदयाः! पूज्याः गुरवः! संयोजकमहोदयाः! सहसंयोजकमहोदयौ! तच्छास्त्रनिष्णाता विद्वान्सः! विदुष्यः! प्रेयांसश्छात्राः! भ्रातरो! भगिन्यश्च!

विदितमेवैतत् तत्रभवतां यत् सर्वं हि वक्तव्यं श्रोतव्यञ्च शब्दाधीनमेव यथोक्तं भर्तृहरिणा–

न सोऽस्ति प्रत्ययोलोके, यश्शब्दानुगमादृते।[१]
अनुविद्धमिवज्ञानं सर्वं शब्देन भासते॥

स च शब्दः किञ्च कथञ्च बोधयतीति शब्दखण्डेन निरूप्यते। शब्देऽपि प्रकृतिप्रत्ययभेदेन द्वौ भागौ, तत्र प्रत्ययार्थस्य श्रीगदाधरभट्टाचार्येण व्युत्पत्तिवादे निरूपणं कृतम्, प्रकृत्यर्थस्य शक्तेश्चात्र शक्तिवादे। अस्य च ग्रन्थस्य सामान्यकाण्डविशेषकाण्डभेदेन भागद्वये यथाक्रमं सामान्यविशेषशब्दानां शक्तेर्विचारो विहितोऽस्ति, अन्ते च परिशिष्टकाण्डे विभिन्नमतानि समुपस्थाप्य विचारितानि।

अत्र किल शक्तिवादग्रन्थविचारक्रमे संयोजकमहोदयैः मम पक्षे यो हि विषयः निक्षिप्तः स सामान्यकाण्डस्य अन्ते "तन्नशोभनम्" इति दीधितिकारमतनिरसनम्। विशेषकाण्डस्य प्रारम्भे "अथ पदार्थांश इव"–इत्यादि आकाशपदशक्तिविचारश्च। अस्य विषयस्य समुपस्थापनाय पूर्वं संक्षेपेण शाब्दबोधप्रक्रियानिरूपणप्रसङ्गेन न्यायमतानुसारं शक्तेः स्वरूपं समुपस्थाप्यते। शाब्दबोधप्रक्रिया यथा विश्वनाथपञ्चाननेन निरूपिता–

"पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः।[२]
शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी।"

---

१. वा. प. - ब्रा. का., का. - १२४

२. कारिकावली - ८१

अनेकपदार्थसंसर्गावगाहिज्ञानं शाब्दबोधः। तत्र पदज्ञानं करणं, वृत्तिसहकृततज्जन्यपदार्थस्मरणं व्यापारः। वृत्तिश्च–शक्तिलक्षणान्यतरसम्बन्धः। यथोक्तं–"सङ्केतो लक्षणा चार्थे पदवृत्तिः।"[१] "अर्थे"–इति सप्तम्यर्थो निरूपितत्वं, पदस्य वृत्तिः पदवृत्तिः, षष्ठ्यर्थो निष्ठत्वं, तथा च अर्थनिरूपिता पदनिष्ठा या वृत्तिः सा संकेतो लक्षणा च। तत्र घटाद्यर्थनिरूपिता घटादिपदनिष्ठा वृत्तिः सङ्केतरूपा, तीरादिनिरूपिता गंगादिपदनिष्ठा या वृत्तिः सा लक्षणा ज्ञेया।

अत्रेयं जिज्ञासा समुदेति यत् किमर्थं वृत्तेरङ्गीकारः? तत्रोच्यते यत्–पदैः श्रुतैरपि सर्वैः सदा पदार्थज्ञानं न जायते अतस्तत्रार्थविषयिणी काचित् शब्दवृत्तिरवश्यमङ्गीकरणीया। सा च पदपदार्थ-सम्बन्धरूपा ज्ञेया। वृत्त्या प्रतिपाद्य एव पदार्थ इत्यभिधीयते।

तत्र "इदं पदमिममर्थं बोधयतु" "अस्मात्पदादयमर्थो बोद्धव्य"–इति वेच्छा संकेतरूपा वृत्तिः। तत्राधुनिकसंकेतः परिभाषा, तथाचार्थबोधकं पदं पारिभाषिकं यथा शास्त्रकारादिसंकेतितं नदीवृद्ध्यादिपदं, ईश्वरसङ्केतः शक्तिः, तया चार्थबोधकं पदं वाचकं, यथा गोत्वादिविशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थो गवादिर्वाच्यः, स एव मुखमिव प्राथम्येन प्रतीयमानत्वात् मुख्यार्थ इत्यभिधीयते।

सा च शक्तिरत्र द्विविधत्वेन प्रतिपादिता–"इदं पदं इममर्थं बोधयतु" इति पदानुयोगिकाऽर्थ प्रतियोगिका, "अस्मात्पदादयमर्थो बोद्धव्य"–इति अर्थानुयोगिका पदप्रतियोगिका च। तत्रापि कर्तृवाच्ये "पदं गां वक्ति" गां ब्रूते "गोर्वाचकं"–इत्यादिस्थले वचधात्वर्थः–बोधजनकत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीय-विशेषयतारूपः। तत्र कर्मवाचकगोपदोत्तरद्वितीयार्थः कर्मत्वं, तच्च धात्वर्थैकदेशे बोधे अन्वीयते। तथा च–"गोविषयकबोधजनकत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यताश्रयत्ववत् गोपदम्" इति बोधो जायते।

"पदेन गौरुच्यते"–इत्यादिकर्मवाच्यस्थले धात्वर्थविषयतायाः परम्परया निरूपकत्वं प्रथमेच्छायाः सङ्केतरूपत्वे कर्तृवाचकगोपदोपस्थाप्यगोरूपेऽर्थे बोध्यते। तथा च कर्मवाच्ये तादृशपदात्–"गोविषयकबोध-जनकत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यतानिरूपकजनकत्वत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपक-बोधत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपकविषयित्वसम्बन्धावच्छिन्नप्रकारताश्रयाभिन्नो गौः" इति बोधो जायते।

द्वितीयेच्छायाः संकेतरूपत्वाभ्युपगमे तु–वचधात्वर्थः–"स्वजन्यबोधविषयत्वनिष्ठप्रकारता-निरूपितेश्वरेच्छीयविशेष्यतारूपः। तथा च–"पदेन गौरुच्यते, पदस्य गौर्वाच्यः"–इत्यादिवाक्यात्–गोपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यताश्रयत्वं गोरूपेऽर्थेऽवगम्यते।

कर्तृवाच्यस्थले च–तादृशेच्छीयविशेष्यतायाः परम्परया निरूपकत्वं पदे बोध्यते। तथा च–"गोपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयविशेष्यतानिरूपकविषयतात्वावच्छिन्न-विशेष्यत्वावच्छिन्नप्रकारतानिरूपकबोधत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपकजन्यत्वसम्बन्धा-वच्छिन्नप्रकारताश्रयत्ववत्पदमिति" बोधो जायते।

---

१. शक्तिवादः - प्रारम्भः।

इत्थं प्रथमेच्छायां तादृशविशेष्यताश्रयत्वं "वाचकत्व", तस्या: परम्परया निरूपकत्वं "वाच्यत्वम्।" द्वितीयेच्छायां तादृशविशेष्यताश्रयत्वं "वाच्यत्वं," तस्या: परम्परया निरूपकत्वं "वाचकत्वं" विज्ञेयम्। अनेन प्रकारेण शक्त्या वाच्यवाचकभावो विज्ञेय:।

सा च शक्ति: "विशिष्टे" ग्राह्या इति न्यायमतम्। तद्विशिष्टे शक्तिरित्यस्य तद्धर्मतद्वैशिष्ट्यतदाश्रयेषु त्रिष्वेव शक्तिरित्यर्थ:। अतएव घटादिपदशक्तिमति द्रव्यत्वादिवैशिष्ट्यसत्त्वेऽपि द्रव्यत्वादौ तच्छक्ति-विरहात् तेषामुपलक्षणता, घटत्वादौ सत्त्वात् तेषां विशेषणता ज्ञेया, तथा च घटादिपदार्थे द्रव्यत्वादिवैशिष्ट्यसत्त्वेऽपि न घटादिपदाद्द्रव्यत्वेन बोधापत्ति:। नवा द्रव्यादिपदाद् घटत्वादिना बोधापत्तिरिति विज्ञेयम्। एवञ्च प्रवृत्तिनिमित्तेऽपि शक्ते: सत्त्वात् तस्यापि वाच्यतया-"वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वम्-"इति प्रवृत्तिनिमित्तलक्षणे" "वाच्यत्वे" सति इति विशेषणं दत्तम्। "व्यक्त्याकृतिजातयस्तु पदार्थ:"[१]-इति सूत्रोक्तं गोत्वादिजातेर्गवादिपदार्थत्वं समुपपद्यते।

अत्रेयं जिज्ञासा जायते यत्- घटपदाद् घटो बोद्धव्य:-इति भगवदिच्छाया बोधविषयतात्वेन बोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यता घट एवास्ति, न तु घटत्वादिधर्मे विषयतामात्रं च वस्तुमात्र एवेति कथं घटपदशक्तिर्घटत्वादिषु त्रिष्वेव गृह्यते।

अत्र विषये ग्रन्थकारेण समाहितम् यत्-ईश्वरेच्छायास्तत्पदजन्यशाब्दबोधविषयताप्रयोजक: सम्बन्ध एव तत्र तत्पदशक्तिरिति व्यपदेशनियामक:, "घटपदाद् घटो बोद्धव्य:"-इत्याकारकेच्छायां च घटत्वावच्छेदेन बोधविषयत्वमवगाहमानायां समवायावच्छिन्नं बोधविषयतावच्छेदकत्वं घटत्वे, समवायेन घटत्वावच्छेद्यत्वं वा विषयतायां संसर्गमर्यादया भासते। एवञ्च-आश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्वप्रकारता निरूपितविशेष्यत्वं घटस्य, अवच्छेदकत्वसंसर्गावच्छिन्ना घटविशेषणतापन्नबोधविषयत्वस्य या प्रकारता तन्निरूपितविशेष्यत्वं घटत्वस्य, घटत्वे बोधविषयताया: संसर्गविधया भासमानेऽवच्छेदकत्वेऽवच्छेदकतया भासमानत्वं समवायस्य इति त्रितयमेव घटपदजन्यबोधविषयतायामुपयुक्तं भवति, अत: त्रयाणामेव वाच्यता उपपद्यते। घट-घटत्व-संसर्गेषु सङ्केतविषयतानां मिथो वैलक्षण्येऽपि तन्निरूपकबोधविषयताया ऐक्याच्छक्त्यैक्यप्रवादो न तु संकेतैक्यात्। तथा सति शक्तशक्यतावच्छेदकभेदेन शक्तिभेदो न स्यात्। भगवत्संकेतस्य नित्यत्वेन अभेदात्, इष्टश्च शक्तशक्यतावच्छेदकभेदेन शक्तिभेद इति सङ्केतनिरूपकबोध-विषयताया एव भेदाभेदौ शक्तिभेदाभेदनियामकावित्यभ्युपगन्तव्यम्।

अत्रविषये दीधिकारा: प्रवृत्तिनिमिन्तस्य वाच्यतामनङ्गीकुर्वन्तो वदन्ति यत् पदार्थांशे घटत्वादे: शाब्दबोधप्रकारतायां तदंशे तत्पदशक्यतावच्छेदकत्वमेव प्रयोजकं, तच्च तत्पदजन्यबोधविषयत्वप्रकारता-निरूपितविशेष्यतावच्छेदकत्वं, न तु बोधविषयताया: संकेतविषयत्वरूपं विशेषणविधया वाच्यत्वम्। तथा च तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मावच्छिन्नत्वविशिष्टतादृशविषयतासंसर्गकं पदशक्तिज्ञानमेव कारणत्वेन स्वीक्रियताम्। द्रव्यादिपदजन्यबोधविषयत्वप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्य-

---

१. न्यायसूत्रम् - अ. - २। आ. - २

तात्वेन—तादृशप्रकारतानिरूपितभगवदिच्छाविशेष्यतायां द्रव्यत्वादेरेवावच्छेदकत्वं न तु घटत्वादेरतो न द्रव्यपदाद् घटत्वादिना बोधापत्तिः, न वा घटपदाद् द्रव्यत्वादिना, इत्थं शक्यतावच्छेदकमवाच्यमेवेति।

अत्र गदाधरेण मतमिदं खण्ड्यते "तन्न शोभनम्", तथा हि—एतन्मतानुसारं शक्तिज्ञानाधुनिकसंकेतज्ञानयोः शक्यतावच्छेदकप्रकारताकशक्तिज्ञानत्वेनैकरूपेणैव शाब्दबोधहेतुत्वं वक्तव्यम्। शक्यतावच्छेदकं च विशेष्यतावच्छेदकमेव, विशेष्यतावच्छेदकञ्च धर्मितावच्छेदकमेव, तथा सति "द्रव्यपदाद् गुणवत्त्वेन द्रव्यं बोद्धव्यम्" इत्याकारकाधुनिकसंकेतस्यापि तेन रूपेणैव कारणत्वं प्राप्तं, धर्मितावच्छेदकञ्चोक्ताधुनिकसंकेतस्थले द्रव्यत्वमेव, द्रव्यस्यैव धर्मित्वाद् न तु गुणवत्त्वमपि, शक्तिज्ञानशाब्दबोधयोश्च समानप्रकारकत्वनियमाद् द्रव्यत्वप्रकारकसंकतज्ञाने जाते शाब्दबोधोऽपि तथैव स्यात्, न तु गुणवत्त्वप्रकारकः, इष्टश्चोक्तस्थले गुणवत्त्वप्रकारकशाब्दबोधः।

गदाधरमते तु—तत्पदजन्यशाब्दबोधविषयतायां यस्य धर्मस्यावच्छेद्यत्वसम्बन्धेनान्वयो भवति तद्धर्मप्रकारकशाब्दबोधो भवति। "द्रव्यपदाद् गुणवत्त्वेन द्रव्यं बोद्धव्यम्"—इत्यत्र तादृशसम्बन्धेन तादृशविषय-तायां गुणवत्त्वस्यैव अन्वयो न तु द्रव्यत्वस्येति गुणवत्त्वप्रकारक एव बोधो जायते, नतु द्रव्यत्व प्रकारकः। अतः शक्यतावच्छेदकस्यापि वाच्यत्वं स्वीकार्यमेव।

आस्मिन्नेव क्रमे विशेषकाण्डे आकाशपदशक्तिनिरूपणावसरे ग्रन्थकारेण निवेदितं यत्—

पदार्थांशं इव प्रकारीभूतधर्मांशेऽपि वाच्यत्वग्रहस्यापेक्षायाम् आकाशपदात् शब्दाश्रयतया बोधो न स्यात्, शब्दाश्रयत्वस्याकापदावाच्यतायाः सिद्धान्तसिद्धत्वात्, तद्वारणायैव प्रवृत्तिनिमित्तलक्षणे "वाच्यत्वे" सति इति विशेषणोपादानम्, इति यदुच्यते, तन्न युक्तम्। शब्दाश्रयत्वस्य आकाशपदवाच्यत्वमनङ्गीकर्तृभिः प्राचीनैराकाशपदादाकाशे तदुपस्थाप्यधर्माप्रकारकशाब्दबुद्धेरेवोपगमात्। अत एवोक्तम् "अस्तु पदादपि निर्विकल्पकमिति" निर्विकल्पकत्वञ्च—तदंशे तदुपस्थाप्यधर्माप्रकारकत्वं, नतु तदंशे सामान्यतो निष्प्रकारकत्वं, विभक्त्युपस्थापितैकत्वादीनां तदंशे प्रकारतया आवश्यकत्वात्। तेन सह पदार्थान्तरस्य संसर्गानवगाहने तादृशबोधस्य शाब्दत्वमेव न सम्भवति। इत्थं यत्र शक्यतावच्छेदकं विशेषणतया भासमानं तत्र तत्प्रकारकशाब्दबोधः, यत्र च तदुपलक्षणतया भासमानं, तत्र तदुपलक्षितस्यैव शाब्दबोधोऽङ्गीकरणीय इति दिक्। इति शम्।

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

॥ॐ शान्तिः शान्तिः शान्तिः॥

अर्थनिरूपितपदनिष्ठवाचकत्वप्रतिपादनम्

प्रो. शुद्धानन्दपाठकः

"एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमि"ति न्यायेन समवायसम्बन्धेन घटादिपदादाकाशविषय-कान्वयबोधवारणाय तत्पदजन्यतद्विषयकान्वयबुद्धित्वावच्छिनं प्रति वृत्तिज्ञानाधीनतत्पदजन्यतद्विषयकोपस्थितिः कारणमिति कार्यकारणभावं नैयायिका अभ्युपगच्छन्ति। तत्र न्यायनये शक्तिलक्षणान्यतरसम्बन्धरूपा वृत्तिः द्विविधा भवति। अस्मात्पदादयमर्थो बोद्धव्य इति ईश्वरेच्छा इच्छारूपा वा शक्तिः। अर्थनिरूपिता शक्तिः पदनिष्ठेत्यभ्युपगतानां नैयायिकानां मतमुपेक्ष्य सम्प्रति अर्थज्ञाननिरूपिता शक्तिः पदनिष्ठेत्यङ्गीकर्तॄणां मीमांसकानां मतमुपस्थापयन्ति भट्टाचार्याः–

"यस्तु ज्ञाने पदानां शक्तिः न त्वर्थेति"–शक्तिवादः

तथाहि जन्यनिरूपिता शक्तिः जनकेऽभ्युपेयते। तथा पाकादिनिष्ठकार्यतानिरूपिता शक्तिः वह्नावस्ति तथैव अर्थज्ञाननिरूपिता शक्तिः पदेऽभ्युपेयते। यतो हि अर्थज्ञानं पदज्ञानेन जायते। पदज्ञानमन्तरा अर्थज्ञानं नैव सम्भवति, अतः मीमांसकानां नये अर्थज्ञाननिरूपिता शक्तिः पदनिष्ठेति। यदि मीमांसकनये अर्थज्ञाननिरूपिता शक्तिः पदनिष्ठा स्यात्तर्हि किं वाचकमित्याशंकायामुच्यते भट्टाचार्यैः–

"तज्ज्ञानशक्तत्वं तद्वाचकत्वमिति"। शक्तिवादः

तद्विषयकबोधोत्पादकशक्तिमत्त्वं तद्वाचकत्वमिति तदर्थः यदि स्यात्तर्हि घटविषयकबोधोत्पाद-कशक्तिमत्त्वस्य घटपदे सत्त्वाद् घटपदस्य घटज्ञानवाचकत्वेऽपि वह्निविषयकबोधोत्पादकशक्तिमत्त्वस्य धूमपदेऽपि सत्त्वाद् धूमपदस्य वह्निवाचकत्वं स्यात्। धूमज्ञानस्य वह्निज्ञानजनकत्वादिति, तद्विषयकशाब्दधीजनकतावच्छेदकशक्तिमत्त्वं तद्वाचकत्वमित्यभ्युपगमे न धूमपदस्य वह्निवाचकत्वम्। यतः घटविषयकशाब्दधीजनकता घटपदनिष्ठा, तदवच्छेदकशक्तिमत्त्वस्य घटपदे विद्यमानत्वात् घटपदस्य घटवाचकत्वेऽपि वह्निविषयकान्वयधीजनकतायाः धूमपदेऽवर्तमानत्वात्तदवच्छेदकशक्तिमद्धूमपदं न भवति। अनुमानादिकेन धूमपदस्य वह्निवाचकत्वेऽपि शाब्दबोधत्वेन धूमपदस्य वह्निवाचकत्वं नास्ति।

अथ च वह्न्यादिनिष्ठदाहानुकूलशक्तिरिव वह्निविषयकान्वयधीजनकतावच्छेदकशक्तिरपि पदार्थान्तरमिति मीमांसका अभ्युपगच्छन्ति। तद्विषयकशाब्दधीजनकतावच्छेदकशक्तिमत्त्वं तद्वाचकत्वमित्यभ्युपगमे सति शक्यसम्बन्धरूपलक्षणायाः गंगादिपदस्य तीरवाचकत्वमापद्येत, तीरविषयकान्वयबोधनिष्ठजन्यतानिरूपितजनकता गंगादिपदनिष्ठा, तदवच्छेदकशक्तिमत्त्वस्य गंगापदे-विद्यमानत्वात्। गंगादिपदस्य तीराद्यनुभवजनकत्वविरहात् न तत्र शक्तिः न वा तदापत्तिरित्युच्यते चेत्तथापि ज्ञाने मितिमातामेयेति त्रिपुटिविषयकं भासते इति मीमांसकैरभ्युपेयते। तत्र घटपदस्य मितिवाचकत्वमापद्येत, मितिविषयकान्वयधीजनकतावच्छेदकशक्तिमत्त्वस्य घटपदे सत्त्वाद् इति।

यदि तद्विषयकत्वं शाब्दबुद्धित्वमित्येतदुभयधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकशक्तिमत्त्वं तद्वाचकत्वमिति स्यात्तर्हि घटपदनिष्ठजनकतानिरूपितजन्यतावच्छेदकत्वं घटविषयकत्वे एव न तु मितिविषयकत्वे, तत्र घटपदनिष्ठजनकतानिरूपितजन्यताया अतिप्रसक्तत्वात्, अतो न मितिवाचकत्वं घटपदस्य।

यद्यपि एतादृशवाचकत्वपरिष्कारेऽपि कार्यान्वितस्वार्थे पदानां शक्तिरिति वदतां प्राभाकराणां नये घटपदस्यापि कार्यत्ववाचकत्वापत्तिः, तथापि साक्षात्परम्परासाधारणनिरूपितत्वांशेऽविशेषणीभूतं यदवच्छेदकत्वं तन्निरूपितायाः जन्यतायाः निवेशनीयतया कार्यत्वविषयत्वनिष्ठावच्छेदकतायाः साक्षात्परम्पराभूतं घटविषयतानिरूपितत्वे विशेषणतया अविशेषणत्वाभावेन कार्यत्वविषयतायाः न जन्यतावच्छेदकत्वेन ग्रहणं सम्भवति, अतो न घटादिपदस्य कार्यतावाचकत्वम्।

यद्यपि कार्यनिरूपिता स्वरूपसती शक्तिः कारणे भवति यथा पाकादिकार्यनिरूपिता शक्तिः वह्नौ विद्यते शाब्दबोधस्थले च अर्थज्ञाननिरूपिता न पदे शक्तिः, अपि तु अर्थनिरूपितैव शक्तिः पदेऽभ्युपेया। यतो हि ज्ञाता सत्येव सा शाब्दबोधे उपयोगिनी भवति, तथापि एकत्र वैषम्यं सर्वत्र वैषम्यं नावधारयति। भवतु नाम एकत्र ज्ञातासती शक्तिरुपयोगिनी, अपरत्र च स्वरूपसती उपयोगिनी, तथापि सर्वत्रैव कार्यनिरूपिता कारणे शक्तिस्वीकारे न किमपि बाधकमित्यतः ज्ञाननिरूपितैव पदशक्तिरभ्युपेया।

मीमांसकैः यत्साधितं तन्न विचारपथमधिरोहति, ज्ञाननिरूपिता पदे शक्तिरिति वादिनां लाक्षणिकस्य अननुभावकत्वं यत्प्रतिपादितं तन्न सम्भवति, यतो हि लाक्षणिकपदे लक्ष्यार्थविषयकान्वयबोधजनकता सर्वसिद्धः, अस्यां परिस्थितौ लाक्षणिकपदस्यापि वाचकत्वापत्तिर्भवेत्। न च लाक्षणिकपदात् केवलं लक्ष्यार्थविषयकोपस्थितिः जायते, उपस्थितिश्च लक्ष्यार्थविषयकबोधजनिका, अतः लाक्षणिकपदे न लक्ष्यार्थविषयकबोधजनकत्वं तस्य लक्ष्यार्थविषयकबोधं प्रति अन्यथासिद्धत्वादिति वाच्यम्, तथा सति शक्तमपि पदं शक्यार्थविषयकोपस्थितिं प्रत्येव कारणमस्तु। शक्यार्थविषयकान्वयबोधं प्रति तस्यापि अन्यथासिद्धत्वं स्यात्। अतः यस्मात्कारणात् शक्तं पदं शक्यार्थोपस्थितिद्वारा शक्यार्थविषयकान्वयबोधजनकं भवति तथैव लाक्षणिकमपि पदं लक्ष्यार्थविषयकान्वयबोधजनकतावच्छेदकशक्तिमत्त्वाद् वाचकं स्यादित्यत्र

न किञ्चिद् विनिगमकम्। लाक्षणिकपदस्य वाचकत्वापत्तिभिया न तज्ज्ञाननिरूपिता पदे शक्तिरभ्युपेयते, किन्तु तदर्थनिरूपितैव शक्तिः तत्पदेऽभ्युपेया।

किञ्च तत्पदजन्यबोधविषयत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छावत्त्वं तत्पदवाच्यत्वम्। यथा घटपदजन्यबोधविषयतात्वावच्छिन्ना या बोधविषयत्वनिष्ठप्रकारता तादृशप्रकारतानिरूपितविशेष्यतासम्बन्धेन घटपदं घटं बोधयतु इतीश्वरेच्छावत्त्वस्य घटे सत्त्वेन भवति घटे घटपदशक्यत्वम्। अनया रीत्या घटस्य वाच्यत्वं घटपदस्य च वाचकत्वं सिद्धं भवति। तीरे च गंगापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छायाः तीरेऽभावात् न तीरस्य गंगापदवाच्यत्वं न वा गंगापदस्य तीरवाचकत्वं सम्भवतीत्यलम्।

युष्मदस्मत्पदशक्तिविवेचनम्

डॉ. संगीता खन्ना

प्रमाणमन्तरा प्रमेयस्य सिद्धिर्न भवतीति समेषां दार्शनिकानां सम्मतिः। प्रमाणसङ्ख्याविषये दार्शनिकानां वैमत्यदर्शनेऽपि न्यायशास्त्रे न्यायसूत्रकारैः प्रत्यक्षानुमानोपमानशब्दभेदात्[१] प्रमाणचतुष्टयमभ्युपगतम्। प्रमाणस्य सामान्यलक्षणं तावत् प्रमाकरणमिति। प्रत्यक्षे इन्द्रियं करणम्, अनुमितौ व्याप्तिज्ञानम्, उपमितौ सादृश्यज्ञानम्, शाब्दबोधे पदज्ञानं करणं भवतीति। समानविधित्वात् प्रत्यक्षानुमित्यतिरिक्तत्वं यद्यपि शाब्दीप्रमायाः नास्तीति वैशेषिकाः प्रवदन्ति तथापि पदोपस्थाप्यपदार्थानां शाब्दबोधे भासमानत्वात् तदेवनियन्त्रितर्थत्वाच्छाब्दीप्रमा प्रत्यक्षानुमित्यतिरिक्तेति नैयायिकाः निगदन्ति। उक्तञ्च जगदीशतर्कालङ्कारेण–

साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥[२]

प्रत्यक्षानुमित्यतिरिक्ता या शाब्दीप्रमा सा शाब्दबोधरूपा अन्वयबोधरूपा वाक्यार्थबोधरूपा वा भवतीति। शाब्दबोधे पदज्ञानं करणम्, पदार्थोपस्थितिः व्यापारः, फलन्तु शाब्दबोध एव।[३] पदजन्यः यो हि बोधः तादृशबुद्धित्वावच्छिन्नं प्रति पदजन्यपदार्थोपस्थितिमात्रस्यैव कारणत्वमभ्युपेयते चेत्तर्हि एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायेन घटादिपदात् समवायसम्बन्धेनाकाशविषयकान्वय-बोधस्यापत्तिः स्यात्। तदापत्तेः परिहारार्थं वृत्तिज्ञानस्यापि शाब्दबोधे कारणत्वमभ्युगच्छन्ति नैयायिकाः। उक्तञ्च **"शक्तिधीः सहकारीणि"**[४] इति। नागेशभट्टस्तु मञ्जूषायामित्थं प्रतिपादितवान्– **"तद्धर्मावच्छिन्नविषयकशाब्दबोधं प्रति वृत्तिविशिष्टज्ञानं कारणमिति"**।[५] एतेन स्पष्टं भवति यत् तत्पदजन्यतदर्थविषयकान्वयबुद्धित्वावच्छिन्नं प्रति वृत्तिज्ञानाधीनपदजन्यपदार्थोपस्थितिः कारणमिति। एतादृशकार्यकारणभावः नैयायिकैः वैयाकरणैश्च स्वीकृतः। तत्र का नाम वृत्तिः? इति जिज्ञासायां शक्तिवादे श्रीगदाधरभट्टाचार्येण अभिहितं यत् **"सङ्केतो लक्षणा चाऽर्थे पदवृत्तिः"** इति।[६] मुक्तावलीकारः

---

१. "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"। न्यायसूत्रम्–१.१.३.

२. शब्दशक्तिप्रकाशिकायाम्, कारिका–०३

३. "पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।" न्यायसिद्धान्तमुक्तावल्याम्, का. ८१

४. न्यायसिद्धान्तमुक्तावल्याम्, कारिकांशः–८१

५. परमलघुमञ्जूषायाम्, पृष्ठम्–३

६. शक्तिवादे, पृष्ठम्–१

विश्वनाथपञ्चाननस्तु "शक्तिलक्षणान्यतरसम्बन्धरूपा वृत्तिः" इति।[७] वस्तुतः अन्वयबोधौपयिकसम्बन्धः वृत्तिरिति।[८] सा च वृत्तिः न्यायनये शक्तिलक्षणाभेदाद् द्विविधा भवति। शक्तिश्च पदप्रकारकार्थविशेष्यकोऽर्थ-प्रतियोगिकपदानुयोगिको वा ईश्वरेच्छा रूपा। उक्तञ्च श्रीगदाधरभट्टाचार्येण–"अस्माच्छब्दादयमर्थो बोद्धव्यः, इदम्पदमिममर्थं बोधयत्विति वेच्छा; सङ्केतरूपा वृत्तिः"।[९] अर्थाद् घटादिपदनिष्ठाघटाद्यर्थनिरूपिता वृत्तिः सङ्केतरूपा, गङ्गादिपदनिष्ठा तीराद्यर्थनिरूपिता वृत्तिः लक्षणारूपेति। "**जात्याकृतिव्यक्तयः पदार्थः**"[१०] इति न्यायसूत्रवचनानुसारेण घटपदाद् घट-घटत्व-समवायानां त्रयाणां बोधसम्भवेऽपि अर्थाद् घटपदस्य घटत्वावच्छिन्नघटव्यक्तौ शक्तिस्वीकारेऽपि युष्मदस्मत्पदयोः कुत्र शक्तिः? इति जिज्ञासायां श्रीगदाधरभट्टा-चार्येण उच्यते–स्वोच्चारयितृतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नविषयकत्वस्वजन्यत्वैतदुभयसम्बन्धेना-ऽस्मत्पदविशिष्टो बोधो भवतु इत्याकारकोऽस्मत्पदप्रकारको बोधविशेष्यकः यः भगवत्सङ्केतः अस्मत्पदस्थले, युष्मत्पदस्थले च स्वघटितवाक्यजन्यबोधाश्रयत्वेनेच्छोद्देश्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नविषयकत्व-स्वजन्यत्वैतदुभयसम्बन्धेन युष्मत्पदविशिष्टबोधो भवतु इत्याकारको युष्मत्पदप्रकारको बोधविशेष्यकश्च भगवत्सङ्केतरूपा शक्तिः, उभयत्र एतादृशभगवत्सङ्केतरूपां शक्तिं स्वीकृत्य स्वोच्चारयितृतावच्छेदकत्वो-पलक्षितधर्मावच्छिन्नेऽस्मत्पदस्य स्वघटितवाक्यजन्यबोधाश्रयत्वेनेच्छोद्देश्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य च शक्तिरिति नैयायिकानां सिद्धान्तः।

यदि स्वसम्बोध्ये युष्मत्पदस्य स्वोच्चारयितरि च अस्मत्पदस्य शक्तिः स्वीक्रियते तर्हि "**देव्युवाच–मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवता**"[११] इत्यादि ऋष्युच्चारितवाक्याद् देव्युच्चारितत्वस्य महिषासुरसम्बोध्यत्वस्य च विरहाद्देवीकर्तृकमहिषासुरकर्मकघातादिबोधस्यानुपपत्तिः स्यात्। अथ च "देव्युवाच–मया त्वयि" इत्यादिवाक्ये ऋष्युच्चरितत्वस्य सुरथसम्बोध्यत्वस्य च विद्यमानत्वाद् योग्यताभ्रमेण ऋषिकर्तृकसुरथकर्मकघातादिबोधस्योपपत्तिः स्यात्। तदापत्तिर्वारणायोच्यते–यथा सामान्यलक्षणाप्रत्यासत्त्या घटत्वप्रकारेण सकलघटानां स्मरणं भवति तथा प्रकृतेऽपि सामान्यलक्षणाप्रत्यासत्त्या "मया त्वयि" इत्यादिवाक्यानुपूर्वीरूपेण देवीवाक्यस्यापि स्मरणसम्भवात् न देवीकर्तृकमहिषासुरकर्मकघातादि-बोधस्यानुपपत्तिः। अर्थात् सामान्यलक्षणाप्रत्यासत्त्या देव्यास्तादृशवाक्यप्रयोक्तृत्वस्मरणं महिषासुरस्य च तादृशवाक्यसम्बोध्यत्वस्मरणं भवत्येव, तेन न तादृशबोधस्यानुपपत्तिः। यदि च वक्तृदेव्याः वाक्यम् अनुवादक-ऋषिवाक्यञ्च एकानुपूर्वीकं भवेत्तर्हि तत्र सामान्यलक्षणाप्रत्यासत्त्या तादृशबोधस्यानुपपत्त्यभावेऽपि भिन्नानुपूर्वीकस्थले किं क्रियत इत्याशङ्कायामुच्यते।

यद्वाक्यमृषिणोक्तं तद्देव्या नोक्तमित्याकारके तद्वाक्यव्यक्तित्वेन रूपेण देव्युच्चारितत्वाभावज्ञानेऽपि तादृशानुपूर्वीप्रकारेण देव्युच्चरितत्वभ्रमस्तु सम्भवत्येव, तादृशभ्रमादेवात्र श्रोतुरस्मत्पदेन देव्याः युष्मत्पदेन

७. न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे, पृष्ठम्–५

८. "शाब्दबोधौपयिकोपस्थितिजनकः पदपदार्थयोः सम्बन्धः कल्प्यते" इति। शब्दमण्यालोके।

९. शक्तिवादे, पृष्ठम्–५

१०. न्यायसूत्रम्–२.२.६८

११. श्रीदुर्गासप्तशत्याम्–३.३७–३८

च महिषासुरस्य बोधः स्वीकार्यः। अथ च यत्र मयेत्याद्यानुपूर्व्यवच्छेदेनापि देव्युच्चारितत्वाभावनिश्चयः, तत्र अस्मद्युष्मद्भ्यां देवीमहिषासुरयोः बोधे न कस्यापि प्रवृत्तिः। स्वसम्बोध्ये युष्मदः स्वोच्चारयितरि चास्मदः शक्तिमभ्युपेत्य "मया त्वयि" इत्यादिवाक्याद् देवीकर्तृकमहिषासुरकर्मकघातादिबोधस्यानुपपत्यभावेऽपि ऋषिकर्तृकसुरथकर्मकघातादिबोधस्यापत्तिर्न वारयितुं शक्यते। तादृशबोधस्यापत्तिर्वारणाय "अन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणरूपं स्वतन्त्रोच्चारणमस्मत्पदप्रवृत्तिनिमित्तम्"[१२] इति प्रवृत्तिनिमित्तमभ्युपेत्य तादृशस्वतन्त्रोच्चारणकर्तृत्वावच्छिन्नेऽस्मत्पदस्य शक्तिरभ्युपेया। तथा च "मया त्वयि" इत्याद्यृष्युच्चरितवाक्ये देवीकर्तृकास्मत्पदतात्पर्यकोच्चारणाधीनोच्चारणत्वाद् अस्मत्पदान्न ऋषिकर्तृकसुरथकर्मकघातादिविषयकबोधः। यत्र च स्वातन्त्र्येणाहं गच्छामीत्युच्चारणस्यापि को गच्छतीत्यादिप्रश्नवाक्यशक्तिग्राहकवाक्योच्चारणाधीनत्वात् तत्र अस्मत्पदाच्चैत्रस्य बोधानुपपत्तिर्वारणाय स्वार्थतात्पर्यकेतिपदमुपात्तम्। तथा च प्रश्नवाक्यस्य अहं गच्छामीत्यादिप्रकृतवाक्यतात्पर्यविषयविरहात् न तादृशबोधानुपपत्तिः।

एवञ्च स्वसम्बोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य शक्तिः। तत्र च युष्मत्पदप्रवृत्तिनिमित्तानुगमकं यत् स्वसम्बोध्यतावच्छेदकत्वं तद्गर्भनिविष्टं स्वसम्बोध्यत्वञ्च "वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थानवगाहिनी या स्वजन्यप्रतीत्याश्रयत्वेनेच्छा तद्विषयत्वम्।[१३] तथा च वाक्यान्तरस्थोक्तिक्रियाकर्मत्वेन युष्मत्पदघटितवाक्यार्थानवगाहिनी या युष्मत्पदजन्यप्रतीत्याश्रयत्वेनेच्छाविषयत्वं महिषासुरे विद्यते, न तु ऋषिसम्बोध्यसुरथे। ऋषिसम्बोध्यत्वञ्च वाक्यान्तरस्थक्रियाकर्मत्वेन युष्मत्पदघटितवाक्यार्थावगाहिनीयुष्मत्पदजन्यप्रतीत्याश्रयत्वेनेच्छाविषयत्वं सुरथत्वमिति। अतो न युष्मत्पदेन सुरथस्य प्रतीतिः।

महावाक्यार्थबोधस्य फलत्वाद्, अवान्तरवाक्यार्थबोधस्योपायरूपत्वाच्च "मया त्वयि" इत्याद्यवान्तरवाक्यमात्रजन्यो भवतु इत्याकारिकाया इच्छायाः अपि तादृशवाक्योच्चारणानुकूलत्वात् तस्या च वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थस्यानवगाहनात् तद्विशेषत्वमादाय अनुवादकसम्बोध्यस्य सुरथे विद्यमानत्वाद् युष्मत्पदेन सुरथस्य स्वसम्बोध्यत्वापत्तिः स्यादिति, न युक्तम्। यतः वाक्यान्तरार्थप्रतीतीच्छानधीनत्वस्यापीच्छाविशेषणत्वात्। तथा च वाक्यान्तरार्थप्रतीतीच्छानधीना या वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थानवगाहिनी या स्वजन्यप्रतीत्याश्रयत्वेनेच्छा तादृशेच्छाविषयत्वं स्वसम्बोध्यत्वम्। अनुवादक-ऋषीच्छा "इत्युवाच देव्युवाच" इत्यादि यद्वाक्यान्तरं तदर्थप्रतीतीच्छानधीना नास्ति, किन्तु सुरथस्य तादृशेच्छाधीनत्वमित्यतः न सुरथस्य सम्बोध्यत्वम्। तादृशेच्छानधीना वाक्यान्तरस्थक्रियाकर्मत्वेन युष्मत्पदघटितवाक्यार्थानवगाहिनी या युष्मत्पदजन्यप्रतीत्याश्रयत्वेनेच्छा देवीच्छा तद्विषयत्वस्य महिषासुरे विद्यमानत्वात् महिषासुरस्य एव स्वसम्बोध्यत्वमित्यलं पल्लवितेन।

---

१२. शक्तिवादे, पृष्ठम्–११२

१३. शक्तिवादे, पृष्ठम्–११९

कुत्रास्ति शक्तिःपदानाम्?

डॉ.सच्चिदानन्दमिश्रः

"जात्याकृतिव्यक्तयस्तु पदार्थः" इति वदता महर्षिणा न्यायसूत्रकृता गोतमेन जात्याकृतिव्यक्तिषु पदजन्यप्रतीतिविषयत्वरूपं पदार्थत्वं विद्यते इति प्रतिपादितम्। एतासु जात्याकृतिव्यक्तिषु त्रिष्वप्येकैव शक्तिरिति न्यायसम्प्रदायस्य सुपरिष्कृतः सिद्धान्तो विद्यते। किन्तु सन्त्यत्र विविधानि मतानि मीमांसकानां वैयाकरणानामन्येषाञ्च। मीमांसकाः वैयाकरणाश्च जातावेव शक्तिरिति स्वीकुर्वन्ति। जातिशक्त्यैव निर्वाहे व्यक्तिशक्तिस्वीकारे गौरवाद् व्यभिचाराच्च। जातौ शक्तिस्वीकारे सति समस्तासु व्यक्तिषु शक्तिस्वीकारापेक्षया एकस्यां गोत्वादिजातौ शक्तिस्वीकारे विद्यते लाघवम्। यस्यां घटादिव्यक्तौ शक्तिग्रहो जायते तदतिरिक्ताया अपि व्यक्तेः बोधो भवति कालान्तरे देशान्तरे च। फलतः सुस्पष्ट एव व्यभिचारः। अतः जातिशक्तिरेवादरणीया इति मीमांसकाः। मीमांसकानां विद्यते कश्चन मतविशेषो यः पदानां शक्तिर्ज्ञाने विद्यते इति स्वीकरोति। गदाधरभट्टाचार्यैरयं पक्षः स्वीये शक्तिवादाभिधे ग्रन्थे निपुणं प्रतिपादितो खण्डितोऽन्ते स्वीकृतश्च। अस्मिन्नालेखे मुख्यतः **शक्तिवाद**दिशा मयाऽयं पक्षो विचार्यते।

व्यक्तौ शक्तिर्न स्वीक्रियते तर्हि शाब्दबोधे व्यक्तिभानं कथं स्यात्? व्यक्तिभानं तु शाब्दबोधे परममावश्यकम्। कारणमत्र विद्यते आनयनादिकं सर्वं व्यक्तावेव स्वीक्रियते। जातेरस्तित्वनास्तित्वव्यपदेशो न् भवत्येव। न कश्चित् जातेरस्तित्वविवक्षया 'गोरस्ति' इत्यादिकं वाक्यं प्रयुङ्क्ते। घटादिपदश्रवणे सति घटादेर्व्यक्तेः स्मरणं भवत्यनुभवोऽपि जायते। स चावश्यमुपपादनीयः। अस्मात् कारणात् जातिशक्तिस्वीकारे व्यक्तिभानं कथं भवेदिति भवत्याशङ्का। भाट्टाः मीमांसकाः ये जातिशक्तिवादिनो भवन्ति, ते व्यक्तिभाननिर्वाहस्तु आक्षेपाद्भवतीति सिद्धान्तयन्ति। अस्मिन् मते घटादिपदात् स्वरूपतो गोत्वादिज्ञानं कथं जायेत? सविकल्पकमेव ज्ञानं शब्दात् सम्भवति। निर्धर्मितावच्छेदककं च घटादिज्ञानं कथं भवेत्? अत्र भाट्टानां भवति समाधानं यत् पदादालोचनरूपमेव स्मरणं स्वीक्रियते, आलोचनं नाम निर्विकल्पकात्मकम्। निर्विकल्पकं स्मरणमपि सम्भवति। अयमेव पक्षो बहुधा श्रूयतेऽनया रीत्या यत्–'अस्तु पदादपि निर्विकल्पकम्'। परन्तु नैतत् सम्भवति–यतो हि कोऽसावयमाक्षेपो यस्मात् व्यक्तिभानं भवति। आक्षेपो नामानुमानं वाऽर्थापत्तिर्वा स्यात्। उभयथापि निर्विकल्पकात्मकात् जातिज्ञानादालोचनरूपाद् व्यक्तिभानं कथमपि न स्यात्, व्याप्यतावच्छेदकप्रकारेण जातिज्ञानं यदि प्रथमं स्यात् तर्हि अनुमितिः सम्भावयितुं शक्या। परन्तु पदादालोचनरूपस्यैव स्मरणस्य स्वीकारात्

व्याप्यतावच्छेदकप्रकारेण जातिज्ञानं तु नैव वृत्तम्। व्याप्यतावच्छेदकप्रकारेण जातिज्ञानस्याजातत्वात् कथं स्यादाक्षेपादपि व्यक्तिधीः। अस्मात् कारणात् जातिशक्तिवादिभाट्टमतं त्वनादेयमेव।

भाट्टमतात् प्राभाकरमतस्यायं विशेषो यत् प्राभाकराः जातौ शक्तिरिति न स्वीकुर्वन्ति न वा व्यक्तौ शक्तिरिति तेषां मतम्। किन्तुं गोत्वादिजातिप्रकारकज्ञाने घटादिपदानां शक्तिरिति तेषां मतम्। पदानां शक्तिर्ज्ञाने न त्वर्थे। किन्तु यदि पदानां शक्तिर्ज्ञाने विद्यते नार्थे तर्हि कथं स्यादर्थस्य वाच्यता पदानां चार्थवाचकता? ज्ञाने पदानां शक्त्या ज्ञानानामेव वाच्यता स्यात्, ज्ञानवाचकता च स्यात्पदानाम्। परन्तु न कश्चित् लोके ब्रवीति यत् पदानां शक्तिर्ज्ञाने विद्यते, इदं पदमस्य ज्ञानस्य वाचकमित्यादि। अत्र प्राभाकराः वदन्ति यत् लोके जनाः तज्ज्ञानशक्तत्वमेव तद्वाचकत्वमिति व्यवहरन्ति। यद्विषयकज्ञाने पदानां शक्तिर्विद्यते तद्वाचकं तत्पदमिति भवति लोके व्यवहारः। अयं लोकव्यवहारो पदानां शक्तिरर्थे विद्यते इति न व्यवस्थापयितुं शक्नोति। पदेषु तज्ज्ञानशक्तत्वं हि तद्विषयकशाब्दधीजनकतावच्छेदकधर्मवत्त्वम् स च धर्मो न ईश्वरसङ्केतविषयत्वादिरूपो किन्तु वह्न्यादौ विद्यमानदाहानुकूलशक्तिरिव पदार्थान्तरमेव।

किन्त्वेवं स्वीकारे विद्यते काचनानुपपत्तिः, तथाहि–प्राभाकरमते सर्वेषामेव ज्ञानानां मितिमातृविषयकत्वनियमः। त्रिपुटीप्रत्यक्षवादिनो भवन्ति प्राभाकरा इति सुविदितमेव। सर्वमपि ज्ञानं ज्ञानज्ञेयज्ञातृविषयकं नियमेन भवति। अस्मात् कारणात् यदा हि घटादिपदाज्ज्ञानं भवत्युत्पन्नं तर्हि तस्यापि ज्ञानस्य मितिमातृविषयकत्वमवश्यमेव स्यात्। अतो यथा घटादिपदाज्जायमानस्य ज्ञानस्य घटादिविषयकतया घटादिवाचकं घटादिपदमित्यादिव्यवहारा भवन्ति तथैव घटादिपदादेव जायमानस्य ज्ञानस्य मितिमातृविषयकतया मितिमातृवाचकं घटपदमित्यादिव्यवहारोऽपि तुल्ययुक्त्या स्यात्।

अत्र समाधीयते प्राभाकरैर्यत् घटादिपदानां मितिमातृविषयकधीजनकत्वेऽपि न घटादिपदानां मितिमातृवाचकत्वं सम्भवति, यतो हि तद्विषयकत्वावच्छिन्नज्ञानशक्तपदस्यैव तद्वाचकत्वात्। यत्पदं यद्विषयकत्वावच्छिन्नज्ञानजनने समर्थं भवति तत्पदस्यैव तद्विषयकत्वावच्छिन्नवाचकत्वं स्वीक्रियते। सर्वस्यैव ज्ञानस्य मितिमातृविषयकतया मितिमातृविषयकत्वावच्छिन्नज्ञाने न कस्यापि पदस्य शक्तिः। अयमाशयो विद्यते प्राभाकराणाम्–यद्विषयकत्वं यत्पदजन्यतावच्छेदकं तत्पदं तद्विषयकज्ञाने शक्तम्, तत्पदं च तद्विषयकत्वावच्छिन्नवाचकं भवति। अवच्छेदकत्वञ्चात्रानतिरिक्तवृत्तित्वादिरूपम्। मितिमातृविषयकत्वावच्छिन्नं प्रति न कस्यापि पदस्य वाचकत्वं सम्भवति। सर्वापि ज्ञानसामग्री मितिमातृविषयकज्ञानजननस्वभावा। ज्ञानसामान्यसामग्री एव मितिमातृभासिका। तथा चोक्तं प्रकरणपञ्चिकायां प्राभाकरमतानुयायिभिः शालिकनाथमिश्रपादैः–

"सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा।
साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन सम्मता॥" (प्रकरणपञ्चिकायाम्–पृ. १०४)

अयमाशयः शालिकनाथमिश्राणां प्राभाकरमतानुयायिनाम्–सर्वमपि ज्ञानं मितिमातृमेयविषयं नियमेन भवति। मितौ मातरि च यज्ज्ञानं भवति तदिन्द्रियसन्निकर्षाद्यनपेक्षमपि प्रत्यक्षमेव भवति साक्षात्काररूपत्वात्। इन्द्रियार्थसन्निकर्षजन्यमेव प्रत्यक्षं भवतीति न नियमः। यदि साक्षात्कारित्वं विद्यते

कस्मिंश्चिदपि ज्ञाने तर्हि तज्ज्ञानं प्रत्यक्षमित्यङ्गीकर्त्तव्यम्। अस्मात् कारणात् सर्वमपि ज्ञानमंशे प्रत्यक्षमेव भवति। मितौ मातरि चांशे प्रत्यक्षमेव सर्वमपि ज्ञानम्। अत एवानुभूतिमात्रस्यैव प्रामाण्यं स्वीक्रियते प्राभाकरैः। घटादिपदानान्तु घटादिरूपार्थभाननियामकत्वम्। अस्मात् कारणात् मितिमातृविषयकत्वं घटादिपदस्य जन्यतावच्छेदकं न भवत्येव, अतिप्रसक्तत्वात्, प्रमाणाभावाच्च। अत्र सुहृद्भावेन पृच्छयते यत् मितिमातृपदे अपि लोके प्रयुज्यते। किं मितिमातृपदयोरपि शक्तिर्न स्वीकार्या मितिमात्रोः। किं मितिमातृविषयकतया मितिमातृपदयोरपि नास्ति ज्ञानजनकता? अत्रैतत् मे प्रतिभाति– मितिमातृपदयोस्तु मितिमातृविषयकत्वावच्छिन्नज्ञानशक्तत्वं स्वीकार्यमेव लोकानुभवेन समर्थनात्। अस्त्येव लोकानां व्यवहारो यत् 'मितिवाचकं मितिपदम्' 'मातृवाचकं मातृपदम्' इत्यादि। अस्मात् कारणात् प्रभाकरमतं कथं स्यात् सङ्गतमिति प्रश्नो जायते। अस्य प्रश्नस्य समाधानमेवं कर्तुं शक्यते इति चिन्तयामि। तथाहि–यदा हि मितिपदं वाक्ये प्रयुज्यते मातृपदं वा वाक्ये प्रयुज्यते, यथा 'घटविषयिणीमितिः' 'अहं घटप्रमाता' इत्यादौ स्थले, तदा घटविषयिणी या मितिरस्ति, घटप्रमाता वा योऽस्ति तयोः विषयकमपरं ज्ञानं तयोर्ज्ञाता चापरो भवति। तयोश्च बोधो जायत एव। तर्हि एकांशे मितिविषयकं मातृविषयकं ज्ञानं मितिमातृपदप्रयुक्तं भवति। अपरांशे तु ज्ञानसामान्यसामग्रीप्रयुक्तं भवति। अतस्तदंशे मितिमातृपदप्रयुक्ततत्वात् मितिमातृपदयोरेव तादृशस्थले मितिमातृभासकत्वं स्वीकार्यम्। अस्मात् कारणात् मितिमातृविषयकत्वं मितिमातृपदजन्यतावच्छेदकमेव भवति न तु घटादिपदजन्यतावच्छेदकम्।

अपरा भवत्यापत्तिरस्मिन् मते–कार्यान्वितस्वार्थे पदानां शक्तिरिति प्राभाकराणां मतमस्ति। अस्मात् कारणात् प्रतिभाति यत् सर्वस्यापि ज्ञानस्य शब्दादुत्पन्नस्य कार्यतावाचित्वमपि स्यादेव। यदि सर्वमपि शाब्दं ज्ञानं कार्यतावाचि तर्हि यथा मितिमातृविषयकत्वावच्छिन्नवाचकत्वं नास्ति कस्यापि पदस्य, तथैव कार्यतावाचकत्वमपि न स्यात् कस्यापि पदस्य अथवा सर्वेषां पदानां स्यात् कार्यतावाचकत्वम्। अत्र यद्यपि विद्यतेऽयं विशेषो यत् ज्ञानसामान्यसामग्री एव मितिमातृविषयकतया ज्ञानं जनयति। कार्यताबोधिका च न भवति ज्ञानसामान्यसामग्री, केवलं शाब्दबोधस्यैव कार्यताविषयकत्वनियमात्। सर्वा हि शाब्दबोधात्मिका बुद्धिर्भवति कार्यताविषयिणी। किन्तु कार्यतावाचकं लिङादिपदमेव भवतीति सामान्यलोकानुभवतः स्वीक्रियते। शाब्दबोधसामान्यस्यैव कार्यताविषयकत्वे तु लिङादिपदस्यैव कार्यतावाचकत्वं कथं स्यात्? घटादिपदस्यापि कार्यतावाचकत्वमावश्यकं प्रतिभाति। तत्र कारणमेतद्भवति यत् घटादिकैः सर्वैरपि पदैर्जायमानैः यत्किञ्चिद्विषयकैः शाब्दबोधैः कार्यताविषयीकरणमावश्यकम्, साक्षाद्वा परम्परया वा भवेत्। अस्मात् कारणात् साक्षात्परम्परासाधारणकार्यत्वविषयतानिरूपितघटादि- विषयताशालिशाब्दबोधो घटादिपदाज्जायते। कार्यत्वविषयतानिरूपितैव घटादिविषयता घटादिपदजन्यतावच्छेदिका भविष्यति। तर्हि यथा घटत्वादिवाचकत्वं घटादिपदस्य भवति, यथा वा लोमविषयतानिरूपितलाङ्गूलविषयताशालिशाब्दबोधजनकतया लोमवल्लाङ्गूलविशिष्टवाचकत्वं पश्वादिपदस्य भवति, तथैव साक्षात्परम्परासाधारणकार्यत्वविषयतानिरूपितघटादिविषयताशालिशाब्दबोधस्य घटादिपदादुत्पत्तेः घटादिपदस्य कार्यतावाचकत्वमपि स्यात्।

इमामापत्तिं परिहर्तुं प्राभाकरैरेषा पद्धतिराश्रियते उच्यते च यत्–तद्विषयकत्वावच्छिन्नवाचकपदस्यैव तद्वाचकत्वमिति कथनस्याशयोऽयं विद्यते यत् साक्षात्परम्परासाधारणनिरूपितत्वांशेऽविशेषणीभूतयद्विष-यकत्वावच्छिन्नविषयकबोधजनकं यत्पदं भवति तद्विषयक्त्वावच्छिन्नवाचकं तत्पदं भवतीति स्वीक्रियते। कार्यतावाचकत्वं तु नानया रीत्या परिष्करणे कृते घटादिपदस्य सम्भवति, कार्यतायाः साक्षात्परम्परासाधारण-निरूपितत्वांशे विशेषणतयैव घटादिपदजन्यबोधविषयत्वात्। लिङादिपदस्य तु साक्षात्परम्परासाधारण-निरूपितत्वांशे विशेषणया कार्यतावाचकत्वं नास्ति किन्तु सामान्यत एवेति कार्यताज्ञानशक्ततया एतादृशं वाचकत्वं लिङादौ सम्भवति। अनया रीत्या कार्यतादिवाचकत्वं लिङादिपदस्यैव न तु घटादिपदस्य, इति नैषाऽऽपत्तिरस्मिन् मते प्रसरं लभते।

अत्रायं प्रश्नोऽपरः समुदेति–कार्यानुकूला शक्तिर्न ज्ञाता कार्योत्पत्तौ कारणीभूता किन्तु पदानां या शक्तिर्विद्यते सा तु न स्वरूपसती कारणीभवति, सा तु ज्ञाता सती एव भवति कारणम्। यथा हि वह्न्यादौ विद्यमाना या शक्तिर्दाहानुकूला स्वीक्रियते, सा ज्ञाता स्यादज्ञाता वा, उभयथापि दाहं करोत्येव। यदि पदानां ज्ञाने शक्तिस्तथैव विद्यते तर्हि पदे विद्यमाना ज्ञानजननशक्तिरपि ज्ञाता स्यादज्ञाता वा, उभयथापि ज्ञानजनने समर्था भवेत्। नास्ति चैवम्, तर्हि कथमेतत्?

अत्रोच्यते–पदे विद्यमाना शक्तिः ज्ञानजननस्वभावा, ज्ञाता सत्येव भवत्युपयोगिनी नास्त्यत्र किञ्चनापि बाधकम्। नायं नियमो यत् वह्न्यादौ दाहानुकूला शक्तिर्यदि स्वरूपसती एवोपयोगिनी भवति तर्हि पदे विद्यमाना शक्तिरपि स्वरूपसती एवोपयोगिनी भविष्यति।

अपरोऽपि प्रश्नो भवत्यत्र समुपस्थितः–यदि पदानां ज्ञाने शक्तिरस्ति न त्वर्थे तर्हि अतीतानागतपदज्ञानाच्छाब्दबोधो न स्यात्, भवति चातीतानागतपदज्ञानाच्छाब्दबोधः। अतः पदस्य तु शाब्दबोधं प्रति कारणत्वमेव न सम्भवति कथं तर्हि तत्र पदे ज्ञानजननशक्तिः स्वीकार्या। न भवति दाहो वह्न्यसत्त्वकाले। अत एव दाहं प्रति वह्नेः कारणत्वमभ्युपगम्यते। अत्र तु पदाभावेऽपि शाब्दबोधस्य जायमानत्वात्पदानां शाब्दबोधं प्रति कारणतैव स्वीकर्तुं न शक्यते, तर्हि कुतस्तत्र पदे शक्तिः कल्प्या? नैयायिकास्तु न पदस्य शाब्दबोधकारणतां ब्रुवते किन्तु पदज्ञानस्य। उक्तं हि कारिकावल्यां विश्वनाथपञ्चाननभट्टाचार्यैः–

> **"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**
> **शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥"** कारिकावल्याम्–८१

इदं वस्तुतः प्रमुखमन्तरं विद्यते न्यायप्राभाकरमतयोः। अनया रीत्या तु प्रश्नोऽत्र कर्तुं न शक्यते। यतो हि प्राभाकराणां मते पदानां नित्यतया पदेष्वतीतानागतते न सम्भवत एव। अतः सर्वत्रैव पदशक्त्यैव निर्वाहः सम्भवति। अथवा पदज्ञाने पदार्थज्ञानजननस्वभावा शक्तिः स्वीक्रियताम्।

इमं मीमांसकमतं गदाधरभट्टाचार्यो दूषयति। तत्र च प्रधाना युक्तिः प्रस्तूयते तैर्यत्–अस्मिन् मते लाक्षणिकस्यापि अनुभावकत्वमावश्यकं भविष्यति। लाक्षणिकस्य त्वनुभावकत्वं न स्वीक्रियते।

यथा हि पदार्थोपस्थितिद्वारा शक्तं पदं भवत्यनुभावकमनुभवजनकत्वात्, तथैव 'गङ्गायां घोषः' इत्यादौ गङ्गादिपदमपि गङ्गातीरादिविषयकशाब्दबोधं जनयत्येवेति गङ्गादिपदस्य गङ्गातीरादिविषयकशाब्दबोधजनकत्वात् गङ्गादिपदस्यापि गङ्गातीरादिवाचकत्वं कुतो न स्यात्? गङ्गादिपदस्य गङ्गातीरादिवाचकत्वं तु न कश्चन स्वीकरोति। स्वीकारे तु लक्षणोच्छेदप्रसङ्गः। गङ्गादिपदं गङ्गादिवाचकं भवति तथैव मुख्ययैव वृत्त्या गङ्गातीरादिवाचकमपि स्यात् गङ्गादिपदम्। पदार्थोपस्थितिद्वारा अन्यथासिद्धतया लाक्षणिकस्थले गङ्गादिपदस्य गङ्गातीरादिवाचकत्वं न भविष्यति इति तु नैव वक्तुं शक्यम्। अनया रीत्या तु गङ्गादिपदस्य गङ्गादिवाचकत्वमपि न स्यात् पदार्थोपस्थितिद्वारा तुल्ययुक्त्याऽन्यथासिद्धत्वात्।

अनुभावकतावच्छेदिकायाः शक्तेरभावात् लाक्षणिकस्य नानुभावकत्वं सम्भवति, लाक्षणिकस्थले 'गङ्गायां घोषः' इत्यादौ घोषादिपदमेव घोषादिवाचकं सन्नपि गङ्गातीरादिकमप्यनुभावयति, यतो हि यदि तत्र घोषपदस्थले नौकादिपदं भवेत् तर्हि तत्र लक्षणा न भवत्येव किन्तु मुख्यया वृत्त्यैव तत्र शाब्दबोधो जायते। अतः घोषादिपदस्यैव गङ्गातीराद्यनुभावकत्वं स्वीक्रियते–अनया रीत्या तु समाधातुं न शक्यते। तत्र कारणमेतद्विद्यते यत्–अनया रीत्या तु 'वृश्चिकभिया पलायमानस्य सर्पमुखे पातः' इति न्याय एव गले पतति। यतो हि अनया पद्धत्या गङ्गादिपदस्य गङ्गातीरादिवाचकत्वापत्तिवारणसम्भवेऽपि घोषादिपदस्य गङ्गातीरादिवाचकत्वापत्तिः सुतरां स्यात्। तत्र भवता गङ्गातीराद्यनुभावकतायाः स्वीकृतत्वात्। अथ च लाक्षणिकस्याननुभावकत्वे शक्तपदाघटितहेतुवाक्यादन्वयबोधोऽपि न स्यात्। 'धूमात्' इत्यादिहेतु-वाक्यघटकीभूतस्य पदद्वयस्यापि लाक्षणिकत्वस्वीकारात्। धूमादिपदस्य धूमज्ञाने पञ्चम्याश्च ज्ञाप्यत्वे लक्षणायाः स्वीकारात्। लाक्षणिकस्य तु न भवताऽनुभावकत्वं स्वीक्रियते।

यदि चेमाः आपत्तीः वारयितुमुच्यते यत्–लक्ष्यार्थस्य न शाब्दबोधे प्रवेशः किन्तु लक्ष्यार्थस्य स्मृतस्य समभिव्याहृतपदार्थैः सह असंसर्गाग्रहमात्रं भवति। अत एव च लक्ष्यार्थविषयोपरागेण न कदाचनापि 'शृणोमि' इत्यनुव्यवसायः, किन्तु विधेयोपरागेणैव तादृशोऽनुव्यवसायो भवति। अस्मादेव कारणात् ' न विधौ परः शब्दार्थः' इतिसिद्धान्तोऽपि विद्यते इति–तर्हि नैतदपि साधु। 'मञ्चाः क्रोशन्ति' इत्यादौ लक्ष्यार्थमञ्चस्थपुरुषादेः शाब्दबोधविषयत्वं परमावश्यकम्, अन्यथा पूर्वाननुभूतस्य पुरुषादेः प्रतीतिर्न निर्वहेत्। भवता तु तत्र स्मृतस्य केवलं असंसर्गाग्रह एव भवतीति स्वीक्रियते, अननुभूतस्य तु स्मरणं न सम्भवति। लक्ष्यार्थस्तु न पूर्वमनुभूतः।

अथ उपर्युक्ता आपत्तीः वारयितुं **तत्प्रकारकशाब्दबोधं प्रति शक्तिज्ञानाधीनतत्प्रकारक-पदार्थोपस्थितिः कारणमिति** समानप्रकारकत्वमात्रेण कार्यकारणभावः स्वीकर्त्तुं वाञ्छितः। तथा च तद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति शक्त्यधीना पदार्थोपस्थितिरेव कारणीभवति न तु लक्षणाधीना पदार्थोपस्थितिः, लक्षणया समुपस्थापितार्थेन सह तु केवलमसंसर्गाग्रहमात्रं भवति न तु शाब्दबोधः। अलाक्षणिकस्थलीयशाब्दबोधे खलु योग्यताबलादपूर्वस्याप्यर्थस्य बोधे न किञ्चिद्बाधकम्। अत एव जातावेव शक्तेर्ज्ञाताया उपयोगित्वेऽपि अपूर्वस्याः व्यक्तेर्भानं निर्विरोधं भवत्येव। लक्ष्यार्थस्य शाब्दबोधविषयत्वानभ्युपगमेऽपि लक्ष्यार्थस्य प्रतीतिः सामान्यतोदृष्टानुमानाद्भवन्ती नानुभवविरोधं पुरस्करोति।

अत्र विषये प्रकरणपञ्चिकाकृतां शालिकनाथमिश्रपादानामपि सम्मतिर्वरीवर्तीति दृष्ट्वा शक्तिवादव्याख्याकारान् श्रीहरिनाथभट्टाचार्य-सुदर्शनाचार्यादीनुपेक्ष्य स्वकीयया चिन्तनपद्धत्या मया गदाधरभट्टाचार्यग्रन्थसम्मतिरस्मिन् पक्षे पुरस्कृता। तथा हि प्रोक्तं प्रकरणपञ्चिकाकृता शालिकनाथमिश्रेण–

''अत्रोच्यते–का पुनरियं लक्षणा?

'वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः।
तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते॥' इति सङ्ग्रहश्लोकः।

'गङ्गायां घोषः' इत्यादिषु श्रौतस्य गङ्गापदार्थस्य वाक्यार्थेऽन्वयासम्भवात्, तं परित्यज्य तत्सम्बन्धाल्लब्धबुद्धिसन्निधेः कूलाद्यर्थस्य वाक्यार्थान्वयिताऽध्यवसीयते। अत एवाहुः–'अनुपपत्त्या, सम्बन्धेन च लक्षणा भवती'ति। इह च 'गामानये'त्यादौ न श्रौतस्यार्थस्यान्वयायोग्यत्वं, नाप्यन्वितावस्थस्याऽऽनयनसम्बन्धार्हता, अन्वितार्थस्यान्वयान्तरासम्भवात्।

अथ मा भूदेषा लक्षणा, किन्तु क्रियाऽवगता कारकान्वयिनीमात्मनो दशामवगमयति, अविनाभावादिति। उच्यते–शाब्दत्वं तावदित्थमपह्नुतमन्वयावगमस्य, किन्तु सामान्यतोदृष्टानुमान-गोचरताऽभ्युपगता भवति।'' (प्रकरणपञ्चिकायाम्–पृ० ३९८-३९९)

एवं हि मम प्रतिभाति–अत्र सामान्यतोदृष्टानुमानगोचरता लक्ष्यार्थान्वयस्य प्रतिपादिता। अस्य शालिकनाथमिश्रग्रन्थस्य सङ्गतिर्गदाधरग्रन्थेन प्राभाकरमतानुवादेन साकं समुचिता विद्यते। अनया अनुमानविधया अपूर्वव्यक्तिभानं लक्ष्यार्थस्थलेऽपि नासङ्गतमिति प्राभाकरमतं भवितुमर्हति।

अत्र हि गदाधरभट्टाचार्या एवं दूषयन्ति–उपर्युक्तया पद्धत्या शक्तिविशेषपुरस्कारेण तद्वाचकपदस्य तज्ज्ञानस्य वा हेतुताकल्पनं न सङ्गतिमावहति। तत्र कारणमेतावदेव यत् **तत्तत्पदार्थान्विततत्तदर्थबोधं प्रति तत्तत्पदसाकाङ्क्षतत्तत्पदज्ञानस्य कारणत्वं** स्वीकार्यम्। अस्य कार्यकारणभावस्य स्वीकारस्त्वावश्यक एव। तर्हि तदतिरिक्तस्य कार्यकारणभावस्य स्वीकृतिर्युक्तिविरहादनुचिता प्रतिभाति। अतः उपर्युक्तकार्य-कारणभावं पुरस्कृत्य लाक्षणिकस्याननुभावकत्वव्यवस्थापनं न सङ्गतं प्रतीयते। अतएव न प्राभाकरमतं स्वीकृतिमर्हति। अत एव जातिविशिष्टायां व्यक्तौ शक्तिरिति न्यायसिद्धान्तः।

वस्तुतस्तु न्यायमतेऽपि लाक्षणिकस्याननुभावकत्वं न स्वीकर्त्तुं शक्यम्। अत एव नवीनाः लाक्षणिकस्याप्यनुभावकत्वं स्वीकुर्वन्ति।

(अस्मिन्नालेखे प्रकरणपञ्चिकागतानि सर्वाण्युद्धरणानि काशीहिन्दुविश्वविद्यालयतः १९६१खिस्ताब्दे प्रकाशितायाः प्रकरणपञ्चिकातः न्यायसिद्ध्याख्यव्याख्यायुतातः प्रस्तुतानि सन्ति।)

षोढा शक्तिवादः

सुजाता त्रिपाठी

श्रीमद्गदाधरभट्टाचार्येण सुप्रणीतोऽयं ग्रन्थः शक्तिवादः। तत्र अनेके विषयाः निरूपिताः। तत्रैव शक्तेः स्वरूपमपि प्रतिपादितं वर्तते। प्रातिपदिकस्य के-के अर्थाः वाच्याः भवन्ति इति सिद्धान्तस्य यथामति तुलनात्मकदृष्ट्या विवेचनं कुर्वे।

उक्तञ्च वैय्याकरणभूषणे–

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिता॥

अर्थात् एकं जातिः, द्विकं जातिव्यक्ती, त्रिकं, जातिव्यक्तिलिङ्गानि। तत्र सत्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्, सत्वादिगुणानामाधिक्यं पुंस्त्वम्, तेषामेव सत्वादिगुणानामपचयः स्त्रीत्वम्। चतुष्कं–संख्यासहितं त्रिकम्। पञ्चकं–कारकसहितं पञ्चकमिति।

अत्र जातिपदेन तत्तत्पदार्थगतसाधारणधर्मो विवक्षितो न तु नित्यत्वे सत्यनेकसमवेतत्व-रूपाजातिरङ्गीक्रियते। असाधारणत्वं तु तत्पदार्थेतरावृत्तित्वे सति तत्पदार्थमात्रवृत्तित्वम् तेनाकाशत्वाभावत्वादीनामनेकसमवेतत्वरूपजातित्वाभावेऽपि नाव्याप्तिः। अयं हि तत्तद्पदार्थसाधारणधर्मः शास्त्रे स्वार्थशब्देनाभिधीयते। जातेः शब्दशक्यत्वे सवर्णेऽणग्रहणमपरिभाष्यमाकृतिग्रहणात् सिद्धम्। इति जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् इति सूत्रस्थं वार्तिकं प्रमाणम्। तथा च सरूपसूत्रे स्थितं आकृतिं वाजप्यायनः इति वाक्यञ्च प्रमाणम्।

अयं हि जातिशक्तिवादो मीमांसकाऽभिमतः। लाघवाज्जातौ शब्दानां शक्तिः स्वीकार्येति तेषामभिप्रायः। यत्तु व्यवहारे व्यक्तावेव शब्दानां शक्तिदर्शनात् तत्रैव शक्तिरिति तु न, व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात्।

व्यक्तिवादस्यापि समर्थनं एवं कर्तुं शक्यते। तत्र केवलं व्यक्तिवादे समापतितानां दोषाणां निराकरणं एव क्रियते। यद्यपि उपचयापचयशब्दार्थाः परस्परं विरुद्धाः, तेषां परस्परविरुद्धधर्माणामेकत्र समावेशो न भवति। तेन तटस्तटीतटमिति लिङ्गत्रयमनुपपन्नं स्यात्। किञ्च सर्वविकाररहिते ब्रह्मणि उपचयापचयासंभवात् आत्मा ब्रह्म इति पुंस्त्वनपुंसकत्वयुक्तव्यवहारानुपपत्तिश्च स्यात्।

तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यञ्च। तमेव विरुद्धधर्ममादाय तटादिशब्दाः भिद्यन्ते। स्त्रीपुंस्त्वादिधर्माः परस्परं विरुद्धाः, तेषामेकत्रावस्थानासंभवः। अतो धर्मभेदाच्छब्दभेदो भवति। यथा एक एव अकारोकारादयो वर्णाः ह्रस्वत्वदीर्घत्वादिभेदेन भिद्यन्ते तथैव समानानुपूर्वीकाः तटादिशब्दाः भिन्नाः भवन्ति। तेन पुल्लिङ्गस्तटशब्दो भिन्नः, स्त्रीलिङ्गस्तटशब्दोऽन्यः, नपुंसकलिङ्गस्तटशब्दो भिन्न इत्येवं शब्दभेदान्न दोषः। केषाञ्चिदनेकलिङ्गव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानाम्–अभेदारोपात्।

चतुष्कं नाम चतुर्णां समूहः। जाति-व्यक्ति-लिङ्ग-संख्या इति चत्वारो नामार्थ इति केषाञ्चिन्मतम्।

पञ्चानां समूह इति पञ्चकम्। कर्तादिकारकसहितं जातिव्यक्तिलिङ्गसंख्याप्रातिपदिकार्थ इत्यपि केषाञ्चिन्मतम्। टाबादिस्त्रीत्वबोधकप्रत्ययसमभिव्याहारे अजा-अश्वादिशब्दात् स्त्रीत्वस्य प्रतीतिर्जायते। टाबाद्यभावे स्त्रीत्वप्रतीतिर्न जायते। एवं प्रतीत्यप्रतीतिरूपाभ्यामन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव प्रतीतिर्जायते। किन्तु प्रत्ययवर्जिते दधि पश्य इत्यादौ प्रत्ययज्ञानाऽभावेऽपि क्लीबत्व-एकत्वोभयविशिष्टदधिकर्मकं दर्शनमित्यनुभवसिद्धतया संख्येत्यादिना प्रकृत्यर्थत्वमेवसिद्धयति। अन्यथाऽनुभवविरोधः स्पष्ट एव। किञ्च शास्त्रेण प्रकृतेरेव लिङ्गमुपदिष्टं वर्तते। अतो लिङ्गसंख्यादयः प्रकृतेरेव वाच्या न तु प्रत्ययस्येति।

षोढा प्रातिपदिकार्थ इति कौण्डभट्टादीनां मतम्। एतेषां मते शब्दोऽपि शाब्दबोधे भासते। अतः सोऽपि प्रातिपदिकार्थः। तन्मते न किमपि ज्ञानं शब्दविरहितं भवति। उक्तञ्च वाक्यपदीये–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

एषोऽभिप्रायो यत् सर्वमपि ज्ञानं शब्दरूपविशेषणेनानुविद्धमेव भवति। नास्ति किमप्येतादृशं ज्ञानं यच्छब्दशून्यं भवेत्। यत्र च प्रत्यक्षज्ञानं जायते शब्दार्थयोस्तादात्म्यादारोपितं शब्दज्ञानमस्त्येव। शब्दार्थयोस्तादात्म्यं तु अर्थं कथयति, अर्थं शृणोति इत्यादि प्रयोगानुसारेणानुभवसिद्धम्। विष्णुमुच्चारय इत्यादौ विष्णुपदात् स्वार्थद्रव्यलिङ्गाद्यर्थवद्विष्णुशब्दस्याप्युपस्थितिर्यदि न स्यात् तर्हि उच्चारणासंभवेन वाक्यार्थबोधो न स्यात्। अतः शब्दार्थवत् स्ववाचकशब्दस्याप्युपस्थितिर्भवतीति मन्तव्यम्।

शब्दस्य प्रातिपदिकार्थत्वमनङ्गीकृत्य यदि तस्योपस्थितिः लक्षणया स्वीक्रियते तदपि न साधु। लक्षणा द्विविधा-निरूढा, प्रयोजनवती च। निरूढा लक्षणा तु शक्त्यनतिरिक्तैव भवति। यथाऽस्य शब्दस्यैतस्मिन्नर्थे शक्तिरित्यनादितात्पर्यवशाद् बुद्ध्यते तथा निरूढलक्षणाऽप्यनादितात्पर्यग्रहाधीनेत्यर्थः। यदि शब्दो न प्रातिपदिकार्थस्तर्हि विष्णुपदवाच्यो विष्णुशब्दो नैव भवितुमर्हति। एवं सति निरूढलक्षणयाऽपि न निर्वाहः सम्भवति। किञ्च, विष्णुपदस्य विष्णुशब्दे लक्षणायां प्रयोजनाभावात् प्रयोजनवती लक्षणाऽपि न सम्भवति।

यदि अनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः। यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद् भासते। अयमभिप्रायः अनुकरणानुकार्ययोरभेदपक्षे स्वप्रत्यक्षरूपां

पदजन्योपस्थितिमादाय यथा शाब्दबोधे शब्दस्य भानं तद्वद् घटमानयेत्यादौ घटादिपदानामपि श्रोत्रेण स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय भानस्यावर्जनीयतया सर्वत्रैव शाब्दबोधे शब्दविषयता सिद्ध्यति।

अनया रीत्या शब्दस्यापि प्रातिपदिकार्थत्वं सिद्ध्यति। शब्दे वाचकत्वं वाच्यत्वञ्चेत्युभयं सिद्ध्यति। उक्तञ्च वाक्यपदीये–

ग्राह्यत्वं ग्राहकत्वञ्च शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते।।
विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते।

अभिप्रायो यत् यथा लोके दीपादिरूपतेजसि विषयसन्निधाने शक्तिद्वयं दृष्टम्, विषयासन्निधाने तु तेजसि ग्राह्यत्वमेव। एवं सर्वेषां शब्दानामर्थबोधे ग्राह्यत्वग्राहकत्वरूपे द्वे शक्ती स्तः। एते पृथगवस्थिते इत्यनेन तयोरसमनियतत्वं प्रदर्शयति। एवमर्थगोचरशब्दनिष्ठशक्तिसहकृत एव शब्दोऽर्थस्य स्वस्वरूपस्य च प्रत्यक्षं जनयति। शब्दैः स्वात्मनो ज्ञानविषयत्वमसंप्राप्य नार्थो बोध्यते, किन्त्वात्मनो ज्ञानविषयत्वं संपाद्यैव शब्दैरर्थो बोध्यते। एवं शब्दनिष्ठबोधकतानिरूपितबोध्यतायाः शब्दाश्रयकत्वं शास्त्रकृत् संमतम्।

शब्दस्य प्रातिपदिकार्थत्वं वैयाकरणानां मतानुसारेण सिद्धं भवति। अत्र प्रसङ्गे ममेदं तात्पर्यं यत् आप्तजनानां एते अर्थाः नामार्थत्वेन अभिप्रेताः। तत्रैव सङ्केतः कर्त्तव्य इति।

शक्तिस्वरूपम्

सतीशमिश्रः

तद् विषयकबोधे तत्पदजन्योपस्थितिः कारणं किन्तु शाब्दबोधे कारणीभूता या उपस्थितिः सा सामान्येन कारणं न भवति अन्यथा घटपदात् एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवति इति न्यायेन घटपदसम्बन्धिज्ञानेन आकाशोपस्थितौ आकाशस्यापि शाब्दबोधापत्तिः स्यात् तद्वारणाय उपस्थितौ पदनिष्ठवृत्तिज्ञानाधीनत्वेन विशेषणं दीयते तथा च घटपदात् आकाशोपस्थितेः घटपदनिष्ठवृत्तिः ज्ञानाधीनत्वाभावेन घटपदात् आकाशबोधापत्ति नास्ति किन्तु घटपदनिष्ठा वृत्तिः का इत्याकाक्षायां शक्तिवादे आह।

सङ्केतो लक्षणा चार्थे पदवृत्तिः। अर्थप्रतियोगिकपदनिष्ठा वृत्तिः सङ्केतो लक्षणा वा सङ्केतपदेन ईश्वरेच्छारूपः सम्बन्धो गृह्यते ईश्वरेच्छा च "अस्मात् पदात् अयमर्थो बोद्धव्यः इत्याकारिका अर्थ-विशेषिका द्वितीया तु इदं पदं इममर्थं बोधयतु इतिपदविशेषिका च नैयायिकमते प्रथमान्तार्थस्य विशेष्यतया उक्तस्य इच्छाद्वयस्य पदविशेषकत्वम् अर्थविशेष्यकत्वं च किन्तु पदपदार्थयोः सम्बन्धविशेषः वृत्तिः, इत्याशयः अत एव उच्यते सति प्रत्ययहेतुत्वंसम्बन्धे ह्युपपद्ये तस्मात् तदर्थैः शब्दानां सम्बन्धोऽस्तीति गम्यते स च सम्बन्धः औत्पत्तिकः। तथा भाष्यं सिद्धे शब्दार्थसम्बन्धे" इत्युक्तम् अत एव अनादिकालतः घटादिपदेभ्यः घटाद्यर्थबोधः जायमानो दृश्यते, तादृशार्थेन पदस्य यः सम्बन्धः तस्य इच्छारूपत्वस्वीकारे वाच्यत्ववाचकत्वविवेको न स्यात् अतः उच्यते बोधविषयत्वेन इच्छाविषयः वाच्यः बोधजनकत्वेन इच्छाविषयः वाचकः किन्तु एतन्मते इच्छासम्बन्धेन पदवैशिष्ट्यम् अर्थे अर्थवैशिष्ट्यं पदे दुरुपपादम् अतः वैयाकरणैः वाच्यवाचक भावापरपर्याप सम्बन्धान्त रमेष शक्तिः। तस्याश्च स्वरूपसम्बन्धेन उभयत्र वृत्तित्वेन तस्याः सम्बन्धोपपत्तिः अत एव उक्तं वाक्यपदीयकारेण–

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

"अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा। अयमाशयः यथा इन्द्रियाणां चक्षुरादीनां घटादिग्रहणयोग्यता अनादिः तथैव अर्थैः साकं पदानामनादिःसम्बन्ध एव योग्यता, योग्यता इत्यस्य योग्यतावच्छेदकः वाच्यवाचकसम्बन्धः अनादिः इति शेखरकारमतं तस्य वाच्यवाचकभावरूपसम्बन्धस्य ग्राहकं इतरेतराध्यासरूपं तादात्म्यं शक्तिग्राहकत्वात् तस्या अपि शक्तिव्यवहारः शास्त्रेषु कृतो वर्तते।

भेदाभेदघटितस्य तस्य वास्तविकसम्बन्धत्वाभावात् शब्दार्थयोः तादात्म्यं भवति यथा घट इत्ययं शब्दः घट इत्ययमर्थः इति पदपदार्थयोः सामानाधिकरण्यसत्त्वात्। अत एव वृद्धिरादैच् संज्ञासंज्ञिवाचकयोः सामानाधिकरण्यं दृश्यते" रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः "ॐ इत्येकाक्षरं ब्रह्म" इत्यादौ सामानाधिकरण्यमुपपद्यते तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वं क्वचिद् अभेदस्यबोधः अत एव उक्तेषु समानाधिकरण्यं क्वच्चिद् भेदस्य उद्बोधः। अतः "ऊञः प्रगृह्यम्" इत्यत्र षष्ठी भवति तथा सति तस्य वाचकः प्रणवः इति।

ननु शब्दार्थयोस्तादात्म्यस्वीकारे असिशब्दोच्चारणे जिह्वोच्छेदापत्तिः मधुशब्दोच्चारणे माधुर्यानुभवापत्तिः स्यात् इति चेन्न ; भेदस्य वास्तविकत्वेन अभेदस्य आरोपितत्त्वेन उक्तदोषाभावात् शब्दार्थयोस्तादात्म्याद् एव श्लोकः कथितः।

इदानीं श्लोकार्थं श्रृणु इति श्रवणकर्मतोपपत्तिः। वस्तुतः बौद्धं पदं शक्तं बौद्धः अर्थः शक्यः इति न दाह्यदाहकभावापत्तिः शब्दार्थयोः सम्बन्धः अवश्यमेव मन्तव्यः तथा च उक्तं हरिणा।

सति प्रत्ययहेतुत्वं सम्बन्धोप्युपपद्यते।
अतस्तदर्थैः शब्दानां सम्बन्धोस्तीति गम्यते॥ इति।

स च सम्बन्धः अनादिः सर्गादिभुवां महर्षिणाम् ईश्वरेण साक्षात्कृतः तद्व्यवहाराच्च अस्मदादी जायते। शब्दार्थयोः सम्बन्धः वृत्तिरूपः, सा च वृत्तिस्त्रिधा, शक्तिर्लक्षणा व्यञ्जना च सा च शक्तिः साधुष्विवापभ्रंशेष्वपि शक्तिग्राहिका शिरोमणेर्व्यवहारस्य तुल्यत्वात्। व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम्। अत एव बालानां तिरश्चांचबोधः। न हि तेषां तदेव तत्सम्भव इत्यन्ये। न च साधुस्मरणात्ततो बोधः।

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः॥

इति हर्युक्तेः। अनुमानमत्र ज्ञानं साधुविषयस्मरणेनेत्यर्थः। तद्विदां साधुविदाम्। असाधोः साधुप्रकृतिकत्वात्सादृश्येन तज्ज्ञानमिति वाच्यम्, साधुस्मरणं विनापि बोधानुभवात्। तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च तदर्थज्ञापकत्वेन स्मरणं तु नार्थोपस्थापक शक्ततावच्छेदकानुपूर्व्यग्रहात् तद्वाचक-सर्वनामस्मरणाननुभवाच्च, उच्चारितस्यैव बोधकत्वेन स्मृत साधुतो बोधासम्भवाच्च।

न च शक्तिभ्रमाद् बोधः पूर्वपूर्वभ्रमाच्चोत्तरोत्तभ्रम इति पामराणां शक्त्यग्रहेऽपि तद्भ्रमोपपत्तिरिति वाच्यं घटत्वादिविशिष्टघटादिरूपार्थनिरूपिताया घटादिपदवृत्तित्वेन गृहीताया भिन्नानुपूर्वीकत्वरूप-

विशेषदर्शनसत्त्वेन साधारणधर्मदर्शनाभावेन च गगरीपदादौ भ्रमानुपपत्तेः। यदि तु अशक्त्या किञ्चिद् 'गगरी'इति प्रयुक्तेऽम्बाम्बेत्यादाविव घट इति साधुशब्दस्मरणात्प्रयोज्यस्य बोधे तटस्थस्य गगरीशब्दादेवास्य बोध इति भ्रमेणाद्यस्यशक्तिभ्रमस्तन्मूलकश्चान्येषामपि। तदुक्तं हरिणा–

तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः इति।

इव शब्देन तदुपगमस्य भ्रमत्वं सूचितम्।
तादात्म्यस्य शक्तित्वं च स्पष्टमेवोक्तम्।।

शक्तिस्त्रिधा, रूढिर्योगो योगरूढिश्च। शास्त्रकृत्कल्पितावयवार्थप्रतीतौ यदर्थनिरूपितं प्रकृतिप्रत्ययसमुदायमात्रे बोधकत्वं तत्पदे सा तदर्थनिरूपिता रूढिः। यथा मणिनूपुरादौ।

शास्त्रकृत्कल्पितावयवार्थमात्रबोधे शक्तिः–योगरूढिः यथा–पाचकादौ अश्वगन्धापदमोषधि-विशेषबोधे रूढम्, अश्वसम्बन्धवत्तया वाजिशालाबोधे योगिकम्। इदं योगिकरूढम् इत्युच्यते। "रूढिर्योगापहारिणी" इति तु प्रकरणाद्यभावे इति बोध्यम्। तत्र मण्डपपदादिभ्यो मण्डपानकर्त्रादेः रूढ्यर्थमण्डपादिगुणवत्त्वेन बोधः तत्र प्रथमप्रतीतिरूढिमुख्यार्थत्यागेन, योगात् रूढिपूर्वकलक्षणाया वलवत्त्वेन लक्षणयैव बोधः।

यत्र शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितं समुदायबोधकत्वं सा योगरूढिः, यथापङ्कजादौ, तत्र पङ्कजनिकर्तृपद्ममिति बोधात्। पद्मस्यानुपपत्तिप्रतिसन्धानं सम्बन्धप्रतिसन्धानं च विना बोधान्न तत्र लक्षणावसरः। क्वचित् तात्पर्यग्राहकवशात् केवलरूढ्यर्थस्य केवलयोगार्थस्य च बोधः, "भूमौ पङ्कजमुत्पन्नं कह्लारकैरवमुरवेष्वपि पङ्कजेषु इत्यादौ। स्पष्टश्चेदं "आर्हात्" इति सूत्रे भाष्ये।

सैषा शक्तिः संयोगादिभिर्नानार्थशब्देषु नियम्यते। तदुक्तं हरिणा–

संयोगो विप्रयोगश्च साहचर्यं विराधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।

सामर्थ्यमौचिती देशः कालो व्यक्तिस्वरादयः।
शब्दार्थस्यानवच्छेदे च विशेषस्मृतिहेतवः।।

एते संयोगादयः शब्दार्थस्यानवच्छेदे सन्देहे तदपाकरणद्वारेण विशेषस्मृतिहेतवो निर्णयहेतवः इत्यर्थः। उपस्थितानामनेकेषां एकतरमात्रार्थतात्पर्यनिर्णयद्वारा तन्मात्रार्थविषयकान्वयबोधजनका इति भावः संख्यासंज्ञासूत्रे भाष्येऽपि स्फुटमेतत्।

अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकं संयोगादयस्तद्व्यञ्जकप्रपञ्चः, तैः सामर्थ्यस्यैवाभिव्यक्तेरिति परे।

सवत्साधेनुः, अवत्साधेनुः इति संसर्गविप्रयोगयोरुदाहरणे। रामलक्ष्मणौ इत्यादौ साहचर्येणोभयोर्युगपदेव नियमनमिति नान्योन्याश्रयः साहचर्यं सादृश्यं सदृशयोरेव सह प्रयोग इति नियमात्। "रामार्जुनगतिस्तयोः इत्यत्र विरोधेन तत्। अञ्जलिना जुहोति, अञ्जलिना सूर्यमुपतिष्ठत इत्यत्र जुहोत्यादिपदार्थवशादञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वम्। सैन्धवमानय इत्यादौ प्रकरणेन तत्। अक्ताः शर्कराः उपदधाति इत्यादौ "तेजो वै घृतम्" इति घृतस्तुतिरूपाल्लिङ्गाद्अक्ता इत्यस्य घृतसाधनाञ्जनपरत्वम्। रामो जामदग्न्यः, इत्यादौ जामदग्न्यपदसन्निधानेन रामः परशुरामः। अभिरूपाय कन्या देया, इत्यादौ अभिरूपरामेति सामर्थ्यात्प्रतीयते। "यश्च निम्वं परशुना इत्यादौ औचित्यात् परशुनेत्यस्यच्छेदनार्थत्वम्। भात्यत्र परमेश्वरः, इत्यत्र राजधानीरूपाद्देशात्परमेश्वरपदं राजबोधकम्। 'चित्रभानुर्भाति' इत्यादौ रात्रौ वह्नौ, दिवासूर्ये। व्यक्तिलिङ्गं मित्रो भाति मित्रं भाति। अत्राद्ये सूर्योऽन्त्ये सुहृत्। स्थूलपृषतीमित्यादौ स्वरात्तत्पुरुषबहुब्रीह्यर्थनिर्णयः। आदिना षत्वसत्वणत्वनत्वादिसुसिक्तमियत्रोपसर्गोन्यार्थः। प्रणायके प्रणयनक्रियाकर्ताणत्वात्, प्रनायके प्रगतनायकदेशबोध इति पुञ्जराजः। क्वचित्प्राकरणिकार्थबोधोत्तरं वक्तृबोध्दव्यवैशिष्ट्यप्रतिभादिसहकारेण द्वितीयार्थबोधोऽपि। यथा शालकादिप्रयुक्तात् 'सुरभिमांसम्' इत्यादेर्द्वितीयाश्लीलार्थबोधः।

द्वितीयः
परिचर्चाखण्डः

इदमन्धन्तमः सर्वं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिः आंससारं न दीप्यते।।

शक्तिवाद-शास्त्रार्थपरिचर्चा-परिदृश्यम्

मान्या:!

अत्र किल शक्तिवादमधिकृत्य प्रवर्त्तितायां शास्त्रार्थपरिचर्चायां विद्वद्भिः विविधेषु विषयेषु स्वानुसन्धानप्रबन्धानां समुपस्थापनं विहितम्। तत्र तत्तद्गूढविषयानधिकृत्य पूर्वोत्तरपक्षरूपेण विदुषां वादकथारूप: शास्त्रार्थ: सञ्जात:। तस्य परस्परवाद-सम्वादरूपस्य शास्त्रार्थस्य किञ्चित्परिदृश्यमत्र विदुषां विनोदाय शास्त्राध्येतृणां बोधाय च प्रस्तूयते।

तत्र सर्वप्रथमं गुरुवर्यैराचार्यश्रीसुधाकरदीक्षितमहोदयैर्नैयायिकपक्षत: शाब्दबोधानुकूलां पदपदार्थसम्बन्धरूपां शक्तिं समुपस्थापयद्भिः समुदीरितम्–"पदपदार्थसम्बन्धरूपा" "शक्ति:" ईश्वरेच्छारूपा इच्छारूपा वा बोध्या। सा च–"अस्मात्पददयमर्थो बोद्धव्य:" "इदम्पदामिममर्थम्बोधयतु"–इति द्विविधाकारेण प्रतीयमाना पदप्रकारिका अर्थविशेष्यिका, अर्थप्रकारिका पदविशेष्यिका च भवति। "इच्छा शक्ति:" इत्यस्य इदमेव तात्पर्यं यद्–इच्छीया विशेष्यतैव शक्ति:। इच्छायां विशेष्यविधया प्रतीयमाने अर्थे सा विशेष्यता तिष्ठति। तथा च यदि अर्थविशेष्यिका अस्ति तदा "तत्पदजन्यबोधविषयतावान्" "अर्थो" भवति, इत्येवं"–तत्पदजन्यबोधविषयत्वनिष्ठप्रकारता निरूपितविशेष्यता अर्थे प्रतीयते। पदविशेष्यिका इच्छा भवति चेत्–"तदर्थविषयकबोधजनकतावत् "पदम्" भवति, इत्येवं"– तदर्थविषयकबोध-जनकत्वनिष्ठप्रकारतानिरूपितविशेष्यता पदे प्रतीयते। प्रथमेच्छानुसारं तादृशविशेष्यताश्रयत्वम् अर्थनिष्ठं "वाच्यत्वम्", तादृशविशेष्यताया: परम्परया निरूपिका या प्रकारता तदाश्रयत्वं पदनिष्ठं "वाचकत्वम्" द्वितीयेच्छानुसारं–तादृशविशेष्यताश्रयत्वं पदनिष्ठ"वाचकत्वम्", तादृशविशेष्यतानिरूपक तादृश प्रकारताश्रयत्वञ्चार्थनिष्ठं "वाच्यत्वम्" विज्ञेयम्। तथा च शक्तिरूप: पदपदार्थसम्बन्धो वाच्यत्वरूपो वाचकत्वरूपो वा विज्ञेय इति न्यायसिद्धान्त:।

इत्थं तादृशेच्छीयविशेष्यताया: अर्थे पदे च सत्त्वात् तादृशविशेष्यतासंसर्गमाधारीकृत्य–"एक सम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्"–इति न्यायेन पदे ज्ञाते अर्थस्मरणम्, अर्थे ज्ञाते च पदस्मरणञ्जायतेऽत: तादृशविशेष्यताया: संसर्गत्वमङ्गीक्रियते। इति।

इत्येवं रूपेण गुरुवर्यै: समुपस्थापिते विषये, डॉ॰ रामसलाहीद्विवेदिमहोदयानां वैयाकरणपक्षत आक्षेप: समागतो यत्–

"सम्बन्धो नाम"–सम्बन्धिभ्यां भिन्नः द्विष्ठः विशिष्टप्रतीतिनियामकः–"कश्चिदर्थविशेषः, स च तादृशविशेष्यतारूपो नैव भवितुमर्हति, तस्या द्विष्ठत्वाभावात् अतो वाच्यवाचकभावापरपर्यायः कश्चित् सम्बन्धविशेष एव शब्दार्थयोरखण्डसंसर्गत्वेन सङ्ग्राह्यः। स चाध्यासमूलकः तयोस्तादात्म्यमेव। भवतां नैयायिकानां मते सैव सङ्केतः, सैव सम्बन्धः, सैव शक्तिः, वैयाकरणानां मते तु एतेषां परस्परभिन्नत्वं विज्ञाप्यते।" इति।

मध्ये अद्वैताचार्याणां प्रो॰ डॉ॰ शुद्धानन्दपाठकमहोदयानामत्र सहमतिभाव आगतो यद्–"अत्र विषय इदं विचारणीयं यत् शब्दार्थयोस्तादात्म्यमस्ति न वेति। भेद सहकृतोऽभेद एव तादात्म्यं, भेदस्त्वस्त्येवेति भेदसहचरिताभेदस्य विद्यमानत्वात्तादात्म्यं वक्तुं शक्यत इति।"

अस्याक्षेपस्य समाधानं विदधद्भिः श्रीगुरुवर्यैर्निवेदितं यद्–"को हि सम्बन्धो नाम द्विष्ठः? सर्वोऽपि सम्बन्धो यदाश्रितस्तन्निष्ठ एव ग्राह्यः। भवदभिमत"–वाच्यवाचकभावसम्बन्धस्यापि द्विष्ठत्वं नास्ति। वाच्यवाचकभावो नाम किमिति विचारणीयं–"वाच्यश्च वाचकश्चेति वाच्यवाचके, तयोर्भावो वाच्यवाचकभावः"–स च वाच्यत्वे वाचकत्वे वा पर्यवस्यति। स च केवलमर्थे पदे वा भवितुमर्हति, नतूभयत्र।

एवमेव "आधाराधेयभावो"ऽपि ग्राह्यः। सोऽपि "आधारता"रूपः, आधेयतारूपो वा भवति, तथा सति "आधारता" केवलमाधारे, "आधेयता" केवलमाधेये एव, नतूभयनिष्ठा। अतो द्विष्ठत्वस्य तात्पर्यमूरीकरणीयम्, तच्च "द्विसम्बन्धित्वमे"व, द्वाभ्यां सम्बन्धो भवेत्। द्वाभ्यां सम्बन्धोऽस्ति चेत्तस्य सम्बन्धत्वं सुग्राह्यम्। एवं सति "वाच्यत्व-वाचकत्वयोः" सम्बन्धत्वं सिद्ध्यति। "वाच्यत्वं" स्वरूपेण वाच्ये, निरूपकतया च वाचके भवति। एवं वाचकत्वं स्वरूपेण वाचके, निरूपकत्वेन च वाच्ये विद्यते। इत्थमत्र द्विसम्बन्धित्वमागतमिति सम्बन्धत्वं सुसिद्धम्। इत्येवं रूपेणेश्वरेच्छाया इच्छाया वा "द्विसम्बन्धित्वेन" सम्बन्धत्वं बोध्यम्। इच्छीयविशेष्यतायाः स्वरूपनिरूपकत्वाभ्यामुभयत्र विद्यमानत्वादिति नास्ति कश्चन विरोधः।" इति।

इत्येवं प्रकारेण गुरुवर्यैः नैयायिकपक्षस्य सुस्पष्टं विवेचनं विहितम्। अत्रैवास्य सत्रस्य सम्पूर्त्तिः सञ्जाता।

द्वितीयसत्रे यत्र विचारोऽवसित आसीत्, तत एव तस्योत्थापनङ्कृतमाचार्यैः डॉ॰ सच्चिनन्दमिश्र-महोदयैर्यत्–"प्रश्न एवमासीद्यत्–"सम्बन्धः सम्बन्धिभ्यां भिन्नः द्विष्ठः"–इत्यादिरूपेण व्याकृतं सम्बन्ध-लक्षणमीश्वरसङ्केतरूपायां शक्तौ कथं समुपपादयितुं शक्यते। इति।

अत्र गुरुवर्यैः श्रीदीक्षितमहोदयैः समुत्तरितं यद्–"अस्य समाधानन्तु पूर्वव्याख्याने कृतम्, कोऽपि सम्बन्धो द्विष्ठो न भवतीति।"

अतः परं पुनरपि रामसलाही द्विवेदिमहोदयैराक्षिप्तं यत्–"तत्र व्युत्पत्तिवादे" आधाराधेय-भावप्रतियोग्यनुयोगिभावविषये "जया"–टीकायां स्पष्टमुल्लिखितं यदयं सिद्धान्तः नैयायिकानां, न तु

वैयाकरणानामिति। वैयाकरणरीत्या उच्यते–इति। यद्येवं प्रकल्पः स्यात्तर्हि जयदेवमिश्रः कथमेवं वदेदिति"

अत्र गुरुवर्यैः समाधानाय प्रश्नः समुपस्थापितः–"आधाराधेयभावसम्बन्धः कथं भवतीति।"

मध्ये सच्चिदानन्दमिश्रैराक्षिप्तम्–"जयदेवमिश्रास्तु वैयाकरणा आसन्" इति।

गुरुवर्याणां प्रश्नस्योत्तरक्रमे द्विवेद्विमहोदयैरुक्तम्–"आधाराधेयभावसम्बन्धो नैयायिकानां मते न सम्भवतीति।"

अत्र मिश्रमहोदयैः प्रतिविहितम् यत्–"नहि, एवं नास्ति। तत्रैवावसरे गूढार्थतत्त्वालोकव्याख्याकृद्भिराचार्यश्रीबच्चाझामहोदयैरुक्तम्–एतत्तु प्राचीनन्यायमतमस्ति। नव्यन्यायमते तु "आधारत्वं", ''आधेयत्वं" वा सम्बन्ध इति पुनश्च द्विवेदिमहोदयैराक्षिप्तम्–"यदि भवतां मतानुसारं चलामस्तर्हि प्राचीनमतानुसारन्तत्र सम्बन्धत्वमेव न स्यादिति।"

अत्र मिश्रमहोदयैः समुत्तरितम्–"अत एव नवीनैः सम्बन्धस्य तल्लक्षणं परित्यक्तम्। यद्यपि प्राचीनन्यायग्रन्थेषु अनेकत्र एतादृशं लक्षणमुपलब्धं भवति, किन्तु न वयं नवीना नैयायिकाः प्राचीनन्यायसिद्धान्तान् सर्वान् स्वीकुर्मः। यदि काचन परिष्कारपद्धतिर्भवति तदा दोषवारणाय पदार्थतत्त्वावबोधाय च साऽङ्गीक्रियते।" इति।

अत्र पुनरपि द्विवेदिमहादयैराक्षिप्तं यत्–"सम्बन्धः सम्बन्धिनोः परस्परं सम्बन्धाय कल्प्यते, तस्य द्विष्ठत्वाभावे कथमुभयोः सम्बन्धः स्यात्। सम्बन्धो न द्विष्ठोऽपितु एकत्रैवेति तु लोकानुभव विरुद्धमिति।"

अत्र गुरुभिः समाहितम्–"सम्बन्धस्य द्विसम्बन्धित्वमावश्यकन्तु द्विष्ठत्वमिति।"

मध्ये मिश्रमहोदयैरुक्तम् यत्–"सम्बन्धस्य द्विष्ठत्वे अनवस्था भविष्यति। कथमिति चेदुच्यते–यथा मञ्चहस्तयोः सम्बन्धः "संयोगः"। संयोगसम्बन्धस्य कः सम्बन्धः? "समवायः"। समवायसम्बन्धस्य कः सम्बन्धः? स्वरूपसम्बन्धः। तस्यापि यदि द्विष्ठत्वं स्यात्तर्हि पुनस्तत्र प्रश्नो भवेत्। कः सम्बन्धस्तस्येति। अनया रीत्या अनवस्था स्यात्। कुत्रचिदपि विशिष्टप्रतीतिरेव न स्यात्। अत एव नैयायिका एवं वदन्ति–"विशिष्टप्रतीतिनियामकत्वम्"–सम्बन्धत्वमिति। तत्र द्विष्ठत्वमावश्यकं नास्ति। द्विसम्बन्धित्वं भवितुमर्हति। यतो हि–सम्बन्धः एकस्य भवत्यपरत्र, एवं नास्ति यत्–सम्बन्ध उभयत्र तिष्ठतीति। यथा–संयोगः सम्बन्धः सः हस्त मञ्चयोरुभयत्र न तिष्ठति। यतो हि–हस्तस्य सः सम्बन्धः मञ्चे विद्यते, तत्र सम्बन्ध निरूपिता प्रतियोगिता हस्ते विद्यते, मञ्चे चानुयोगिता अस्ति।" इति।

अतः परं आचार्यश्रीपीयूषकान्तदीक्षितमहोदयैर्जिज्ञासा समुपस्थापिता–"अत्र मध्ये एका जिज्ञासा जायते, यदि मञ्चहस्तयोः सम्बन्ध उभयत्र न तिष्ठतीति स्वीक्रियते। सः सम्बन्धः संयोगः तस्य द्विष्ठत्वं नास्तीति कथं वक्तुं शक्यते यतः "द्रव्ययोरेव संयोगः"–इति पङ्क्तिरस्माभिः पठ्यते। द्रव्ययोरित्युच्यमाने

द्रव्यद्वयनिष्ठत्वं तस्य स्पष्टं भाति। अतः संयोगी यतो गुणः, स च समवायेन हस्ते मञ्चे चोभयत्र विद्यतेऽतो द्वाभ्यां सम्बद्धत्वात्तस्य द्विष्ठत्वमवश्यमङ्गीकार्यम्। किन्तु आधाराधेयभावसम्बन्धे, विशेष्यतारूपे वा सम्बन्धे द्विष्ठत्वं न प्रतिभाति। आधारता, आधेयता वा एकत्रैव भवति। एवं तादृशविशेष्यता पदे वा अर्थे वा एकत्रैव भवितुमर्हति, न तु द्वयोः, अत एतादृशसम्बन्धस्य द्विष्ठत्वं कथं वक्तुं शक्यत इति प्रश्नः समुदेतीति।"

अत्र विषये मिश्रमहोदयैर्यदुक्तं तदित्थम्–"अयं प्रश्नः गदाधरभट्टाचार्यैः व्युत्पत्तिवादस्य सप्तमीकारकविवेचनावसरे बहुधा निरूपितः। तत्र एभिः एवमुक्तं यत्–एवं प्रतीतिस्तु भवति–"तन्तुषु पटः" इति, किन्तु "पटे तन्तवः" इत्येषा प्रतीतिर्न भवति। कुतो न भवति? यतो हि–एकस्य सम्बन्धः अस्ति, सः अपरत्र विद्यते, अर्थात्–एकप्रतियोगिकः अपरानुयोगिकः सः सम्बन्धः, यथा अत्रैव प्रतीतौ तन्त्वनुयोगिकः पटप्रतियोगिकः समवायः भासते। समवायसम्बन्धः द्विष्ठ इत्यस्य क आशयः? "सम्बन्धो द्विष्ठ" इति तदैव वक्तुं शक्यते यदि एकेनैव सम्बन्धेन सः सम्बन्धः उभयत्र तिष्ठेत्। एकेन सम्बन्धेन न कश्चन सम्बन्ध उभयत्र तिष्ठति। एकत्र प्रतियोगित्वेन तिष्ठति, अपरत्र चानुयोगित्वेन, तर्हि द्विष्ठत्वं नास्ति। अत एव द्विष्ठत्वं निराक्रियते। एवमुच्यते–एकः अनुयोगी, अपरश्च प्रतियोगी भवतीति।

अत्र शुद्धानन्दपाठकमहोदयै प्रतिविहितम्–"कथमेवमुच्यते! संयोगसम्बन्धस्तु मञ्चेऽपि समवायसम्बन्धेन तिष्ठति हस्तेऽपि समवायसम्बन्धेन तिष्ठति। तथा चैकेनैव सम्बन्धेनोभयत्र विद्यमानत्वात्तस्य द्विष्ठत्वं सुस्पष्टमिति।"

अत्र मिश्रमहोदयैः प्रतिसमाहितं यद्–"संयोगः समवायसम्बन्धेन यदि मञ्चे तिष्ठति, हस्तेऽपि तिष्ठति। तर्हि कथं भवान् वदति–हस्तः मञ्चे विद्यते, मञ्चः हस्ते नास्तीति। हस्तः मञ्चे विद्यते, किं मञ्चोऽपि हस्ते विद्यते वा? इति।

अत्र पुनरपि पाठकमहोदयैः करपुटौ सम्मील्य प्रतिविहितम्–"पश्यताम्। एषः हस्तः अस्मिन् हस्ते, एषः हस्तः अस्मिन् हस्ते विद्यते, एवमेव मञ्चहस्तयोर्विषयेऽपि प्रत्येतव्यम् इति।

अतः परं मिश्रैः समाहितम् यत्–"तत्राधाराधेयभावो नास्ति। यथा द्वयोर्मेषयोर्यः संयोगः सः द्विष्ठस्तु विद्यते किन्तु तत्राधाराधेयभावो नास्ति। न एकः मेषः अपरस्य मेषस्य आधारः अस्ति।" इति।

मध्ये करुणानन्दमुखोपाध्यायमहोदयैरत्रविषये किञ्चिदुक्तम्–"संयोगस्य द्विष्ठत्वं भवतु नाम। परं सम्बन्धत्वेन संयोगो न द्विष्ठः। तात्पर्यमिदं यत्–संयोगस्तु द्विष्ठ एव, हस्तेऽपि समवायेन तिष्ठति, मञ्चेऽपि, परं संयोगः संयोगत्वेन रूपेणैव द्विष्ठः, नतु सम्बन्धत्वेन, सम्बन्धत्वेन रूपेण संयोगस्य द्विष्ठत्वं नास्ति।" इति।

अतः परं के. एस. सतीशमहोदयैर्मिश्रमहोदयमभिलक्ष्याक्षेपो विहितः–"भवद्भिरुक्तम्–"तन्तुषु पटः" इति प्रतीतिर्भवति, "पटे तन्तवः" इति प्रतीतिर्न भवतीति। अत्रोच्यते यन्नैयायिकानामेव एवं

प्रतीतिर्न भवेत्, परं लौकिकानान्तु "पटे तन्तव" इत्येव प्रतीतिर्जायते।" इति।

अत्र विषये पीयूषकान्तदीक्षितमहोदयैः स्वसम्मतिः प्रदर्शिता–"समान्यतो लौकिकानां यः व्यवहारः अस्ति, तत्र पटमवलोक्य प्रतीतिर्भवति यदास्मिन् पटे तन्तवः सन्ति।" तन्तुषु पटः "इति प्रतीतिस्तु अलौकिकी एव नैयायिकानामिति"।

अत्र मिश्रमहोदयैर्नैयायिकपक्षस्य तात्पर्यं विस्फोरितं यत्–"समवायसम्बन्धमादाय तु तादृश-प्रतीतिर्न भवति।" इति।

मिश्र महोदयानां कथनस्य इदं तात्पर्य यद् अत्र नैयायिकपक्षस्यायमेवाशयो यत्–समवायेन कार्यस्य कारणाधिष्ठितत्वात्, "एतत्कारणे एतत्कार्यमस्ति"–इत्येव प्रतीतिः वस्तुतः प्रमात्मिका। अतः पटस्य तन्त्वाश्रितत्वात् "तन्तुषु पटः"–इति प्रतीतिरेव प्रामाण्यं भजते। इति।

अग्रे मिश्रैरुक्तम्–"सम्बन्धान्तरमादाय तादृशप्रतीतिरपि भवितुमर्हति। यथा"–समवायप्रतियोगित्वं "सम्बन्धत्वेन प्रकल्प्य "पटे तन्तवः" इत्यपि प्रतीतिर्नास्माभिः निराक्रियते।" इति।

अत्र पुनः सतीशमहोदयैः प्रतिविहितम्–"प्रतीतिरेव प्रमाणतया समुपन्यस्यते भवद्भिः। प्रतीतिस्तु भिन्ना-भिन्ना भवति। सर्वेषामेकरूपा प्रतीतिर्नैव जायते। नैयायिकानामन्यादृशी प्रतीतिः, अस्माकं लौकिकानान्तु अन्यादृशी प्रतीतिरिति कस्याः प्रतीतेर्वस्तुगत्या प्रामाण्यं स्यात्?" इति।

अत्र करुणानन्दैरुक्तम्–"पटे तन्तवः तिष्ठन्तु, परं केन सम्बन्धेन? "आधेयता" सम्बन्धेन। "स्वनिष्ठाधिकरणतानिरूपितसमवायसम्बन्धावच्छिन्नाधेयतासम्बन्धेनेति भावः। परं पटः समवायसम्बन्धेन तन्तुषु तिष्ठति, इति हि विवेकः" इति।

अत्र सतीशमहोदयैः पुनरप्याक्षिप्तम्–"प्रतीतिः सम्बन्धादिकं विचिन्त्य न भवति। अत्र "गवि श्रृङ्गः" इति प्रतीतौ श्रृङ्गे गोः आधेयता प्रतीयते इति स्वीकरणीयम्।" इति।

मध्ये विदुषां परस्परवाक्यसम्मर्दः सञ्जातः। ततः मिश्रमहोदयैः प्रत्याक्षिप्तम्–"श्रीमन्तः! क्षणं श्रृण्वन्तु! भवान् वदति–प्रतीतिमाधारीकृत्य व्यवहारो भवति। का नाम प्रतीतिः? अनुभवः। ज्ञानं वेति?

सतीशैरुक्तम्–"ज्ञानम्" इति।

मिश्रैराक्षिप्तम्–"ज्ञानं विना अर्थो भवति वा? अर्थं विना ज्ञानं भवति वा? इति।

सतीशैरङ्गीकृतम्–"भवितुमर्हति।" इति।

मिश्रैराक्षिप्तम्–"विषयं विना कथं ज्ञानं भवितुमर्हति?" इति।

अत्र सतीशपक्षतः पाठकादिभिरनुमोदनं विहितम्–"आम्! आम्! विषयं विनापि ज्ञानं भवितुमर्हति। यथा–शशश्रृङ्गज्ञानं विषयं विनैव जायते" इति।

अत्र मिश्रमहोदयैर्नैयायिकपक्षतः दृढं खण्डनं विहितम् यद्–"भवान् श्रृङ्गं न जानाति। शशञ्च न जानाति। तदा "शशश्रृङ्ग" इति प्रतीतिः कस्यचिदपि भवितुं नार्हति। ब्रह्मणाऽपि प्रतिपादयितुं न शक्यते। अत एतत्स्वीकरणीयं यद्–ज्ञानं वस्त्वाधारितं, विषयाधारितं भवति। विषयेण प्रतीतिर्जन्यते। अत एव ज्ञाने विषयस्य कारणत्वं स्वीकुर्वन्ति। तर्हि यदि प्रतीतिरस्ति तदा तस्या विषयोऽपि अवश्यमेव भवेत्। को विषयः? इत्यन्वेषणीयम् यदि एतादृशी प्रतीतिर्भवति–"गवि श्रृङ्गः" तन्तुषु पटः "तर्हि एवमेव अवश्यमेव तत्र कश्चन विषयः स्यात्। यं विषयमाधारीकृत्य एतादृशी प्रतीतिर्जायते। तर्हि स विषयः अन्वेषणीयः" इति।

अत्र सतीशैरुक्तम्–"प्रतीतिरस्ति चेद्विषयोऽपि स्यादेव। तर्हि स विषयोऽन्वेषणीयः। भवता एवं प्रतीतिर्नभवतीति कथमुच्यते?। इति।

पुनः मिश्रैः समुदीरितम्–"भवतः एतादृशः अनुभवः अस्ति चेत्तर्हि स्वीकरोमि। अस्तु नाम तादृशी प्रतीतिः, किन्तु तस्याः कश्चन विषयोऽपि स्यादेव। कश्चन सम्बन्धोऽपि तत्रावश्यं स्यात्। एक एव विषयः अस्ति चेदुभयविधा प्रतीतिः कथं स्यात्? इति।

अत्र सतीशैः स्वाशयः प्रकाशितः–"वयन्तत्राग्रहं न प्रदर्शमयामः। वयमत्रैव प्रष्टुमिच्छामः, भवता एतदेवोक्तम्–"एतादृशी प्रतीतिर्न भवति" इति कथम्? इति।

मिश्रैः पुनरप्युक्तम्–"भवतः एतादृशः अनुभवः अस्ति चेत् प्रतीतिः स्वीक्रियते। किन्तु सः अनुभवः व्याख्येयः। व्याख्येयो नाम तस्य विषयः अन्वेषणीयः" इति।

सतीशैः समुदीरितं यद्–"लौकिकानां सर्वेषामयमनुभवः अस्त्येव। विश्लेषणं विनापि अनुभवः जायत एव"। इति।

अत्र मिश्रैः प्रतिविहितम्–"लौकिकास्तु यं कमपि जनं किमपि कथयन्ति। निर्धनमपि धनिकं वदन्ति। तर्हि तत्र कश्चन अर्थः आधारो वा भवति वा? अत एव तत्रान्वेषणीयं यत्–कमर्थमाधारीकृत्य एतादृशव्यवहारो भवति"। इति।

पुनः सतीशैः पृष्टम्–"गवि श्रृङ्गः" इति प्रतीतिर्नैयायिकानां भवति न वा?" इति।

मिश्रैः प्रत्युत्तरितम्–"स्वावयवित्वसम्बन्धमाधारीकृत्य भवति।" इति।

सतीशैरुक्तम्–"किञ्चिद्वा भवतु। प्रतीतिस्तु भवति खलु।" इति।

मिश्रैः प्रत्युत्तरितम्–"तत्र समवायः सम्बन्धविधया न भासते।" इति।

सतीशैर्निगदितम्–"तत्रास्माकमाग्रहो नास्ति। प्रतीतिर्भवति। इत्यत्रैव केवलमस्माकमाग्रहः" इति।

अत्र मध्ये शुद्धानन्दपाठकमहोदयैः समवायसम्बन्धमादायाक्षिप्तम्–"समवायस्तु सम्बन्ध एव नास्ति"। इति।

अत्र मिश्रैः प्रतिविहितं यद्–"सम्बन्धनियामिका प्रतीतिरस्ति चेद् भवान् सम्बन्धं कथं दूषयितुमर्हति यदि प्रतीतिरस्ति एतादृशी यद्–"इह तन्तुषु पटसमवायः" तदा समवायः सम्बन्धतया स्वीकरणीय एव"। इति।

अत्र विषये मध्ये विद्वद्वरेण्यैराचार्यश्रीजयकान्तसिंहमहोदयैः वैयाकरणपक्षतः महाभाष्यमुदाहरणीकृत्य यत्समुदीरितन्तदित्थम्–"भगवान् पतञ्जलिः अत्र विषये किञ्चिदाह तस्यापि महत्त्वमस्माभिरङ्गीकर्त्तव्यम्, अतस्तादृशप्रामाण्यमेव बुद्धौ निधाय तत्तत्पदानामध्याहारो भवति। "एकशतं षष्ठ्यर्थाः" इति एवं "सिद्धे शब्दार्थसम्बन्धे"–इति भाष्यञ्चोपादाय भगवता पतञ्जलिना समुदीरितं यत्–तत्र सम्बन्धस्य किं स्वरूपम्"? इत्यादि। तत्र यदुक्तं तदेवोपादाय नागेशो मञ्जूषायां वदति–"सम्बन्धो हि सम्बन्धिभ्यां भिन्नत्वे सति द्विष्ठत्वे सति आश्रयतया विशिष्टबुद्धिनियामकः" इति। सम्बन्धे द्विष्ठत्वमस्ति नवेति विचारे। स्वयं भगवानाह–"राज्ञः पुरुषः" इत्यत्र सम्बन्धः द्विष्ठ इति। इदञ्च वाक्यं पुरतो निधाय पुनः सैव भगवानाह–"द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्" इति तात्पर्यमिदं यत्–यद्यपि सम्बन्धः–"स्वस्वामिभावसम्बन्धः", द्विष्ठः, उभयत्र सम्बन्धस्य विद्यमानत्वात्, उभयत्र षष्ठी कुतो न? इत्यत्र पुनः सैव समाधत्ते–"षण्ठ्युत्पत्तिस्तु भेदकात्" अर्थात् विशेषणं यत्पदं तदेव भेदकं, तस्मादेव षष्ठी। "राज्ञःपुरुषः" इत्यत्र राजपदं विशेषणं तस्मादेव षष्ठयुत्पत्तिर्भवतीत्याशयः।" इति।

अत्र मिश्रैः प्रश्नो विहितः–"विशेषणत्वं तत्र कथं? विवक्षाधीनं वा?" इति।

जयकान्तमहोदयैरुत्तरितम्–"एवम्। विशेषणत्वन्तत्र विवक्षाधीनमेव। "राजनिरूपितस्वत्ववान् पुरुषः" इति विवक्षायां राजपदं विशेषणत्वेन प्रतीयमानमस्ति।" इति।

अत्र मिश्रैराक्षिप्तम्–"विवक्षाधीनं नाम–तत्र वास्तविके जगति नास्ति किमपि यद् वक्तुं सः सम्बन्धः प्रतिपाद्यते।" इति।

अत्र गुरुवर्यैर्दीक्षितमहोदयैः तथ्यमुद्घाटितं यद्–"विवक्षाऽपि किञ्चिन्मूलिकैव भवति, न निर्मूला। वक्तुमिच्छा विवक्षा सा च किञ्चिन्मूलिकैव भवति, यन्मूलिका सा भवति, तदेव तस्या वास्तविकं तत्त्वम्"। इति।

मध्ये मिश्रैः प्रश्नो विहितः–"पुरुषस्य राजा" इति प्रयोगो भवति वा?" इति।

जयकान्तमहोदयैरुत्तरितम्–"भवति। यदि तादृशी विवक्षा भवति चेत्"। इति।

अत्र मिश्रैराक्षिप्तम्–"तर्हि भवतैव भाष्यकारवचनमुद्धृत्य स्वयमेव प्रत्याख्यातम्।" इति।

अत्र जयकान्तमिश्रैः समाहितम्–"नैव। "दण्डी पुरुष" इति व्यवहारो भवति। "पुरुषी दण्ड" इति व्यवहारो न भवति। तादृशप्रतीतेः विरुद्धत्वात्, अर्थात् पुरुषे विशेषणत्वेन विवक्षाविरहात्।

स्वयं भगवान् षष्ठ्यर्थसम्बन्धस्य द्विष्ठत्वं विज्ञापयति। यदि द्विष्ठो भवति तदोभयत्र षष्ठी प्राप्तेः प्रसङ्ग एव न स्यात्"। इति।

अत्र मिश्रैः प्रश्नः कृतः–"षष्ठी प्राप्तिप्रसङ्गस्य किन्तात्पर्यम्?'' इति।

तत्र जयकान्तैः समाहितम्–"तात्पर्यमिदं यत्–सम्बन्धस्तु द्विष्ठ एव भवति। अतो हेतोर्विशेष्यवाचकपदाद् विशेषणवाचकपदाच्च षष्ठी प्राप्यते। अतस्तद्वारणाय भाष्यकारैरेवं नियमः क्रियते यद्–भेदकत्वादेव षष्ठी भवति। भेदकञ्च विशेषणं भवति।" इति।

अत्र गुरुभिरनुमोदितम्–"अत्र भेदकत्वादेव षष्ठी भवति। सम्बन्धस्तूभयत्र वर्तते। भेदकं विशेषणं भवति। अतस्तस्मादेव षष्ठी भवति"। इति।

मिश्रैरप्ययं विषयोऽनुमोदितः–"विशेषणं भेदकं भवति।" विद्यमानत्वे सति व्यावर्त्तकत्वम्। अतः भेदकत्वात्तस्मादेव षष्ठी भवति। "राज्ञः पुरुषः" इत्यत्र राजा एव विशेषणं पुरुषस्तु विशेष्यः, अतः तस्मात् षष्ठी न भवति।" इति।

गुरुवर्यैरयं विषयः पुनरपि विस्फोरितः–"कस्य पुरुषः? "राज्ञ" इति पुरुषस्य विशेषो वर्त्तते, राज्ञः सम्बन्धात्। अतः राज्ञः अत्र भेदकत्वमुच्यते।" इति।

अत्र जयकान्तमहोदयैः स्वाभिमतं प्रकाशितम्–"अतः मन्ये! भाष्यवचनमेवोपादाय एवम्भूतं लक्षणं कल्पितं स्यात्।" इति।

पर्यन्ते गुरुभिः परिचर्चा निष्कर्षाभिमुखी कृता–"अत एव मन्तव्यं यत्–सम्बन्धस्य द्विष्ठत्वं तु अस्त्येव। कुतः? "अस्य सम्बन्धस्य इमौ सम्बन्धिनौ" इत्येवमुच्यते। तर्हि–उभयोः सम्बन्धित्वव्यवहारस्य मूलमस्ति सम्बन्ध एव, तेन सम्बन्धेनोभयत्र वर्त्तितव्यम्, नो चेत्, "सम्बन्धी"–इति व्यवहारः कथं भवति? "सम्बन्धी"–इति व्यवहारस्तत्र तस्य सम्बन्धस्य विद्यमानतायां नियामकोऽस्ति। अतः सम्बन्ध उभयत्र वर्तते इति तु निष्कर्षः। द्विष्ठत्वं कथमिति चेत् तर्हि–"द्विसम्बन्धित्वात्" द्विष्ठत्वं स्वीकरणीयम्। व्युत्पत्तिवादे तत्त्वालोककारः वदति–"द्विष्ठत्वम्"–इत्यस्य नायमर्थो यदेकेनैव सम्बन्धेन उभयत्र विद्यमानत्वम्। सम्बन्धत्वेन यः कल्प्यते तेनोभयत्र वर्त्तितव्यम्। इदमेव द्विष्ठत्वमित्यस्य तात्पर्यम्। अत आधाराधेयभावस्य, तादृशविशेष्यतायाश्च सम्बन्धत्वं समुपपद्यते। अतो निष्कर्षतयेदमवधारणीयं यत्–सम्बन्धस्य द्विसम्बन्धित्वमेवावश्यकन्नतु एकेनैव सम्बन्धेन उभयत्र विद्यमानत्वम्"। इति।

अत्र पाठकमहोदयैः किञ्चिदाक्षिप्तम्–"संयोगः सम्बन्धः हस्तमञ्चयोरस्ति स च समवायेनात्रापि तत्रापीति तस्य एकेनैव सम्बन्धेन द्विष्ठत्वं प्रसिद्ध्यति।" इति।

अत्र गुरुवर्यैः समाहितम्–"सम्बन्धस्य एकेनैव सम्बन्धेन द्विसम्बद्धता भवतु, सम्बन्धद्वयेन वा। इति तु अन्या कथा। इति तु अन्या कथा।" इति।

मध्ये करुणानन्दैः पूर्वोक्तं स्वाभिमतं पुनरप्यावर्त्तितम्–"संयोगे धर्मद्वयं वर्त्तते" संयोगत्वं "सम्बन्धत्वं" च तत्र संयोगत्वेन संयोगः द्विष्ठः, परं सम्बन्धत्वेन संयोगो न द्विष्ठः।" इति।

पक्षोऽयं गुरुभिर्निरस्तः–"सम्बन्धत्वेनापि संयोगः द्विष्ठः अस्तीति।"

अन्यैरपि सम्बन्धत्वेनापि संयोगस्य द्विष्ठता समर्थिता।

अत्र विषये पीयूषकान्तमहोदयैः स्वाशयः प्रकाशितः–"अत्र अस्माभिः चिन्तनीयम्। संयोगः यदि "सम्बन्ध" इत्युच्यते, तदा सः सम्बन्धत्वेन प्रतीयते। यदा "गुण" इत्युच्यते तदा स गुणत्वेन प्रतीयते। स संयोगः गुणः सम्बन्धो वा भवतु तस्य सम्बन्धता तु अक्षुण्णैवेति।"

अन्ते च सच्चिदानन्द मिश्रैः–सम्बन्धविषयकं नैयायिकमतं सिद्धान्तयितुं वैयाकरणाभितमसम्बन्ध-लक्षणमनङ्गीकरणीयमिति व्यवस्थापितम्–"सम्बन्धः सम्बन्धिभ्यां भिन्नः द्विष्ठस्तर्हि "स्वरूपसम्बन्धस्थले का कथा? स्वरूपसम्बन्धस्तु सम्बन्धिभ्यां भिन्नो न भवति। अतो द्विष्ठः कथं स्यात्? तर्हि एतल्लक्षणं न स्वीकरणीयमिति।"

इत्थं तत्तद्विद्वत्तल्लजैः सम्बन्धस्वरूपमधिकृत्य विस्तृतेयं न्यायपरिचर्चा सम्पूरिता। शास्त्रीयार्थानाम्परिप्रकाशनमेव शास्त्रार्थचर्चायाः परमं लक्ष्यम्। अत्र किल वादकथायां तत्त्वप्रतिपत्तिरेव परमं प्रयोजनं भवति। तदर्थमेव परस्परं पक्षप्रतिपक्षौ परिगृह्य विद्वद्भिः वाद-कथा प्रचाल्यते। परस्परखण्डनमण्डनस्यापि प्रयोजनमिदमेव यन्मध्यस्थानां तत्त्वबुभुत्सूनां पदार्थतत्त्वविषयकसंशयनिवृत्तिपूर्वकं प्रमात्मकबोधो जायेत। येन पदार्थतत्त्वज्ञानानन्तरं निष्कम्पप्रवृत्तिपुरस्सरम् अभ्युदयो निःश्रेयससिद्धिश्च स्यादिति।

मान्याः!

अत्र किल शास्त्रसदसि एवं विधेषु बहुषु विषयेषु विशदरूपेण विद्वद्भिः शास्त्रार्थचर्चा-माध्यमेन विद्याब्धिपरिमन्थनं विधाय ततः साररूपा सिद्धान्तसुधा समुद्धृता। अस्माभिस्तु तत किञ्चित्परिगृह्य विद्यारसाभिप्राशनसमुत्सुकानां प्रेक्षावतां हृदयाह्लादसम्वर्धनाय शास्त्रार्थपरिचर्चाया एतत्परिदृश्यं समुपस्थापितम्। यदि कुत्रचित्खलनं प्रतीयेत तदा "गच्छतः स्खलनमि"त्यादिन्यायेन विद्वद्भिस्तत्समाधेयम्। प्रयासोऽयं गुरूणां मोदाय परमेश्वरप्रीतये च स्यादिति कामनया सर्वं तत्रैव समर्प्य स्वीयां सरस्वतीं समुपसंहरामीति शम्।

श्रीगुरुचरणसरोरुहद्वन्द्वद्विरेफः–

डा. रामचन्द्रशर्मा

(सहसंयोजकः)

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥
ॐ शान्तिः, शान्तिः, शान्तिः

तृतीयः
शक्तिवादग्रन्थखण्डः

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

SHAKTIVADA – An introduction[1]

The Shaktivada explores the relationship between the uttered word and the meaning it conveys. Acharya Gadadhara in his careful analytical style, expounds various significant aspects of the relationship and adds his own keen insight to the subject matter to present a textual content that should satisfy the exacting student of Nyaya.

This article is closely based on the text of the Shaktivada as published by the Chaukhamba Sansrit Sansthan and is aided by the Vivriti commentary of Harinatha-Tarka-Sidhanta-Bhattacharya. This article intends to provide an introduction to the analytical method used by Acharya Gadadhara and the subject matter of the text. It is hoped that it will inspire readers to undertake a more detailed exploration of the world of Tarka and Sanskrit scholarship.

Context

Sanketa and Lakshana are the two forms of Pada-Vrtti. Pada-Vrtti is the means by which meaning (Padartha) is conveyed by a Pada (uttered word). It is noticed that not all words are understood by everybody. It is only those who possess the knowledge of the relation between the word and its intended meaning that are able to comprehend correctly a word's intent. This clearly indicates that there exists a specific relationship between the word and its intended meaning. To enable the comprehension of the nature of the relationship, it is necessary to first declare and define the elements of the analysis. The author has begun the process by declaring that Sanketa and Lakshana are two forms of the relationship that enables Shabdabodha or the cognition caused by words (Word-cognition).

In most relationships it is common to think of a principal and an associate. For example, when we say a pot rests on the earth, the earth is the principal (Anuyogi) and the pot is the associate (Pratiyogi) in the relation between the earth and the pot. When we say the sense of existence on earth is in the pot, the pot is the principal and the earth is the associate. In most cases, the usage of the communication determines the principal and associate in a related pair. Similarly, it is possible to consider the related pair of the word and its intended meaning. Depending upon the circumstance, either the word or the intended meaning could be the principal/ associate.

1. Written by Krishnan Venkataraman, an advocate with a keen interset in Sanskrit Scholarship. He has been guided in the understanding of Nyaya Literature by his teacher Prof. Piyushkant Dixit of Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha.

Irrespective of whether the word or the intended meaning is the principal/ associate, the relationship (Padavrtti) is two fold – Sanketa or Lakshana. The author has also signified that there exist only two such divisions of the relationship that enables Word-cognition. To further clarify the nature of the relationship between the word and its intended meaning, it is enunciated that only that which is conveyed by a word (Padam) through the specific relationship (Vrtti) qualifies to be the intended meaning of that word (Padartha). That is, any meaning obtained by the cognition of a word through a relation other than the Vrtti or specific relationship of that word cannot be called the Padartha or intended meaning of that word.

Desire as a relation

Amongst Sanketa and Lakshana (the two forms of Vrtti), either one can be the relation between the word and its intended meaning. Sanketa has been defined as a desire. Normally, it is difficult to comprehend how a desire can be equated to a relation. A relation like conjunction (Samyoga) between a book and a table for instance has a clearly defined principal (Anuyogi) and associate (Pratiyogi). In the case of a desire such elements of a relationship are not so clearly discernible. It is to clarify this ambiguity that the author gives an example of the form of the desire (Ichcha). In the first example of the desire – 'May this word cognize this meaning), the desire has the characteristic of wanting a certain type of cognition to be created. This cognition (this word leads to the cognition of this meaning), that is desired to be created has two elements – the word and its meaning. In this form of cognition, the word is the locus (Visheshya) where the meaning is located. Thus, the desire or Sanketa clearly relates the word and its meaning. In this example of the form of the desire, the word is the locus, the principal to which its meaning has been associated.

The other form of the desire mentioned is – 'May this meaning be cognized by this word'. In this case, the desire has the characteristic (Prakara) of a certain type of cognition to be created. The cognition (Bodha) is of the form – 'This meaning is cognized by this word'. In this case, the cognition has two elements, the meaning and its word. In this form of desire, the meaning is the locus, the principal and the word is associated with the meaning.

Sanketa having been defined, the author proceeds to describe the various possible types of Sanketa relations between a word and its meaning. Paribhasha is declared to be the type of Sanketa which has modern origins. Paribhasha is the desire of historical or modern humans to establish relationship between a word and its meaning. In the case of the Sanskrit language, most word usages are not traceable to any particular individual or historical entity. For example the use of the word Nadi – to denote a river is not traceable to any historical entity or person and is accepted to be a timeless and inherent aspect of the

Sanskrit language with divine origins. However, there are certain which are specific to a school of thought or a particular branch of study. For example, the sage Panini in his work Ashtadhyayi has used the word Nadi or Vrddhi to denote grammatical rules and elements which he uses to communicate his expositions. The usage by Panini is entirely different from the normal usages of these words. To understand Panini's usage, it is necessary to have a specific knowledge of Panini's declared desire (Sanketa) which he has communicated in the text of the Ashtadhyayi. This desire (Sanketa) of Panini (a modern, historical figure) to relate words like Nadi or Vrddhi to grammatical and linguistic elements is an instance of Paribhasha, which is a form of Sanketa. The words whose meanings have been defined by modern (historical) entities are called Paribhashika and the meanings associated with such word usages are called Paribhashita or Paribhashya.

The second type of Sanketa is Shakti, the principal topic of this text. Shakti is defined to be the desire of Ishvara or the omniscient, omnipotent soul. This Ishvara entity is also known to be permanent and in existence always. Thus, the reference to Ishvara is to denote that Shakti is that Sanketa (desire) that has always existed and was not caused by a recent/ historical human entity. It is believed that many words have been in usage, denoting their meanings, for ever. In the case of the Sanskrit language, these permanent relationships between such words and their meanings were realized by the vision of the vedic seers and described to the rest of humanity. Thus, Shakti is the desire of the permanent Ishvara relating words to their meanings.

Words which are related to their meanings through the relation of Shakti are termed Vachaka. For example, the word 'Gow' denotes the meaning of the object that has the characteristic of cowness (Gow is the Sanskrit word for cow.) This usage is permanent and was not historically created. The relationship between the word Gow and a cow is one instance of Shakti. The meaning (object) denoted by a word through the relation of Shakti is termed Vachya.

Thus, the meaning cow, denoted by the word Gow is the Vachya of Gow. The Vachya meaning is declared to be the principal meaning of a word. Thus, if a word is related to various meanings through various relationships like Shakti, Paribhasha and Lakshana, only that or those meanings that are related through the relation of Shakti would be considered the principal meanings of that word.

In words like Vachya (denoted) or Vachaka (denoting), the root form of the words is 'Vach;. It is required to understand how Shakti, or the Sanketa (desire) of Ishvara linking a word and its meaning, is related to the meaning of the root 'Vach'. This linkage is not necessarily obvious. The author clarifies how the meaning of the root "Vach' is to be understood in the desire of Ishvara ('may this word cause the cognition of that meaning').

The usage or sense of the root 'Vach' is similar to the word 'denote'. When we say that a word denotes a meaning, the word 'denote' is meant to link/ relate the uttered word and its meaning. Similarly, the root 'Vach' links the word and its meaning by signifying that the word causes cognition of that meaning.

One form of Ishvara's desire is 'May this word lead to the cognition having this meaning as its subject'. In this form of the desire, the cognition has the meaning (Artha) as its subject. This cognition is caused by the word (Padam). Thus, the cause-ness of the cognition is a characteristic (Prakara) of the word. This cause-ness further has the characteristic (Dharma) of Prakarata or characteristic-ness. This Prakarata (characteristic-ness) is linked to the locus-ness (Vishayata or Visheshyata) that characterizes the word (Padam) with respect to the cause of cognition. It is this locus-ness (Vishayata) that is the meaning of the root 'Vach'. When we say that the word has a locus-ness (Vishayata) that is linked to the cause-ness of a cognition that has the meaning as its subject, it implicitly signifies that the word is related/ linked to its meaning. In the course of the exposition, the author refers to the locus-ness (Vishayata) as the meaning of the word-root 'Vach'.

The author then continues to analyse various linguistic aspects of the sentence of desire of Ishvara. This discussion dealing with the linguistic aspects of the desire-sentence of Ishvara and the significance of the suffixes of its element words requires some knowledge of the rules of Vyakarana (Sanskrit linguistics). Since omitting the explanation of this short discussion would not affect the appreciation of the rest of the text. Given the inability of appreciating the intent of this discussion without knowledge of the rules of Vyakarana, the detailed description of this portion is omitted. It is however interesting to appreciate the consequences of this short discussion.

In the desire sentence of the form – 'this word denotes the cognition of this meaning', the cause-ness has the word as its locus. In the desire-sentence of the form – 'the word Gow denotes the cognition of a cow', the word 'cow' signifying the meaning of the word is a subject of the cognition – which is part of the sentence defining the meaning of the root form 'Vach" (the meaning of the word root Vach is the locus-ness existing in the word that is associated with the characteristic-ness that exists in the cause-ness of the cognition which has the meaning as its subject).

When the form of the desire is a passive sentence like – 'This meaning is conveyed by this word' or 'This meaning is denoted by this word', there is a difference in the manner in which the verb containing the word 'Vach' relates the word to the meaning. In active form desire-sentences like 'This word denotes this meaning', the word is the locus of the sentence and has been given the quality of giving rise to the cognition which has the meaning as its subject. In this case, the meaning (related to the word) is contained in the mean-

ing-sentence of the Vach word-root (locus-ness that characterizes the word with respect to the cause of cognition) as the subject of the cognition. In the case of passive form desire-sentences, the word is not defined in the first place as being the cause of cognition having the meaning as the subject matter. In the case of passive form desire-sentences, it is the meaning that is the locus of the sentence. In this case, the relation between the word and the meaning through the verb formed by the 'Vach' root is not straight forward as in the case of the active form desire-sentence. The meaning of the 'Vach' root has been defined to be 'the locus-ness characterizing the word with respect to the cause of cognition having the meaning as the subject'. This locus-ness is linked (Nirupita) to the Characterstic-ness (Prakarata) characterizing the cause-ness of the cognition having the meaning as the subject. This Prakarata or characteristic-ness residing in the cause-ness of cognition is regulated by the locus-ness which also exists in the cause-ness of cognition. Cognition itself is an element of the cause-ness and contains the characterstic-ness that is linked to the locus-ness that exists in the cause-ness of cognition that regulates the characteristic-ness linked to the locus-ness existing in the word. The characteristic-ness that exists in cognition is governed by the locus-ness existing in the cognition which is linked to the characteristic-ness governed by the relation of Vishayita. The cognition has the meaning as its subject. The meaning contains a characteristic-ness (Prakarata) which is linked to the locus-ness (Visheshyata) that is contained in the cognition by the relation of Vishayita. The locus of this characteristic-ness is infact the meaning of the word. Thus, while retaining the status of the meaning as the locus of the passive-form of the desire, the author has demonstrated how the meaning of the 'Vach' word-root effectively relates a word and its meaning.

Is Shakti a necessary concept?

After completing an analysis of how Shakti relates word and meaning, the author goes on to examine various discussions and contentions that have arisen with respect to the validity and sufficiency of the acceptance of the concept of Shakti. It is the position of the Nyaya School that Shakti is a necessary separate relation that relates word and meaning. This position is challenged by the Mimamsa school. The concept of Shakti implies a strict relation between a word and its meaning, It is the belief that correct usages of the Sanskrit language represent the true relationships between words and meanings. Only the use of the correct Sanskrit pronunciations to denote meanings can be considered correct, especially in the context of supernatural usages like in ritualistic sacrifices (Yagnas) and prescribes repentances (Prayaschitta). Contorted usages (Apabhramsha) of Sanskrit language cannot confer the same merit as properly pronounced usages.

The Mimamsa school would contend that Apabhramsha or contorted usages also, due to the mistaken cognition of Shakti lead to the cognition of the meaning. For example,

the word for cow in Sanskrit is Gow. However, it is common to find the use of the contorted usage 'Gaay' to refer to a cow. Although (being a contorted usage), the word 'Gaay' is not related to the meaning 'cow' through the relation of Shakti, due to a mistaken assumption/ cognition of the existence of such a Shakti relationship, the use of the word 'Gay' also leads to the cognition of the meaning – 'cow'. Now, it has been demonstrated that even non-Sanskrit contorted (Apabhramsha) usages can lead to the cognition of the meaning. It is also true that the Ishvara is omniscient and is aware of all forms of knowledge. The Ishvara is also omnipotent and is the cause for all that occurs in the Universe. It is thus necessary that Ishvara's desire (Ishvarasanketa or Shakti) relating words and meanings would include in its fold even the word-meaning linkages prevalent in the Apabhramsha or contorted usages. In that case, the Nyaya school has to accept that even such contorted usages are instances where the Shakti relationship relates words and meanings. If so, even such contorted usages would be endowed with the effectiveness of proper Sanskrit word usages. This would imply that there is no necessity to use correctly pronounced Sanskrit words to make supernatural activities like Yagnas effective. Use of contorted words would work just as well. However, this result is entirely unacceptable. It is universally accepted (even by the Nyaya school) that only correctly used Sanskrit words have the quality of Sadhutvam or correctness where the intent or meaning of the word is arrived at by the applications of the correct rules of Vyakarana (linguistics) or where the meaning is not arrived at by a mistaken cognition of Shakti. To avoid this unwanted result of Apabhramsha usages acquiring the quality of Sadhutvam, the Mimamsa school would argue that it is necessary to reject the concept of Shakti. Accepting Shakti as the desire of Ishvara to link words and meanings would lead to unacceptable consequences.

Apart from demonstrating the overcoverage of Shakti to Apabhramsha usages, the Mimamsa school forwards yet another argument to reject the concept of Shakti. Apart from Sanketa (of which Shakti is a category), the other category of Vrtti or relation connecting a word and its meaning has been mentioned to be Lakshana. Lakshana relates a word to its meaning other than the principal meanings(which are related by Shakti or Paribhasha). An example of Lakshana is the usage of the word Ganga. The principal meaning of the word Ganga as related by Shakti is the flow of the river Ganges. However, it is not uncommon to come across usages like – 'the hutment of fishermen is on the Ganga'. Here, the hutment cannot be said to exist in or on the flow of the river. The intent of the use of the word 'Ganga' is clearly to refer to the bank of the river. This linkage/ relationship between the word 'Ganga' and the bank of the river (instead of the Shakti linkage between the word 'Ganga' and the flow of the river) is referred to as Lakshana.

The followers of the Mimamsa school state that even this Lakshana relation, which is distinct form Shakti, would be over-covered by the definition of Shakti. This is because, similar to the case of Apabhramsha or contorted usage, Ishvara, the omniscient soul can-

not be denied to possess cognizance of the relation between words like 'Ganga' and their Lakshana meanings like the bank of the river. Thus, if Shakti is accepted to be Ishvara's desire, then the definition of Shakti would overcover onto instances of Lakshana. This is extremely undesirable form the Nyaya school's point of view which accepts a clear distinction between the concepts of Shakti and Lakshana.

Words spoken by Ishvara

At this stage, the Nyaya school could counter saying that Shakti usages have to be determined by what was uttered/ physically spoken by Ishvara with the intent of relating words and their principal meanings. In the case of contorted (Apabhramsha) and Lakshana, these usages were not uttered by Ishvara. Thus, not being uttered by Ishvara, the contorted and Lakshana usages are not over-covered by this improved definition of Shakti (being the desire of Ishvara as uttered by Ishvara).

The Mimamsa school would counter that even this proposition of the Nyaya school - that Shakti usages have to be considered to be derived from the desire of Ishvara as uttered by Ishvara – is faulty. One direct fault that is evident in this proposition is our everyday usage of words denoting their meaning as related by Shakti. For example, when we use words like Ganga or Gow to denote the flow of the river or a cow, we are in fact able to do so because the words like Ganga and Gow (as uttered by us) possess the relation of Shakti. However, these instances of Shakti enable words are not uttered by Ishvara but by us mortals. If the Nyaya proposition is accepted that for an instance of Shakti to exist, the word has to be uttered by Ishvara, then in that case, instances when we utter words to denote meanings related by Shakti would not be covered by the current definition of Shakti (desire as uttered by Ishvara). Thus, undeniable instances of everyday Shakti usage would be rendered not covered by the current definition of Shakti. This is definitely not acceptable.

To this, the Nyaya school would respond by refining the definition of Shakti by clarifying that the reference to the 'utterance by Ishvara' includes instances which can be identified with the actual utterance of Ishvara. That is, Ishvara uttered certain words which were intended to give rise to the subject-ness of the cognition related to the locus-ness which is contained in the meaning. Words containing this sequential linkage with the meaning can be identified with those uttered by Ishvara. It is sufficient that a word can be identified with one uttered by Ishvara having such sequential linkages and it is not necessary that a word be physically uttered by Ishvara to possess the relationship of Shakti.

The detractors of the Nyaya school would not yet be satisfied. It has to be noted that the Vedas have numerous instances of Lakshana usages where the Vedic word in-

stead of denoting the principal meaning related by Shakti, denotes a related meaning related through the relationship of Lakshana. For example, it has been mentioned in the Veda that clarified butter (Ghrtam) is life and elsewhere it has been mentioned that the Sun (aditya) is the Yagna fire. Here, although the main meaning of the word 'Ghrtam' is clarified butter, it is also used metaphorically to denote life. Similarly the word 'Aditya' although used principally to denote the Sun is used metaphorically to denote the Yagna (Sacrificial) fire. The Nyaya school accepts that the entire body of the Vedic text has been uttered by Ishvara. In that case, these metaphorical usages where the relationship of Lakshana rather than Shakti prevails would also be overcovered by the (modified) definition of Shakti (identifiability with usages uttered by Ishvara). This is not desirable.

Another flaw is demonstrated in the proposition that Shakti usages are to be identified with utterances of Ishvara. Human beings are born. The body of a human being when born in nameless. However, after being named, the body of that human being is the meaning of the name (a word). Acoording to the Nyaya school, the relation between the name and the person is also an instance of Shakti. If a person's name is Devadutta, this particular name 'Devadutta' is not physically uttered by Ishvara. Thus, the relation between a person and a name is not covered by the definition of Shakti as the word used to signify the name to denote a particular person has not been actually uttered by Ishvara. It might be argued that there is a prescription in the Shastras (which are based on the Vedas that are the utterances of Ishvara) that the father name a child on the eleventh (or twelfth) day after birth. This would imply that there is a linkage between the uttered desire of Ishvara and the name of the child. However it is a fact that the actual name of the child (Devadutta etc.) has not been uttered by Ishvara with an intention to name that particular child. It is the father who performs the physical process of uttering the name of the child. Thus, it is seen that in the case of the relation between a name and a person (a word and its meaning), although it is desired that the relation falls under the category of Shakti, the proposed definition of Shakti prevent such a categorization. This is undesirable and demonstrates the unsuitability of such a definition of Shakti (being identifiable with the desire of Ishvara as uttered by Ishvara).

Another interesting fault is demonstrated in the proposition to equate Shakti to the Sanketa (desire) of Ishvara. There is a class of people (among whom are counted the Charvakas) who do not accept the existence of an omnipotent, indestructible, omniscient Ishvara. They are agnostics who strongly challenge the very existence of Ishvara. However, it is found that such persons find no difficulty in using words to convey meaning. They are comfortable in the usage of words like Ganga and Gow that are related to their respective meanings through the relation of Shakti. If Shakti were to be the Sanketa (desire) of Isvara, then such non-believers in the existence of Ishvara should have been unable to

use words as in their opinion an Ishvara, whose desire is necessary to link words to their meanings, does not exist. This suggests that it is unnecessary to link the concept of Ishvara to the potency of words to denote meanings.

Separation of Ishvara from Shakti and its consequences

After discussing the various oppositions to the inclusion of the concept of Ishvara, the author proposes an alteration to the Nyaya viewpoint. It is suggested that there be no reference to the concept of Ishvara in the definition of Shakti. Since it has become clear that various intractable faults persist, it is suggested that Shakti is merely a Sanketa (desire) relating a word and its meaning. There is no specific purpose that is achieved by the requirement that to constitute a Shakti relation, the desire has to emanate from Ishvara. Any desire would do. As long as the desire relates the word and its meaning, it is included in the space of Shakti. One consequence of this broader definition of Shakti is that it now covers the entire space of Sanketa (desire relating words and meanings). The artificial difference between Shakti (Ishvara's desire) and Paribhasha (desire of historical entities) ceases to exist. Indeed there is no more necessity to persist with a separate entity Paribhasha at all.

Now that the halo of relation to Ishvara has been removed from the definition of Shakti, all forms of contemporary desires relating words and meanings can be considered to be valid relations of Shakti that give rise to valid aural cognition (Shaabdabodha). It is not necessary that long established usage exists before a Shakti relation is accepted as a valid source of aural cognition. It becomes necessary to examine the consequences of accepting all contemporary desires (Aadhunika Sanketa) as causes of valid aural cognition.

The first opposition to this proposition of including all contemporary Sanketas as forms of Shakti is forwarded with reference to Tatparya. Tatparya is the desire of the speaker of a sentence which brings out the meaning of the entire sentence. When a sentence is spoken, depending on the background circumstances and the tone of the speaker, a certain meaning is understood which is distinct from the sum of the individual meanings of the words of the sentence. Shaabdabodha or aural cognition is also termed as Vaakyarthabodha or cognition of the meaning of a sentence. This aural cognition is dependent or caused by Tatparya, which is again the desire of the speaker of the sentence. Thus, Tatparya is a contemporary desire that causes aural cognition or Shaabdabodha. Accepting contemporary desires simpliciter as instances of Shakti would lead to the inclusion of Tatparya as a form of Vrtti or relation between words and meanings. This would appear to be an undesirable consequence of the acceptance of contemporary desires as instances of Vrtti.

It could be supposed for the sake of argument that it could be desirable to accept Tatparya within the folds of Vrtti. Such a supposition is quickly dispelled. Accepting Tatparya as an instance of Vrtti would mean that the separately accepted Vrtti of Lakshana would have to be abandoned as redundant. For example, in the Lakshana usage of the form 'the fisherman's tenement is on the river Ganga', the sense of the usage of the word 'Ganga' to mean the bank of the river (instead of the Shakti based meaning of being the flow of the river,) could be easily derived from a knowledge of the Tatparya of the speaker of the sentence. If Tatparya was itself accepted to be a Vrtti rather than a separate cause of aural cognition, there would be no sense in retaining the concept of Lakshana which is a Vrtti having the same function. This consequence of the redundancy of Lakshana is very undesirable as it leads to a disturbance of the accepted position of the Nyaya school. Thus, it is necessary to distinguish Vrtti and Tatparya. Doing so would require a revised examination of the definition of Vrtti.

It is clarified that there is a distinction in the manner in which Tatparya and Vrtti function in the causation of aural cognition. Vrtti is that Sanketa (desire) which causes the intermediary cause (of aural cognition) of the recollection of the meaning of the words. Tatparya however does not give rise to such an intermediary cause (Vyapara) in the form of recollection of meanings of words, but instead is a direct (immediate) cause of aural cognition. First the relation of Vrtti, based on Sanketa (desire linking words and meaings) leads to the recollection of the meanings of the uttered words. It is only after such meanings are recollected that, on the basis of the knowledge of the speaker's desire or Tatparya (derived from the surrounding circumstances), aural cognition is caused. Here, the attempt is to distinguish between Vrtti and Tatparya by specifying that Vrtti leads to the recollection of the meanings of words (which is an intermediary cause of aural cognition) whereas Tatparya does not lead to such a recollection of meanings but is instead an immediate cause of aural cognition. Whereas Vrtti is not an immediate cause of aural cognition, Tatparya is - although both of them are manifestations of desire. One desire (Vrtti) links words and meanings whereas another desire (Tatparya) acts upon the recollected meanings to cause aural cognition. Thus, since Tatparya and Vrtti have been distinguished, there is no more a case of Lakshana being rendered redundant. If Lakshana is not accepted as a Vrtti, in usages like where the word – Ganga – is used denote the bank (instead of the flow), the recollection of the meaning of the word 'Ganga' as the bank is not achieved. If the meaning is not recollected (through Lakshana), it will not be possible to understand the Tatparya of the speaker and hence, aural cognition will not occur. Hence it is demonstrated that it is necessary to accept the concept of Lakshana as a separate entity.

The critics of this viewpoint would aver that it is not necessary to accept the fact that it is the memory/ recollection brought about by the relation of Lakshana that causes

aural cognition. Granted, that it is the recollection (of the meaning) brought about by Lakshana that leads to the application of Tatparya (or the desire of the speaker). However, it is suggested that it is the secondary recollection brought about by a knowledge of Tatparya (as opposed to Lakshana) that leads to the formation of aural cognition. It is suggested that Lakshana need not be included as an instance of Vrtti. Even in the case of contemporary Sanketas, it is suggested that it is the recollection brought about by Tatparya that leads to aural cognition. This argument is rejected as being untenable.

The above argument is untenable on account of it being opposed to ordinary experience. It is a matter of ordinary experience that immediately subsequent to the application of Tatparya (speaker's desire) to the meanings of the recollected words, aural cognition is caused. There is no intermediate recollection of words after the knowledge of Tatparya and before aural cognition is caused. Thus, the only recollection (Upasthiti) of the meanings of words that causes aural cognition occurs due to Lakshana/ Sanketa and before the appreciation of Tatparya. Since Lakshana gives rise to the recollection of meanings that leads directly to aural cognition, it is correctly regarded as an instance of Vrtti. It is common experience that due to the knowledge of the relation of Lakshana, due to the knowledge of the inapplicability of principal meanings (like the word 'Ganga' not meaning the flow but the bank), the intended meaning of the word is recollected. Ater such a recollection, the word's Tatparya is appreciated and without the occurrence of any further recollection of meaning, the experience of the meaning through aural cognition is experienced. This undeniable experience firmly establishes Lakshana as a Vrtti.

Even if Lakshana has been established as a Vrtti, how is it possible to account for the aural cognition resulting from contemporary words? It is clarified that it is not necessary to accept Tatparya as a Vrtti in order to account for aural cognition resulting from the utterance of contemporary words. In the case of contemporary words, the meaning of the contemporary word is recollected due to the knowledge of the historical desire of the preceptor of that contemporary word. After the recollection of the meanings, the Tatparya or sense of the present user is gauged based on the context etc. of the usage and aural cognition is achieved. Thus, contemporary desires (Adhunika Sanketa) are also instances of Vrtti and not obviated by the concept of Tatparya.

Appreciation

These arguments for the ousting of Tatparya as an instance of Vrtti are based on common experience. It would thus appear that Lakshana and Shakti (including contemporary usages) are firmly established as instances of Vrtti.

This is not by any means an end of the multifaceted discussion contained in the Shaktivada. It represents only the start of a chain of sophisticated reasoning and counter arguments that guide the mind of the reader through the intricate possibilities of the subject matter. To put it in perspective, the subject matter covered in this article is less than ten percent of the content of the text and does not yet represent some of the more involved and insightful reasoning.

What is creditable and most noteworthy of this work by Acharya Gadadhara Bhattacharya is the sheer strength of his purpose, and intense analytical rigor in uncovering the basis of a most basic aspect of human existence – communication. Conventional communication is fundamentally based on representation of ideas, objects and events by words. In our everyday life we take for granted the ability to relate word usages with intended meanings. Of course, a casual approach to communication can lead to misunderstanding and miscommunication. But even efforts at precision are often not necessarily effective. Acharya Gadadhara's discussions, while demonstrating the effectiveness of the Nyaya method as a tool for precise examination of ideas, gives us great insight into the origin, usage and flaws in the relationship between words and meanings. An understanding and appreciation of the Shaktivada, apart from being extremely informative and stimulating is sure to invoke in us a humility - considering the limitations of communication and the possibilities of analysis.

ॐ नमो गणेशाय

सविवृतिकः

शक्तिवादः

सामान्यकाण्डम्

सङ्केतो लक्षणा चार्थे पदवृत्तिः।

विवृतिः

शिवोऽप्युद्बुद्धशक्तिश्चेत् समर्थः स्वार्थसाधने॥
साकाङ्क्षः शब्दवन्नेता वन्दे तं शक्तिभूषितम्॥१॥

विद्वद्वरोऽभूद् हरचन्द्रनामा तत्पुत्र आसीत् प्रथितातिकीर्तिः॥
गोलोकनाथः शुचि नीरजं सद् वाणी श्रिता यद्रसनं विदित्वा॥२॥

विचिन्त्य तत्तातपदारविन्दं विभाव्य गाढं हरिनाथनाम्ना।
विशद्यते दुर्गमशक्तिवादः सतां प्रमोदाय गदाधरोक्तः॥३॥

इह खलु सर्वैः शब्दैः श्रूयमाणैरपि सदा सर्वेषां न तदर्थप्रतिपत्तिः; न वा सद्यः; किन्तु कदाचित् शब्दैः केषाञ्चित् स्वल्पचिरेण जन्यते, कल्प्यते च तस्मात् तत्सम्पादिनी पदपदार्थसम्बन्धविशेषधीजनितपदार्थसार्थोपस्थितिरेव, इतरेषान्त्वन्वयव्यतिरेकनियमविरहगौरवादिदोषकवलितत्वेन न तत्कल्पनसम्भवः, स च सम्बन्धविशेषः किंस्वरूप इति जिज्ञासूनामन्तेवासिनां तदवधारणार्थं तद्विशेषस्यैव स्वरूपं वाच्यमिति तं विभज्य परीक्षासहितं सामान्यतो विशेषतश्च तत्स्वरूपमाह--सङ्केतो लक्षणा चेत्यादि।

चकारार्थः समुच्चयः, तच्च धीविशेषविषयत्वं द्वित्वं पर्यवसितं,वृत्तिः शाब्दबोधौपयिकः सम्बन्धः, तथा चार्थप्रतियोगिकः पदानुयोगिकः, अर्थानुयोगिकः पदप्रतियोगिको वा तादृशः सम्बन्धः सङ्केतलक्षणाद्वयमित्यर्थः।

केचित्तु–अयं ग्रन्थो न विभागपरो वृत्तित्वसामान्यधर्मस्य पूर्वाकथनेन तद्विशेषजिज्ञासाऽनुदयात्, तत्परत्वे लक्षणाया अप्यवश्यनिरूपणीयत्वेन तदनिरूपणाद् न्यूनत्वाच्च; किन्तु शाब्दबोधौपयिकसम्बन्धस्य पदार्थान्तरत्वनिराकरणक्लृप्तपदार्थस्वरूपत्वप्रदर्शनपरः, लक्षणा चेत्यंशस्तु दृष्टान्तार्थमित्याहुः।

तन्न शोभनं–शाब्दबोधौपयिकसम्बन्धत्वरूपसामान्यधर्मस्योक्तरीत्या मनसैव सुग्रहत्वाद् विभाग उद्दिष्टधर्मस्य शब्दजन्यज्ञानमात्रानपेक्षणाच्च।

लक्षणायास्तु ग्रन्थान्तरे निरूपितत्वात् सङ्केते निरूपिते तत्सम्बन्धरूपलक्षणाया अपि स्फुटतयैव लाभादनिरूपणेऽपि न्यूनत्वाभावात् शक्तेरज्ञातत्वे शक्यसम्बन्धरूपलक्षणाया अप्यज्ञातत्वेन दृष्टान्तत्वायोगाच्चेति।

अथ विशेषविधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वस्येवावगतसामान्यधर्मावच्छिन्नानां किञ्चित्संख्यकविशेषधर्मेणाभिधानस्याधिकसंख्याऽवच्छिन्नव्यवच्छेदो लभ्यते; स च न सम्भवति; व्यञ्जनाया अपि वृत्तित्वावश्यकत्वाद्, अन्यथा–

"मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितम्"

इत्यादौ परस्परविभागजनकक्रियारूपविकासस्य मुखे बाधाल्लक्षितार्थस्य विस्तृतस्यान्वयबोधानन्तरं मुखे कुसुमतुल्यसौरभवत्तायाः चमत्कृतिरमणीयताया वा बोधस्यानुभवसिद्धस्यापलापापत्तेरिति चेद्? न–

मनसैव तत्तत्पदार्थस्य स्मृतिसहकारेण बोधनिर्वाहात्; तदर्थं व्यञ्जनाया वृत्तेः कल्पनानावश्यकत्वाद्।

न चैवं गामानयेत्यादिवाक्यानन्तरं तत्तत्पदार्थोपस्थितिसहकृतमनसैव विशिष्टबोधः सम्पाद्यतां किं शक्त्यादेः वृत्तित्वकल्पनयेति वाच्यम्?

यतः पदजन्यपदार्थोपस्थितिर्यत्र सम्बन्धान्तरज्ञानजन्यपदार्थान्तरोपस्थितिरूपा तत्र विशिष्टबोधे तादृशपदार्थान्तराभानाद् वाक्यजन्यबोधस्य नियन्त्रितविषयकत्वस्यावश्यकत्वेन तादृशबोधस्य मानसत्वायोगः।

एवं व्यञ्जना स्वरूपसती ज्ञाता वा कारणम्? तत्र नाद्यः–तथा सति विकसितादिपदेन सर्वदा सर्वस्यैव व्युत्पन्नस्य तादृशबोधापत्तेः; न तु सहृदयमात्रस्य; व्यञ्जनाया अविशेषाद्,

इष्टापत्तावनुभवविरोधः सहजाप्रतीयमानरूपगूढत्वस्य तादृशव्यङ्ग्येऽनुपपत्तिश्च स्याद्, नापि द्वितीयः–शक्तिग्राहकव्यवहारकोषादिवल्लक्षणाग्राहकप्रत्यक्षादिवच्च तद्ग्राहकस्य वक्तव्यत्वापादात्, ज्ञानसामान्यसामग्री तद्ग्राहिका चेत् पूर्वोक्तदोषस्य जागरूकत्वाच्चेत्यादिकं द्रष्टव्यम्।

अर्थ इत्यनुक्तौ वृत्तित्वं शाब्दबोधानुकूलज्ञानविषयसम्बन्धत्वं; तच्च सङ्केतादाविवाकाङ्क्षाऽऽदिज्ञानविषये तत्तत्पदाव्यवहितोत्तरत्वरूपसम्बन्धादावप्यस्ति; अतस्तत्रापत्तिवारणायार्थ इति, तथा चाव्यवहितोत्तरत्वादेरर्थप्रतियोगिकत्वाभावान्न तदापत्तिः, पचतीत्यादौ योग्यताज्ञानविषये पाकादिप्रतियोगिकानुकूलत्वादौ वृत्तित्ववारणाय पदेति, तथा च तादृशानुकूलत्वादेः पदानुयेगिकत्वाभावान्न तदापत्तिः।

ननु वृत्तित्वं शाब्दबोधजनकोपस्थितिजनकज्ञानविषयसम्बन्धत्वमेव वक्तव्यम्; अत एव वृत्तिः शाब्दबोधौपयिकोपस्थितिजनकः पदपदार्थयोः सम्बन्धः कल्प्यत इति शब्दमण्यालोके मिश्रैरभिहितम्, एवञ्च तादृशाव्यहितोत्तरत्वादेः शाब्दबोधजनकोपस्थितिजनकज्ञानविषयत्वाभावेन न तदापत्तिरिति चेद्? न–

तथाऽप्युपस्थित्यात्मकाकाङ्क्षाऽऽदिज्ञानजनकवाक्यविषयकानुभवविषयेऽव्यवहितोत्तरत्वादौ तदापत्तिसम्भवाद्।

अथ शाब्दबोधनिरूपिता या स्मृतित्वावच्छिन्नजनकता तन्निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतावत्सांसर्गिकविषयतावत्त्वं वृत्तित्वमुच्यते? आकाङ्क्षाज्ञानादेः शाब्दं प्रति निश्चयत्वेनैव कारणत्वं न तूपस्थितित्वेन नातः पूर्वोक्तदोष इति चेद्?

एवमपि, वर्णादिविषयकशाब्दबोधनिरूपितवर्णविषयकोपस्थितित्वावच्छिन्नजनकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतावती या वर्णपदं शक्तिसम्बन्धेन वर्णवदित्यादिज्ञानीयवर्णवर्णत्वयोः सम्बन्धनिष्ठा सांसर्गिकविषयता तदाश्रयसमवायादौ वृत्तित्वापत्तिवारणायार्थ इति।

न च वर्णत्वस्याप्यर्थपदार्थतया समवायस्यानैक्यमतेऽपि तन्निवेशेनापि न तद्वारणमिति वाच्यम्?

अर्थ इत्यस्य प्रकारताऽवच्छेदकताऽवच्छेदकत्वानच्छिन्नतादृशसांसर्गिकविषयस्य वृत्तित्वत्वे तात्पर्याद्।

एवञ्च तादृशज्ञानीया याऽऽनुपूर्वीपदयोः सम्बन्धनिष्ठा विषयता तामादाय तादृशसम्बन्धे वृत्तित्वापत्तिवारणाय पदेति, अस्य च तादृशसांसर्गिकविषयतायां विशेष्यताऽवच्छेदकताऽवच्छेदकताऽनात्मकत्वे तात्पर्येण तद्वारणं प्रतिभाति, तथा चार्थेत्यादेरवच्छेदकताऽवच्छेदकत्वानवच्छिन्नतादृशसांसर्गिकविषयत्वं पर्यवसितार्थः।

वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते। इदम्पदमिममर्थं बोधयत्विति; अस्माच्छब्दादयमर्थो बोद्धव्य इति वेच्छा; सङ्केतरूपा वृत्तिः।

केचित्तु–शाब्दबोधानुकूलोऽर्थे पदस्य सम्बन्धः कीदृश? इति जिज्ञासया तन्निरूपणं तादृशजिज्ञासानिवृत्तिस्त्वर्थपदघटितोद्देश्यबोधकपदसंबलितोत्तरवाक्यं विना न भवत्यतोऽर्थ इत्यादिप्रयोजनान्तरानुसन्धानं विफलमिति प्राहुः।

ननु सङ्केतो लक्षणा चेति विभजनं न युज्यते? यस्मात् शाब्दबोधनियामको ज्ञातः पदपदार्थयोः सम्बन्ध इति प्राच्यैर्गीयते; तेन पदस्यार्थोऽभिधेयः पदार्थ इति व्युत्पत्त्या पदशक्य एव पदार्थो वक्तव्यः, अन्यथा घटादेरपि पटादिपदार्थत्वापत्तिरेवञ्च पदलक्ष्यार्थयोः सम्बन्धे वृत्तित्वं न वक्तुमर्हतीत्यत आह–वृत्त्येत्यादि।

वृत्त्येत्यादिग्रन्थस्य पदार्थपदव्यवहारविषयनिर्वचनपरत्वमिति केषाञ्चिद्व्याख्यानं न - सम्यक्।

तादृशग्रन्थस्य सामान्यतः पदार्थपदव्यवहारविषयनिर्वचनपरत्वे वस्तुमात्र एव तत्सत्त्वे-नाव्यावर्त्तकतया वृत्त्येत्यस्य व्यर्थत्वापत्तेः, गगनकुसुमादेश्चालीकत्वेन धर्मिणोऽलाभे तादृश-व्यवहारविषयत्वासम्भवाच्च पदपदार्थविशेषघटितपदार्थपदव्यवहारविषयनिर्वचनपरत्वे शक्त्या जलप्रवाहदेरिव लक्षणया तीरादेरिव च पदार्थमात्रस्यैव जलप्रवाहकालिकादिसम्बन्धरूपलक्षणया नद्यादिपदप्रतिपाद्यत्वेन नद्यादिपदघटितपदार्थपदव्यवहारविषयत्वसम्भवेन तद्दोषतादवस्थ्याद्।

यदि च यत्र यत्रार्थ आधुनिकदेवदत्तादिपदानां कस्यापि पुंसस्तात्पर्यादिकं न ज्ञायते तत्र तत्रार्थे तत्तत्पदप्रतिपाद्यत्वसम्भवेन तत्तत्पदघटितपदार्थपदव्यवहारवारणाय वृत्त्येति; इत्यपि न शङ्कनीयम्।

तत्र तत्र तत्तत्पदानां तात्पर्यादिविरहेणैव शाब्दबोधाजननेन तदापत्त्यसम्भवेन वृत्त्येत्यस्या-नावश्यकत्वाद्, वृत्तिस्वरूपादिनिरूपणे पदार्थपदव्यवहारविषयनिर्वचनस्यानाकाङ्क्षित-त्वेनार्थान्तरापत्तेश्च।

एतेन 'घटादिपदे गगनादेः समवेतत्वादिसम्बद्धे ज्ञानाद् गगनाद्युपस्थितितो गगनादेः शाब्दबोधवारणाय वृत्त्येति' इति केषाञ्चित्प्रलापोऽनादेयः।

तज्जन्यशाब्दबोधं प्रति वृत्त्येत्यादिवाक्यस्याप्रतिबन्धकत्वाच्चेत्यलं विस्तरेण।

वृत्त्येति। संकेतलक्षणाऽन्यतरसम्बन्धेनेत्यर्थः।

अभिधीयते; इत्यनन्तरं प्राच्यैरिति शेषः, अतो लक्षणा चेत्यस्य न तादृशगाथया विरोध इति भावः।

तत्राधुनिकसङ्केतः परिभाषा; तया चार्थबोधकं पदं पारिभाषिकं यथा शास्त्रकारादिसङ्केतितनदीबृद्ध्यादिपदम्।

ईश्वरसङ्केतः शक्तिः; तया चार्थबोधकं पदं वाचकं; यथा गोत्वादिविशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते।

ननु सङ्केतस्येच्छारूपस्य संसर्गत्वं कुतः तस्य निष्प्रतियोगिकत्वात् कुतो वा घटपदस्य सङ्केतो घटे न तु पटादावित्यादिनियमोपपत्तिरीश्वरेच्छायाः सर्वं प्रति तुल्यत्वाद्? इत्यतस्तस्य विषयविशेषघटितत्वेन सप्रतियोगिकत्वं नियामकत्वञ्चोपपादयन्नाह—इदं पदमिति।

बोधयत्वित्यत्र णिजर्थो बोधान्वयिजनकत्वं, तथा चैतत्पदविशेष्यकैतत्पदार्थविषयकबोधजनकत्वप्रकारकेच्छा तद्वाक्याभिलाप्या।

विनिगमनाविरहेणार्थविशेष्यकेच्छाया अपि तथात्वमाह—अस्माच्छब्देति।

शब्दादित्यत्र पञ्चम्यर्थो जन्यत्वं, तस्य च बोद्धव्येत्यत्र बुधधात्वर्थेऽन्वयः, तव्यप्रत्ययार्थो विषयरूपकर्म तथा चैतच्छब्दजन्यबोधविषयत्वप्रकारकार्थविशेष्यकेच्छालाभः।

इदमत्रावधातव्यं—यत्र विनिगमनाऽस्ति तत्रैकविध एव सङ्केतः प्रयोजकः, यथा पुष्पवन्तपदादौ पदविशेष्यक एव, एतस्योपलक्षणत्वेन च यत्रोभयविधसङ्केतेन न निर्वाहः तत्र बोधादिविशेष्यक एव प्रयोजकः यथा तदादिपदादौ।

सङ्केतं विभजते—तत्रेति। सङ्केतमध्य इत्यर्थकम्।

आधुनिकेति। जन्येत्यर्थः।

परिभाषा=परिभाषापदार्थः।

एतेन सङ्केतमात्रं शक्तिः, परिभाषा तूभयावृत्तिधर्मावच्छिन्नसङ्केतरूपशक्तिविशेष एवेति मतं नाभिप्रेतमिति सूचितम्।

नन्वाधुनिकसङ्केतः परिभाषापदार्थो न वक्तुं शक्यते? उभयावृत्तिधर्मावच्छिन्नसङ्केतवत्पदस्य पारिभाषिकत्वेन तत्पदसङ्केतस्यैव परिभाषात्वादित्याशङ्क्याह—तया चेति।

तथा च तस्य मतविशेषसिद्धत्वेन नैतन्मते दोष इति भावः। परिभाषया बोध्योऽर्थः परिभाषितः परिभाष्यो वेति।

शक्तिं निर्वक्ति—ईश्वरसङ्केतइति।

अत्रेश्वरपदस्य नित्यत्वपरिचायकतया नित्यसंकेतः शक्तिरित्येवार्थो बोध्यः।

वाच्यवाचकादिपद ईश्वरेच्छाया बोधजनकत्वेन या विषयता सैव धात्वर्थः। तस्या आश्रयत्वरूपं कर्तृत्वं पदे कर्तृप्रत्ययेन बोध्यते। पदं गां वक्ति, गां ब्रूते, गोर्वाचकमित्यादौ कर्मप्रत्ययान्तेनार्थवाचकपदेन तत्तदर्थविषयकत्वरूपतत्तत्कर्मकत्वं धात्वर्थैकदेशे बोधे बोध्यते। पदेन गौरुच्यते पदस्य गौर्वाच्य इत्यादौ पदनिष्ठधात्वर्थीभूततादृशविषयतायाः परम्परया निरूपकत्वं, तच्च धात्वर्थीभूततादृशविषयतानिरूपकबोधजनकत्वप्रकारताऽन्तःपातिबोधनिष्ठविषयतानिरूपकविषयितासम्बन्धावच्छिन्नप्रकारताऽऽश्रयत्वरूपं तादृशक्रियाकर्मत्वं, गवादौ कर्मप्रत्ययेन बोध्यते।

एतेनेश्वरत्वं ज्ञानवत्त्वं जगत्कर्तृत्वं चेति वक्तव्यम्, अतस्तद्घटितसङ्केतत्वस्य महागौरवेण वच्यादिधातोः शक्यताऽवच्छेदकत्वासम्भवेन नित्यसङ्केतः शक्तिरित्येव वक्तुमुचितं स्यादित्यपि परास्तम्।

न चेश्वरीत्वमनुपादेयमेवेत्यग्रिमग्रन्थविरोध इति वाच्यम्?

तत्रापीश्वरीयत्वपदस्य नित्यत्वपरत्वादिति।

गवादिशब्दानां वाचकपदप्रतिपाद्यत्वं गवादेर्वाच्यशब्दप्रतिपाद्यत्वञ्च योगेन समर्थयते–वाच्यवाचकादीति।

पदे इत्यत्र सप्तम्यर्थो घटकत्वं, तस्य च धात्वर्थ इत्यस्य घटकधातावन्वयः, ईश्वरेच्छाया इत्यत्र षष्ठ्यर्थो निरूपितत्वं बोधजनकत्वेनेत्यत्र तृतीयायाः प्रकारतानिरूपितत्वरूपवैशिष्ट्यमर्थः, उभयञ्च विषयतेत्यत्रान्वेति, तथा चेश्वरेच्छानिरूपिता या बोधजनकत्वप्रकारतानिरूपितविषयता सैव वाच्यवाचकादिघटकीभूतधात्वर्थ इत्यन्वयबोधः।

तस्या इति। वचधात्वर्थतादृशविषयताया इत्यर्थः।

कर्तृत्वं=कर्तृविहितप्रत्ययेन विवक्षितम्।

पद इत्यत्र बुधधात्वर्थबोधान्वयिविशेष्यत्वं सप्तम्यर्थः, तस्य च पारतन्त्र्येणाख्यातार्थप्रकारतायामप्यन्वयः कर्माख्यातार्थप्रकारत्वं कर्तृत्वमन्वेति, एवञ्च तादृशविषयतानिरूपितमाश्रयत्वस्वरूपं कर्तृप्रत्ययेन विवक्षितं, पदनिष्ठविशेष्यतानिरूपितकर्तृप्रत्ययजन्यबोधीयप्रकारत्वाश्रय इति शाब्दधीरिति।

आश्रयत्वरूपमित्याद्युपलक्षणं तेन कर्तृविहितकृताऽऽश्रयरूपकर्तृबोधनेऽपि न क्षतिः।

कर्मप्रत्ययान्तेन=गामित्यादिना।

द्वितीयेच्छायाः सङ्केतरूपत्वे वैपरीत्यमूह्यमिति न्यायसिद्धान्तः। अत्र मीमांसकानुयायिनः—अपभ्रंशादपि शक्तिभ्रमेणार्थप्रत्ययात् सन्मात्रविषयके भगवत्सङ्केते तस्यापि बोधकत्वेन विषयत्वमिति नैयायिकैरभ्युपगमात्तस्यापि वाचकत्वं साधुत्वञ्च स्याद्?

एवं लाक्षणिकगङ्गाऽऽदिपदस्योक्तयुक्त्या तीरादिवाचकत्वापत्तिः?

बोध इत्यत्र सप्तम्यर्थो विशेष्यत्वं; तस्य च बोध्यत इत्यत्र धात्वर्थेऽन्वयः; तथा च पदं गां वक्तीत्यादिवाक्यतो गोविषयकबोधजनकत्वप्रकारतानिरूपितेश्वरेच्छीयविषयताऽऽश्रयत्ववत् पदमित्याद्यन्वयबोधः, तच्च=तादृशविषयतायाः परम्परया निरूपकत्वञ्च।

तादृशेति। बोधजनकत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयेत्यर्थः।

बोधजनकत्वप्रकारतेति। बोधजनकतात्वावच्छिन्नप्रकारतेत्यर्थः।

ननु जनकत्वप्रकारतेत्यनेनैव चरितार्थत्वे बोधेति व्यर्थमिति चेद्?

अत्र केचिद् - बोधेति सम्पातायातमिति प्राहुः।

परेतु - जनकत्वं नियताव्यवहितपूर्ववर्त्तित्वं, तच्च सामान्यतोऽसिद्धमतो बोधेत्यावश्यकमिति व्याचक्षते। तादृशप्रकारताऽन्तः- पातित्वं=तादृशप्रकारत्वावाच्छिन्न विशेष्यता निरूपकत्वम्।

परे तु—तादृशप्रकारताऽन्तःपातित्वं=तादृशप्रकारताव्यापकत्वं बोधाव्यवहितपूर्ववर्त्तित्वप्रकारताव्यापकत्वं बोधविषयताया अक्षतमित्याहुः।

बोध्यत इति। तथा च पदेनेत्यादौ तृतीयाऽऽद्यर्थो धात्वर्थतादृशविषयताऽन्वयि वृत्तित्वं, एवञ्च पदनिष्ठं यद् बोधजनकत्वप्रकारतानिरूपितेश्वरेच्छीयविशेष्यत्वं तन्निरूपकं जनकत्वनिष्ठप्रकारतान्तःपातिबोधनिष्ठविषयतानिरूपकविषयत्वसम्बन्धावच्छिन्नं यद्विषयत्वं तदाश्रयो गौरित्यन्वयबोधः।

पदस्य गौरित्यादिवाक्यतस्तु—पदनिष्ठा या बोधजनकत्वप्रकारताकेश्वरेच्छीयविशेष्यता तन्निरूपकजनकत्वनिष्ठविषयत्वावच्छिन्नविषयतानिरूपकबोधनिष्ठविषयतानिरूपकविषयत्वसम्बन्धावच्छिन्नविषयताऽऽश्रयाभिन्नो गौरित्यन्वयधीरिति।

द्वितीयेच्छाया इति।

अत्र जन्यबोधविषयत्वनिष्ठप्रकारताकेश्वरेच्छीया विशेष्यता सैव वच्यादिधात्वर्थः।

वैपरीत्यमिति। तादृशविशेष्यतायाः परम्परया निरूपकत्वं कर्त्तृत्वं, तच्च=तादृशविशेष्यतानिरूपकविषयत्वनिष्ठप्रकारत्वावच्छिन्नविशेष्यताकबोधनिष्ठप्रकारत्वावच्छिन्नविशेष्य-

यत्तु–तादृशेच्छया भगवदुच्चरितत्वं वाचकत्वम्, अपभ्रंशादयश्च नार्थप्रत्यायनेच्छया भगवदुच्चरिता इति नातिप्रसङ्ग इति।

तन्न–अस्मदाद्युच्चरितपदेष्वव्याप्तेः तज्जातीयत्वनिवेशेऽपि वेदस्थलाक्षणिकेष्वतिव्याप्तेः सादिदेवदत्तादिपदेऽव्याप्तेश्च द्वादशेऽन्हि पिता नाम कुर्यादिति वेदे

तानिरूपकजन्यतासम्बन्धावच्छिन्नप्रकारताऽऽश्रयत्वं कर्तृप्रत्ययेन बोध्यते, तादृशविशेष्यताऽऽश्रयत्वं कर्मत्वं कर्मप्रत्ययबोध्यमिति भावः।

न्यायसिद्धान्त इति। न्यायग्रन्थकर्तृभिरभ्युपगतोऽर्थ इत्यर्थकम्।

अत्रेति। शक्तिपदार्थजिज्ञासायामित्यर्थः।

मीमांसकानुयायिन इति। अस्यागामिना वदन्तीत्यनेनान्वयः।

शक्तिपदार्थं पदपदार्थयोरतिरिक्तसम्बन्धरूपं संस्थापयितुमादौ न्यायमतं दूषयति। अपभ्रंशादपीत्यादि।

अपभ्रंशात्=शक्तिशून्यत्वे सति व्यवहाराधीनगृहीतशक्तिकाद् गाच माच इत्यादिशब्दात्।

सन्मात्रविषयक इति। अत्र मात्रपदं कात्स्न्यार्थकं, तेन वस्तुत्वव्यापकविषयताक इत्यर्थः। सङ्केत इत्यत्र सप्तम्यर्थो विषयत्वान्वयि निरूपितत्वम्।

अभ्युपगमादिति। अवश्यं स्वीकरणीयत्वादित्यर्थः, अशक्यापह्नवत्वेनेति भावः।

नन्वपभ्रंशशब्दस्य वाचकत्वाङ्गीकारे का? क्षतिरित्यत आह–

साधुत्वञ्चेति। तच्च=शक्तिभ्रमानधीनशाब्दबोधजनकत्वं, व्याकरणनिष्पादितत्वमिति केचिद्, एवञ्च साधुभिर्भाषितव्यमित्यादिविधिविषयत्वेन यज्ञादौ तत्प्रयोगेऽनिष्टं न स्यात् प्रायश्चित्तविधेश्च वैफल्यं न स्यादिति भावः।

दोषान्तरमाह–

एवमिति। गङ्गाऽऽदिपदानां तीरादिमुख्यार्थकत्वापत्त्या लक्षणामात्रोच्छेदापत्त्या च तस्य स्वीकर्तुमशक्यत्वादिति भावः।

मिश्रमतं दूषयितुमुपन्यस्यति–

यत्त्विति। तादृशेच्छयेति। अस्माच्छब्दादित्याद्याकारकेच्छयेत्यर्थः। एवञ्च यादृशशब्दजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितयदर्थनिष्ठविशेष्यताकेच्छया भगवदुच्चरितत्वं यस्य यस्य

नामपदस्य देवदत्तादिपदपरत्वेऽपि देवदत्त इत्यादिस्वरूपाणां भगवदनुच्चरितत्वात्।

तत्तत्पदस्य तत्तदर्थवाचकत्वं, तेन घटादिशब्दस्य न पटादिवाचकत्वापत्तिर्न वा गाचूशब्दादेर्गमश्नतीति क्विपि निष्पन्नस्य गणपतिप्रापकाद्यर्थस्य वृक्षार्थे तदापत्तिः, उच्चरितत्वञ्च= कण्ठताल्वाद्यभिघातजन्यत्वम्, ईश्वरस्तु सर्गादौ नियोज्यनियोजकशरीरे परिगृह्य लोकानां शब्दसङ्केतज्ञापनार्थं तादृशेच्छया साधुशब्दानेव प्रयुक्तवानिति न्यायसिद्धान्तादिति भावः।

अपभ्रंशादयश्चेति। आदिना लाक्षणिकादिपरिग्रहः।

तज्जातीयत्वेति। यादृशशब्दजन्यबोधविषयत्वप्रकारताकयदर्थनिष्ठविशेष्यताकेच्छया भगवदुच्चरिता यादृशानुर्वीमच्छब्दाः तादृशानुपूर्वीमत्त्वं तज्जीतायत्वं तदेव तदर्थवाचकत्वमिति तु फलितार्थः, तादृशानुपूर्वी चाव्यवहितोत्तरत्वसम्बन्धेन घविशिष्टाकारविशिष्टटविशिष्टाकारत्वादिरूपा घटादिपदनिष्ठा भगवदुच्चरितपद इवास्मदाद्युच्चरितपदेऽप्यस्ति।

नन्वेतादृशानुपूर्व्या अपि पूर्वपूर्ववर्णघटितत्वेनेश्वरोच्चरितानुपूर्व्याअस्मदुच्चरितपदे सत्त्वं न सम्भवतीति चेद्?

न–अव्यवहितोत्तरत्वसम्बन्धेन घत्वावच्छिन्नविशिष्टात्वावच्छिन्नविशिष्टटत्वावच्छिन्नविशिष्टात्वादिरूपायास्तस्या भगवदुच्चरितपद इवास्मदाद्युच्चरितपदेऽपि सत्त्वे बाधकाभावात् तस्याः स्वाश्रयाव्यवहितोत्तरवृत्तिवृत्तित्वसम्बन्धेन घत्वादिविशिष्टात्वादिरूपत्वाद्वा।

ननु तादृशानुपूर्वी चरमवर्ण एवातः पूर्ववर्णे तद्वाचकत्वानुपपत्तिरिति चेद्।

न–तादृशतादृशोत्तरवर्णस्यैव वाचकत्वस्वीकाराद् उत्तरोत्तरवर्णविशिष्टपूर्वपूर्ववर्णत्वस्याप्यानुपूर्वीत्वसत्वाच्चेति।

ननु तथाऽपि तादृशानुपूर्वी एकवर्ण एव सत्त्वेन टशब्दो घटवाचक इतिव्यवहारापत्तिरिति चेद्?

मैवं–वाचकपदार्थताऽवच्छेदकरूपायास्तादृशानुपूर्व्याः पारतन्त्र्येणाभेदेनोद्देश्यताऽवच्छेदके भानोपगमाद्, एवं च शुद्धटत्वे तादृशानुपूर्व्याअभेदबाधान्न तादृशव्यवहारापत्तिः, स्वावच्छिन्नप्रकारताऽवच्छेदकत्वसम्बन्धेन भानोपगमाद्वा, सूक्ष्मदोषाश्च पर्याप्तिनिवेशेनैव वारणीयाइति ध्येयम्।

वेदस्थलाक्षणिकेष्विति। आयुर्घृतम्, आदित्यो यूप इत्यादावायुरादित्यादिपदेष्वित्यर्थः। अतिव्याप्तिरिति। आयुर्जनकादित्यसदृशप्रत्यायनेच्छया तत्तत्पदानां भगवदुच्चरितत्वेन तत्तदर्थे वाचकत्वापत्तेरित्यर्थः।

ननु तादृशेच्छया भगवदुच्चरितत्वमित्यत्रेच्छांशे विषयतया विशेषणताऽऽपन्नप-

दनिष्ठजनकत्वमुपस्थितिरूपव्यापारद्वारावाच्यम्; अन्यथाऽऽकाङ्क्षाज्ञानविधया वाक्यनिष्ठजनकतामादाय सिद्धान्तेऽपि वाक्येऽतिव्याप्त्यापत्तिरेतच्चाग्रे स्फुटीभविष्यति।

एवञ्च तद्घटकीभूतोपस्थितौ शक्यविषयतानिरूपितसम्बन्धविषयत्वाप्रयोज्यत्वनिवेशे लाक्षणिकपदेषु नातिव्याप्तिरिति यदि विभाव्यते? तदाऽप्याह—

सादीति।

सादित्वश्च=तत्तर्थकतत्तत्पदजातीयपदासमानकालीनप्रागभावप्रतियोगित्वम्।

अव्यातेश्चेति। देवदत्तादिपदानां पुत्रादिबोधजननेच्छया पित्रादिनोच्चारणाद् न त्वीश्वरेणेति भावः।

ननु द्वादशेऽहनि पिता नाम कुर्यादिति नामकरणविधायकश्रुतौ नामपदस्य देवदत्तादिसंज्ञापरत्वं वाच्यम्? अन्यथा तेषामलक्ष्यतयैवाव्याप्तिशङ्का न स्यादेवञ्च तेषु कुतो नेश्वरोच्चरितत्वमित्यत आह—द्वादश इत्यादि।

नन्वाधुनिकदेवदत्तादिपदानामिदं पदमिममर्थं बोधयत्वित्याद्याकारकपितृसङ्केतविषयत्वेनेश्वरसङ्केतविषयत्वाभावात् तदुच्चरितत्वानिवेशपक्षेऽप्यव्याप्तितादवस्थ्यमिति?

न च वाक्योच्चारणं प्रति बुबोधयिषाया हेतुत्वेन द्वादशेऽहनीतिवाक्यमिष्टसाधनीभूतद्वादशदिनाधिकरणकपुत्रविषयकबोधजनकत्ववन्नामविषयककृतिमान् पितेति बोधं जनयत्वितीच्छा तात्पर्यरूपा परमेशितुरस्ति; यतः तत्र पुत्रस्येत्यध्याहार्यस्य तद्घटकषष्ठ्या बोधजनकत्वरूपसम्बन्धार्थकत्वेन पुत्रविषयकबोधजनकत्वमर्थो; नामपदं देवदत्तादिसंज्ञापरं तादृशेच्छायां नाम्नि पुत्रविषयकबोधजनकत्वभानाद् देवदत्तादिपदानां वाचकत्वसम्भव इति वाच्यम्?

तथा सति पितृसङ्केतस्य तादृशविषयत्वेन सङ्केतं विनाऽपि पितुस्तादृशनामप्रयोगेणैव कृतकृत्यताऽऽपत्तेः।

एवं यत्र द्वाद्वशाहात् पूर्वमन्येन पुरुषेणेदं पदमेतं पुत्रं बोधयत्विति सङ्केतितः पुत्रस्तत्र द्वादशदिवसेऽपि पित्रा पुत्रबोधजनकं देवदत्तपदमिति शब्दमात्रकरणेऽपि वेदार्थसिद्धौ भगवत्तात्पर्योपपत्तौ च तादृशशब्दस्य वाचकत्वापत्तेः।

न च नामपदं पदजन्यबोधविषयतावत्सङ्केतपरं व्युत्पत्तिवैचित्र्याच्च तदेकदेशे तादृशविषयतायाम् अध्याहार्यपुत्रस्येत्यस्यार्थस्य पुत्रनिष्ठत्वस्यान्वयः कृधातोश्चाश्रयत्वमर्थः, तथा चेष्टसाधनीभूता या पुत्रनिष्ठपदजन्यबोधविषयतावदिच्छाऽऽश्रयता तदाश्रयः पितेति बोधः।

अथ वा—नामपदं पदजन्यबोधविषतावत्पुत्रविषयकेच्छापरम्, एवमीशितुस्तादृशबुबोधयिषया पदजन्यबोधविषयत्वेन पुत्रावगाहनात् सङ्केतरूपेति वाच्यम्?

नामपदस्य देवदत्तादिपदपरत्वेऽपीति ग्रन्थासङ्गतेरिति चेद्?

अत्र केचिद्–नामपदस्येत्यादिग्रन्थस्तु भट्टाचार्येणापातत उक्तः, नामपदन्तु तादृशेच्छापरमेव।

ननु यादृशानुपूर्व्या पदं यादृशरूपेणार्थश्च सङ्केतेनावगाह्यते तादृशानुपूर्व्या तादृशरूपेण च पदपदार्थयोर्वाच्यवाचकभाव एवावश्यकः, उक्तसङ्केते तु पदत्वेन देवदत्तादिशब्दानां पुत्रत्वेन तत्तदर्थानां चावगाहनाद् देवदत्तपदत्वादिना पुत्रनिष्ठतत्तज्जातिरूपेण कुतस्तयोर्वाच्य-वाचकभाव इति चेद्?

न–नामपदस्य नामत्वसामानाधिकरण्योपलक्षितधर्मावच्छिन्नपरत्वात्, पुत्रपदस्य पुत्रत्वादिसामानाधिकरण्योपलक्षितधर्मावच्छिन्नपरत्वाच्च तादृशतादृशरूपेण वाच्यवाचकत्वसि-द्धेरित्याहुः।

वस्तुतस्तु–नामपदम् इच्छाविशिष्टपदत्वसमानाधिकरणधर्मावच्छिन्नपरम्, अध्याहार्यश्च पुत्रस्येति;तत्र पुत्रपदं पुत्रत्वसमानाधिकरणधर्मावच्छिन्नपरं, षष्ठ्यर्थश्च बोधजनकत्वरूपसम्बन्धः तथा चेष्टसाधनीभूता या पुत्रत्वसमानाधिकरणधर्मवद्बोधजनकतावदिच्छावत्पदत्वसमानाधिकरण-धर्मावच्छिन्नविषयिणी कृति : तद्वान् पितेत्यन्वबोधः, इच्छावत्ता च स्वसमानाधिकरणकृतिप्रयोज्यो-च्चारणकत्वस्वसमानाधिकरणपितृत्वनिरूपितपुत्रत्वसमानाधिकरणधर्मावच्छिन्नविषयित्वसम्बन्धावच्छि-न्नप्रकारतानिरूपितबोधत्वावच्छिन्नविषयताकजनकत्वत्वावच्छिन्नविषयताकपदत्वसमाना-धिकरणधर्मावच्छिन्नविशेष्यतावत्त्वोभयसम्बन्धेन, स्वद्वयमिच्छापरम्।

अथ वा–इच्छावत्ता च स्वसमानाधिकरणकृतिजन्योच्चारकत्वस्वावच्छेदकशरीरावच्छिन्न-पितृत्वनिरूपितजन्यतावच्छरीरवत्त्वोभयसम्बन्धेन, स्वद्वयमिच्छापरं, शरीरवत्त्वश्च स्वोत्पत्त्यधि-करणदिनावधिकद्वादशदिनाधिकरणकत्वस्ववृत्तिपृथिवीत्वव्याप्यजात्यवच्छिन्नविषयित्वसम्बन्धा-वच्छिन्नप्रकारत्वं यत् तन्निरूपितबोधत्वावच्छिन्नविषयताकजनकत्वविषयताकतादृशविशेष्य-तावत्त्वोभयसम्बन्धेन, स्वद्वयं शरीरपरम्।

एवश्चेच्छाविशिष्टनाम्नो विधेयत्वेन पितुरपि तादृशसङ्केतआवश्यकः।

एतेन पितृत्वपुत्रत्वयोरननुगतत्वे वाक्यभेदापत्तिः; अनुगतत्वेऽन्यदीयपुत्रस्यान्येन नामकर-णेऽपि न वेदार्थबाध इत्यपि निरस्तम्, भगवतो बुबोधयिषया पुत्रत्वसमानाधिकर-णधर्मावच्छिन्नविषयकबोधजनकत्वस्य तादृशनामत्वसमानाधिकरणधर्मावचिछन्नांऽशेऽवगाहनात् तेषां वाच्यवाचकभावसिद्धिश्चेति द्रष्टव्यम्।

विधिवाक्ये द्वादश इत्यत्रैकादश इति पाठ इति केचित्।

एवमीश्वरसङ्केतस्य शक्तित्व ईश्वरानङ्गीकर्तृमते शाब्दबोधानुपपत्तिः।

अथ शाब्दबोधोपयोगितायामीश्वरीयत्वमनुपादेयमेव।

एवञ्चाधुनिकसङ्केतज्ञानादपि शाब्दबोधस्तादृशसङ्केतस्य वृत्तित्वञ्च निर्वहति।

न चाधुनिकसङ्केतस्य वृत्तित्वे तात्पर्यस्यापि तथात्वप्रसङ्गः; तस्यापि बोधकत्वेन पदविषयकतया सङ्केतरूपत्वाद्। न चेष्टापत्तिः; तथा सति लक्षणास्थलेऽपि तात्पर्यस्य वृत्तितया लक्षणाया वृत्तित्वोच्छेदप्रसङ्गादिति वाच्यम्?

यतः पदार्थोपस्थितिव्यापारकः सङ्केतो वृत्तिः, तात्पर्यज्ञानञ्च साक्षादेव

ईश्वरसङ्केतस्य शक्तित्वे दोषान्तरमाह—एवमिति।

ईश्वरानङ्गीकर्तृमत इति। तन्मते ज्ञाने नित्यत्वस्य कृतौ जगज्जनकत्वस्य वा बाधेन नित्यज्ञानादिमत्त्वरूपेश्वरत्वघटितज्ञानस्येच्छायां नित्यत्वबाधेन वा नित्यसङ्केतज्ञानस्यासम्भवाद् व्युत्पन्नानां शाब्दबोधानुपपत्तिरिति भावः।

नन्वीश्वरसङ्केतस्य शक्तित्वेऽपि शाब्दबोधं प्रति सङ्केतज्ञानत्वेन कारणत्वं वाच्यं न तु तत्रेश्वरीयत्वं प्रवेश्यते गौरवात्प्रयोजनविरहाच्च कुतस्तदनुपपत्तिरित्याशङ्कते?

अथेति।

एतच्च वदतो व्याघातशङ्कामात्रं, तेन पूर्वदोषान्तरसत्वेऽपि न क्षतिः।

शाब्दबोधोपयोगितायामिति। शाब्दबोधकारणताऽवच्छेदककोटावित्यर्थः। एवञ्च=कारणताऽवच्छेदकतयेश्वरीयत्वस्याप्रवेशे चेत्यर्थः।

आधुनिकसङ्केतज्ञानादपीति। तादृशसङ्केतज्ञानस्यार्थविषयकबोधजनकत्वप्रकारताकेच्छीयविशेष्यताप्रकारकपदनिष्ठविशेष्यताशालिनिश्चयत्वरूपकारणताऽवेच्छदकाक्रान्तत्वादिति भावः। वृत्तित्वं= शाब्दबोधौपयिकसम्बन्धत्वम्। निर्वहतीति। तथा च परिभाषात्वेन सङ्केतविभजनमपि नासङ्गतमिति। तात्पर्यस्यापि=तात्पर्यसमुदायस्यापि, तेन शक्तिज्ञानत्वेन कारणत्वपक्षेऽपीश्वरतात्पर्यस्य वृत्तित्वप्रसङ्गेऽपि न क्षतिः, तथा सति=तात्पर्यस्य वृत्तित्वस्वीकारे सति, वृत्तित्वोच्छेदेति। गङ्गायां घोष इत्यादौ गङ्गापदं तीरं बोधयत्वित्याद्याकारकवक्तृतात्पर्यस्य वृत्तिरूपतया तज्ज्ञानोपस्थापितस्य तीरादेः शाब्दबोधनिर्वाहेण किमर्थं लक्षणाया वृत्तित्वं कल्पनीयमिति, तथा च लक्षणोच्छेदरूपानिष्टापत्त्या तदिष्टापत्तेरयोगादिति भावः।

तात्पर्यज्ञानस्य सङ्केतरूपवृत्तिज्ञानरूपत्वेऽपि तस्याव्यवधानेन शाब्दबोधजनकतया पदार्थोपस्थितिद्वारा जनकस्य वृत्तिज्ञानस्य कारणत्वस्याचरितार्थत्वेन स्वतन्त्रकारणत्वमावश्यकमिति समाधत्ते—यत इति। वृत्तिरिति। शाब्दबोधजनक इत्यर्थः। तथा चादौ पदपदार्थयोः सम्बन्धरूपसङ्केतज्ञानं ततस्तज्जन्यपदार्थस्मरणं ततश्च शाब्दबोधः फलम्।

शाब्दबोधोपयोगि, न तु पदार्थोपस्थितिद्वारा, वृत्त्युपस्थापितपदार्थ एव प्रकरणादिना वक्तृतात्पर्यावधारणात्। तथा च लक्षणाया वृत्तित्वानभ्युपगमे गङ्गादिपदात्तीराद्यनुपस्थितौ तत्र तत्पदव्यक्तेस्तात्पर्याग्रहाच्छाब्दबोधानुपपत्तिरिति तस्या वृत्तित्वमावश्यकम्।

न च तात्पर्यग्रहार्थं लक्षणाऽधीनोपस्थितेरपेक्षितत्वेऽपि तदधीनोपस्थितित्वेन शाब्दबोधहेतुत्वे मानाभावात् तस्या वृत्तित्वासिद्धिः। लक्षणास्थले तात्पर्यात्मकसङ्केताधीनोपस्थितित एव शाब्दबोधनिर्वाहादाधुनिकसङ्केतस्थले तात्पर्याधीनोपस्थितेः शाब्दबोधप्रयोजकतायाः क्लृप्तत्वादिति वाच्यम्?

ननु तात्पर्यज्ञानस्य पदार्थोपस्थितिद्वारा कुतो न कारणत्वं, येन लाघवं स्यात्, क्षणविलम्बस्य शपथमात्रनिर्णेतव्यत्वाद्? इत्यत आह– वृत्त्युपस्थापितेति।

एवकारेण सम्बन्धान्तरज्ञानोपस्थापितव्यच्छेदः, एवञ्च तात्पर्यज्ञानात् पूर्वं वृत्तिज्ञानजन्योपस्थितेरावश्यकत्वेन न तद्द्वारा तस्य जनकत्वसम्भव इति भावः।

प्रकरणादनेति। प्रकरणं=भोजनपरिधानादिव्यापारविशेषः, तथा च घटमानयेत्यादौ शक्यघटादिसाहचर्यादिसम्बन्धरूपलक्षणाग्रहात्पटाद्युपस्थितौ घटपदमिदं वक्तुः पटविषयकबोधजनकतयेच्छाविषयतावत् पटानयननिर्वाह्यपरिधानोद्देश्यकप्रवृत्तिप्रयोज्योच्चारणकत्वादित्याद्यनुमानादिनेत्यर्थः, आदिना मुख्यार्थबाधपरिग्रहः।

ननु सङ्केतलक्षणाऽन्यतरसम्बन्धज्ञानाधीनोपस्थितपदार्थविषयकतात्पर्यज्ञानस्य शाब्दबोधहेतुत्वे विशिष्टबुध्द्यात्मकतात्पर्यज्ञानस्य सम्पादकतया विशेषणस्य पदार्थस्य लक्षणाऽधीनोपस्थितेरपेक्षणेऽपि शाब्दबोधं प्रति लक्षणाऽधीनोपस्थितित्वेन कारणत्वाकल्पनात्, लक्षणायाः शाब्दबोधजनकोपस्थितिप्रयोजकत्वरूपवृत्तित्वं न सम्भवति, सम्पद्यते च तात्पर्यज्ञानानन्तरं तद्रूपसङ्केतग्रहाधीनोपस्थितितः शाब्दबोध इत्याशङ्कते?

न चेत्यादि।

ननु तात्पर्यज्ञानाधीनोपस्थितितः शाब्दबोधस्य क्वचिदप्यनुदयेनानुभवविरोधात् कुतस्तत्कल्पनम्? इत्यत आह–

आधुनिकेति। सर्वानुभवसिद्धत्वादिति।

तात्पर्यज्ञानाव्यवहितोत्तरशाब्दबोधजननस्य सर्वानुभवविषयत्वेन गङ्गायां घोष इत्यादौ

लक्षणाऽधीनपदार्थोपस्थितिसत्त्वे मुख्यार्थबाधादिना तत्तदर्थे तत्तत्पदव्यक्ते स्तात्पर्यग्रहउपस्थित्यन्तरमन्तरेणैव तत्तदर्थानुभवस्य सर्वानुभवसिद्धत्वाद्। आधुनिकसङ्केतस्थले पूर्वसङ्केतकर्तृपुरुषवाक्यतोऽर्थविशेषे डित्थादिपदस्य सङ्केतग्रहात्तत्तत्पदेनार्थविशेषोपस्थितौ प्रकरणादिना तत्तत्पदव्यक्तेस्तत्र तात्पर्यग्रहे सति शाब्दबोधस्य वृत्त्यन्तराधीनोपस्थितिमन्तरेणैवोत्पत्त्या आधुनिकसङ्केतस्य वृत्तित्वमिति चेद्?

एवमपि सङ्केतस्य सम्बन्धत्वे मानाभावेन निष्प्रतियोगिकतया तदसम्भवेन च पदार्थोपस्थापकत्वासम्भवेन वृत्तित्वानिर्वाहाद्।

एतेन शाब्दबोधौपयिकसम्बन्धत्वेनेश्वरसङ्केतज्ञानं हेतुः, तच्च मीमांसकानामपि सम्भवति तादृशज्ञानविरोधिविपरीतज्ञानाभावादित्यपि निरस्तम्।

यत्तु—स्वजन्यज्ञानविषयत्वप्रकारकेच्छाविशेष्यत्वमर्थे पदसम्बन्धः; पदे चार्थस्य

तात्पर्यज्ञानानन्तरं तीराद्युपस्थितिं प्रकल्प्य शाब्दबोधकल्पने सर्वानुभवविरोधः स्याद्, यत्र न सर्वानुभवविरोधस्तत्र क्षणविलम्बस्य स्वीकारे न दोषः, लाघवमपि साधकं तत्रैव, तथा च तदुपपत्त्यर्थं लक्षणाया वृत्तित्वमावश्यकमिति भावः।

ननु तात्पर्यस्यावृत्तित्व आधुनिकसङ्केतस्य कथं वृत्तित्वम्? इत्यतआह—

आधुनिकेति। वाक्यत इति।

"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृग" इति वाक्याद्, "यूस्त्र्याख्यौ नदी"-त्यादिवाक्याच्चेत्यर्थः। अर्थविशेषे=काष्ठमयहस्त्यादौ।

ननु शाब्दबोधकारणतायामीश्वरीयत्वानुपादान ईश्वरानङ्गीकर्त्तृमते सङ्केतकर्त्तृपुरुषवाक्यतो डित्थादिपदानां सङ्केतग्रहात् शाब्दबोधो जायतां; गवादिपदानां वेदस्थापरपदानाञ्च सङ्केतकर्त्तृपुरुषाभावात् तेभ्यः कुतः शाब्दबोध इति चेद्?

न—पूर्वाचार्यकपिलकमलासनादीनां तत्तत्सङ्केतकर्त्तृणां वाक्यतस्तेषां सङ्केतग्रहेण वा तेभ्यः शाब्दबोधजननादिति हृदयम्।

एवमपीति। शाब्दबोधोपयोगितायामीश्वरीयत्वानुपादानेन ईश्वरानङ्गीकर्त्तृमते शाब्दबोधसम्भवेऽपीत्यर्थः।

ननु शाब्दबोधस्य पूर्वोक्तकादाचित्कत्वान्यथाऽनुपपत्त्या क्लृप्तस्य तस्य तत्प्रयोजकसम्बन्धत्वकल्पनमावश्यकं तस्यातिरिक्तत्वकल्पने धर्मिकल्पनातो हि वरं धर्मकल्पनेत्यादि-

विपरीतः। अस्य सम्बन्धत्वमन्यथाऽनुपपत्त्या कल्प्यते। एतादृशपरम्पराया अपभ्रंशादिस्थले सम्बन्धत्वं न स्वीक्रियत इति तत्र तत्सम्बन्धावगाहिज्ञानं भ्रम एवेति।

तदपि तुच्छम्–अक्लृप्तस्य तादृशेच्छाविषयत्वस्य सम्बन्धतोपगमे तादृशज्ञा-

---

न्यायेन गौरवमापद्यते, ज्ञानादेश्च तथात्वेऽतिप्रसङ्गः स्यादतो लाघवज्ञानादिसहकृततादृशान्यथा-ऽनुपपत्तिरेव तस्य सम्बन्धत्वकल्पने मानम्? इत्यत आह–

निष्प्रतियोगिकतयेति।

तथा च सम्बन्धत्वकल्पने सम्बन्धत्वाभावव्याप्यतया निष्प्रतियोगिकत्वज्ञानमेव बाधकमिति भावः।

निष्प्रतियोगिकत्वं=प्रतियोगित्वनिरूपकत्वाभावः, प्रतियोगित्वश्चानुभवसिद्धः स्वरूप-सम्बन्धविशेषः, घटादाविव सङ्केतेऽपि सप्रतियोगिकत्वं नानुभवसिद्धमिति। एतेनेति। सङ्केतस्य सम्बन्धत्वाभावेनेत्यर्थः। अस्य च निरस्तमित्यनेनान्वयः। तच्चेति। शाब्दबोधौपयिकसम्बन्धत्वेन ज्ञानश्चेत्यर्थः। मीमांसकानामिति। न्यायमते धर्मिणीश्वरसङ्केते, तन्मते पदपदार्थयोरतिरिक्तसम्बन्धे, तथा च धर्मिणि विवादेऽपि तादृशधर्मे विवादाभावेन तन्मतसाधारण्यादित्याशयः। तत्र बाधकाभावरूपहेतुमाह,–तादृशज्ञानेति। शाब्दबोधौपयिकसम्बन्धत्वज्ञानेत्यर्थः। स्वजन्येति। स्वं परिचायकं, तथा च जन्यत्वनिष्ठविषयताकबोधनिष्ठविषयताकविषयत्वनिष्ठप्रकारतानिरू-पितेश्वरेच्छीयविशेष्यत्वं पदप्रतियोगिकोऽर्थानुयोगिकः सम्बन्धः।

विपरीत इति। स्वनिष्ठेच्छीयविशेष्यतानिरूपितविषयत्वनिष्ठप्रकारताकबोधनिष्ठप्रकारता-कजन्यत्वनिष्ठप्रकारताकनिरूपितत्वसम्बन्धावच्छिन्नप्रकारत्वम्, अथवा स्वविषयकबोधजनकत्व-प्रकारताकेच्छाविशेष्यत्वं सम्बन्धः; अर्थप्रतियोगिकः पदानुयोगिक इत्यर्थः।

अन्यथाऽनुपपत्त्या=शाब्दबोधान्यथाऽनुपपत्त्या।

न स्वीक्रियत इति। अपभ्रंशादिस्थल ईश्वरच्छीयतादृशविषयतायाः सत्त्वेऽपि तस्याः संसर्गत्वं नाङ्गीक्रियते कल्पकाभावादित्यर्थः।

भ्रम एवेति। अन्यनिष्ठतादृशविषयतायाः संसर्गतया भानादिति भावः।

तादृशज्ञानविषयत्वेति। स्वजन्यबोधीयविषयत्वप्रकारताकज्ञानीयविशेष्यत्वेत्यर्थः, तादृशज्ञानविषयत्वसंसर्गत्वस्य कथञ्चिदिष्टापत्तौ समानकालीनविषयत्वस्य विभिन्नकालीन-पदपदार्थयोः संसर्गत्वासम्भवादाह–आदीति। आदिना स्ववृत्त्यभावकालीनविषयत्वादेः परिग्रहः।

एतेन पूर्वस्मिन् लाघवरूपविनिगमनासत्त्वेऽपि न क्षतिः।

नविषयत्वस्वसमानकालीनविषयत्वादिपरम्पराया अपि विनिगमनाविरहेण सम्बन्धताप्रसङ्गात्। तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव वाच्यवाचकभाव इति वदन्ति।

यस्तु ज्ञाने पदानां शक्तिः; न त्वर्थे। तथा च तज्ज्ञानशक्तत्वं तद्वाचकत्वं, तच्च तद्विषयकशाब्दधीजनकताऽवच्छेदकधर्मवत्त्वम्। स च धर्मो वह्न्यादिनिष्ठदाहानुकूलशक्तिरिव पदार्थान्तरमेव। लाक्षणिकश्च नानुभावकमेवेति न तत्र शक्तिः। घटादिपदस्य मितिमातृविषयकधीजनकत्वेऽपि न तद्वाचकत्वं, तद्विषयकत्वावच्छिन्नज्ञानशक्तपदस्यैव तद्वाचकत्वाद्। मितिमातृविषयकत्वेन च ज्ञानस्य न किञ्चित्पदशक्यता;

यद्यपि तादृशविषयत्वमवाचकेऽप्यस्ति तथाऽपि तन्निष्ठविषयताया अपभ्रंशनिष्ठाया इव संसर्गत्वास्वीकारान्नातिप्रसङ्ग इति।

मतान्तरमुत्थापयति–यस्त्विति। ज्ञाने=अर्थज्ञाने, अर्थविषयकशाब्दबोध इति तु यावत्, सप्तम्यर्थोऽनुकूलत्वं तस्य च शक्तावन्वयः। न त्वर्थइति। न त्वर्थानुकूलेत्यर्थः।

ननु तद्विषयकज्ञानानुकूलशक्तिमत्त्वं यदि तद्वाचकत्वं, तदा चक्षुरादेरपि घटादिवाचकत्वापत्तिः? अत आह–तच्चेति।–तद्विषयकेति। तद्विषयकत्वशाब्दत्वोभयधर्मावच्छिन्नजन्यतानिरूपितजनकताऽवच्छेदकधर्मवत्त्वमर्थः।

एवञ्च पटविषययकसमूहालम्बनघटविषयकशाब्दनुकूलशक्तिमादाय न घटादिपदानां पटादिवाचकत्वापत्तिः। वह्न्यादिनिष्ठदाहानुकूलेति। तैः सर्वत्रैव कारणे कार्यानुकूला सामर्थ्यरूपशक्तिः पदार्थान्तरं स्वीक्रियमाणाऽपि वह्न्यादौ प्रसिद्धतया दृष्टान्ततयोक्ता, कार्यकारणभावश्च दाहादिकं प्रति तत्तदनुकूलशक्तिमत्त्वेन, तत्र कार्यताऽवच्छेदकं दाहत्वादिकं कारणताऽवच्छेदकञ्च तत्तच्छक्तिरेव, तत्तत्कार्यानुकूलत्वञ्च परिचायकं बोध्यम्।

ननु गङ्गायां घोषं इत्यादौ गङ्गाऽऽदिपदानां तीरादिप्रतिपादकतया तत्र तीरादिबोधाद्यनुकूलशक्तेरावश्यकत्वेन तीरादिवाचकत्वापत्तिः? अतआह–लाक्षणिकश्चेति। नानुभावकमेवेति। गङ्गाऽऽदिपदं न तीराद्यनुभवजनकमेवेत्यर्थः, अपि तु तत्स्मारकमेवेति, एतच्चाग्रे स्फुटीभविष्यति। मितिमातृविषयकेति। तन्मते ज्ञानमात्र एव मितिमातारौ भासेते, मितिर्ज्ञानं, माता चात्मा, तथा च घटोऽस्तीत्यादिवाक्याद् अस्तितावान् घटः; अस्तित्वेन घटमहं जानामीत्याकारकं समूहालम्बनरूपं ज्ञानं जायते, तत्र मितेः प्रकारतयाऽऽत्मनो विशेष्यतया भानमिति। तद्विषयकत्वावच्छिन्नेति। तद्विषयकत्वावच्छिन्नजन्यतानिरूपितजनकताऽवच्छेदकशक्तिमत्पदस्यैवेत्यर्थः। तद्वाचकत्वादिति। तद्वाचकत्वेन विवक्षितत्वादित्यर्थः।

ननु घटादिपदजन्यज्ञानस्य मितिमातृनियतविषयकत्वेन तादृशजन्यताया मितिमातृविषय-

ज्ञानसामान्यसामग्र्या एव मितिमातृभासकतया पदान्तरस्य च तदर्थभासकतया तद्विषयकत्वस्य तत्पदजन्यताऽवच्छेदकत्वे मानाभावात्।

कार्यान्वितस्वार्थे पदानां शक्तिरिति वादिनां गुरूणां साक्षात्परम्परासाधारणकार्यत्वविषयतानिरूपितत्वेन घटादिविषयताया घटादिपदजन्यताऽवच्छेदकत्वेऽपि न घटादिपदस्य कार्यतावाचकत्वम्; अपि तु लिङादिपदस्यैव। तद्विषयकत्वावच्छिन्नेत्यत्र साक्षात्परम्परासाधारणनिरूपितत्वांशेऽविशेषणतयाऽवच्छेदकत्वस्यैव निवेशाद्।

कत्वावच्छिन्नत्वं न कुतः? अन्यथा घटादिविषयकत्वावच्छिन्नत्वमपि माऽस्त्वित्यत आह—ज्ञानसामान्येति। ज्ञानमात्र एव तद्भानाद्व्यभिचारादिदोषेण विशेषसामग्र्यायास्तद्भानप्रयोजकत्वाकल्पनादिति भावः। पदान्तरस्य=पटादिपदान्तरस्य, तदर्थभासकतया=मितिमातृभानप्रयोजकव्याप्यतया, एतेन घटादिपदस्य मितिमातृज्ञानजनकत्वे पटादिपदान्तर्भावेण व्यभिचारः स्यात् प्रकारान्तरेण व्यभिचारवारणे महागौरवं स्यादिति सूचितम्।

गुरुमतमुपन्यस्यति—कार्यान्वितेति। तेषामयामाशयः—गामानय गां बधानेत्यादिवृद्धव्यवहारप्रयोजकवाक्यानि सर्वाणि प्रवर्त्तकत्वेन लिङादिपदघटितानि ततश्च तद्व्यवहारदर्शिनः शिशवोऽपि कार्यविषयकगवाद्यर्थबोधं प्रत्येव गवादिपदानां सामर्थ्यवधारयन्तः तस्मादुत्तरमपि कार्यान्वितगवादौ शक्तिज्ञानेनैव तादृशगवादिकं प्रतिपद्यन्तइति। साक्षात्परम्परासाधारणेति। तन्मते सर्वत्रैव शाब्दबोधे कार्यत्वभानोपपत्तये कार्यत्वविषयतानिरूपितघटाद्यर्थनिष्ठविषयताशालिशाब्दत्वावच्छिन्नं प्रति ज्ञायमानघटादिपदत्वेन कारणत्वमिति भावः। घटमानयेत्यादावानयनादिनिष्ठविषयतायां कार्यत्वविषयतायाः साक्षान्निरूपितत्वेन साक्षादिति, घटादिविषयतायां कार्यत्वविषतायाः परम्परानिरूपितत्वेन परम्परेति। निरूपितत्वेनेति। अत्र तृतीयाऽर्थोघटादिविषयताऽन्वितवैशिष्ट्यं, तथा च कार्यताविषयतानिरूपितत्वस्य घटादिविषयताविशेषणस्य घटादिपदजन्यताऽवच्छेदकत्वावच्छेदकत्वेन तदवच्छेदकत्वं कार्यत्वविषयताया आवश्यकम्, एवञ्च तद्विषयत्वनिष्ठावच्छेदकताकशाब्दबोधनिष्ठजन्यताकजनकत्वं तद्वाचकत्वमिति सामान्यलक्षणे सति घटादिपदानां कार्यतावाचकत्वापत्तिरिति भावः।

कार्यत्वविषयतानिष्ठावच्छेदकतावारणाय—साक्षादिति, कार्यत्वत्वविषयतानिष्ठावच्छेदकतावारणाय—परम्परेति केचित्।

अपि तु लिङादिपदस्यैवेति। आदिना लोट्तव्यादिपरिग्रहः। लिङादिपदस्य तु कार्यतानिष्ठविषयताशालिशाब्दं प्रति हेतुतया तादृशविषयतानिष्ठावच्छेदकतायां तादृशावच्छेदकताभिन्नत्वस्य निरूपकत्वनिष्ठावच्छेदकत्वानिरूपकत्वस्य च सत्त्वान्नाव्याप्तिरिति।

निरूपितत्वांशेऽविशेषणतयेति। तथा च निरूपितत्वनिष्ठावच्छेदकत्वानिरूपकत्वं

तल्लक्षणघटकतन्निष्ठावच्छेदकतायां विशेषणीयमिति।

न चैवं घटादिविषयतानिष्ठावच्छेदकतायामपि कार्यताविषयतानिष्ठावच्छेदकता-निरूपकत्वसत्वाद् घटादिपदानां घटादिवाचकत्वानुपपत्तिरिति वाच्यम्?

विशेष्यनिष्ठावच्छेदकत्वादौ विशेषणनिष्ठावच्छेदकत्वादिनिरूपितत्वस्यैव स्वीकाराद्, न तु तन्निरूपकत्वस्य; विशेषणनिष्ठावच्छेदकत्वादौ तु विशेष्यनिष्ठावच्छेदकत्वादिनिरूपकत्वस्यैव।

न च विनिगमनाविरहेणोभयोः परस्परं निरूप्यनिरूपकभाव आवश्यक इति वाच्यम्?

तत्स्वीकारे प्रकारताऽवच्छेदकत्वादेर्निरवच्छिन्नत्वस्य दुर्वचत्वापत्तेः, तस्य दुर्वचत्वे तु भूतलं न दण्डिमदित्यादिबुद्धिं प्रति भूतलं दण्डिमदित्यादिनिर्णयानां दण्डत्वनिष्ठनिरवच्छिन्ना-वच्छेदकताकप्रकारताकत्वादिनैव प्रतिबन्धकत्वेन तदनुपपत्तेः, अन्यथा भूतलं दण्डत्वजातिम-द्वदित्यादिनिश्चयानामपि प्रतिबन्धकत्वापत्तेः, विशेष्यत्वानवच्छिन्नत्वस्य निरवच्छिन्नत्वत्वञ्चेत्? कारणताऽवच्छेदकत्वादौ स्वत एव तत्सत्त्वेनावच्छिन्नावच्छेदकत्वस्य निरवच्छिन्नत्वापत्तेरित्यलं विस्तरेण।

यदि च लाघवाद् निरूपितत्वसम्बन्धेन कार्यताविषयताविशिष्टघटत्वावच्छिन्नविषयताशा-लिशाब्दत्वावच्छिन्नं प्रति घटादिपदत्वेन कारणत्वं कल्प्यते? तदा निरूपितत्वसम्बन्धनिष्ठ-सांसर्गिकावच्छेदकतानिरूपितावच्छेदकत्वानिरूपिका या तद्विषयत्वनिष्ठाऽवच्छेदकता; तन्निरूपितशाब्दत्वावच्छिन्नजन्यताकजनकत्वं तद्वाचकत्वमिति।

न चात्र यथा कार्यत्वविषयतानिरूपितघटादिनिष्ठविषयताशालिशाब्दत्वेन कार्यत्वं; तथा विनिगमनाविरहेण घटनिष्ठविषयतानिरूपितकार्यतानिष्ठविषयताशालिशाब्दत्वेन कार्यत्वं निर्वक्तुं शक्यते; एवञ्च कार्यत्वविषयतानिष्ठावच्छेदकताया निरूपकत्वनिष्ठावच्छेदकत्वानिरूप-कत्वेन घटादिपदानां कार्यतावाचकत्वापत्तिर्दुर्वारेति वाच्यम्?

विषयतात्वावच्छिन्नावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपित-कार्यताविषयतात्वावच्छिन्नावच्छेदकताभिन्नत्वे सति निरूपितत्वनिष्ठावच्छेदत्वानिरूपिका या यन्निष्ठविषयतात्वावच्छिन्नावच्छेदकता तन्निरूपितशाब्दत्वावच्छिन्नजन्यताकजनकत्वं तद्वाचक-त्वमिति विवक्षणे; घटविषयतानिरूपितकार्यतानिष्ठविषयताशालिशाब्दत्वावच्छिन्ना यां जन्यता तन्निरूपितकार्यताविषयतानिष्ठावच्छेदकतायां तादृशभेदासत्त्वात्; तद्दोषविरहात्, पशुपदादीनाञ्च लाङ्गूलत्वावच्छिन्नावच्छेदकताकविषयताशालिशाब्दं प्रति हेतुत्वेन न तत्र पशुत्वादिवा-चकत्वापत्तिः।

नव्यास्तु–घटादिपदानां कार्यतावाचकताऽऽपत्तिरूपविनिगमनासत्त्वेन घटादिपदानां घटविषयतानिरूपितकार्यताविषयतावत्त्वेन कार्यताकल्पनायोगान्न तदापत्तिरित्याहुः।

न च कार्यानुकूलशक्तेः स्वरूपसत्या एव कार्यानुकूलतया पदार्थोपस्थितौ शाब्दबोधे च ज्ञातोपयोगिनोऽर्थे पदस्य वृत्तिरूपशक्त्यन्तरस्य स्वीकार आवश्यक इति वाच्यम्?

दाहादिकार्ये वह्न्यादिनिष्ठशक्तेःस्वरूपसत्या एवोपयोगित्वेऽपि शाब्दबोधानुकूलशक्तेः शाब्दबोधे पदार्थोपस्थितौ च ज्ञातोपयोगित्वोपगमे बाधकाभावाद्। अतीतानागतपदज्ञानादपि शाब्दबोधोत्पत्त्या पदानामहेतुत्वेन तत्र हेतुताऽवच्छेदकशक्त्यसम्भव इति तु न शङ्क्यम्, तन्मते पदानां नित्यत्वाद्।

अस्तु वा तज्ज्ञानशक्त्या तस्य वाचकत्वमिति मीमांसकमतविशेषः।

परे तु—कार्यताविषयताऽन्तःपातिविषयतानिरूपितत्वातिरिक्तनिरूपितत्वानवच्छिन्नत्वमधिकं जन्यताऽवच्छेदकतायां निवेशनीयं; नातो घटविषयतानिष्ठावच्छेदकताकनिरूपितत्वनिष्ठावच्छेदकताककार्यतात्वावच्छिन्नविषयतानिष्ठावच्छेदकताकजन्यतानिरूपितजनकत्वमादाय घटादिपदानां कार्यतावाचकत्वापत्तिः, एवं पदार्थताऽवच्छेदकविषयताऽन्तःपातिविषयतानिरूपितजन्यतानिरूपितत्वातिरिक्तनिरूपितत्वानवच्छिन्नत्वं देयं; तेन घटपश्वादिपदनिरूपितजन्यतानिरूपितघटपश्वादिविषयतानिष्ठावच्छेदकतायां घटत्वलाङ्गूलादिविषयतानिष्ठावच्छेदकतानिरूपितत्वनिष्ठावच्छेदकताकत्वेन तत्तद्वाचकत्वानुपपत्तिरिति वदन्ति।

स्वरूपसत्या इति। ज्ञानविषयतानापन्नाया इत्यर्थः। ज्ञातोपयागिनः=ज्ञानानुकूलस्य। ज्ञातोपयोगित्वइति। शक्तिप्रकारकज्ञानविषयतावत्पदत्वेन स्वाश्रयत्वस्वप्रकारकज्ञानविषयत्वोभयसम्बन्धेन; अन्तिममात्रसम्बन्धेन वा शक्तिमत्त्वेन पदानां कारणत्वमिति भावः।

बाधकेति। फलानुरोधेन कल्पितस्य दृष्टान्तवैषम्यमपि न क्षतिकरमिति भावः। नित्यत्वादिति। तथा च पदानां सर्वदैव सत्त्वेन न व्यभिचारः; तन्मते पदानां नित्यत्वेऽपि कण्ठताल्वाद्यभिघातव्यङ्ग्यत्वेन न सदा प्रत्यक्षमिति।

अथ तादृशाभिघातानां व्यञ्जकत्वञ्च न प्रत्यक्षप्रतिबन्धकापसारकत्वं तत्प्रतिबन्धकस्य निर्वक्तुमशक्यत्वाद्, नापि तत्प्रत्यक्षे सहकारिकारणत्वं शब्दश्रोतृषु तदभिघातविरहात् तन्नाशेऽपि शब्दश्रवणदर्शनाच्च? इत्यादिदोषेण तन्न बहवो मेनिरे।

अतस्तदनङ्गीकर्तृमीमांसकमतविशेषमाह—अस्तु वेति। तज्ज्ञानशक्त्येति। तत्तदर्थविषयकशाब्दं प्रति तदनुकूलशक्तिप्रकारकपदविशेष्यकज्ञानत्वेन हेतुत्वं बोध्यं, प्रकारता चात्र स्वाश्रयविषयत्वसम्बन्धावच्छिन्ना।

एतन्मते घटादिवाचकत्वं हि घदादिशाब्दबोधजनकताऽवच्छेदकीभूतशक्तिप्रकारतानिरूप-

न चासौ विचारसहः। यतस्तन्मते लाक्षणिकस्याननुभावकत्वं दुर्घटम्। पदार्थोपस्थितिद्वारा शक्यार्थानुभवे शक्तस्येव लक्ष्यार्थबोधे लाक्षणिकस्यापि हेतुताया दुर्वारत्वात् तत्रापि शक्तेरावश्यकतया वाचकताऽऽपत्तेःपदार्थोपस्थित्याऽन्यथासिद्धत्वे शक्तस्यापि तथात्वापाताद्।

कज्ञानीयविशेष्यतावत्पदत्वं न तु तादृशशक्तिमज्ज्ञानविषयत्वं; येन समूहालम्बनज्ञानमादायोसीनेऽतिव्याप्तिः स्यात्, तन्निवेशे चोदासीने तादृशज्ञानीयविशेष्यत्वाभावान्न तदापत्तिः,

अथ वा—यद्विषयकशाब्दानुकूलशक्तिमत्त्वं यादृशानुपूर्व्यवच्छिन्नविशेष्यताकत्वव्यापकं तादृशानुपूर्वीमत्त्वं, यादृशानुपूर्व्यवच्छिन्नविशेष्यताकत्वव्यापकत्वनिवेशाद् न समूहालम्बनज्ञानमादायोदासीनेऽतिव्याप्तिः।

ननु कादिशब्दघटितबकादिशब्दानां ज्ञाने प्रजापत्यादिशाब्दबोधानुकूलशक्तिसत्त्वेन प्रजापत्यादिवाचकत्वापत्तिर्दुर्वारैवेति यदि विभाव्यते?

तदा तादृशशक्तौ यादृशानुपूर्वीघटकविशिष्टान्तररूपावच्छिन्नविशेष्यताकत्वाव्याप- कत्वमपि निवेशनीयम्; एवञ्च प्रजापत्यादिबोधानुकूलशक्तौ बकत्वरूपानुपूर्वीघटकविशिष्टान्तरं यत् कत्वादिरूपं तद्रूपावच्छिन्नविशेष्यकत्वाव्यापकत्वविरहाद्, यत्रैकमेव रूपं वाचकताऽवच्छेदकं तत्रान्त्यं विशेषणं न देयम्, अवच्छेदकभेदे लक्षणस्य भिन्नत्वात्, पूर्वोक्तस्यानुमगमेनैव वारणीयं वा,

यत्तु—तादृशक्तिमज्ज्ञाने शक्तिविशिष्टशक्तिमदन्यत्वं निवेशनीयं, शक्तिवैशिष्ट्यञ्च—स्वसामानाधिकरण्यस्वभिन्नत्वस्वव्यापकत्वैतत्त्रितयसम्बन्धेन, सर्वत्र स्वं शक्तिरेव, तत्र ज्ञानान्तरनिष्ठशक्तिवैशिष्ट्यस्य शक्तिमात्रे सत्त्वादसम्भवः शक्तिमात्रे स्वात्मकशक्तिवैशिष्ट्यस्य सत्त्वात्तद्दोषश्च स्यादतः प्रथमद्वितीयसम्बन्धौ; घटादिपदज्ञानस्य तद्घटकवासुदेवादिवाचककाकारादिपदविषयकतयाऽव्याप्तिः स्याद्; अतस्तृतीयसम्बन्धस्य प्रवेशः; घटपटादिपदविषयकसमूहालम्बनज्ञानस्य शक्तिविशिष्टशक्तिमत्त्वान्न पटादिपदस्य घटादिवाचकत्वापत्तिरिति;

तदसद्—घटादिविषयकशाब्दबोधानुकूलशक्तेर्घटकलसादिपदज्ञानसाधारणतयोक्तत्रितयसम्बन्धेन पितामहादिविषयकशाब्दनुकूलकलसादिपदघटककाकारादिपदज्ञाननिष्ठशक्तिवैशिष्ट्येनाव्याप्तेर्दुर्वारत्वाद् ज्ञानभेदेन शक्तेर्भेदस्वीकरे तत्तदनुकूलशक्तित्वस्याखण्डस्यावश्यकतया गौरवापत्तेरतिव्याप्तितादवस्थ्याच्चेति।

तन्मतं दूषयितुमारभते—न चासाविति। विचारसह इति। विचारसिद्धइत्यर्थः। तत्रापीति। लाक्षणिकगङ्गाऽऽदिपदेऽपीत्यर्थः। पदार्थोपस्थित्येति। शाब्दबोधात् पूर्वं पदार्थोपस्थितेरावश्यकत्वेन चरितार्थतया तज्जनकजनकतया शाब्दं प्रति पदज्ञानमन्यथासिद्धमिति भावः। वांक्यार्थेति।

न चानुभावकताऽवच्छेदकशक्त्यभावाल्लाक्षणिकस्य नानुभावकत्वसम्भवः तर्हि वाक्यार्थघटकार्थान्तरवाचकमेव पदं स्वार्थस्येव तदन्वयप्रतियोगी लक्ष्यार्थस्याप्यनुभावकमुपेयत इति वाच्यम्?

एवं सति गङ्गायां घोष इत्यादौ घोषादिपदस्यापि गङ्गातीरादिरूपार्थानुभावकताऽवच्छेकशक्तिमत्त्वेन तद्वाचकत्वापत्तेः; लाक्षणिकस्याननुभावकत्वे शक्तपदाघटितधूमादित्यादिहेतुवाक्यादन्वयानुपपत्तेश्च, तत्र धूमादिपदस्य ज्ञाने विभक्तेश्च ज्ञाप्यत्वे लाक्षणिकत्वाद्।

अथ लक्ष्यार्थस्य न शाब्दबोधे प्रवेशः; अपि तु स्मृतस्य तस्य समभिव्याहृतपदार्थैरसंसर्गाग्रहमात्रं, तथा च नानुपपत्तिः।

न च लक्ष्यार्थस्य शाब्दबोधविषयत्वानुपगमे तदुपरागेण शृणोमीत्यनुव्यवसायानुपपत्तिरिति वाच्यम्?

वाक्यार्थघटकीभूतं यदर्थान्तरं तद्वाचकं घोषादिपदमित्यर्थः। स्वार्थस्येवेति। तथा च तीरान्वितघोषविषयकशाब्दं प्रति वृत्तिज्ञानजन्यतीरोपस्थितिसहकारेण ज्ञायमानघोषपदत्वेन तज्ज्ञानत्वेन वा कारणत्वं कल्पनीयमिति भावः। तद्वाचकत्वापत्तेरिति। तीरान्वितघोषवाचकत्वापत्तेरित्यर्थः।

ननु पदान्तरजन्योपस्थित्यप्रयोज्यतदर्थनिष्ठविषयताशालिशाब्दजनकताऽवच्छेदकशक्तिमत्त्वं तद्वाचकत्वं वक्तव्यं; तथा च तीरनिष्ठविषयताया गङ्गाऽऽदिपदान्तरजन्योपस्थितिप्रयोज्यतया न तद्वाचकत्वापत्तिः? इत्यत आह–लाक्षणिकस्येति। ज्ञायमानलिङ्गस्य करणत्वमते पञ्चम्या वा ज्ञानजन्यज्ञानविषयत्वार्थकत्वे धूमपदस्य लक्षणाऽनावश्यकीत्यत आह–आदीति। आदिना गुणिपरशुक्लादित्यादिहेतुवाक्यपरिग्रहः। ज्ञाप्यत्वे लाक्षणिकत्वादिति। पञ्चम्या जन्यत्वेऽवधित्वेऽवधिमत्त्वे वा, शक्ततया गुरूणि तत्र लक्षणैवेति भावः। प्रवेश इत्यस्य विषयत्वमर्थः, तथा च लक्ष्यार्थस्य शाब्दबोध एव न जायते कुतो गङ्गाऽऽदिपदानां तीरादिवाचकत्वापत्तिरिति भावः।

ननु लक्षणार्थस्य यदि शाब्दबोधो न भवति तदा शुक्लं घटमानयेत्यादिवाक्यात् कथं शुक्लघटानयनादौ प्रवृत्तिः? इत्यह आह–स्मृतस्येति। समभिव्याहृतेति। घटघोषादावित्यर्थः। असंसर्गाग्रहमात्रं=बाधनिश्चयाभावमात्रं, मात्रपदेन घटतीरादिविषयतायां शुक्लादिविषयतानिरूपितत्वव्यवच्छेदः, तथा च तत्तत्पदार्थस्मृतिबाधनिश्चयाभावादिसहकृतस्येतरांशविशिष्टबोधस्यैव स्वातन्त्र्येण प्रवृत्त्यादिहेतुत्वाद्, उत्तरकालमानसतादृशविशिष्टबोधेनैव वा तत्र तत्र प्रवृत्त्यादिर्जायत इति भावः।

इष्टत्वाद्, विधेयोपरागेणैव तथा प्रत्ययात् लक्ष्यार्थस्य शाब्दबोधविषयत्वेऽपि तस्य विधेयतया भानानभ्युपगमाद् "विधौ न परः शब्दार्थ" इति सिद्धान्तादिति चेद्?

न–मञ्चाः क्रोशन्तीत्यादौ लक्ष्यार्थमञ्चस्थपुरुषादेः शाब्दबोधविषयताया आवश्यकत्वाद्। अन्यथा पूर्वाननुभूतस्य पुरुषादेः प्रतीत्यनिर्वाहाद्; अननुभूतस्य स्मरणासम्भवात् समानप्रकारकत्वमात्रेण शाब्दबोधपदार्थोपस्थित्यादेः कार्यकारणभावमभ्युपगच्छतां मीमांसकानां शाब्दबोधे योग्यताबलादपूर्वपदार्थस्य भानेन लक्ष्यार्थस्य शाब्दानुपगमेऽपूर्वस्यापि तस्य प्रतीत्युपपत्तिरिति तद्विषयकशाब्दत्वावच्छिन्नं प्रति शक्तिविशेषपुरस्कारेण तद्वाचकपदस्य तज्ज्ञानस्य वा न हेतुतासम्भवः, विशिष्य तत्तत्पदार्थान्वितत्तदर्थबोधे तत्तत्पदसाकाङ्क्षतत्तत्पदज्ञानत्वेनावश्यक्लृप्तकारणतयैवोपपत्तावीदृशकार्यकारणभावस्य निर्युक्तिकत्वाद्।

ननूक्तरीत्या भवतु तत्र तत्र प्रवृत्तिः; किन्तु गङ्गायां घोष इत्यादिवाक्यश्रवणानन्तरं तीरादिकं शाब्दयामीत्याद्यनुव्यवसायो जायते स चानुपपन्नः? इत्याशङ्कते–न चेति। उत्तरयति–इष्टत्वदिति। इष्टापत्तौ युक्तिमाह–विधेय इत्यादि। उपरागेण=प्रकारत्वेन, तथा च विधेयताऽऽत्मप्रकारत्वेनेति। यावद्, लक्ष्यार्थस्य विधेयत्वेनाभाने जैमिनिसूत्रं प्रमाणमाह–"विधौ ने"ति। अत्र भावसाधितेन विधिशब्देन विधेयित्वं बोध्यते, सम्यर्थो निरूपकत्वं, परः=शक्यभिन्नः; लक्ष्यार्थ इति यावत् तथा च लक्ष्यार्थो न विधेयितानिरूपकः न विधेयो भवतीति तु यावद्। अन्यथेति। लक्ष्यार्थस्य शाब्दबोधाविषयत्व इत्यर्थः। प्रतीत्यनिर्वाहादिति। लक्ष्यार्थस्य सामान्यप्रतीतेस्तु भवताऽपि स्वीकारादिति,

ननु तस्य स्मरणात्मकप्रतीतिरेव कुतो न भवेदिति? अत आह, अननुभूतस्येति।

ननु मञ्चस्थपुरुषस्य पूर्वाननुभूतत्वेन स्मरणासम्भवे शाब्दबोधस्वीकारे तत्र तस्य कुतो भानं वृत्त्यनुपस्थितत्वादिति। अतस्तस्य शाब्दबोधे भानं तन्मते सम्पादयति–समानप्रकारकत्वेति। तथा च तद्धर्मप्रकारकशाब्दं प्रति वृत्तिज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेन कारणत्वं कल्प्यते; न तत्र धर्मिविषयताप्रवेश इति, योग्यतावशात्=तदन्वयीतरपदार्थसम्बन्धाबाधवशात्। अपूर्वस्यापि=पूर्वाननुभूतस्यापि। तस्येति। मञ्चस्थपुरुषादेरित्यर्थः। प्रतीत्युपपत्तिरिति। तथा च लाक्षणिकगङ्गाऽऽदिपदस्य वाचकत्वापत्तेर्दुर्वारत्वमिति भावः। शाब्दबोधं प्रति ज्ञायमानपदस्य तज्ज्ञानस्रू वा स्वातन्त्र्येण कारणताखण्डनेन पदानां तज्ज्ञानानां सामर्थ्यरूपां शक्तिं निरासयति –तद्विषयकेति। निर्युक्तिकत्वादिति। अयं भावः–निराकाङ्क्षपदजन्यशाब्दबोधानुत्पत्त्या तद्वारणायसाकाङ्क्षपदसमूहरूपज्ञानत्वेन साक्षात्कारणत्वं तन्मतेऽप्यावश्यकम्, एवञ्च वृत्तिज्ञानजन्योपस्थितेरेव

इदन्तु तत्त्वं—तीरादौ गङ्गाऽऽदिपदजन्यबोधविषयत्वसत्त्वेऽपि तदंशे शुद्धबोधविषयत्वत्वादिनैव तादृशविषयत्वादिप्रकारकत्वमीश्वरेच्छायामुपगम्यते; न तु गङ्गाऽऽदिपदजन्यबोधविषयत्वत्वादिनाऽपि तत्प्रकारकत्वं मानाभावात्, तदनभ्युपगमेऽपि तस्याः सर्वविषयकत्वव्याघाताभावाद्।

न च तथा सति बोधांशे गङ्गापदजन्यत्वानवगाहितया सर्वविषयकत्वानुपपत्तिरिति वाच्यम्?

तीरादिनिष्ठविशेष्यतानिरूपितप्रकारताऽवच्छेदकघटकतया तदनवगाहित्वेऽपि बोधांशे स्वातन्त्र्येण तदवगाहित्वोपगमात्। तथा च तत्पदजन्यबोधविषयतात्वावच्छिन्न-

---

तत्सहकारिकारणत्वेनोपपत्तौ शक्तिमत्पदज्ञानत्वेन कारणत्वान्तरं न कल्पनीयं प्रयोजनविरहादिति कुतस्तदनुकूला शक्तिः पदे तज्ज्ञाने वेति, एवञ्च सङ्केतोऽपीदं पदमेतदर्थबोधकोपस्थितिं जनयत्वित्याकारकः, अयमर्थ एतच्छब्दजन्योपस्थितेर्बोद्धव्य इत्याकारको वा बोध्य इति।

ईश्वरसङ्केतस्य शक्तित्वपक्ष आपन्नामपभ्रंशशब्दानां वाचकतां गङ्गाऽऽदिपदानां लक्ष्यतीरादिवाचकताञ्च परिहरति—इदन्त्विति। तीरादाविति। आदिना गोसदृशवृक्षादिपरिग्रहः। गङ्गाऽऽदिपदेति। आदिना गोशब्दगाच्शब्दादिपरिग्रहः। शुद्धबोधविषयतात्वादिनेति। तथा च तीरं बोधविषयतावद्भवत्वित्याद्याकार एवेश्वरेच्छायाः स्वीक्रियत इति भावः। तत्प्रकारकत्वं= गङ्गाऽऽदिपदजन्यबोधविषयत्वप्रकारतानिरूपकत्वम्, अस्य चोपगम्यत इत्यनेनान्वयः। मानाभावदिति। तस्यातीन्द्रियत्वेन प्रत्यक्षस्याग्राहकत्वात् तादृशशब्दस्य चासत्त्वात् प्रत्युतानिष्टापत्तिभिया तत्कल्पनासम्भवाच्चेति भावः, तेन चेश्वरेच्छाया नित्यैकतया विनिगमनाविरहेण च सर्वविषयकत्वमवश्यमङ्गीकार्यमिति न्यायसिद्धान्तोऽपि न व्याहन्यत इत्याह—तदनभ्युमगम इति। तथा सतीति। शुद्धबोधविषयतात्वादिनेश्वरेच्छायां तादृशविषयत्वावगाहनमात्रस्वीकारे सति। स्वातन्त्र्येणेति। विशेषणताऽनवच्छेदकतयेत्यर्थः। तदवगाहित्व इति गङ्गाऽऽदिपदजन्यत्व इत्यर्थः। तथा च बोधो गङ्गाऽऽदिपदजन्यो भवत्वित्याकारोऽपीश्वरेच्छायाः स्वीक्रियत इति भावः, तथा च शक्यशक्तस्थलमात्र एव तादृशविशिष्टविषयतात्वेनावगाहनस्वीकारे च।

ननु तादृशसम्बन्धेनेश्वरेच्छायाः शक्यतात्वे घटपदशक्यत्वं घटे न तु पट इत्यादिव्यवहारानुपपत्तिः, वृत्त्यनियामकतादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः सम्बन्धान्तरावच्छितादृशशक्यत्वाभावस्य तु घटेऽपि सत्त्वेन; घटे न घटपदशक्यत्वमित्यादिव्यवहारापत्तिरिति? अत आह—इच्छानिरूपितेत्यादि। नातिप्रसङ्ग इति। पटादौ घटादिपदशक्यत्वप्रसङ्गो नेत्यर्थः।

प्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छावत्त्वस्येश्वरेच्छानिरूपिततादृशविशेष्यतावत्त्वस्य वा तत्पदशक्यतारूपतया नातिप्रसङ्गः। उक्तरीत्यैव च घटादिपदजन्यबोधविषयस्य घटान्वितकर्मत्वान्वितानयनादेर्घटादिसंसर्गस्य च तादृशबोधविषयत्वप्रकारकेश्वरेच्छाविषयत्वेऽपि घटादिपदावाच्यत्वमुपपादनीयम्।

नन्वेतावता माऽस्तु गङ्गाऽऽदिपदानां तीरादिवाचकत्वापत्तिः; किन्तु घटमानयेत्यादिवाक्यजन्यबोधस्यापि घटादिपदजन्यता कर्मत्वाद्यंशे घटादिपदजन्यबोधविषयत्वेनेश्वरेच्छाया अवगाहनाद्, घटादिपदानां कर्मत्वादिवाचकत्वापत्तिर्दुर्वारैवेति? अत आह—उक्तरीत्यैव चेति। कर्मत्वाद्यंशे शुद्धविषयत्वादिना तादृशेच्छीयप्रकारत्वस्योगमेन; न तु घटपदजन्यबोधीयविषयतात्वेनेत्यर्थः।

ननु तीराद्यंशे बोधविषयतात्वेन बोधाद्यंशे च गङ्गाऽऽदिपदजन्यतात्वेनेश्वरेच्छाया नानाविषयकत्वकल्पनापेक्षया पदपदार्थयोरतिरिक्तसम्बन्धकल्पने लाघवं, तथा च मीमांसका एव विजयेरन्निति चेद्?

न—तीराद्यंशे गङ्गाऽऽदिपदजन्यबोधविषयतात्वेन तदिच्छीयविषयत्वकल्पने बोधाद्यंशे विशेष्यत्वप्रकारताऽवच्छेदकताऽऽत्मकविषयताद्वयप्रसक्त्या महागौरवाद्, मीमांसकमतापेक्षयेश्वरस्येच्छायास्तद्विषयत्वादेश्च कल्पनन्तु युक्त्यन्तरेणैव न त्वेतदनुरोधेनेति।

अथ तथाऽपि विनिगमनाविहरेण तत्तत्पदजन्यबोधविषयतात्वेनेश्वरेच्छीयविषयतावदीश्वरज्ञानीयतादृशविषयता तत्तत्पदशक्यत्वमस्तु।

न च भगवद्विद्वेषिमीमांसकानामपि शाब्दबोधोत्पत्तिनिर्वाहाय शाब्दबोधकारणताऽवच्छेदककोटावीश्वरीयत्वमनुपादायाधुनिकसङ्केतज्ञानसाधारणकारणत्वस्यावश्यकत्वेन तादृशज्ञानस्य शक्यत्वत्वे तदनुपपत्तिरितिवाच्यम्?

आधुनिकतादृशज्ञानस्यापि शाब्दबोधोपयागित्वस्वीकरे क्षतिविरहाद् आधुनिकसङ्केतस्य परिभाषात्ववदाधुनिकतादृशज्ञानस्य परिभाषात्वाङ्गीकाराच्चेति चेद्?

न—आधुनिकतादृशज्ञानस्य परिभाषात्वस्वीकारे गवादिवाचकपदानां नदीवृद्ध्यादिपदानाञ्च सर्वपुरुषान्तर्भावेण पारिभाषिकत्वापत्तेः; भ्रमतादृशज्ञानमादायान्यार्थेऽपि पारिभाषिकत्वापत्तेश्चेति।

नन्वेवमपि वेदस्थलाक्षणिकायुःपदादेरायुर्जनकादिवाचकत्वापत्तिर्दुर्वारा; आयुःपदादेरायुर्जनकबोधकत्वेन भगवतो बुबोधयिषयाऽवगाहनादिति चेद्?

अन्विताभिधानवादिनस्तु—पदार्थसंसर्गस्यापि वाच्यतां स्वीकुर्वन्ति। तन्मत इतरान्वितघटो घटपदशक्य इत्येतादृशमेव शक्तिज्ञानं शाब्दबोधप्रयोजकं घटो घटपदवाच्य इत्याकारकस्यान्वयांशानन्तर्भावेण शक्तिग्रहस्य तथात्वे च वृत्तिग्रहाविषयतया पदार्थसंसर्गस्य शाब्दबोधविषयताऽनुपपत्तेः।

न चेतरान्वितघटस्य वाक्यप्रतिपाद्यतया शाब्दबोधात् प्राक् शक्तिग्रह एव दुर्घटोऽनुपस्थितत्वादिति वाच्यम्?

विशेषतः पदार्थान्तरघटितस्य तदन्वितघटादिरूपवाक्यार्थस्य प्रागनुपस्थि-

---

न—आयुःपदमिदमायुर्जनकं बोधयत्वित्याकारकभगवदिच्छयाऽऽयुःपदादेरिदन्त्वेनावगाहनेन शक्यताघटकपदनिष्ठविषयताया इदन्त्वानवच्छिन्नत्वेन विशेषणाद्, वाचकगवादिपदशक्यताघटकविषयता तु गकारोत्तरौकारादिरूपानुपूर्व्यवच्छिन्नैवातो नासम्भवः,

अथ वा—भगवद्बुबोधयिषयाऽऽयुर्जनकत्वत्वावच्छिन्नविषयताकत्वेन बोधस्यावगाहनस्यावगमाद्, न तु बोधजनकविषयकत्वेनेत्यास्तां विस्तरः।

वृत्त्युपस्थापिता एव पदार्थाः शाब्दबोधे भासन्त इति नियमेन सम्बन्धांशेऽपि वाच्यतां स्वीकुर्वतां भट्टानां मतं दूषयितुमुपन्यस्यति—अन्विताभिधानेत्यादि। एतन्मत इतरान्वितघटादिविषयकशाब्दबोधानुकूलशक्तिमत्तया घटादिपदानामितरान्वितघटादिवाचकत्वम्; इतरान्वितघटादीनामपि घटादिपदनिष्ठशक्तिनिरूपितजन्यताऽवच्छेदकविषयतावत्त्वेन तद्वाच्यत्वम्, कार्यकारणभावश्च—इतरत्वोपलक्षितनिष्ठविषयतानिरूपितान्वयनिष्ठविषयतानिरूपितघटत्वावच्छिन्नविषयताकशाब्दं प्रत्यनुकूलशक्तिमत्त्वेन चेति।

ननु शक्तिज्ञानं यद्यन्वयांशं नावगाहते तदा तस्य कुत उपस्थितिः शाब्दबोधे प्रवेशश्चेत्यतोऽन्वयांशं शक्तिज्ञानेऽन्तर्भावयन् ज्ञानाकारं दर्शयति—इतरान्वितेति। इतरान्वयविशिष्टेत्यर्थः, तथा च वैशिष्ट्यमर्यादया तादृशज्ञानस्यापरान्वयांशेऽपि पदनिष्ठशक्तिनिरूपितजन्यताऽवच्छेदकशाब्दबोधीयसांसर्गिकविषयतारूपशक्यत्वावगाहनमिति

नन्वितरपदेनात्र घट इत्यादिवाक्यार्थघटकैतद्देशवृत्तित्वादिकं वाच्यं; तथा च तादृशेतरान्वितघटादेर्वाक्यादेव प्रतिपत्तिरिन्द्रियाद्यसन्निकृष्टत्वादेवश्च कुत इतरान्वितघटादेः शाब्दबोधात् पूर्वं ग्रहः; अग्रहे च कुतस्तादृशशक्तिग्रहः; धर्मिग्रहाभावाद्? इत्याशङ्कते—न चेत्यादि। दुर्घट इति। असम्भवीत्यर्थः। एतद्देशवृत्तित्वान्वितघटादेः प्रागनुभवासम्भवेऽपि किञ्चित्पदार्थान्वितघटादेर्वृद्धव्यवहारादितः प्रागनुभूतत्वेनेतरत्वादिसामान्यधर्मेणेतरान्वितघटादेर्मनसैव सुग्रहसम्भवादिति समाधत्ते—विशेषत इत्यादि।

तावपीतरपदार्थत्वादिना सामान्यधर्मप्रकारेण तदघटितस्य तदन्वितघटादेःप्रागुपस्थितिसम्भवेन तत्र शक्तिग्रहस्य सुघटत्वात्।

वस्तुतस्तु–पदार्थान्तरमनन्तर्भाव्य केवलान्वयांशान्तर्भावेण शक्तिग्रहस्य शाब्दधीप्रयोजकतोपेयते, पदार्थान्तरस्य पदान्तरलभ्यतया तदंशान्तर्भावेण शक्तिग्रहस्यानुपयुक्तत्वाद्।

न चान्वयस्य पदवाच्यत्वे तदंशे शक्तिग्रहस्य शाब्दबोधोपयोगित्वे च मानाभाव इति वाच्यम्?

तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिहेतुतायाः सामान्यत एव क्लृप्ततया वृत्तिज्ञानादन्वयानुपस्थितौ तस्य शाब्दबोधविषयत्वासम्भवाद्। अन्वयांशे

इतरपदार्थस्य पदान्तरलभ्यतया तदन्तर्भावेण शक्तिकल्पने प्रयोजनविरहो गौरवश्चेत्यतस्तदंशं परित्यजन्नाह–वस्तुतस्त्विति। केवलान्वयांशेति। तथा चान्वितघटो घटपदशक्य इत्याद्याकारकशक्तिज्ञानमेव घटादिपदमन्वित घटादिबोधशक्तमित्याद्याकारकं वा ज्ञानं हेतुरिति।

ननु तादृज्ज्ञानेऽन्वयस्य सम्बन्धस्य केन रूपेण भानं? सम्बन्धत्वेन; संयोगत्वसमवायत्वादिविशेषधर्मेण वा, तत्र नाद्यः–सम्बन्धत्वस्याभावात्; संयोगादेः शक्तिज्ञाने संयोगाद्यन्यतमत्वरूपसम्बन्धत्वेन भानोपगमे वा तेनैव प्रकारेण तज्जन्योपस्थित्या तेनैव रूपेण शाब्दबोधे भानापत्तेः संयोगत्वादिना भानानुपपत्तेश्च, नाप्यन्त्यः–घटवद्भूतलं पचति चैत्र इत्यादौ सर्वत्र संयोगत्वानुकूलत्वत्वादिधर्मेण सम्बन्धानां शाब्दबोधात् प्रागुपस्थित्यसम्भवतादवस्थ्यादिति चेद्?

न–घटवद्गृहे गां नयेत्यादिवृद्धव्यवहारतः संयुक्तघटादावनुकूलकृत्यादौ च शक्तिग्रहोदयेन पश्चादपि तथैवोपस्थितिसम्भवाद्।

नन्वेवमपि संयोगत्वादिभेदेन घटादिपदानामपि शक्त्यानन्त्यप्रसङ्ग इति चेद्?

मैवं–बुद्धिस्थताऽवच्छेदकत्वोपलक्षणवत् संसर्गताऽवच्छेदकत्वोपलक्षणेन तेषामनुगमाद्।

अन्वयांशे शक्तेः तादृशशक्तिग्रहे शाब्दबोधकारणत्वस्य चावगमे युक्तिं प्रदर्शयितुं शङ्कते–न चेति। तद्विषयकेति। शरेण संयुनक्ति पटसमवेतो रक्त इत्यादितः वृत्त्या संयोगादेरनुपस्थितिकाले शाब्दबोधवारणाय संयोगादिविषयकशाब्दं प्रति वृत्तिज्ञानजन्यसंयोगादिविषयकोपस्थितित्वेनापि हेतुत्वं वाच्यमिति भावः।

ननु भट्टमते सामान्यलक्षणाविरहेण वृत्तिज्ञानजन्योपस्थितौ पूर्वानुभूता व्यक्तिरेव भासते; शाब्दबोधे त्वपूर्वव्यक्तिरेवातो नोक्तकार्यकारणभावकल्पनसम्भव इति चेत्?

शक्तिग्रहस्य शाब्दबोधेऽवश्यापेक्षणीयत्वात्। संसर्गताभिन्नविषयतायास्तादृशोपस्थितिजन्यताऽवच्छेदकत्वे गौरवात्।

अत्र वदन्ति–सामान्यतस्तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतदुपस्थितित्वेन न हेतुता स्वतन्त्रवृत्तिज्ञानाद्विशृङ्खलभावेनैकपदोपस्थितयोः पदार्थतत्त्वावच्छेदकयोर्विशेष्यविशेषणभावक्रमेण शाब्दबोधापत्तेः; किन्तु तद्धर्मप्रकारेण तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतद्धर्मावच्छिन्नतद्विषयकोपस्थितित्वेनैव हेतुता वाच्या।

सामान्यतो विषयतासम्बन्धेन तत्तत्पुरुषीयशाब्दबोधं प्रति विषयत्वस्वप्रकाराश्रयत्वान्यतरसम्बन्धेन तत्तत्पुरुषीयवृत्तिज्ञानजन्योपस्थितित्वेन कार्यत्वं कारणत्वञ्च कल्पनीयमित्यत्रैवोक्तग्रन्थतात्पर्याद् गोत्वघटत्वादौ व्यभिचारवारकं प्रथमदलं; सम्बन्धे स्वीयप्रकाराश्रयत्वनिवेशादपूर्वव्यक्तिसङ्ग्रहः।

न चैवमपि विषयतासम्बन्धेन कार्यकारणभावकल्पने पुरुषभेदेन तस्यानन्त्यापत्तिरतः समवायप्रत्यासत्त्या तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मप्रकारकोपस्थितित्वेन तत्कल्पनुमुचितमिति वाच्यम्?

एतन्मतेऽपि धर्मधर्मिभेदेन कार्यकारणभावभेदाद् महागौरवापत्तेः।

एतेनानन्तधर्मव्यक्तिभेदेनानन्तकार्यकारणभावापत्त्या गोत्वादिप्रकारकशाब्दबोधे गोत्वादिप्रकारकोपस्थितेर्हेतुत्वापेक्षयाऽतीव गौरवभिया यथाश्रुतन्तु न सम्यगित्यपि निरस्तम्।

स्वतन्त्रेति। पशुपदं लोम्नि शक्तं लाङ्गूलवति च शक्तमिति धेनुपदं धानकर्मत्वे शक्तं गवि च शक्तमित्यादि पृथक्शक्तिज्ञानादित्यर्थः, विशृङ्खलभावेन=विशेष्यविशेषणभावानापन्नत्वेन, विशेष्येति। पदार्थताऽवच्छेदकप्रकारताकपदार्थनिष्ठविशेष्यताकत्वेनेत्यर्थः; वाक्यार्थमर्यादयेति भावः, तथा च तादृशोपस्थितिकालं विशिष्टबोधस्य कैरप्यस्वीकारेणेष्टापत्तेरयोग इति।

ननु पार्थ एवेत्यादावेवशब्दात् खण्डश उपस्थितानामितरसम्बन्धाभावादीनां कथं विशिष्टबोध इति चेद्?

न–अगत्या तत्र तत्र तादृशबोधस्येष्टत्वाद्, एवादिपदानां वा पार्थान्ययोगव्यवच्छेदार्थकत्वमत एतस्योक्तत्वादिति। तद्विषयकेति। एतच्चापातत उक्तं न तु कार्यकारणभावे प्रविष्टमिति ध्येयम्।

ननु दण्डमानयेत्यादित आधेयत्वादौ निरूपितत्वसम्बन्धेन दण्डप्रकारकबोधो जायते; स च न सम्भवति तत्र दण्डादिप्रकारकोपस्थितिविरहाद्।

एवञ्च तत्संसर्गकबोधस्य किञ्चिद्धर्मप्रकारेण तद्विषयकत्वाभावाद् वृत्तिज्ञाना-त्तदनुपस्थितावपि तत्संसर्गकशाब्दबोधः सम्भवत्येव।

न च तादृशकार्यकारणभावस्य विशिष्य वक्तव्यतया तत्राकल्पनेन न तदनुपपत्तिरिति वाच्यम्?

यो दण्डी पुरुषस्तमानयेत्यादौ दण्डादेः पृथगुपस्थितिकाले तच्छब्देन दण्डप्रकारेण पुरुषस्य शाब्दबोधवारणाय दण्डप्रकारकशाब्दं प्रति दण्डप्रकारकोपस्थितित्वेन कारणत्वस्यावश्य-कतया दण्डी पुरुषइत्यादितः शाब्दबोधानुपपत्तेर्दुर्वारत्वादिति चेद्?

न–एतद्दोषेणैव वस्तुतस्त्वित्यादिकल्पस्य वक्ष्यमाणत्वाद्।

अथ वा–तत्र पृथगुपस्थितयोरपि दण्डपुरुषयोः शाब्दस्येष्टत्वात्तदकल्पनादिति।

तत्संसर्गकबोधस्येति। तथा च संसर्गे संसर्गताऽवच्छेदके च प्रकारताऽऽख्यविषयत्वं न स्वीक्रियते; अपि तु विशेषणताऽऽत्मकविषयतेति भावः।

केचित्तु–तन्मते संसर्गस्य स्वरूपो भानेन न तादृशकार्यकारणभावाक्रान्ततेत्याहुः,

तच्चिन्त्यं–संयोगादेः स्वरूपतो भानस्यानुभवविरुद्धत्वादुक्तरीत्या परीहारसम्भवाद्, भूतलं द्रव्यवदित्यादिभूतलावच्छेद्यत्वावगाहिप्रतीतेर्भ्रमत्वापाताच्च, यावन्तः संयोगाः सन्ति तेषां प्रत्येकं संयोगव्यक्त्या निखिलभूतले सर्वस्यैव द्रव्यस्यैव बाधादिति।

ननूक्तदोषवारणार्थं विशेषरूपेण तादृशकार्यकारणभाव आवश्यकश्चेदस्तु; तथाऽपि सामान्यतो विषयतासम्बन्धेन शाब्दबोधं प्रति विषयतासम्बन्धेन वृत्तिज्ञानजन्योपस्थितित्वेन शाब्दबोधं प्रति विषयतासम्बन्धेन वृत्तिज्ञानजन्योपस्थितित्वेन हेतुत्वस्यान्वयव्यतिरेकसिद्धस्य सत्त्वेन संसर्गांशेऽपि वृत्तिरावश्यकी, एवकारादाविव तत्र तत्र पृथगुपस्थितयोरपि तयोर्विशेषणविशेष्यभावेन शाब्दबोधे भानन्त्वाकाङ्क्षाज्ञाननियम्यं विशेषकार्यकारणभावेनैव वा वारणीयमिति वा यदि कथ्यते? तदाऽप्याह–[1]वस्तुतस्त्विति।

एतत्पाठस्य[2]पूर्वं क्रोडपत्रम्।

---

१. क्रोडपत्रानन्तरमारप्स्यमानमूलस्य प्रतीकग्रहणमेतद्।

२. स्वाभिमतक्रम एव टीकाकृता स्वाक्षरैरसूचि,
एतत्पाठस्येत्यादिना, एतच्छब्देन ''वस्तुतस्त्व''त्यादिना

क्रोडपत्रम्

एवं तद्विषयकशाब्दबोधे तच्छक्तपदज्ञानजन्यतदुपस्थितितल्लाक्षणिकपदज्ञानजन्यतदुपस्थित्योर्द्वयोरेव हेतुतया तयोः परस्परजन्यबोधे व्यभिचारस्य वारणाय तत्तत्कारणानन्तर्यस्य तत्तत्कारणजन्यताऽवच्छेदकप्रवेशध्रौव्येण पदार्थद्वयसंसर्गावगाहिबोधे-वृत्तिज्ञानजन्यतदुपस्थितेर्व्यभिचाराप्रसक्त्याऽन्वयस्य पदवाच्यत्वमप्रामाणिकम्[1]।

न च शक्तिलक्षणयोर्वृत्तित्वेनानुगमसम्भवात्तदुभयविषयकज्ञानजन्योपस्थित्योरेकरूपेणैव हेतुतया नोक्तव्यभिचारप्रसक्तिरिति वाच्यम्?

उभयसाधारणवृत्तित्वस्यानुगतस्य दुर्वचत्वात्।[2]

यत्तु—शक्तिविषयकज्ञानजन्यतदुपस्थितित्वेनैव शक्तिलक्षणाऽधीनपदार्थोपस्थित्योरनुगमसम्भवः; घटशक्तं घटपदमित्येतादृशशक्तिज्ञानजन्योपस्थितेरिव घटसम्बन्धिशक्तं पटपदमित्यादिलक्षणाज्ञानजन्योपस्थितेरपि घटादिसम्बन्धिपटादिनिरूपितशक्तिविषयकज्ञानजन्यत्वादिति नोक्तव्यभिचारप्रसक्तिः।

न च घटशक्तं घटपदमित्यादिज्ञानजन्यघटाद्युपस्थितौ यत्रोद्बोधकान्तरात्पटा-

अथ क्रोडपत्रस्य टीका

व्यभिचाराप्रसक्त्येति। शरेण संयुनक्तीत्यादितः संयोगादिविषयकशाब्दस्य संयोगांशे शक्तिग्रहाधीनोपस्थित्यव्यवहितोत्तरत्वरूपकार्यताऽवच्छेदकाक्रान्तस्य पूर्वं संयोगांशे शक्तिज्ञानसत्त्वाद् दण्डवानित्यादितः संयोगादिविषयकशाब्दे शक्तिज्ञानस्य लक्षणाग्रहस्य वाऽव्यवहितोत्तरत्वविरहेण तत्पूर्वं तादृशज्ञानजन्योपस्थित्यसत्त्वेऽपि न व्यभिचारसम्भव इति भावः।

यत्त्विति—अनुगमसम्भव इति। तथा च तत्तदर्थविषयकशाब्दं प्रति शक्तिविषयकज्ञानजन्यतदर्थविषयकोपस्थितित्वेनोभयसाधारणैककारणत्वं कल्प्यमिति भावः। उद्बोधकान्तरादिति।

---

१. एतच्चिह्नान्तर्गतः पाठः प्राचीनपुस्तकेषु नोपलभ्यते।

२. अनयोरनतर्गतः पाठस्तु टीकाकृता पौनरुक्त्या नानुमन्यत इति क्रोडपत्रटीकासमाप्तिलेखात्सुव्यक्तम्।

दिभानं तादृशपटादिविषयकोपस्थितेरपि पटादिशाब्दबोधजनकत्वापत्तिरिति तद्विषयकशाब्दबोधे तदर्थविशेषितशक्तिविशिष्टपदविषयकज्ञानजन्यतदुपस्थितित्वेन हेतुता वाच्या; तथा च न तेन रूपेण घटसम्बन्धिशक्तं पटपदमित्यादिज्ञानजन्यघटाद्युपस्थितेः संग्रह इत्युक्तव्यभिचार एवेति वाच्यम्?

शक्तिविषयत्वावच्छिन्नकारणताप्रतियोगिकतद्विषयत्वावच्छिन्नकार्यताशालित्वेनोपस्थितस्तच्छाब्दबोधहेतुतया दर्शितोद्बोधकान्तरप्रयोज्यपटादिविषयताकोपस्थितेर्निरुक्तकार्यताशालित्वविरहेणोक्तातिप्रसङ्गानवकाशात्, तदर्थविशेषितशक्तिविषयतापर्यन्तस्योपस्थितिनिष्ठकारणताऽवच्छेदकेऽनिवेशादनुगमसम्भवा-दुक्तलक्षणाज्ञानहेतुतायामपि शक्तिविषयताया अवच्छेदकत्वेन प्रवेशादिति।

तन्न समीचीनम्--उक्तानुगतरूपेण पदार्थोपस्थितेर्हेतुत्वे घटकालीना या शक्तिस्तद्वत् पटपदमित्यादिज्ञानजन्यघटाद्युपस्थितितोऽपि घटादिशाब्दबोधप्रसङ्गात्, तत्कालीनशक्तिरूपपरम्परासम्बन्धविषयताऽन्तःपातिन्याः शक्तिविषयताया अपि तादृशसम्बन्धविषयताप्रयोज्यघटादिविषयताप्रयोजकत्वात्, तादृशशक्तिविषयकधियश्च घटादिनिरूपितत्वेन तत्सम्बन्धिनिरूपितत्वोपरागेण च पदे शक्त्यनवगाहितया शाब्दबोधप्रयोजकतच्छक्तपदज्ञानतल्लाक्षणिकपदज्ञानानात्मकतया तज्जन्योपस्थितेः शाब्दबोधजनकत्वोपगमासम्भवाद्।

न च यत्किञ्चिन्निरूपितत्वोपरक्तशक्तिविषयताप्रयोज्यतत्तदर्थविषयताकोपस्थितित्वेन शाब्दधीजनकत्वोपगमान्नायमतिप्रसङ्गः; उक्तज्ञानीयशक्तिविषयतायाः किञ्चिन्निरूपितत्वविषयतानिरूपितत्वविरहादिति वाच्यम्?

साहचर्यादिरूपसम्बन्धज्ञानादित्यर्थः। तदर्थविशेषितेति। निरूपितत्वसम्बधेन विषयत्वसम्बन्धेन वा तदर्थविशिष्टशक्तिमत्पदविशिष्टज्ञानजन्येत्यर्थः, तादृशपदवैशिष्ट्यश्च विषयित्वसम्बन्धेन।

एतच्चान्यथाख्यात्यनङ्गीकारमतेन; तेनान्यमतसिद्धशक्तिभ्रजन्योपस्थितेरसङ्ग्रहेऽपि न क्षतिः।

तादृशशक्तीति। घटकालीनशक्तिमत्पटपदादिविषयकधिय इत्यर्थः। घटादिनिरूपितत्वेनेत्यस्य शक्त्यनवगाहितयेत्यत्र योजना। तत्सम्बन्धीति। घटादिसम्बन्धित्वोपलक्षितो यस्तन्निरूपितत्वेनेत्यर्थः। यत्किञ्चिन्निरूपितत्वोपरक्तेति। यत्किञ्चिन्निरूपतत्वनिष्ठविषयतानिरूपितशक्तिनिष्ठविषयतानिष्ठावच्छेदकताकजनकताकजन्यताऽवच्छेदकीभूततदर्थनिष्ठविषयताशाल्युपस्थितित्वेन तदर्थविषयकशाब्दनिरूपितजनकत्वाङ्गीकारादित्यर्थः।

एवमपि घटकालीना या पटनिरूपिता शक्तिस्तद्वत्पटपदमिति ज्ञानप्रयोज्यघटाद्युपस्थितेरव्यावृत्तेः।

अथ किञ्चिन्निरूपितत्वविषयतानिरूपितत्वेन शक्तिविषयता यादृशकारणताऽवच्छेदिका तादृशकारणताप्रतियोगिकप्रकृतार्थविषयत्वावच्छिन्नकार्यताशालित्वेन पदार्थोपस्थितेर्हेतुत्वोपगमान्नायमतिप्रसङ्गः; शक्त्यंश उदासीनस्य पटनिरूपितत्वादेर्भानेऽपि घटकालीनशक्तिरूपघटीयपरम्परासम्बन्धविषयकपदज्ञानस्य घटादिस्मारकतया तत्स्मृतिजनकताऽवच्छेदककोटौ पटादिनिरूपितत्वविषयतानिरूपितत्वस्य शक्तिविषयकत्वेऽनिवेशादिति चेद्?

एवमपि यत्र ज्ञाने घटादेः शक्तत्वसम्बन्धेन पदांशे प्रकारता तज्जन्योपस्थितितोऽपि घटादेःशाब्दबोधोत्पत्त्या तदनुपपत्तिदुर्वारैव, तत्र पदांशेऽर्थसंसर्गतया भासमानशक्तावर्थस्य निरूपितत्वरूपसम्बन्धान्तराभानाद्।

वस्तुतो घटत्वाद्युपलक्षितवाचकाद् द्रव्यादिपदाच्छक्त्याऽभ्रान्तस्य घटत्वादि-

---

निरूपितत्वविरहादितीति। घटकालीनशक्तिमत्पटपदमित्यादिज्ञानीयविषयतायां कालीनत्वविषयतानिरूपितत्वस्यैव सत्त्वादिति भावः।

ननु किञ्चिन्निरूपितत्वविषयतानिष्ठावच्छेदकताकशक्तिविषयतानिष्ठावच्छेदकताकज्ञानत्वावच्छिन्नजनकताका यदर्थनिष्ठविषयत्वावच्छिन्नोपस्थितिनिष्ठजन्यता तदर्थविषयकशाब्दं प्रति तादृशजन्यताशाल्युपस्थितित्वेन कारणत्वस्य कल्पनाद् नोक्तदोषः? घटकालीना या पटनिरूपिता शक्तिस्तद्वत्पटपदमिति ज्ञाने पदे घटस्य स्वकालीनशक्तिरूपसम्बन्धावगाहित्वेन तज्ज्ञानजन्योपस्थितिनिरूपितजनकताऽवच्छेदककोटौ तत्सम्बन्धाघटकस्योदासीनस्य पटनिरूपितत्वस्य विषयताया अप्रवेशादित्याशङ्कते—अथ किञ्चिदिति।

ननु किञ्चिन्निरूपितत्वनिष्ठविशेषणताभिन्नविशेषणत्वानिरूपितशक्तिनिष्ठसंसर्गतानिष्ठावच्छेदकतानिरूपितपदनिष्ठविषयतानिष्ठावच्छेदकताका या ज्ञाननिष्ठजनकता तन्निरूपिता या तदर्थविषयकत्वावच्छिन्नजन्यता तच्छाल्युपस्थितित्वेन तदर्थविषयकशाब्दं प्रति हेतुत्वेन शक्तिसम्बन्धेन स्वसम्बन्धिनिरूपितशक्तिसम्बन्धेन च घटवद्घटपदमित्यादिज्ञानजन्यघटाद्युपस्थितेःसंग्रहः; असंग्रहश्च स्वकालीनशक्तिसम्बन्धेन घटवत्पटपदमित्यादिज्ञानस्य, नाङ्गीक्रियते च शक्त्यादिप्रकारकज्ञानजन्योपस्थितेः कारणत्वमिति?

अथ वा—किञ्चिद्धर्मावच्छिन्नविषयनिष्ठावच्छेदकताभिन्ना सती तादृशावच्छेदकताकसम्बन्धिविषयतानिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपितनिरूपितत्वविषयतानिष्ठा-

प्रकारकशाब्दबोधवारणाय तद्धर्मप्रकारकशाब्दबोधे शक्तौ तद्धर्मविशिष्टनिरूपितत्वावगाहित्वेन शक्तिज्ञानस्योपयोगिता वाच्या; तथा च तत्सम्बन्धिशक्तत्वावगाहिनो लक्षणाग्रहस्य तेन रूपेणासंग्रहादननुगमेन व्यभिचारप्रसक्त्योक्तकार्यकारणभावे कारणानन्तर्यस्य प्रवेश आवश्यकः।

एवं शक्तिज्ञानमुभयविधं विनिगमकाभावात् शाब्दबोधप्रयोजकं पदेऽर्थवाचकत्वावगाहि; अर्थे पदवाच्यत्वावगाहि च; तयोरपि नानुगमसम्भवः, वाच्यत्ववाचकत्वयोः शक्तिप्रतियोगित्वशक्त्याश्रयत्वरूपमिथोविलक्षणसम्बन्धरूपतयाऽनुगतानतिरिक्तरूपाभावात्, सम्बन्धत्वादिनाऽनुगमे तदीयकालिकादिसम्बन्धज्ञानादर्थधर्मिकपदवाचकतायाः पदधर्मिकार्थवाच्यतायाश्च ज्ञानात् शाब्दबोधापत्तेः तज्जन्योपस्थित्योरपि परस्परजन्यबोधे व्यभिचारः।

एवं लक्षणाज्ञानमपि पदेऽर्थसम्बन्धिवाचकताऽवगाहितयाऽर्थे पदवाच्यसम्बन्धिताऽवगाहितया च द्विविधशाब्दबोधप्रयोजकं तदधीनोपस्थित्योरप्यनतिप्रसक्त-

---

वच्छेदकताकशक्तिविषयतानिष्ठावच्छेदकताकजनकताकजन्यताशालितदर्थनिष्ठविषयताशाल्युपस्थितेः कारणतया न तद्दोष इति यदि विभाव्यते? तदाऽप्याह–वस्तुत इति।

द्रव्यपदं घटत्वविशिष्टे शक्तमित्यादिभ्रमेण द्रव्यादिपदादपि भ्रान्तस्य घटादेरन्वयबोधो भवत्येवेत्यत आह–अभ्रान्तस्येति। तादृशभ्रमरहितस्येत्यर्थः, तथा च तदानीं तादृशबोधस्येष्टापत्तेरयोग इति भावः। तद्धर्मविशिष्टेति। तद्धर्मप्रकारकशाब्दबोधं प्रति निरूपितत्वसम्बन्धेन तद्धर्मविशिष्टवैशिष्ट्यापन्नशक्तिनिष्ठविषयतानिरूपितपदनिष्ठविषयताशालिनिश्चयत्वेन कारणत्वमित्यर्थः। उपलक्षितावगाहिज्ञानस्य यथा न कारणत्वं तथाऽग्रे दर्शयिष्यति। तत्सम्बन्धीति। तथा च लक्षणाग्रहे तद्धर्मावच्छिन्नविषयतानिरूपितसम्बन्धिनिष्ठविषयताकशक्तिनिष्ठविषयतासत्त्वेन न तस्य तादृशकारणताऽवच्छेदकाक्रान्ततेति भावः।

द्विविधशक्तिज्ञानस्य कारणत्वानुरोधेनापि कार्यताऽवच्छेदककोटावानन्तर्यप्रवेशस्यावश्यकत्वं दर्शयति–एवमिति। सम्बन्धत्वादिनेति। सम्बन्धत्वं च विशिष्टधीजनकत्वं विशेष्यत्वप्रकारत्वान्यविशिष्टधीविषयत्वं संयोगसमवायाद्यन्यतमत्वं वा। अनुगम इति। तथा च तदर्थविषयकशाब्दं प्रति तदर्थनिष्ठविषयतानिरूपितसम्बन्धत्वसमानाधिकरणधर्मावच्छिन्नसंसर्गताकपदनिष्ठविषयताशालिज्ञानजन्योपस्थितित्वेन कारणत्वमिति ध्येयम्, आदिनैकज्ञानीयविषयत्वादिपरिग्रहः।

रूपेणानुगमासम्भवात् परस्परजन्यबोधे व्यभिचार इति कार्यताऽवच्छेदकगर्भे तत्कारणानन्तर्यप्रवेशो ध्रुव इत्यवधेयम्।

क्रोडपत्रं समाप्तम्

वस्तुतस्तु शक्त्या लक्षणया चोपस्थितस्य तत्तदर्थस्य शाब्दबोधे भानादुभयविधतत्तदर्थोपस्थितेरेव तत्तद्विषयकशाब्दबोधहेतुता वाच्या; तादृशोपस्थित्योश्चानुगताननतिप्रसक्तकारणताऽवच्छेदकस्यागुरोर्दुर्वचतया व्यभिचारवारणाय शक्त्यादिज्ञानजन्यतदुपस्थितेर्जन्यताऽवच्छेदककोटौ तत्तत्कारणाव्यवहितोत्तरत्वनिवेश आवश्यकः।

इत्थञ्च वृत्त्यनुपस्थितस्यापि संसर्गस्य शाब्दबोधोपगमे व्यभिचाराप्रसक्त्या न किञ्चिद्बाधकमिति किं तत्र वृत्तिकल्पनेन?[१]

अथ तत्र वृत्त्यनुपस्थितस्यापि पदार्थद्वयसंसर्गस्य शाब्दबोधविषयत्वोपगमे सम्बन्धभाने नियामकाभावात् सर्वत्राबाधितयावत्संसर्गभानापत्तिरिति चेद्?

एवं तद्विषकेत्यादि यत्त्वित्यन्तकक्रोडपत्रीयपाठस्तु न सम्यङ्, अग्रिमेण सह पौनरुक्त्यदोषग्रस्तत्वादिति।

इति क्रोडपत्रटीका

वस्तुतस्त्विति। शक्तिलक्षणाऽन्यतरत्वस्यानुगताननतिप्रसक्तस्य सुवचत्वादाह—अगुरोरिति। तथा चैकभेदविशिष्टपरभेदवद्भेदात्मकस्यान्यतरत्वस्य विशेष्यविशेषणभाववैपरीत्येन द्विविधतया तद्रूपेण कार्यकारणभावकल्पने गुरुधर्मावच्छिन्नद्विविधकारणत्वापत्तिरिति।

नन्वन्यतरत्वस्याखण्डोपाधित्वेन न गौरवं न वा विशेष्यविशेषणवैपरीत्या च कार्यकारणभावद्वयापत्तिरिति चेद्?

न—तस्याखण्डोपाधित्वे मानाभावाद्, अन्यथाऽनुमित्यादिनिष्ठपरामर्शादिजन्यताऽवच्छेदककोटावव्यवहितोत्तरत्वादेः प्रवेशस्य मणिकारादिसमतस्यानावश्यकत्वापत्तेः।

अथ तथाऽपि शाब्दबोधौपयिकोपस्थितिजनकसम्बन्धज्ञानजन्यत्वमनुगतमिति चेद्?

मैवं—शाब्दबोधजनकत्वघटितधर्मेण तज्जनकत्वनिर्वचन आत्माश्रयापत्तेः, शाब्दबोधं प्रति शक्तिज्ञानादेः स्वयं कारणत्वखण्डनाच्चेति भावः। इत्थञ्चेति। अनुगतरूपेण तादृशकार्यकारणभावासम्भवे चेत्यर्थः, यावत्संसर्गेति। द्रव्यं घट इत्यादौ द्रव्यघटाद्योरभेदस्येव संयोगसमवायादीनामपि भानं स्यादिति।

---

१. एतच्चिह्नान्तर्गतपाठः प्राचीनपुस्तकेषु क्रोडपत्राव्यवहितपूर्वं मूलघटकतया वर्तते।

न—कयोश्चित् पदयोः केनचित् सम्बन्धेन स्वार्थान्वयबोधसाकाङ्क्षतयाऽऽकाङ्क्षाज्ञानस्यैव पदार्थसंसर्गभाननियामकत्वाद्, ययोः पदयोर्नानासम्बन्धेन स्वार्थान्वयबोध आकाङ्क्षा तज्जन्यशाब्दबोधे संसर्गविशेषतात्पर्यज्ञानरूपकारणबलादेव सम्बन्धभाननियमोपपत्तेः; अन्वयांशे शक्त्युपगमेऽप्येकैकस्यैव पदार्थस्य संसर्गविधया क्वचित् कस्यचिद् भानं क्वचित् कस्यचिदभानमित्यनियमेन सामान्यरूपेणैवान्वयस्य शक्यकोटावन्तर्भावणीयतयोक्तस्यैव संसर्गभाननियामकत्वाद्।

न च संसर्गविशेषानुपस्थितौ तात्पर्यज्ञानासम्भवेन तदुपस्थितेरावश्यकतया तद्गोचरसंस्कारोद्बोधार्थमेव तत्र वृत्तिज्ञानमपेक्षितमिति वाच्यम्?

उद्बोधकान्तरोपस्थितेऽपि संसर्गे तात्पर्यग्रहसम्भवात् तत्र वृत्तिग्रहस्यानपेक्षितत्वात्, तस्माद् घटत्वगोत्वादिविशिष्टे घटगवादिपदस्य शक्तिः; पदार्थद्वयसंसर्गस्त्वा-

---

इदमुपलक्षणं तेन चैत्रः पचतीत्यादौ भानसम्भवेन तादृशकृत्यादिशून्येऽपि चैत्रादौ तादृशप्रयोगापत्तिरित्यपि बोध्यम्।

कयोश्चिदिति। पचतीत्यादौ पच्यादिपदतिङादिपदयोरित्यर्थः। केनचिदिति। अनुकूलत्वादिसम्बन्धेनेत्यर्थः। आकाङ्क्षाज्ञानस्येति। अव्यवहितोत्तरत्वसंसर्गेणैकपदविशिष्टापरपदत्वज्ञानस्येत्यर्थः, तथा च पचतीत्यादौ पचादिपदविशिष्टतिबादिपदत्वज्ञानस्यानुकूलत्वसम्बन्धेनैव पाकादिप्रकारककृतिविशेष्यकबोधं प्रत्येव हेतुतया न तत्र सम्बन्धान्तरभानमिति भावः, एवमन्यत्रापि। ययोरिति। द्रव्यं घटवदित्यादौ द्रव्यघटादिपदयोरित्यर्थः। नानासम्बन्धेन=संयोगसमवायादिनानासम्बन्धेनेत्यर्थः। संसर्गविशेषेति। उक्तं वाक्यं संयोगेन द्रव्ये घटान्वयबोधेच्छया प्रयुक्तमित्याद्याकारकज्ञानेत्यर्थकं, तथा च यदा यत्र यादृशसम्बन्धघटिततात्पर्यज्ञानं तद्घटितसामग्रीविशेषबलात् तदा तादृशसम्बन्धस्यैव भानमिति नानियम इति भावः।

शक्तिज्ञानजन्यसंसर्गविशेषोपस्थितिरेव नियामिका कुतोऽनियमः?

इत्यत आह—सामान्यरूपेणति। सम्बन्धत्वादिसामान्यधर्मेणेत्यर्थः। शक्यकोटौ=अन्वितघटादिघटके। उक्तस्यैवेति। तात्पर्यज्ञानस्यैवेत्यर्थः। संसर्गविशेषेति। इदं वाक्यम् एतद्धर्मावच्छिन्नविशेष्यताकैतत्सम्बन्धावच्छिन्नैतद्धर्मावच्छिन्नप्रकारकबोधजनकत्वप्रकारकेच्छावदित्याद्याकारकपर्यवसन्ने तात्पर्यज्ञाने, अवच्छिन्नत्वांशे संयोगादेः प्रकारतया भानात् तादृशप्रकारताप्रयोजकतदुपस्थित्यभावेन तात्पर्यज्ञानासम्भव इति भावः।

संस्कारोद्बोधार्थमेव=संस्कारे फलोपधानार्थमेव। तत्र=सम्बन्धे। उद्बोधकान्तरेति। सम्बन्धान्तरज्ञानादिजन्योपस्थितिविषय इत्यर्थकम्। तस्मादिति। संसर्गांशे शक्त्यनावश्यकत्वादित्यर्थः।

काङ्क्षादिबललभ्य एवेति स्थितम्।

घटादिपदस्य पदार्थताऽवच्छेदकीभूतघटत्वादिविशिष्ट एव शक्तिर्न तु तदुपलक्षिते; घटत्वादेरुपलक्षणत्वे तस्य द्रव्यत्वाद्यविशेषेण घटादिपदाद् द्रव्यत्वादिना न बोधः; अपि तु घटत्वादिनैवेति नियमानुपपत्तेः।

अथ घटत्वादेरिव द्रव्यत्वादेरपि वैशिष्ट्यस्य घटादौ सत्त्वाद् घटादिपदशक्तेर्घटत्वादिसामानाधिकरण्यरूपवैशिष्ट्यवद् द्रव्यत्वादिसामानाधिकरण्यस्यापि तत्र सत्त्वाद् घटादिविशिष्टे शक्तिर्न तु द्रव्यत्वादिविशिष्ट इत्यस्य कोऽर्थः?

अत्र वदन्ति—तद्विशिष्टे शक्तिरित्यस्य तद्धर्मतद्वैशिष्ट्यतदाश्रयेषु त्रिष्वेव शक्तिरित्यर्थः, घटादिपदशक्तिमति द्रव्यत्वादिवैशिष्ट्यसत्त्वेऽपि द्रव्यत्वादौ तच्छक्तिविरहात् तेषामुपलक्षणता; घटत्वादौ तत्सत्वाच्च तेषां विशेषणता, एवञ्च प्रवृत्तिनिमित्तेऽपि शक्तेः सत्त्वात् तस्यापि वाच्यतया; वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थि-

---

घटत्वेति। अस्य सावधारणपरत्वेन; न त्वन्विघटत्वादिविशिष्ट इति भावः। आकाङ्क्षादीति। आदिना योग्यतातात्पर्यज्ञानयोः परिग्रहः, तस्य=घटत्वादेः, द्रव्यत्वाद्यविशेषाद्=द्रव्यत्वादिना सह वैलक्षण्याभावादिति। आशङ्कते—अथेति। द्रव्यत्वसामानाधिकरण्यस्येति, तथा च घटादिपदस्य घटत्वादिविशिष्टे शक्तिरिति वाक्यजन्यप्रतीतौ सप्तम्या वृत्तित्वार्थकतया घटत्वादिशक्त्योः सामानाधिकरण्यावगाहनेनापि न निस्तारः। अत्रेति। तादृशशङ्कायामित्यर्थः,

वदन्तीति। स्वयन्तु जातावavयवसंस्थानरूपाकृतौ व्यक्तौ च गवादिपदानां शक्तिस्वीकारादेतस्मिन्ननिर्भरसूचनाय तदुक्तम्, एतच्चाग्रे व्यक्तीभविष्यति। तद्वैशिष्ट्येति। तद्धर्मवैशिष्ट्येत्यर्थः, वैशिष्ट्यश्च सम्बन्धः, स च समवायादिः। उपलक्षणतेति। सामानाधिकरण्यमात्रमित्यर्थः।

वाच्यत्वे सतीत्यादि, आकाशादिशब्दस्य शब्दाश्रये स्वरूपतः शक्तिवादिप्राचां नये शब्दाश्रयत्वे प्रवृत्तिनिमित्तत्ववारणाय—वाच्यत्वे सतीति।

नव्यनये तु द्रव्यादिपदादपि घटत्वाद्युपलक्षितघटादौ शक्तिग्रहाद् घटत्वादिना घटाद्युपस्थितिर्जायतेऽतो द्रव्यादिपदानां घटत्वादौ प्रवृत्तिनिमित्तत्ववारणाय—तद्।

नन्वेवं घटादिपदाविशेषेणाकाशादिपदस्यापि विशिष्टवाचकत्वं; न तु निरवच्छिन्नशक्तिकत्वम्, एवञ्च प्रवृत्तिनिमित्तलक्षणे वाच्यत्वविशेषणमनुपादेयमेवेति दीधितिकारस्य तद्विशेषणखण्डनमसङ्गतम्; उक्तरीत्या द्रव्यादिपदानां घटत्वादौ प्रवृत्तिनिमित्तत्ववारकतया नव्यमतेऽपि तत्सार्थक्यसम्भवादिति चेत्?

तिप्रकारत्वमिति प्रवृत्तिनिमित्तलक्षणे वाच्यत्वे सतीति विशेषणदानं "जात्याकृतिव्यक्तयः पदार्थः" इति न्यायसूत्रोक्तं गोत्वादिजातेर्गवादिपदार्थत्वं चोपपद्यते।

अथ घटशब्दाद् घटो बोद्धव्य इत्याकारिकाया भगवदिच्छाया बोधविशेषविषयतात्वेन बोधविषयप्रकारतानिरूपितविशेष्यता घट एव न तु घटत्वादौ विषयतामात्रञ्च वस्तुमात्र एवेति कथं घटपदशक्तिर्घटत्वादिषु त्रिष्वेवेति नियम इति चेद्?

न–सामान्यतः शक्तिविषयत्वविशेषणेनोपपत्तौ वाच्यत्वपर्यन्तप्रवेशो व्यर्थ इत्यत्र तात्पर्याद्।

न च तादृशज्ञानेन घटत्वाद्यंशे सम्बन्धानवगाहनाद् घटत्वादिना तत्स्मरणं दुर्घटमिति वाच्यम्?

स्मृतिजनने प्रकारांशे सम्बन्धभानानपेक्षणाद्, अन्यथा लक्ष्यताऽवच्छेदकतीरत्वादिना तीरादेः स्मृत्यनुपपत्तेः।

गवादिपदानां जात्याकृतिविशिष्टवाचकतामते तेषां संस्थाने प्रवृत्तिनिमित्तत्ववारणाय–वाच्यवृत्तित्वे सतीति।

न चावयवविशेषसंयोगरूपस्य संस्थानस्य स्वसमवायिसमवेतत्वसम्बन्धेन गवादौ वृत्तित्वात्तन्निवेशेऽप्यतिव्याप्तितादवस्थ्यमिति वाच्यम्?

साक्षात्सम्बन्धेन तद्विवक्षणाद्, एतच्चाग्रे स्वयमेव वक्ष्यते।

वृत्तित्वञ्चात्र वाच्यताघटकसम्बन्धेन विवक्षणीयं; नातः संस्थानस्य कालिकादिसम्बन्धेन गवादौ सत्त्वेऽपि तत्रातिव्याप्तितादवस्थ्यम्, वृत्तित्वपदेन सम्बद्धत्वस्य विवक्षणीयतया गम्यादिधातूनां प्रवृत्तिनिमित्तसंयोगादेरनुकूलत्वादिसम्बन्धेन वृत्तित्वविरहेऽपि न क्षतिः, पशुपदस्य त्वेतन्मते लोमवल्लाङ्गूलविशिष्ट एव शक्तिः; न तु स्वाश्रयलाङ्गूलसमवेतत्वसम्बन्धेन लोमवति नातस्तत्राव्याप्तिः, यत्र बुद्धिस्थतादृशपरम्परासम्बन्धेन लोमविशिष्टस्तच्छब्देन परामृश्यते तत्र तच्छब्दस्य लक्षणैव न तु शक्तिरतो न तत्राव्याप्तिः।

तच्छब्दस्य लक्षणा नास्ति सर्वत्रैव शक्तिरिति तु नाशङ्कनीयम्; अवयवग्रन्थे जगदीशतर्कालङ्कारेण तच्छब्दस्यापि लक्षणास्वीकाराद्।

द्रव्यदधिपदादेर्घटदध्यादौ प्रवृत्तिनिमित्तत्वापत्तिः; घटादिरूपद्रव्येऽवयविरूपदध्यादौ च वाच्यत्वस्य सत्त्वात् तद्वाच्यात्मककपालादाववयवे दध्नि च वृतेश्चातो–वाच्योपस्थितीति। तदर्थस्तु भ्रमान्यशक्तिज्ञानजन्या योपस्थितिस्तन्मुख्यविशेष्यताप्रकारताऽऽश्रयत्वम्, द्रव्यपदं द्रव्यवति शक्तमिति शक्तिभ्रमजन्योपस्थितिमादाय द्रव्यपदादेर्घटादावतिव्याप्तितादवस्थ्याद् भ्रमान्येति,

ईश्वरेच्छायास्तत्पदजन्यशाब्दबोधविषयताप्रयोजकसम्बन्ध एव तत्र तत्पदशक्तिव्यपदेशनियामकः, घटपदाद् घटो बोध्य इत्येतादृशेच्छायाश्च घटत्वावच्छेदेन बोधविषयत्वमवगाहमानायां समवायावच्छिन्नं बोधविषयत्वावच्छेकत्वं घटत्वे समवायेन घटत्वावच्छेद्यत्वं वा विषयतायां संसर्गमर्यादया भासते।

एवञ्चाश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं घटस्यावच्छेदकत्वसंसर्गावच्छिन्नघटविशेषणताऽऽपन्नबोधविषयत्वस्य या प्रकारता तन्निरू-

---

द्रव्यपदं द्रव्यवति लाक्षणिकमिति ज्ञानजन्योपस्थितिमादायोक्तातिव्याप्तिवारणाय- शक्तीति, मुख्यविशेष्यतानिवेशात् पशुपदादीनां शक्यताऽवच्छेदकताऽवच्छेदके लोमादौ नातिव्याप्तिरिति।

विषयतामात्रञ्चेति। अस्येश्वरेच्छीयविषयतात्वावच्छिन्नं तत्पदजन्यबोधविषयत्वप्रकारकेश्वरीच्छीयविषयतात्वावच्छिन्नं वेत्यर्थः।

वस्तुमात्र एवेतीति। तथा च घटत्वादौ वाच्यत्वोपपत्तावपि सर्वेषु पदार्थेषु सर्वेषां पदानां वाच्यत्वापत्तिरिति भावः।

ईश्वरेच्छाया इति। अत्र षष्ठ्यर्थो निरूपितत्वं तस्य च विषयताऽऽत्मकसम्बन्धेऽन्वयः, भगवदिच्छा तु तत्तत्पदजन्यबोधीययादृशविषयत्वेन यमवगाहते तत्र शाब्दबोधीयतादृशविषयतां प्रयुङ्क्ते इति नियममङ्गीकृत्याह–घटपदादिति। इत्येतादृशेच्छायामित्यत्र सप्तम्यर्थो निरूपितत्वं तस्य च भासत इत्यत्र भासधात्वर्थविषयतायामन्वय, घटत्व इत्यत्र सप्तम्यर्थो विशेष्यत्वम् अस्यापि निरूपितत्वसम्बन्धेन भासधात्वर्थेऽन्वयः, भासत इत्यत्राख्यातार्थ आश्रयत्वरूपं कर्तृत्वं तस्य चावच्छेदकत्वमित्यत्रान्वयः। संसर्गमर्यादयेति। सांसर्गिकविषयतयेत्यर्थः, अभेदोऽत्र तृतीयाऽर्थः तस्यापि भासत इत्यत्र भासधात्वर्थेऽन्वयः तथा च ईश्वरेच्छानिरूपितघटत्वनिष्ठविशेष्यतानिरूपितसांसर्गिकविषयत्वाभेदवद्विषयत्वाश्रयो बोधविषयताऽवच्छेदकत्वमित्यन्वयबोधः, बोधविषयतापर्यन्तं परिचायकं बोध्यम्।

द्वितीयपक्षे बोधविषयतायामित्यत्र सप्तम्यर्थो विशेष्यत्वं तथा च ईश्वरेच्छीयबोधविषयतानिष्ठविशेष्यतानिरूपितसांसर्गिकविषयत्वाभेदवद्विषयत्वाश्रयो घटत्वावच्छेद्यत्वमित्यन्वयबोधः।

अत्र प्रथमकल्पे तादृशबोधविषयत्वं घटे भासमानं सद्विशेष्यपारतन्त्र्येणावच्छेदकतासम्बन्धेन घटत्वे भासते।

द्वितीयकल्पे घटत्वं स्वधर्मिताऽवच्छेदकके तादृशेच्छायां भासमाने तादृशविषयत्वे समवायसम्बन्धावच्छिन्नावच्छेद्यतासम्बन्धेन तथा भासत इति बोध्यम्।

पितविशेष्यत्वं घटविशेषणताऽऽपन्नबोधविषयत्वांशेऽवच्छेद्यत्वसम्बन्धेन प्रकारत्वं वा घटत्वस्य घटत्वे बोधविषयतायाः संसर्गविधया भासमानेऽवच्छेदकत्वेऽवच्छेदकतया भासमानत्वं समवायस्येति त्रितयमेव घटपदजन्यबोधविषयतायां ज्ञातमुपयुज्यत इति त्रयाणां वाच्यतोपपत्तिः।

घटविशेषणताऽऽपन्नबोधविषयतेत्यनेन परतन्त्रा तादृशबोधविषयत्वनिष्ठप्रकारताकविशेष्यता न तु स्वतन्त्रेति सूचितं, तथा चाश्रयत्वसम्बन्धावच्छिन्नस्वतन्त्रबोधविषयत्वनिष्ठप्रकारत्वावच्छिन्नायाऽवच्छेदकत्वसम्बन्धावच्छिन्नेच्छीयप्रकारता तन्निरूपितविशेष्यता घटत्वादिविशेषणस्य शक्तिः।

एवाञ्चावच्छेद्यावच्छेदकभावापन्नप्रकारतानिरूपितविषयतात्रयमेव पृथग् विशेष्यविशेषणतत्संसर्गाणां शक्तिर्न तु विशेष्यभेदादिव विशृङ्खलभानमिति, अवच्छेदकत्व इत्यत्र सप्तम्यर्थो विशेष्यत्वं तस्य च निरूपितत्वसम्बन्धेन भासमानत्वमित्यत्र भासधात्वर्थविषयतायामन्वयः। अवच्छेदकतयेति। अवच्छेदकत्वसंसर्गेण तृतीयार्थोऽवच्छिन्नत्वं तस्यापि भासधात्वर्थेऽन्वयः। ज्ञातमुपयुज्यत इति।

अथात्र किमाकारकं ज्ञानं उपयोगि?

अत्र नव्याः—तत्तत्पदजन्यबोधीयविषयतात्वावच्छिन्नेच्छीयप्रकारताकविशेष्यतानिष्ठप्रकारतानिरूपितघटादिनिष्ठमुख्यविशेष्यताकं तादृशविषयतात्वावच्छिन्नेच्छीयप्रकारत्वावच्छिन्नावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यताप्रकारकं घटत्वादिमुख्यविशेष्यकम् इच्छीयतादृशप्रकारत्वावच्छिन्नप्रकारतानिरूपितावच्छेदकत्वनिष्ठसंसर्गतानिरूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकत्वनिरूपिताधेयत्वसम्बन्धावच्छिन्नावच्छेदकताप्रकारकं समवायादिविशेष्यकश्च ज्ञानं समवायेन घटत्वादिप्रकारकघटादिविशेष्यकान्वयबुद्धौ हेतुरिति प्राहुः।

यत्तु—घटत्वादिनिष्ठविशेष्यताकसमवायसम्बन्धावच्छिन्नावच्छेदकत्वनिष्ठसांसर्गिकविषयताकप्रकारत्वावच्छेदिका या तादृशविषयतात्वावच्छिन्नेच्छीयप्रकारता तन्निरूपितविशेष्यतावान् घट इत्याकारकमेकं विशिष्टवैशिष्ट्यावगाहिज्ञानं हेतुरिति।

तत्तुच्छम्—एतद्ग्रन्थस्य तादृशज्ञानपरत्वे; "अथ घटत्वे"त्याद्यग्रिमग्रन्थेन घटत्वविशेष्यकज्ञानस्य कारणत्वे घटत्वत्वानुपस्थितिकाले तादृशशाब्दबोधानुपपत्तिशङ्कनस्यासङ्गत्यापत्तेः, तत्र घटत्वादेर्विशेषणतया प्रवेशादिति।

परे तु—तत्तत्पदजन्यबोधविषयतात्वावच्छिन्नेच्छीयप्रकारतानिष्ठैकप्रकारतानिरूपितं घटत्वादिनिष्ठविशेष्यतात्रयं तन्निरूपकं ज्ञानमेव हेतुः, सम्भवति च तादृशज्ञानं यथा घटपटमठा इत्यादौ घटत्वाद्यवच्छिन्नविशेष्यतात्रयनिरूपितत्रित्वादिनिष्ठैकप्रकारतानिरूपकं ज्ञानं, तद्वदिहापि,

घटघटत्वसंसर्गेषु सङ्केतविषयतानां मिथो वैलक्षण्येऽपि तन्निरूपकबोधनिष्ठ-विषयताया ऐक्याच्छक्त्यैक्यप्रवादो; न तु सङ्केतैक्यात्, शक्तशक्यत्वावच्छेदकभेदेनापि शक्तिभेदानुपपत्तेः भगवत्सङ्केतस्याभेदात्, तदंश आश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्व-प्रकारतानिरूपितसङ्केतविषयताऽवगाहिज्ञानस्यैव पदार्थान्तरान्वयबोधोपयोगित्वेति शक्तिभ्रमं विना न पदार्थताऽवच्छेदके पदार्थान्तरान्वयः।

अत्र घटेत्यादौ व्यासज्यवृत्तिधर्मनिष्ठैकसम्बन्धावच्छिन्नैकप्रकारता; प्रकृते त्वव्यासज्यवृत्तिधर्मनिष्ठा विभिन्नसम्बन्धावच्छिन्ना, तादृशसम्बन्धाश्च—स्वनिरूपितविशेष्यत्वस्वावच्छिन्नप्रकारताकवि-शेष्यत्वस्वावच्छिन्नप्रकारताऽवच्छेदकतानिरूपितावच्छेदकत्वस्वरूपा इयान् विशेष इति ध्येयमिति वदन्ति।

नन्वेतावता सङ्केतविषयतानामेव शक्तित्वमायातं, सा च पदार्थतदवच्छेदकादिभेदेन विभिन्नेति कुतस्त्रिष्वेका शक्तिरिति प्रवादोपपत्तिरित्याशङ्कायां? समाधत्ते—घटघटत्वेत्यादि। तन्निरूप-केति। सङ्केतनिरूपकेत्यर्थः। बोधविषयतायाः=बोधनिष्ठविषयतायाः।

शक्त्यैक्यप्रवाद इति। उपपद्यत इति शेषः। तथा चैका=एकनिरूपिका, साक्षात्परम्परा-साधारणनिरूपितत्वसम्बन्धेनैकत्वविशिष्टा वेत्यर्थः।

हर्यादिनानाऽर्थकशब्दानां शक्यताऽवच्छेदकैक्येऽपि विष्णुत्वसिंहत्वादिशक्यताऽवच्छेद-कभेदेन शक्तिभेद इत्यत उक्तं—शक्यत्वेति।

ननु घटत्वादावपि शक्तिस्वीकारे तेषां पदार्थत्वेनेतरपदार्थान्वये घटो नित्य इत्यादितोऽप्य-भ्रान्तानामन्वयबोधः स्यादित्यत आह—तदंश इत्यादि। ज्ञानस्यैवेति। एवकारेणावच्छेदकत्वसम्बन्धा-वच्छिन्नबोधविषयत्वनिष्ठप्रकारतानिरूपितसङ्केतविषयत्वावगाहिज्ञानादेर्व्यवच्छेदः, पदार्थान्त-रान्वयबोधोपयोगित्वं भिन्नवृत्त्युपस्थापितार्थान्वयबोधोपयोगित्वं, तेन गच्छतीत्यादौ तिङुपस्थाप्य-वर्त्तमानत्वादेर्न तदुपस्थाप्यताऽवच्छेदककृतित्वादावन्वयः। शक्तिभ्रमं विना=भ्रमात्मकतादृशज्ञानं विना। न पदार्थताऽवच्छेदक इति। एतच्च प्रायिकाभिप्रायेण। तेन पक्तेत्यादौ तृजाद्युपस्थाप्य-ताऽवच्छेदककृत्यादौ पाकादेरन्वयेऽपि न क्षतिः।

अथ कुत्र स्थले पदार्थताऽवच्छेदके पदार्थान्तरान्वयापत्तिः? यद्वारणाय तादृशकार्यकार-णभावकल्पनम्।

न च यत्र घटत्वे नित्यस्य लोम्नि पशुभेदस्याबाधितस्य योग्यताज्ञानं तात्पर्यज्ञानं तदवच्छिन्ने शक्तिग्रहाद् घटत्वावच्छिन्नस्य लोमावच्छिन्नस्य वोपस्थितिश्च वर्त्तते तत्र घटो नित्यः पशुर्न पशुरित्यादिवाक्याद् घटत्वेऽभेदेन नित्यस्य लोम्नि च पशुभेदस्यान्वयबोधः स्यादिति वाच्यम्?

तादृशबोधं प्रति घटत्वं नित्यं लोम न पशुरित्याद्याकाङ्क्षाज्ञानस्यैव कारणतया तद्विरहादेव तादृशापत्तेरसम्भवाद्।

ननु यत्र घटपदस्य घटत्वे पशुपदस्य वा लोम्नि शक्तिभ्रमो लक्षणाग्रहो वाऽस्ति; तत्रेतरकारणसहकृतात् तादृशवाक्याद् घटत्वे नित्यस्य लोम्नि वा पशुभेदस्यान्वयबोधजननेन तादृशबोधं प्रत्यप्याकाङ्क्षाज्ञानात्मकस्य तादृशवाक्यज्ञानस्य कारणताया वक्तव्यत्वेनोक्तस्थले तादृशापत्तिर्भवत्येवेति चेद्?

न–तत्र तादृशशक्तिभ्रमादिजन्याया लक्षणाग्रहजन्याया वा घटत्वादेरुपस्थितेरसत्त्वेन तादृशापत्तेरयोगाद्।

यादृशयादृशकारणसत्त्वे कुत्रचित् कार्यमुत्पद्यते तादृशकारणस्तोमस्यैव कार्यापादकत्वनियमादिति चेद्?

मैवम्–यस्मादेतद्ग्रन्थस्यायम्भावः–उपस्थितेर्हेतुतायां मुख्यविशेष्यत्वादिरूपविषयताविशेषस्याप्रवेशेन तद्धर्मप्रकारेण तद्विषयकशाब्दं प्रति शक्तिग्रहजन्यतद्धर्मप्रकारेण तद्विषयकोपस्थितित्वेनैव हेतुत्वं यदि वाच्यं; तथा च घटादिपदानां घटत्वादौ शक्तिभ्रमाद्यधीनघटत्वाद्युपस्थितेरपि घटत्वादिविषयकान्वयबोधं प्रति शक्तिज्ञानजन्यघटत्वादिविषयकोपस्थितित्वेनैव हेतुतया घटत्वविशिष्टे शक्तिग्रहाद्यधीनघटादिविषयकोपस्थितेर्घटत्वादिविषकतया तादृशकारणतावत्त्वे न शक्तिग्रहाद्यधीनघटत्वादिप्रकारघटाद्युपस्थितिकाल इतरकारणसत्त्वे तादृशापत्तिर्दुर्वारैव, कारणताऽवच्छेका यावन्तो धर्माः प्रत्येकं तद्धर्मावच्छिन्नयत्किञ्चिद्व्यक्तीनां सत्त्वस्यैव कार्योत्पादकत्वनियमेन तदापादकत्वाद्।

अथ स्वानधिकरणादिषु तत्तच्छाब्दबोधव्यक्त्यापत्तिवारणाय तत्तच्छाब्दव्यक्तिं प्रति शक्तिज्ञानजन्यतत्तदुपस्थितिव्यक्तित्वेन हेतुताया आवश्यकत्वेन शक्तिभ्रमाद्यधीनतदुपस्थितिव्यक्तेस्तदानीमसत्त्वेन न तदापत्तिरिति चेद्?

यदि तत्तद्व्यक्तित्वस्य कार्यताऽवच्छेदकत्वं कल्प्येत तदा तद्व्यक्तित्वावच्छिन्नं प्रति कारणमेव तद्व्यक्तित्वावच्छिन्नमापादयति तदेव न प्रयोजनविरहाद्।

अथ वा भवतु तद्व्यक्तित्वं कार्यताऽवच्छेदकं मा वा; तथाऽपि तत्र घटत्वादिधर्मिकघटादिभेदप्रकारकाद्यन्वयबुद्धित्वरूपसामान्यधर्मावच्छिन्नस्यापत्तेर्दुर्वारत्वात् सामग्रीसत्त्वात् तत्र तद्व्यक्तिकारणानपेक्षणाद् अन्यथाऽन्वयव्यतिरेकदर्शनादिना सामान्यधर्मावच्छिन्नं प्रति सामान्यधर्मावच्छिन्नस्य कारणताग्रहो न स्याद् यस्मात् यस्य व्यतिरेके दृष्टचरेभ्य इतरकारणेभ्यः कार्योत्पत्तिर्नावलोक्यते जायते चैतद्यद्येतत् कार्यं प्रति कारणं न स्याद् एतत् कार्यमवश्यमुत्पद्येतेत्यापत्तिस्तदा तत् कार्यं प्रति तस्य कारणत्वं परिच्छिद्यते, यस्य व्यतिरेके

यत्तु—तदंशे सङ्केतमुख्यविशेष्यताग्रहस्तत्रेतरान्वयबोधप्रयोजको लोमादिमान् पशुपदाद्बोद्धव्य इत्याकारकसङ्केते लोमाद्यंशे बोधविषयतायाः प्रकारत्वेऽपि लोमादेर्धर्मिविशेषणताऽऽपन्नस्यैव तादृशविषयताविशेष्यत्वं; न तु मुख्यविशेष्यत्वमतो न लोमादौ पदार्थान्तरान्वय इति।

तादृशापरसकलेत्यादितर्कदीधितेरपि तत्रैव तात्पर्य्यं बोध्यं, तत्र यदीतरकारणमध्ये तद्व्यक्तिरूपकारणमप्यपेक्ष्यते तदा यद्वह्निव्यक्तिसत्त्वे महानसादौ धूमोत्पत्तिरवलोकिता; अन्यत्र तद्वह्निव्यक्तेरसत्त्वेन तदापत्तेरसम्भवः स्यादत एवानुमितिनाशकालेऽनुमित्युत्पादो दुर्वार एवेति दीधितिरपि सङ्गच्छते।

वस्तुतस्तु यत्र-यत्र स्थले यद्यच्छरीरावच्छेदेन पदार्थताऽवच्छेदकधर्मिकशक्तिभ्रमादिजन्यपदार्थताऽवच्छेदकोपस्थितिघटितसामग्र्येकदैव समवहिता न तु तत्पूर्वं तत्परतो वा; तत्तच्छरीरावच्छेदेनात्मनि पदार्थतावच्छेदकान्वयबोध एकैक एव, तत्तच्छाब्दबोधव्यक्तिं प्रति तु तत्तच्छरीरव्यक्तेरेव कारणत्वं कल्प्यते नान्यस्य तत्र-तत्र तद्धर्मविशिष्ट- धर्मिकशक्तिग्रहाद्यधीनोपस्थितिघटिततादृशसामग्रीतः पदार्थताऽवच्छेदक इतरपदार्थान्वयबोधापत्तिर्दत्तेति।

यत्तु—तादृशपारमार्थिककारणकूटाभावादेव न तादृशबोधापत्तिरित्येतद्ग्रन्थस्य तात्पर्यं न त्वतिरिक्तकार्यकारणभावकल्पनया तादृशापत्तिवारणे तात्पर्यम्।

तदसद्—उक्तापत्तेरवारणाद्, गतिसम्भवे ग्रन्थस्य यथाश्रुतार्थपरित्यागानर्हत्वाच्चेति।

अथ कीदृशकार्यकारणभावः कल्पनीयो येन न तदापद्येतेति?

अत्र नव्याः—किञ्चित्प्रकारतानिरूपिता योपस्थित्यप्रयोज्या सांसर्गिकविषयता तन्निरूपिततत्पदार्थनिष्ठविशेष्यताशालिशाब्दत्वावच्छिन्नं प्रति किञ्चित्पदजन्यबोधविषयत्वनिष्ठाश्रयत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितेच्छीयविशेष्यत्वनिष्ठप्रकारताकतत्पदार्थनिष्ठविशेष्यताशालिज्ञानत्वेन तादृशविशेष्यतासम्बन्धेन शाब्दं प्रति तादृशविशेष्यतासम्बन्धेनोपस्थितित्वेन वा हेतुता वाच्या, अत एव पशुर्धावतीत्यादौ लोमनिष्ठविशेष्यताया उपस्थितिप्रयोज्यसांसर्गिकविषयतानिरूपितत्वेन न क्षतिरित्याहुः।

यत्त्विति। विशेष्यताया मुख्यत्वं प्रकारत्वानवच्छिन्नत्वं, प्रकारत्वेऽपीति। अवच्छेदकतासम्बन्धेनेति शेषः।

न तु मुख्यविशेष्यत्वमिति। पारतन्त्रीयतादृशविशेष्यतायाः स्वातन्त्रीयतादृशप्रकारत्वावच्छिन्नत्वादिति भावः।

ईश्वरसङ्केतस्य तादृशत्वे मानाभावादाह—आधुनिकेति। सङ्केतेति। लोम; अवच्छेदक-

तत्र–लोम पशुपदजन्यबोधविषयताऽवच्छेदकं भवत्वित्याद्याधुनिकसङ्केतविषयकादवच्छेदकतासंसर्गावच्छिन्नतादृशबोधविषयत्वप्रकारताकमुख्यविशेष्यं लोमेति ज्ञानाल्लोमादिमुख्यविशेष्यकशाब्दबोधानुदयेनाश्रयत्वसम्बन्धावच्छिन्नत्वेन तादृशबोधविषयत्वप्रकारताऽवगाहिताया अवश्यं निवेशनीयत्वात्, तत्र च लोमावच्छिन्नविषयकबोधस्यैव सङ्केतविषयतया ग्रहेणान्यादृशबोधोत्पत्तेरनुभवविरुद्धतयेष्टापत्तेरयोगात् तादृशविशेष्यतायां मुख्यत्वनिवेशे प्रयोजनाभावाद्।

एवञ्च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेत्यत्र पदार्थत्वं बोधविषयताऽऽश्रयत्वेन सङ्केतविषयत्वं, तदेकदेशत्वञ्च बोधविषयताऽऽवच्छेदकत्वेन तथात्वरूपं, तदेव च शक्यताऽऽवच्छेदकत्वमित्यवधेयम्।

अथ घटत्वाद्युपलक्षिते द्रव्यपदशक्त्यवगाहिप्रमातो घटत्वादिप्रकारकस्य घटादिपदशक्तिप्रमातः कालिकादिसम्बन्धेन घटत्वादिप्रकारकस्य च शाब्दबोधस्य वारणाय तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दबोधं प्रति तत्सम्बन्धेन तद्धर्मविशिष्टांशे तत्पदवाच्यत्वावगाहिज्ञानं कारणं वाच्यम्।

तासम्बन्धेन पशुपदजन्यबोधीयविषयतावद्भवत्वित्याकारकेत्यर्थः। तत्रेति। तादृशसङ्केतग्रहोत्तरतादृशबोध इत्यर्थः। सप्तम्यर्थो विषयत्वं तस्य चेष्टापत्तावन्वयः। एवञ्च=सङ्केतीयमुख्यविशेषत्वस्येतरपदार्थान्वयाप्रयोजकत्वे च।

ननु स्वमते लोम पशुपदजन्यबोधविषयत्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितसङ्केतीयमुख्यविशेष्यताकमिति ज्ञानाल्लोमांश इतरपदार्थान्वयवारणेऽपि लोमविशिष्टांश इतरपदार्थन्वयानुपपत्तिः, तदंश आश्रयत्वसम्बन्धावच्छिन्नप्रकारताकविशेष्यत्वस्याभानादिति चेद्?

न–यतो लोमवतः पशुपदजन्यबोधविषयत्वनिष्ठश्रयत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यत्वप्रकारकज्ञानस्य तज्जन्योपस्थितेश्च सत्त्व उक्तज्ञानसत्त्वेऽपि लोमवतीतरपदार्थान्वये बाधकाभावात् तादृशबोधो भवत्येव, तादृशज्ञानजन्यलोमवदनुपस्थितौ तु तत्कारणविरहादेव न तदुत्पत्तिः।

यत्त्वितिमतेऽपि तादृशोपस्थितिकाल एव दोषं दत्तवानिति न कोऽपि दोषः।

एतेन वायसदशनानुसन्धानवत् केषाञ्चित् तदुपपादनान्तरप्रयासो विफल एवेति ध्येयम्।

ननु तथाऽपि पशुपदं पशुं बोधयत्वित्यादिवाचकत्वज्ञानात् पश्वादावितरपदार्थान्वयो न स्यात् तदंश आश्रयत्वसम्बन्धावच्छिन्नप्रकारताकविशेष्यत्वज्ञानविरहादिति चेद्?

विशिष्टांशे तत्पदवाच्यत्वावगाहित्वञ्च विशेषणीभूततद्धर्मतत्सम्बन्धतद्धर्म्यंशे तदवगाहित्वरूपं वाच्यं; न तु तेन सम्बन्धेन तद्धर्मं धर्मिताऽवच्छेदकीकृत्य तदवगाहित्वमात्रम्।

घटत्वादिकं धर्मिताऽवच्छेदकीकृत्य द्रव्यादिपदशक्तिज्ञानस्यापि कालिकादिसम्बन्धेन घटत्वादिकं धर्मिताऽवच्छेदकीकृत्य घटादौ घटादिपदशक्तिग्रहस्यापि च प्रमात्वेनोक्तातिप्रसङ्गावारणाद्, एवमपि घटत्वांशे निर्द्धर्मिताऽवच्छेदककात् प्रमेयत्वादिधर्मिताऽवच्छेदकककाच्च घटादिपदनिरूपितवाच्यताग्रहात्तत्प्रकारकबोधवारणाय स्वरूपतो घटत्वादिप्रकारकबोधे घटत्वत्वावच्छिन्नधर्मिकवाच्यत्वग्रहापेक्षोपेया, तथा च घटत्वत्वाद्यनुपस्थितिदशायां घटादिपदाच्छाब्दबोधानुपपत्तिः।

न च तदंशे घटादिवाचकताज्ञानमेव शाब्दबोधहेतुः; एवञ्च स्वरूपतो घटत्वादिप्रकारकबोधे वाचकत्वांशे स्वरूपतो घटत्वादिप्रकारकज्ञानस्यैव हेतुत्वमिति घटादिपदजन्यबोधे घटत्वत्वाद्युपस्थितेर्नापेक्षेति वाच्यम्?

न–अस्माच्छब्दादयमर्थो बोद्धव्य इत्युत्तरकल्प एव भट्टाचार्यस्य निर्भरत्वात्, शब्दमणौ मिश्रेण तथैव लिखितत्वाच्च।

विषयत्वसम्बन्धावच्छिन्नतादृशसङ्केतीयप्रकारताप्रकारकज्ञानस्यापीतरान्वयबोधप्रयोजकत्वकल्पनाच्चेति।

आशङ्कते–अथेति। घटत्वाद्युपलक्षिते=घटत्वाद्याश्रये। तदवगाहित्वरूपमिति। वाच्यत्वाद्यवगाहित्वरूपमित्यर्थः। मात्रमिति। मात्रपदेन घटत्वाद्यंशे वाच्यत्वावगाहित्वव्यवच्छेदः। एवमपीति। घटत्वादित्रितये वाच्यत्वावगाहिज्ञानस्य हेतुत्वे चेत्यर्थः।

निर्द्धर्मिताऽवच्छेदकेति। घटादिपदजन्यबोधविषयत्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारताकविशेष्यतावदित्याकारकादित्यर्थः।

तादृशविशेष्यत्वनिष्ठप्रकारताककिञ्चिदवच्छिन्नविशेष्यताशालिज्ञानत्वेन हेतुत्वे चाह–प्रमेयत्वादीति। प्रमेयं घटादिपदजन्यबोधविषयत्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारताकसङ्केतीयविशेष्यतावदित्याकारकादित्यर्थः।

वाचकताज्ञानमेवेति। तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दं प्रति तत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठप्रकारताशालिशाब्दं जनयत्वित्याकारकसङ्केतीया या तद्धर्मनिष्ठाधेयत्वसम्बन्धावच्छिन्नप्रकारताकतत्सम्बन्धावच्छिन्नप्रकारतात्वावच्छिन्नविषयताकबोधनिष्ठविषयताकजनकत्वनिष्ठप्रकारताकविशेष्यता; तत्प्रकारकपदविशेष्यकज्ञानं हेतुः।

एवमपि घटादिपदांशे समवायवाचकताप्रकारकज्ञानस्य शाब्दबोधे घटत्वादि-सम्बन्धतया स्वरूपतः समवायभानप्रयोजकतायावाच्यतया समवायवाचकताज्ञाने वाचकतांऽशे समवायादेः स्वरूपतः प्रकारत्वासम्भवेन समवायत्वादिप्रकारेणैव तज्ज्ञान-स्योपगन्तव्यतया तदनुपस्थितिदशायां घटादिपदाच्छाद्बबोधानुपपत्तेः।

तथा च केन रूपेण तत्र शक्तिधीहेतुता?

अत्रोच्यते—तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दबोधे तत्सम्बन्धावच्छिन्नतद्धर्म-निष्ठावच्छेदकताकस्वजन्यबोधविषयत्वप्रकारतानिरूपितेच्छाविशेष्यतात्वावच्छिन्नसंसर्ग-कतत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठधर्मिताऽवच्छेदकताकपदप्रकारकज्ञानत्वेन विषयताविशे-षसंसर्गकार्थविशेष्यकशक्तिज्ञानस्य हेतुता।

ईदृशशक्तिग्रहे च सम्बन्धघटकतयैवावच्छिन्नत्वांशे समवायभानात्, स्वरूपतोऽपि

द्वितीयेच्छापक्षेऽपि तादृशेच्छीया या घटत्वनिष्ठविशेष्यतानिरूपितावच्छेदकत्व-सम्बन्धावच्छिन्ना बोधविषयत्वनिष्ठा प्रकारत्वावच्छिन्ना प्रकारता तन्निरूपितबोधनिष्ठविषयतायाः परम्परया निरूपकत्वप्रकारकं पदविशेष्यकज्ञानं हेतुः।

तत्र प्रथम आधेयत्वसम्बन्धेन प्रकारत्वांशे, द्वितीये तु विशेष्यत्वांशे घटत्वादेः प्रकारतया भानात् स्वरूपतस्तत्सम्भवात्, जातेः स्वरूपतः समवायेनैव भानमिति त्वनुव्यवसायादौ व्यभिचारेण वक्तुमशक्यमिति भावः।

प्रकारत्वासम्भवेनेति। समवायस्य जात्यखण्डोपाध्यतिरिक्तत्वादिति हृदयम्। तदनुपस्थि-तिदशायां=समवायत्वानुपस्थितिदशायाम्; सिद्धान्तयति—अत्रोच्यत इत्यादि। स्वजन्येति। स्वपदं घटादिपदपरम्। हेतुतेति। तत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठप्रकारताकशाब्दबोधं प्रति तत्सम्बन्धा-वच्छिन्नतद्धर्मनिष्ठावच्छेदकताकविषयतानिष्ठा या स्वनिष्ठनिरूपितत्वसम्बन्धावच्छिन्नविषयता-निरूपितजन्यतानिष्ठविषयतानिरूपितबोधनिष्ठविषयतानिरूपितविषयतात्वावच्छिन्नप्रकारता तन्निरूपितसङ्केतीयविशेष्यतासम्बन्धेन घटादिपदप्रकारकतत्सम्बन्धावच्छिन्नतद्धर्मावच्छि-न्नार्थनिष्ठविशेष्यताशालिज्ञानत्वेन हेतुतेत्यर्थः। स्वपदं घटादिपदपरम्।

एवञ्च यथाश्रुतस्वजन्यबोधविषयतानिवेशे घटपटपदोभयजन्यघटपटोभयविषयकस-मूहालम्बनज्ञानमादाय स्वजन्यबोधीयघटत्वावच्छिन्नविषयतानिष्ठेच्छीयप्रकारताकविशेष्यतासम्बन्धेन घटपदवान् पट इति ज्ञानं धृत्वा नातिप्रसङ्गः।

सम्बन्धघटकतयेति। तथा च संसर्गांशे विशेषणस्य विशेषणत्वाख्यविषयता स्वीक्रियते; न तु प्रकारत्वम्, उपस्थितेः प्रकारतां प्रति प्रयोजकत्वादिति भावः।

तस्य तथाभानसम्भवेन समवायत्वोपस्थितेर्नापेक्षेति सामञ्जस्यम्।

द्रव्यपदाद् द्रव्यं बोद्धव्यमित्याकारताप्रयोजकद्रव्यपदजन्यबोधविषयत्वीयभगवदिच्छाप्रकारता न घटत्वावच्छिन्नविषयत्वनिष्ठा; अपि तु द्रव्यत्वावच्छिन्नविषयत्वनिष्ठैवेति द्रव्यपदजन्यबोधीयघटत्वावच्छिन्नविषयत्वनिष्ठप्रकारतानिरूपितभगवदिच्छाविशेष्यतात्वावच्छिन्नसंसर्गेण घटत्वावच्छिन्नविशेष्यकद्रव्यपदप्रकारज्ञानं संसर्गताऽवच्छेदकघटकघटत्वावच्छिन्नत्वांशे भ्रमः।

न च द्रव्यपदजन्यविभक्त्युपस्थापितैकत्वादिप्रकारकद्रव्यत्वावच्छिन्नविशेष्यकबोधीया यैकत्वावच्छिन्नद्रव्यत्वावच्छिन्नविषयता साऽपि द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयतात्वेन भगवदिच्छाविषयः, एवञ्च द्रव्यपदजन्यबोधीयैकत्वावच्छिन्नविषयत्वप्रकारतानिरूपितभगवदिच्छाविशेष्यतासम्बन्धेनैकत्वादिमतो द्रव्यपदवत्त्वाद् द्रव्यपदादभ्रान्तस्य पदान्तरानुपस्थितैकत्वप्रकारेणापि शाब्दबोधप्रसङ्गो दुर्वार एवेति वाच्यम्?

स्वरूपत इति। जात्यखण्डोपाध्यतिरिक्तपदार्थस्य प्रकारतयैव स्वरूपतो भानानङ्गीकारादिति हृदयम्।

इत्याकारतेति। तादृशशब्दजन्यबोधीयविषयतैकरूपविषयता, तादृशशब्दोच्चारणप्रयोजकबुबोधयिषीयविलक्षणविषयता वेत्यर्थः, तथा च तादृशवाक्येन द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयतावद् द्रव्यमित्याकारिकेच्छैवाभिलप्यत इति भावः।

भ्रम इति। तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठविशेषणताकत्वरूपभ्रमत्वावच्छिन्न इत्यर्थः। न चेति।

न च द्रव्यमेकत्ववदिति ज्ञानीयद्रव्यत्वावच्छिन्नविशेष्यताया एकत्वप्रकारतानिरूपितत्वं न त्वेकत्वावच्छिन्नत्वं कुत एतत्सङ्गतिरिति वाच्यम्?

विशेष्यतायाः प्रकारावच्छिन्नत्वमभ्युपेत्य तथोक्तत्वात्, तच्च हेत्वाभासे स्वयमेव प्रत्यक्षमणौ चोक्तम्।

केचित्तु—द्रव्यं गगनमित्यादिवाक्यजन्यगगनप्रकारतानिरूपितैकत्वद्रव्यत्वोभयधर्मावच्छिन्नविशेष्यताशालिज्ञानमादाय तदुक्तमित्याहुः।

द्रव्यं घट इत्यादिवाक्यत एकवचनेनैकत्वोपस्थितिकाल एकत्वेन द्रव्यबोधस्येष्टत्वादाह—पदान्तरानुपस्थितैकत्वेति। प्रसङ्ग इति। द्रव्यगुणः शब्द इत्यादावित्यर्थः।

तादृशविशेष्यतात्वेन तस्य सम्बन्धत्वानुपगमाद्।

अथ वा तत्पदजन्यतद्धर्मप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नत्वावच्छिन्नत्वेन स्वजन्यबोधविषयत्वप्रकारताऽवगाहितादृशप्रकारतानिरूपितविशेष्यतासंसर्गकपद-प्रकारकं ज्ञानं हेतुः।

एवञ्चैकत्वादिप्रकारकद्रव्यादिपदजन्यबोधजनकशक्तिग्रहेण द्रव्यादिपदजन्य-बोधविषयत्वीयद्रव्यत्वाद्यवच्छिन्नत्वावच्छिन्नत्वविशिष्टभगवदिच्छाप्रकारतायां बाधि-तस्यैकत्वावच्छिन्नत्वावच्छिन्नत्वस्यावगाहनात् तस्य भ्रमत्वम्।

यत्तु—पदार्थांशे घटत्वादेः शाब्दबोधप्रकारतायां तदंशे तत्तत्पदशक्यताऽवच्छेद-कत्वमेव प्रयोजकं, शक्यताऽवच्छेदकत्वञ्च तत्पदजन्यबोधविषयत्वप्रकारतानिरू-

---

तादृशविशेष्यतात्वेनेति। जन्यबोधीयैकत्वावच्छिन्नविषयताप्रकारतानिरूपितभग-वदिच्छाविशेष्यतात्वेन। तस्येति। द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयताप्रकारतानिरूपित-भगवदिच्छाविशेष्यत्वस्येत्यर्थः, द्रव्यपदत्वावच्छिन्नप्रतियोगित्वेनेति शेषः, तेनैकवचननामादिपद-जन्यतादृशबोधमादाय तादृशविशेष्यत्वस्यैकत्वावच्छिन्नत्वघटिततादृशविशेष्यतात्वेनैकवचनादेः संसर्गत्वेऽपि द्रव्यादिपदस्य तत्प्रतियोगित्वाभावेन तस्य तत्संसर्गावगाहने ज्ञानस्य भ्रमत्वमलीकत्वं वेति भावः।

तुष्यतु दुर्ज्जन इति न्यायेनाह—अथ वेति। तद्धर्मावच्छिन्नत्वावच्छिन्नेति। तथा च घटो घटपदजन्यबोधीयघटत्वावच्छिन्नविषयतावान् भवत्वित्याद्याकारक एव भगवत्सङ्केतो बोधविषयत्वांशे तत्तद्धर्मावच्छिन्नत्वावगाही शक्तिरिति; सा च द्रव्यपदजन्यबोधीयविषयतायामेकत्वाद्यव-च्छिन्नत्वसत्त्वेऽपि न तद्रूपेण तामवगाहत इति।

एवञ्च तत्पदजन्यतद्धर्मप्रकारकशाब्दं प्रति तद्धर्मावच्छिन्नत्वावच्छिन्ना या स्वजन्यबोधीय-विषयतात्वावच्छिन्नप्रकारता; तन्निरूपितेच्छीयविशेष्यतासम्बन्धेन तत्तत्पदप्रकारकार्थविशेष्यकज्ञानं हेतुरेवं सम्बन्धांशेऽपीति।

दीधितिकारमतं दूषयितमुपन्यस्यति—यत्त्विति।

विशेष्यताऽवच्छेदकत्वमिति। ईश्वरेच्छीयविशेष्यताऽवच्छेदकत्वमित्यर्थः। बोधविषयताऽव-च्छेदकतयेति। अत्र विषयतानिरूपितत्वं तृतीयाऽर्थः, तस्य च सङ्केतविषयत्वेऽन्वयः। तादृशेति। तत्पदजन्यबोधीयविषयत्वप्रकारतानिरूपितविशेष्यतेत्यर्थः, तथा च तद्धर्मावच्छिन्नत्वतादृश-विशेष्यतात्वोभयधर्मावच्छिन्नसंसर्गताकशक्तिज्ञानमेव हेतुरिति।

पितविशेष्यताऽवच्छेदकत्वं; न तु बोधविषयताऽवच्छेदकतया सङ्केतविषयत्वरूपं विशेषणविधया वाच्यत्वं, तथा च तद्धर्मप्रकारकशाब्दबोधे तद्धर्मावच्छिन्नत्वविशिष्टतादृशविषयतासंसर्गकशक्तिज्ञानमेव कारणमास्ताम्।

द्रव्यादिपदजन्यबोधविषयत्वप्रकारतानिरूपितद्रव्यत्वावच्छिन्नभगवत्सङ्केतीयविशेष्यतात्वेनैव सम्बन्धता न तु तादृशप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यतात्वेन तादृशप्रकारतानिरूपितभगवदिच्छाविशेष्यतायां द्रव्यत्वादेरेवावच्छेदकत्वं न तु घटत्वादेरित्येव वा स्वीकरणीयमिति नोक्तातिप्रसङ्गः, किं प्रवृत्तिनिमित्तस्य वाच्यत्वोपगमेन? इति शक्यताऽवच्छेदकमवाच्यमेवेति दीधितिकारमतम्।

तन्न शोभनम्–एवं सति शक्तिज्ञानाधुनिकसङ्केतज्ञानयोरेकरूपेणैव हेतुत्वाद् यत्र द्रव्यपदाद् गुणवत्त्वादिना द्रव्यं बोद्धव्यमित्याकाराधुनिकसङ्केतीयद्रव्यत्वाव-

---

एकरूपेणैव हेतुत्वादिति। लाघवात् कारणताऽवच्छेदक ईश्वरीयत्वस्याप्रवेशेन हेतुतानां तुल्यरूपताया अनुभवसिद्धत्वादित्यर्थः।

एतेन शक्त्याधुनिकसङ्केतयोरर्थपदवैलक्षण्येन भिन्नाकारकतयैकरूपेण हेतुत्वादित्यसङ्गतमित्यपि परास्तम्।

एवञ्चाधुनिकस्थलेऽपि तद्धर्मप्रकारकशाब्दबोधे पदजन्यबोधविषयत्वनिष्ठप्रकारताकसङ्केतीयतद्धर्मावच्छिन्नविशेष्यतासम्बन्धेन पदप्रकारकज्ञानत्वेन हेतुत्वं वाच्यमिति भावः।

गुणवत्त्वादिनेति। अत्र तृतीयाऽर्थोऽवच्छिन्नत्वं, तस्य च बोद्धव्यमित्यत्र तव्यप्रत्ययार्थताऽवच्छेदकविषयतायामन्वयः।

तादृशसङ्केतस्येश्वरीयत्वे मानाभावादाह–आधुनिकेति। अनुपपत्तेरिति। गुणवत्त्वस्य सङ्केतीयधर्मिताऽनवच्छेदकत्वादिति भावः।

अथ भगवत्सङ्केताधुनिकसङ्केतयोरेकरूपहेतुत्वेऽपि द्रव्यपदाद् द्रव्यं बोद्धव्यमिति सङ्केतस्य द्रव्यपदजन्यबोधीयविषयतात्वपर्याप्तावच्छेदकताकप्रकारताकसङ्केतीयद्रव्यत्वावच्छिन्नविशेष्यतासम्बन्धेन द्रव्यपदप्रकारकद्रव्यत्वावच्छिन्नविशेष्यताशालिज्ञानत्वेन हेतुत्वे द्रव्यपदाद् गुणवत्त्वेन द्रव्यं बोद्धव्यमित्याकारकसङ्केतीयप्रकारताया गुणवत्त्वावच्छिन्नत्वतादृशविषयतात्वोभयधर्मावच्छिन्नत्वेन द्रव्यपदजन्यबोधीयविषयतात्वेतरधर्मानवच्छिन्नत्वाभावेन न तदापत्तिः।

न च दीधितिकारमते पर्याप्तिनिवेशस्याधिक्येन गौरवमिति वाच्यम्?

द्रव्यत्वादेर्वाच्यत्वमतेऽपि द्रव्यत्वावच्छिन्नत्वद्रव्यदजन्यबोधीयविषयतात्वोभयधर्म-

च्छिन्नविषयता द्रव्ये गृहीता; तत्र तादृशसङ्केतग्रहाद् द्रव्यत्वेन द्रव्यबोधापत्तेर्गुणवत्त्वादिप्रकारकशाब्दबोधानुपपत्तेश्च दुर्वारत्वात्।

इति सामान्यकाण्डः

पर्याप्तावच्छेदकताकत्वस्य प्रकारतायामवश्यं निवेशनीयत्वेन गौरवानवकाशाद्, अन्यथा द्रव्यपदाद् गुणवद्द्रव्यत्वेन द्रव्यं बोद्धव्यमित्याद्याधुनिकसङ्केतग्रहाद् ([1]द्रव्यत्वमात्रप्रकारेण द्रव्यबोधानुदयेन व्यभिचारापत्तेः)।

न च तादृशाधुनिकसङ्केतज्ञानस्य तादृशशक्तिज्ञानकारणान्तर्भावमवलम्ब्य नोक्तापत्तिर्दत्ता; अपि तु फलबलेन तादृशज्ञानस्य स्वतन्त्रभवदभिमतकारणताकल्पनेनेति वाच्यम्?

यस्मादापत्तिदानाय न केनचित् किमपि कल्प्यते तस्मात् फलोत्पादोऽपि सविवादः; अनुभवेनाप्येकशेषस्य दुष्करत्वं च।

नन्वेवमपि तादृशापत्तिर्मा भूत् किन्तु दीधितिकारमते तादृशाधुनिकसङ्केतग्रहाद् गुणवत्त्वादिना द्रव्यादेर्बोधानुपपत्तिदोषो दुर्वार इति चेद्?

न–तस्येष्टत्वाद्, द्रव्यपदाद् गुणवद्बोद्धव्यमित्याकारकाधुनिकसङ्केतेनैव तादृशबोधोदयाद्।

अथ वा तादृशसङ्केतग्रहात् तादृशबोधस्यानुभवविषयत्वं चेत्? अगत्या स्वजन्यबोधीयगुणवत्त्वावच्छिन्नविषयतात्वावच्छिन्नप्रकारताकसङ्केतीयविशेष्यतासम्बन्धेन द्रव्यपदप्रकारकगुणवत्त्वावच्छिन्नविशेष्यताकज्ञानत्वेन स्वातन्त्र्येणैव हेतुतायाः कल्पनेन तादृशसङ्केतग्रहात्तादृशबोधजननात् स्यादेवमेतदतिरिक्तकल्पने गौरवं न स्याद्, भट्टाचार्यमतेऽपि तत्कल्पनाया आवश्यकत्वाद्।

अथैवमपि तद्धर्मप्रकारकशाब्दबोधं प्रति सङ्केतीयतादृशविशेष्यतायास्तद्धर्मावच्छिन्नत्वेनावगाहिज्ञानमेव कारणमिति नियमो भज्येतेति चेद्?

न–शक्तिज्ञान एव तादृशनियमस्वीकाराद्।

न च तथाऽपि द्रव्यपदाद् गुणवद् बोद्धव्यमिति सङ्केतग्रहात् तादृशबोधस्य भट्टाचार्येणास्वीकारात् तादृशकारणत्वाकल्पनेन लाघवमिति वाच्यम्?

तथा सति दीधितिकारेणापि द्रव्यपदाद् गुणवत्त्वेन द्रव्यं बोद्धव्यमित्याकारकसङ्केतग्रहाद् गुणवद्बोधस्यानङ्गीकारेण तदकल्पनाल्लाघवस्य तुल्यत्वादिति यदि सूक्ष्ममीक्ष्यते; तदा दीधितिकारमतं ब्रह्मणोऽपि दूषयितुमशक्यमिति ध्येयम्।

इति सामान्यकाण्डविवृतिः।

---

१. एतदन्तर्गतं-केवलद्रव्यत्प्रकारकबोधापत्तेः, इति पाठान्तरम्।

विशेषकाण्डः

*अथ पदार्थांश इव प्रकारीभूतधर्मांशेऽपि वाच्यत्वग्रहस्यापेक्षितत्व आकाशपदाच्छब्दाश्रयतया बोधो न स्यात् शब्दाश्रयत्वस्य, आकाशपदावाच्यतायाः सिद्धान्तसिद्धत्वाद् अत एव तद्वारणायैव प्रवृत्तिनिमित्तलक्षणे वाच्यत्वे सतीति विशेषणोपादानमिति चेद्?

न–शब्दाश्रयत्वस्याकाशपदवाच्यत्वमनङ्गीकर्तृभिः प्राचीनैराकाशपदादाकाशांशे तदुपस्थाप्यधर्माप्रकारकशाब्दबुद्धेरेवोपगमात्।

तदुक्तम्–"अस्तु वा पदादपि निर्विकल्पकमिति," निर्विकल्पकत्वञ्च तदंशे तत्पदोपस्थाप्याप्रकारकत्वम्; न तु तदंशे सामान्यतो निष्प्रकारकत्वम्, विभक्त्युपस्थापितैकत्वादीनां तदंशे प्रकारताया आवश्यकत्वात्, तेन समं पदार्थान्तरस्य संसर्गानवगाहने तादृशबोधस्य शाब्दत्वासम्भवाच्च।

सिद्धान्तसिद्धत्वादिति। शास्त्रकाराद्यवधारणविषयत्वादित्यर्थः। तद्वारणायेति। शब्दाश्रयत्वे प्रवृत्तिनिमित्तत्ववारणायेत्यर्थः। तदुपस्थायेति। आकाशपदोपस्थाप्येत्यर्थः। धर्माप्रकारकेति। स्वजन्यबोधीयनिरवच्छिन्नविषयतानिष्ठप्रकारतानिरूपितसङ्केतीयविशेष्यतासम्बन्धेनाकाशपदवान् शब्दाश्रय इत्याकारकज्ञानत्वेनाकाशनिष्ठनिरवच्छिन्नविषयताशालिशाब्दं प्रति हेतुत्वावगमादिति भावः।

तदंश इति। तत्पदशक्यांश इत्यर्थः। तत्पदोपस्थाप्येति। आकाशादिपदोपस्थाप्यशब्दाश्रयत्वेत्यर्थः।

नन्वाकाशैकत्वयोः समूहालम्बनबोधस्वीकारे का क्षतिरिति? अतआह–तेनेति। आकाशेनेत्यर्थः।

एतद्व्याख्याने शब्दाश्रयत्वप्रकारकोपस्थितेः स्वरूपत आकाशशाब्दजननेऽनुभवविरोधो, निर्विकल्पकपदस्य संसर्गानवगाहिज्ञानरूपमुख्यार्थपरित्यागतो न्यूनता च स्यादित्यत आह–वस्तुतस्त्विति। तत्पदेति। आकाशपदेत्यर्थः। तदुपस्थाप्यं यद्वस्तु=तदविशेषितधर्मी,

---

* प्राचीनपुस्तकानुरोधादध्यापकसंप्रदायानुसारात् शब्दविशेषशक्तिविचारारम्भस्वारस्याच्चेत एव विशेषकाण्डारम्भः।

वस्तुतस्तु—तत्र निर्विकल्पकपदं तत्पदोपस्थाप्यवस्त्वविशेषितधर्मिविषयक-शाब्दानुभवजनकनिर्विकल्पस्मरणपरम्; अत एव तत्र निर्विकल्पकरूपस्य स्मरणस्यानुपपत्तिः; अनुभवस्य स्वसमानप्रकारकमात्रस्मृतिजनकत्वादित्याशङ्क्य प्रकारान्तरेण तादृशस्मरणमुपपादितं मिश्रैः।

अत्र च मते जात्यतिरिक्तस्य तस्य स्वरूपतः पदार्थानुभवप्रकारत्वासम्भवादाकाशवासीत्यादौ शाब्दबोधानुपपत्तिः, अन्वयिताऽवच्छेदकावच्छिन्न एव पदार्थान्तरान्वय इति नियमानुपपत्तिश्चेति पदार्थ इव पदार्थप्रकारीभूतधर्मांशेऽपि शक्तिग्रहापेक्षायां गोत्वादेर्गवादिपदवाच्यत्ववत् शब्दाश्रयत्वस्याकाशपदवाच्यत्वमस्त्येव।

अत एव दीधितिकृता गुणटिप्पण्यां रूपग्रन्थे "अत्रेदं तत्त्वमि"त्यादिना गोत्वादिना शब्दाश्रयत्वस्याविशेषं व्युत्पाद्य प्रकाशस्थप्रवृत्तिनिमित्तलक्षणे वाच्यत्ववि-शेषणस्योपादानं दूषितमेव।

प्रत्यक्षमणिदीधितौ च पदार्थांशे गोत्वादेः प्रकारतायां शक्यताऽवच्छेदकत्वस्य प्रयोजकत्वमुपगम्य शक्यताऽवच्छेदके शक्तिर्दूषितैव, तत्रोक्तानुपपत्तिश्चिन्त्या।

यत्तु—शक्त्याऽऽकाशपदादष्टद्रव्यातिरिक्तद्रव्यत्वादिनाऽप्याकाशबोधो भवति

तद्विषयकशाब्दानुभवजनकेत्यर्थः। प्रकारान्तरेणेति। तद्धर्मनिष्ठप्रकारत्वान्यप्रकारत्वानिरूपिततद्धर्मिनिष्ठविषयताशालिस्मरणं प्रति तद्धर्मनिष्ठप्रकारतानिरूपिततद्धर्मिनिष्ठविषेष्यता-शाल्यनुभवत्वेन कारणताकल्पनेनेत्यर्थः, तादृशस्मरणञ्च यदा प्रकारांशे नोद्बोधकस्य धर्म्यंश एवोद्बोधकस्य सम्बलनं तदैव, तत्कल्प्यते च फलबलादिति मिश्राणामाशयः।

अत्र च मत इति। आकाशादिपदानां स्वरूपतः शक्तिवादिमतइत्यर्थः। जात्येति। जातिपदमखण्डोपाध्युपलक्षकं, तेन जात्यखण्डोपाध्यतिरिक्तस्येत्यर्थः। तस्य=आकाशस्य, स्मृतौ स्वरूपत आकाशस्य प्रकारत्वसम्भवादाह—पदार्थानुभव इति। प्रकारत्वासम्भवादिति। योग्यताज्ञानादीनामाकाशांशे किञ्चिद्धर्मभानं विना जननासम्भवात्, तत्र यस्य यद्रूपेण भानं तस्य तद्रूपेणैव शाब्दबोधजननादिति भावः।

जात्यखण्डोपाध्यतिरिक्तपदार्थस्यापि स्वरूपतः कथञ्चिद्भानाङ्गीकारेणात्र बाधनिश्चयाप्रति-बध्यतया योग्यताज्ञानस्य कारणत्वाकल्पनेन च लक्षणया वा तदुपपादने त्वाह—अन्वयिताऽवच्छेदकेति। गगनमित्यादिवाक्यजन्यबोधानुरोधादिति, इष्टापत्तौ शब्दाश्रयो नैक इति बाधनिश्चयकाले सर्वानुभवविरुद्धस्य तादृशबोधस्यापत्तेरिति भावः।

न तु नियमतः शब्दाश्रयत्वेनैव तथा सत्याकाशः शब्दाश्रय इति सहप्रयोगस्य मुख्यताऽनुपपत्तिः, प्रत्येकं नानाधर्मविशिष्ट एवाकाशे तत्पदस्य नानाशक्तिकल्पनं तु न सम्भवति नानाधर्मावच्छिन्नैकधर्मिण्येकपदवाच्यतायाः क्वाप्यदृष्टत्वादिति शब्दाश्रयत्वोपलक्षित एवाकाशपदशक्तिरिति प्राचीनमतमेव साधु।

उपलक्षणस्यापि विशिष्टवाचकपदजन्यशाब्दबोधे प्रकारत्वे न किञ्चिद् बाधकम्।

न च शब्दाश्रयत्वस्योपलक्षणत्वे तस्येवाविशेषात्प्रमेयत्वादरेप्याकाशपद जन्यानुभवप्रकारताऽऽपत्तिरिति वाच्यम्?

तत्प्रकारकशाब्दबोधे तदंशेऽनतिप्रसक्तत्वरूपशक्यताऽवच्छेदकत्वावगाहित्वेनोपलक्षिते शक्तिज्ञानस्य हेतुत्वादिति।

तन्न—आकाशः शब्दाश्रय इति सहप्रयोगस्य मुख्यत्वासिद्ध्याऽष्टद्रव्यातिरिक्तद्रव्यत्वाकाशपदवाच्यत्वाद्येकतररूपेण लक्षणाया एव तत्रोपगमाद्।

अत्र दीधितिकृत्समतिं दर्शयति—अतएवेति। शब्दाश्रयत्वस्य शक्यताऽवच्छेदकत्वादेवेत्यर्थः। गुणटिप्पण्यां=गुणप्रकाशटिप्पण्याम्। गोत्वादिनेति। दृष्टान्तेनेत्यर्थः। अविशेषं=तुल्यानुभवयुक्तिकत्वं, व्युत्पाद्य=प्रदर्श्य, पदार्थांश इत्यत्र सप्तम्यर्थो विशेष्यत्वं तस्य च प्रकारतायामित्यत्रान्वयः, शक्यताऽवच्छेदकत्वस्य=सङ्केतीयविशेष्यताऽवच्छेदकत्वस्य, शक्तिः=पदजन्यबोधविषयत्वेन सङ्केतीयविषयत्वम्, उक्तानुपपत्तिः=गुणवत्त्वेन द्रव्यपदादित्याद्यनुपपत्तिः। सहप्रयोगस्येति। एकार्थकपदद्वयप्रयोगस्येत्यर्थ इति केचित्। मुख्यतेति। सा च शक्त्या स्वार्थप्रतिपादकता, अत्राकाशपदस्य शब्दाश्रयस्य शक्यार्थस्य बोधकता न सम्भवति=उद्देश्यताविधेयताऽवच्छेदकयोरैक्येनान्वयानुपपत्तेः, लक्षणयाऽऽकाशपदार्थत्वावच्छिन्नबोधकत्वेऽन्वयोपपत्तावपि मुख्यताहान्यापत्तेरिति भावः। अनतिप्रसक्तेति। न च गगननिष्ठतद्व्यक्तित्वस्य शब्दध्वंसस्य चानतिप्रसक्ततया तत्तद्रूपेणाप्याकाशादिपदाच्छाब्दबोधापत्तिरिति वाच्यम्? इष्टत्वात्। हेतुत्वादिति। एतन्मत आकाशादिपदजन्यबोधविषतावान् भवत्वित्याकारकआकाशविशेष्यको भगवत्सङ्केतः, शाब्दश्रयत्वाद्यन्यूनानतिरिक्तवृत्तिकसङ्केतीयविशेष्यतासम्बन्धेनाकाशपदवान् शब्दाश्रय इत्याद्याकारकं ज्ञानं हेतुरिति भावः। मुख्यत्वासिद्ध्येति। प्रमाणाभावेनेति शेषः। अष्टद्रव्यातिरिक्तेति। पृथिवीत्वादिप्रत्येकधर्मावच्छिन्नभेदाष्टवदित्यर्थः।

ननु पदानां तत्तद्धर्मोपलक्षितावाचकत्वे सुवर्णादितात्पर्येणापि लोकैर्द्रव्यादिपदं प्रयुज्यते तत्र का गतिः? इत्यत आह—एवञ्चेति। पदानामुपलक्षितावाचकत्वे चेत्यर्थः। द्रव्यान्तरवति द्रव्यं

[१]एवञ्च यत्र सुवर्णवहनयोग्यगवादिरूपविशेषपरसामान्यवाचकपदघटितं द्रव्यं नास्ति गौर्नास्तीत्यादिकं वाक्यं प्रयुज्यते; तत्र विशेषधर्मावच्छिन्ने लक्षणैव, विशेषधर्मस्य सामान्यशब्दावाच्यतया शक्त्या तद्रूपप्रकारकबोधानिर्वाहाद्।

एवं यत्र दुःखासम्भिन्नसुखत्वधानकर्मगोत्वादिविशिष्टवाचकं स्वर्गधेन्वादिपदं केवलसुखत्वगोत्वाद्यवच्छिन्नतात्पर्येण प्रयुज्यते; तत्र लक्षणैव, शक्त्या प्रवृत्तिनिमित्तैकदेशं परित्यज्य न बोध इत्यनुभवनिर्वाहाय शुद्धतद्धर्मप्रकारकशाब्दबोधे तदन्यरूपावच्छिन्नत्वानवच्छिन्नबोधविशेषविषयत्वीयप्रकारतात्वेन प्रकारताघटितसम्बन्धावगाहिशक्तिज्ञानस्य कारणत्वमुपगन्तव्यम्।

शक्यताऽवच्छेदके शक्यत्वानभ्युपगन्तृमते तादृशबोधे तद्रूपांशे सङ्केतविशेष्यताऽवच्छेदकतापर्याप्त्यवगाहिज्ञानत्वेन हेतुत्वान्नोक्तातिप्रसङ्ग इति तूक्तानुपपत्त्या हेयम्।

नास्तीति प्रयोगो द्रव्यपरत्वे न सम्भवति; अपि तु सुवर्णादिपरत्व एवेति विशेषसूचनाय नञ्पदघटितवाक्यमुक्तम्, एवं गवान्तरवति गौर्नास्तीति प्रयोगेऽपि बोध्यं, प्रथमे शक्यताऽवच्छेदकं परित्यज्य सुवर्णत्वावच्छिन्ने लक्षणा, द्वितीये तु शक्यताऽवच्छेदकगोत्वघटितहलवहनयोग्यताविशिष्टगोत्वावच्छिन्ने सेति विशेषसूचनाय द्वयमुपात्तम्। बोधानिर्वाहादिति। तथा च तत्पदजन्यतद्धर्मपर्याप्तप्रकारताकशाब्दबोधं प्रति तद्धर्मपर्याप्तावच्छेदकताकत्वस्वजन्यबोधीयविषयतात्वोभयधर्मावच्छिन्नप्रकारताकसङ्केतीयविशेष्यतासम्बन्धेन पदप्रकारकार्थविशेष्यकज्ञानत्वेन हेतुत्वादिति भावः।

न्यूनधर्मावच्छिन्नबोधनस्थलेऽपि लक्षणामाह—एवमिति। उक्तस्थलवदित्यर्थः। दुःखासम्भिन्नेति। तत्त्वञ्च स्वाव्यवहितोत्तरत्वस्वावच्छेदकीभूतशरीरावच्छिन्नत्वस्वसामानाधिकरण्यैतत्त्रितयसम्बन्धेन दुःखविशिष्टान्यत्वम्। शुद्धतद्धर्मेति। तद्धर्मनिष्ठप्रकारतानिरूपिता सती तदन्यधर्मनिष्ठप्रकारत्वानिरूपिता या विशेष्यता तच्छालिशाब्दबोधं प्रति तद्धर्मावच्छिन्नत्वावच्छिन्नतदितरधर्मानवच्छिन्नत्वावच्छिन्नस्वजन्यबोधीयविषयतात्वावच्छिन्नसङ्केतीयप्रकारताकविशेष्यतासम्बन्धेन स्वर्गादिपदवत् सुखमित्याकारकं ज्ञानं हेतुः, हेतुता च तद्धर्मावच्छिन्नत्वावच्छिन्नत्वावच्छिन्ना सती तदितरधर्मावच्छिन्नत्वाभावावच्छिन्नत्वावच्छिन्ना सती स्वजन्यबोधीयविषयतात्वावच्छिन्नत्वावच्छिन्ना सती सङ्केतीयप्रकारतात्वावच्छिन्ना या विशेषणता तन्निरूपितविशेष्यतात्वावच्छिन्न-

---

१. यद्यपि पुस्तकान्तरेषु किलेह "यदि चेत्यादिध्येयमि" त्यन्तपाठोत्तरम् "एवं चेत्यादिहेयमि" त्यन्तः पाठः, तथाऽपि प्रकृतटीकाऽनुरोधादेनयोर्व्यतिव्यवहारः।

यदि चाकाशः शब्दाश्रय इत्यादिवाक्यस्थमाकाशपदं मुख्यमेव निर्द्धर्मिताऽवच्छेदककश्च नान्वयबोधः कुत्रापि, तदाऽऽकाशादिपदात् शक्त्याऽष्टद्रव्यातिरिक्तद्रव्यत्वादिना बोधनिर्वाहाय विशिष्टवाचकाकाशादिपदस्य प्रकारांशे वाच्यत्वानवगाहिशक्तिग्रहस्यैव तद्धर्मावच्छिन्नविशेष्यकतत्तद्धर्मप्रकारकान्वयबोधहेतुत्वमगत्या स्वीकार्यं, विशिष्टवाचकगवादिपदस्य च प्रकारांशे वाच्यत्वावगाहिशक्तिज्ञानमेव तद्धर्मप्रकारकशाब्दबोधहेतुरिति न शक्तिभ्रमलक्षणाग्रहमन्तरेण गवादिपदाद् गोपदवाच्यत्वाद्यवाच्यधर्मप्रकारको बोधः,

आकाशादिपदमिव गवादिपदमपि विशिष्टवाचकमिति भ्रमवतो गवादिपदादवाच्यधर्मप्रकारकबोधानिर्वाहाय तद्धर्मप्रकारकशाब्दबोधे तद्धर्मसामानाधिकरण्यमात्रावगाहितत्पदवाच्यताऽवगाहिग्रहस्य हेतुत्वेऽपि तद्धेतुतायां वाच्यतांऽशे विशेष-

---

संसर्गताकस्वर्गादिपदत्वावच्छिन्नप्रकारताकसुखत्वादिधर्मावच्छिन्नविशेष्यताशालिनिश्चयत्वेनेति ध्येयम्।

दीधितिकारमतेऽप्युक्तापत्तिवारणप्रकारं दर्शयति–शक्यताऽवच्छेदकइति। आकाशपदस्य स्वरूपतः शक्तिवादिनामाचार्याणां मतं परिष्करोति–यदि चेति। तच्च मुख्यत्वे विवादसूचनाय। प्रकारांश इति। स्वजन्यबोधीयविषयतात्वावच्छिन्नप्रकारतानिरूपितसङ्केतीयविशेष्यतासम्बन्धेनाकाशपदप्रकारकशब्दाश्रयत्वावच्छिन्नविशेष्यकज्ञानं शब्दाश्रयत्वप्रकारकशाब्दबोधं प्रति हेतुः,

एवं तादृशविशेष्यतासम्बन्धेनाकाशपदप्रकारकाष्टद्रव्यातिरिक्तद्रव्यत्वावच्छिन्नविशेष्यताक ज्ञानमष्टद्रव्यातिरिक्तद्रव्यत्वप्रकारकशाब्दं प्रति कारणमिति।

एवं रीत्यैव गगनकालदिक्शब्देऽपि हेतुहेतुमद्भावो बोध्यः। गोपदवाच्यत्वादीति। गोपदवाच्यत्वादिरूपो योऽवाच्यधर्मः तत्प्रकारक इत्यर्थः। विशिष्टावाचकमितीति। किञ्चिद्धर्मावच्छिन्नत्वावच्छिन्ना या तत्तत्पदजन्यबोधीयविषयतात्वावच्छिन्ना सङ्केतीयप्रकारता तन्निरूपितविशेष्यतायाः परम्परया निरूपकमितीत्यर्थः, तत्तद्धर्मासामानाधिकरण्यमात्रावगाहीति। अवच्छिन्नत्वसम्बन्धेन गोपदवाच्यत्वादिसमानाधिकरणा या गवादिपदजन्यबोधीयविषयतात्वावच्छिन्ना सङ्केतीयप्रकारता तन्निरूपितविशेष्यतासम्बन्धेन गवादिप्रकारकगोपदवाच्यादिविशेष्यकं ज्ञानं हेतुरिति भावः,[1]

---

१. वस्तुतस्तु–विषयतायामेव तद्धर्मसामानाधिकरण्यावगाही शक्तिग्रहोऽत्र वाच्यो न तु प्रकारतायामवच्छिन्नत्वघटितसामानाधिकरण्यस्यावगाही; तथा सति विषयतायास्तत्तद्व्यक्तित्वानच्छिन्नत्वेनैव भ्रमत्वसम्भवेऽग्रे भ्रमत्वोपपादनवैयर्थ्यात्।

णानन्तर्भावित्वावगाहित्वमप्यवच्छेदकमुपेयतेऽतोऽवाच्यधर्मप्रकारकबोधहेतुगवादिपद-शक्तिग्रहस्य भ्रमत्वनियमः, अतो नाभ्रान्तपुरुषस्य ततस्तादृशबोध इति बोध्यम्।

प्राभाकरास्तु–धेनुपदस्य धानकर्मताविशिष्ट एव शक्तिर्न तु गोत्वमपि विशेषणं, गोत्वस्य शक्त्युपाधित्वेन शक्तिनियन्त्रकत्वाद् धानकर्मत्वस्य महिष्यादिसाधारणत्वेऽपि न धेनुपदात्तद्बोधः।

विशेषणान्तर्भावित्वेति। तादृशकारणताऽवच्छेदककोटौ प्रकारत्वांशे किञ्चिद्धर्माव-च्छिन्नत्वानवच्छिन्नत्वमपि विशेषणीयं; तथा च गवादिपदजन्यबोधीयविषयतात्वावच्छिन्नत्व-किञ्चिद्धर्मावच्छिन्नत्वावच्छिन्नत्वाभावोभयधर्मावच्छिन्नसङ्केतीयप्रकारतात्वावच्छिन्नविशेषणताक-विशेष्यतात्वावच्छिन्नसंसर्गताकगवादिपदत्वावच्छिन्नप्रकारताकगोपदवाच्यत्वाद्यवच्छिन्नविशेष्य-ताकज्ञानत्वेन हेतुतेति, कार्यताऽवच्छेदकञ्च–तादृशविशिष्टवाचकत्वज्ञानाव्यवहितोत्तरगवादिपद-ज्ञानजन्यगोपदार्थत्वादिप्रकारकशाब्दत्वमतो गवादिपदानां गोपदवाच्यत्वादिविशिष्टवाचकत्व-भ्रमजन्यतादृशशाब्दबोधे न व्यभिचारः, विशिष्टशक्तिज्ञानकार्यकारणभावस्तु पूर्वरीत्यैव बोध्यः।

तत्रापि विशिष्टवाचकत्वज्ञानाव्यवहितोत्तरत्वनिवेशान्न व्यभिचारइति ध्येयम्।

भ्रमत्वनियम इति। गोपदादिसङ्केतीयप्रकारतायां किञ्चिद्धर्मावच्छिन्नत्वावच्छिन्नत्वसत्त्वेन तदभावावगाहने भ्रमत्वमेवेति।

शक्त्युपाधिवादिनां गुरूणां मतमुत्थापयति–प्राभारकरास्त्विति। धानकर्मताविशिष्ट एवेति। धानकर्मता च दुग्धपानकर्मता, दुग्धपानञ्च दुग्धप्रतियोगिकविभागजनकत्वे सति दुग्धप्रतियोगि-कगलाधःसंयोगानुकूलो यो व्यापारस्तद्रूपं, तत्कर्मता च तादृशविभागानुयोगित्वं तदाश्रयतया गवादिकं कर्म; अतएव गां धयति स्तनं पिबतीत्यादिकः प्रयोगः।

ननु गवादिपदानां गोत्वादाविव धेनुपदस्य धानकर्मत्वे कुतो न शक्तिरिति चेद्?

न–यस्माद् यद् येन विना न भासते तद्भासकसामग्र्यैव तद्भासयति न तु तद्भानार्थं समग्र्यन्तरं, जातिस्तु व्यक्तिं विना न भासत इति जातिभासकसामग्री व्यक्तिं भासयति; अतो व्यक्तिभाने न सामग्र्यन्तरकल्पनं, धानकर्मता च व्यक्तिं विनाऽपि भासतेऽतस्तद्भानसामग्र्या व्यक्तिभानसम्भवाभावात् तद्भानार्थं धानकर्मताविशिष्टे शक्तिरावश्यकी।

एवकारव्यवच्छेद्यं स्पष्टयति–न तु गोत्वमपीति। विशेषणमिति। शक्ताविति शेषः,

ननु धेनुपदस्य यदि धानकर्मतामात्रविशिष्टे शक्तिस्तदा धानकर्मत्वेन कुतो न महिष्यादीनां धेनुपदशक्यत्वं न वा तद्बोधइति? अत आह–गोत्वस्येति। शक्त्युपाधित्वेनेति। सम्बन्धान्तररूप-

न च धेनुपदाद् गोत्वप्रकारकबोधस्यानुभविकतया धानकर्ममहिष्यादिमति देशे धेनुर्नास्तीति विशेषदर्शिनां प्रयोगस्य मुख्यतया च धेनुपदजन्यबोधे गोत्वभानमवश्यमङ्गीकरणीयं; तथा च धानकर्मत्ववद् गोत्वेऽपि शक्तेरावश्यकतयाऽशक्यस्यापि प्रकारतया शाब्दबोधे भानोपगमे द्रव्यत्वप्रमेयत्वादेरपि प्रकारतया शाब्दबुद्धौ भानापत्तिरिति वाच्यम्?

शाब्दबोधेऽशक्यस्य गोत्वादेः प्रकारतया भाने शक्यताऽवच्छेदकत्वस्य नियामकत्वाद्, गोत्वस्य चाशक्यत्वेऽपि शक्यतायामवच्छेदकताऽऽत्मकसम्बन्धविशेषोपगमाद् द्रव्यत्वादेश्चातथात्वेनातिप्रसङ्गविरहाद्।

न च गोत्वस्य वृषभादिसाधारणस्यातिप्रसक्ततया शक्तौ नावच्छेदकत्वसम्भव इति वाच्यम्?

अवच्छेदकत्वस्य प्रकृतेऽनतिप्रसक्तत्वानियतत्वान्नियतत्वे वा धानकर्मत्वसहितस्यैव तस्यावच्छेदकत्वोपगमाद्।

शक्तिकल्पनस्य धर्मिताऽवच्छेदकत्वेन शक्त्यभावप्रयोजकाभावप्रतियोगित्वेनेत्यर्थः, तत्तु–अशक्यत्वे सति शक्यताऽवच्छेदकत्वमिति तु यावत्, शक्तिनियन्त्रकत्वात्=शक्तिसङ्कोचकत्वात्; तत्सत्ताप्रयोजकस्वसत्ताकत्वादिति तु पर्यवसितम्, तद्बोध इति। महिष्यादिबोध इत्यर्थः, तत्र गोत्वाभावेन शक्त्यभावादिति भावः।

ननु धेनुपदजन्यबोधे गोत्वाभाने महिष्यादिमद्देशे धानकर्मतात्वावच्छिन्नाधिकरणतया धेनुर्नास्तीति प्रयोगानुपपत्तिरतो गोत्वभानमावश्यकं तच्च शक्तिभ्रमेण लक्षणया वोपपादनीयमिति? अत आह–विशेषेति मुख्यतयेति च। समाधत्ते–शाब्दबोध इति। नियामकत्वादिति। तथा च तत्तत्पदजन्यतत्तद्धर्मप्रकारकशाब्दबोधं प्रति तत्तद्धर्मावच्छिन्नशक्यताकत्वसम्बन्धेन तत्तद्धर्मावच्छिन्नप्रकारकपदविशेष्यकज्ञानं हेतुरिति भावः।

नन्वेवं धानकर्मत्वादेः शक्यताऽनवच्छेदकत्वेन प्रकारतया तस्य भानानुपपत्तिरिति चेद्?

न–अग्रे तस्यापि शक्तयाऽवच्छेदकत्वाङ्गीकारात्, प्रकृते=एतन्मते, अनतिप्रसक्तत्वानियतत्वादिति। अवच्छेद्यस्येति शेषः, तथा चावच्छेद्यानतिप्रसक्तत्वाव्याप्यत्वादित्यर्थः, अतिप्रसक्तधर्मेऽप्यवच्छेदकत्वस्वीकारादिति भावः। धानकर्मत्वसहितस्येति। धानकर्मत्वगोत्वयोरेकव्यासज्यवृत्त्यवच्छेदकत्वस्वीकारादिति।

अथैतन्मते पदपदार्थायोरतिरिक्त एव सम्बन्धः शक्तिपदार्थो न त्वीश्वरेच्छारूपः; तैरीश्वरानङ्गीकारेणासम्भवात्; तत्प्रतियोगित्वं शक्यत्वं वाच्यं; प्रकारान्तरस्य दुर्वचत्वात्, तच्च

अथ गोत्वमेव शक्यं धानकर्मत्वमेव शक्त्युपाधिरिति वैपरीत्यमेव कुतो न स्याद्?

वस्तुतो धानकर्मत्वापेक्षया लाघवेन गोत्वस्यैव शक्यत्वमुचितम्, न च गोत्वमतिप्रसक्तं धानकर्मत्वन्तु धानकर्मव्यक्तिभेदेन भिन्नमिति गोनिष्ठं तदनतिप्रसक्तमिति न वैपरीत्यमिति वाच्यम्?

तस्यातिप्रसक्तत्वेऽपि शक्यत्वोपगमे क्षतिविरहाद् वृषभादिबोधस्य शक्त्युपाधिधानकर्मत्वस्यापि प्रकारतया वारणाद्।

न च गोत्वस्य शक्यत्वे जातिशक्त्यैव व्यक्तिभानसम्भवेनान्यलभ्यतया

धानकर्मतावतीव धानकर्मत्वेऽपि स्वीकार्यम्; अन्यथा तस्य शक्यत्वानुपपत्तेः, एवञ्च धानकर्मत्वसहितं गोत्वं तन्न्यूनवृत्त्येव तत्र कुतस्तदवच्छेदकत्वसम्भव इति चेद्?

न—तादृशसम्बन्धप्रतियोगित्वमेकं व्यक्तिनिष्ठम्; अपरञ्च धानकर्मत्ववृत्ति; अतो व्यक्तिवृत्तिप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वस्य तत्र सत्त्वाद्।

एवञ्च शक्तिप्रतियोगित्वे सति शक्तिप्रतियोगिताऽवच्छेदकत्वं विशेषणविषयं शक्यत्वं बोध्यं; तादृशसम्बन्धप्रतियोगिताऽवच्छेदकत्वं विशेषणनिष्ठं शक्यत्वमिति केचिद्।

विशेषणविधया शक्यत्वमेवेतरपदार्थान्वयप्रयोजकम्, अतो न धानकर्मत्वादावितरान्वय इत्यलं विस्तरेण।

शङ्कते—अथेति। शक्यं शक्तिप्रतियोगित्वे सति तदवच्छेदकम्, गोत्वस्यैवेति। गोत्वे निरवच्छिन्नशक्यत्वं वक्तुमर्हत्यतो लाघवमिति भावः। जातिशक्त्यैवेति। प्रभाकरमते यद् येन विना न भासते तद्भासकस्यैव तद्भासकत्वं तद्भासकान्तरकल्पने प्रयोजनविरहो गौरवञ्चेति, तथा च जातिर्व्यक्तिं विना न भासत इति जातिभासकसामग्र्या एव व्यक्तिभासकत्वाद्, धानकर्मत्वस्य तु दोग्धृव्यापारप्रयोज्यदुग्धविभागरूपस्य जातिभिन्नतया व्यक्तिभानं विनाऽपि भानान्न तद्भासकस्य व्यक्तिभासकत्वमिति भावः।

अथ जातिर्व्यक्तिं विना नेत्यस्य व्यक्त्यविषयकज्ञानाविषयत्वं पर्यवसितं वाच्यं; तच्च न सम्भवति, यदा गोत्वादिना गवयादेः प्रत्यक्षादिकं तत्र; गोत्वं नित्यमित्यत्र ज्ञाने च; व्यक्तिभानं विनाऽपि गोत्वादेर्भानादिति चेद्?

न—व्यक्तिविषयतानिरूपितं यत् सांसर्गिकविषयत्वं तदनिरूपितविषयत्वशून्यत्वं व्यक्तिं विनेत्यादेः पर्यवसन्नार्थत्वाद्, अन्यथाख्यात्यनङ्गीकर्तृणां तेषां मते गोत्वादिना गवयादेर्ज्ञाने

गवादिपदव्यक्तिशक्त्युच्छेदप्रसङ्गः; तथा च धानकर्मत्वस्य शक्यताऽवच्छेदकत्वानुपपत्त्या वृषभादिबोधो दुर्वार एवेति वाच्यम्?

एतदनुरोधेनापि व्यक्तौ शक्तिस्वीकारसम्भवादिति चेद्?

न–यद्धर्मविशिष्टे शक्तिस्तद्धर्माश्रयस्य यावतः शक्यत्वनियमेन गोत्वस्य शक्यत्वे वृषभादेरपि तथात्वापत्तेः, धानकर्मताविशिष्टाया गोः शक्यत्वे च गोनिष्ठधानकर्मता-व्यक्तीनामेव विशेषणतया; तासाञ्च महिष्यादिव्यावृत्ततया महिष्यादेश्च शक्यताऽऽपत्ति-विरहादिति वदन्ति।

तन्मते यद्यपि शक्तिज्ञानाधुनिकसङ्केतज्ञानयोः कारणताभेदेन गौरवं न बाधकं; भगवद्विद्वेषिणां मीमांसकानां शक्तेः सङ्केतानात्मकतया तयोरेककारणतायाः कथमप्य-

---

गोत्वादिवैशिष्ट्यभानेन तत्सम्भवाद् गोत्वं नित्यमित्यादावपि गवेतरावृत्तित्वरूपगोत्वत्वादेर्भानेन तत्र गवादेर्भानाच्चेति।

वस्तुतस्तु व्यक्तिविषयत्वानिरूपितशाब्दविषयताशून्यत्वं तादृशप्रकारताशून्यत्वं वा तत्पर्यवसितार्थो वाच्यः; अतो न पूर्वोक्तदोषः।

एतेन गोत्वेन गवयज्ञानोत्तरं गोत्वेन गवयं जानामीत्यनुव्यवसायादौ गवादेरभानेऽपि न क्षतिर्लाघवञ्चेति, धानकर्मत्वं पश्येत्यादौ गवादिव्यक्तिभानं विनाऽपि तद्भानान्न धानकर्मत्वभासक-सामग्र्या व्यक्तिभासकत्वमिति निगर्वः।

गोत्वकर्मत्वं गोकर्मत्वं विनाऽनुपपन्नमिति ज्ञानसहकृतशाब्दसामग्र्येव व्यक्तिं भासयतीति केचित्।

शक्यताऽवच्छेदकत्वानुपपत्त्येति। धानकर्मत्वे गोत्वनिष्ठशक्यत्वसामानाधिकरण्याभावेन तदसम्भवादित्याशयः, तदनुरोधेनापीत्यत्रापिशब्दो व्यक्तावित्यनन्तरं योजनीयः, तेन व्यक्तावपीति लाभः। यावत–इति। अन्यथा पश्वादिपदं लोमवति शक्तमिति निश्चयेऽप्येष पशुपदशक्यो न वेति संशयापत्तेरिति भावः। गोनिष्ठेति। धानकर्मतानामाश्रयभेदेन भिन्नत्वादिति भावः।

प्रभाकरमते गोत्वस्य धेनुपदाशक्यत्वे धानकर्मताविशिष्टगोत्वोपलक्षिते शक्तं धेनुपदमित्याकारकशक्तिज्ञानस्य कारणत्वं वाच्यम्; एवञ्च धेनुपदाद् धानकर्म गौर्बोद्धव्येत्याकारका-धुनिकसङ्केतज्ञानस्यापि शाब्दबोधजनकतया पृथक्कारणत्वं वक्तव्यम्।

न्यायमते तु तादृशज्ञानस्य शक्तिज्ञानात्मकतया न पृथक् कारणत्वम्; अतस्तन्मते गौरवं भवति, तादृशगौरवस्य तन्मते सार्वत्रिकतया गत्यन्तरविरहेण स्वीकृततया तद्दोषेण तन्मतदूषणं

सम्भवात्; तथाऽपि गोनिष्ठधानकर्मताव्यक्तीनामनतिप्रसक्तानुगतरूपाभावान्न शक्यत्व-सम्भवः।

न च सामानाधिकरण्यसम्बन्धेन गोत्वमेव धानकर्मत्वसहितं धानकर्मत्वविशेषाणामनुगमकमिति वाच्यम्?

अशक्येन शक्यानुगमे सर्वत्रैव विशेषणशक्त्युच्छेदप्रसङ्गाद्, अतिप्रसक्तेनापि धानकर्मतात्वेन विशिष्टे धानकर्मताविशेषे शक्तिग्रहोपगमे लाघवाद् गोत्वविशिष्टे गोविशेष एव शक्तिर्धानकर्मत्वमेव शक्त्युपाधिरित्येव चितमननुगतेन तत्तद्धानकर्मतात्वेन शक्तिग्रहोपगमे चापूर्वव्यक्त्यलाभप्रसङ्ग इत्यनुपपत्तिश्चिन्त्या।

यथा नानाधर्मविशिष्टैकधर्मिवाचकात् पदात् शक्तिप्रमातोनैकधर्मं परित्यज्य धर्मी प्रतीयते तथा चन्द्रत्वसूर्यत्वादिनानाधर्मविशिष्टनानाधर्मिवाचकपुष्पवन्तादिपदाच्चन्द्रत्वादिकं परित्यज्य न सूर्यत्वादिप्रकारको बोधः।

सन्दर्भविरुद्धमित्याह—तन्मते यद्यपीति। न शक्यत्वसम्भवः, विशेषणविधया शक्यत्वमित्यर्थः, तथा च नानाव्यक्तीनामेकशक्यत्वकल्पनमनुगताननतिप्रसक्तधर्मं विनाऽसम्भवयुक्तिकम्; अन्यथा धेनुपदादेरनन्तगवादिव्यक्तिष्वेकशक्तिकल्पनं शक्तयाऽवच्छेदकं विनाऽपि कुतो न स्यादिति भावः।

सामानाधिकरण्येति। सामानाधिकरण्यसम्बन्धेन धानकर्मत्वे वर्त्तमानं सदिति शेषः। गोत्वमेवेति। वह्नित्वसहितं महानसीयत्वं महानसीयवह्नीनामनुगमकमिवेत्यर्थः। अनुगमकमिति। अनुगतव्यवहारनियामकं, तथा च तादृशधर्मेणैवानुगतशक्यता सिध्येदित्यर्थः, अथ वा धानकर्मताविशेषवृत्त्येकशक्यतासत्त्वप्रयोजकस्वसत्ताकमिति वाऽर्थः। लाघवदिति। धानकर्मत्वापेक्षयेत्यर्थः, शक्त्युपाधिरिति। अशक्यत्वे सति शक्यताऽवच्छेदकः; तज्ज्ञानजन्यनियतशाब्दबोधप्रकारो वेत्यर्थः। अपूर्वेति। शाब्दबोधे पूर्वाननुभूतव्यक्त्यविषयकत्वप्रसङ्ग इत्यर्थः। अयम्भावः—तत्तद्धानकर्मताव्यक्तौ शक्तिस्वीकारे व्यवहारेण यद्यद्धानकर्मताव्यक्तौ शक्तिर्गृहीता; अनन्तरं धेनुपदघटितवाक्यात् तत्तद्धानकर्मत्वव्यक्तेरेव स्मरणेन योग्यताविरहात् शाब्दबोधे भानासम्भव इति।

पुष्पवन्तादिपदानां शक्त्या चन्द्रत्वसूर्यत्वादिप्रत्येकधर्मेण नियतचन्द्रसूर्याद्युभयबोधकत्वस्यानुभवं दृष्टान्तेन द्रढयति—यथा नानेति।

पदादिति। दुःखासम्भिन्नत्वसुखत्वोभयधानकर्मत्वगोत्वोभयादिविशिष्टवाचकस्वर्गधेन्वादिपदादित्यर्थः। पुष्पवन्तादिपदादिति। आदिपदाद् दम्पतिपित्रादिपदपरिग्रहः।

अथात्र हरिपदादिशक्तिज्ञानादिवद् दिवाकरः पुष्पवन्तपदवाच्यइत्याकारकशक्तिज्ञानात् केवलसूर्यत्वप्रकारको बोधो दुर्वारः?

न च पुष्पवन्तपदशक्तिज्ञानेन सूर्यत्वादिप्रकारकशाब्दबोधजनने चन्द्रत्वादिप्रकारकशक्तिज्ञानस्यापि सहकारितोपगमान्नातिप्रसङ्गइति वाच्यम्?

तस्य हर्यादिपदवन्नानाऽर्थत्वग्रहदशायां भ्रान्तस्य केवलसूर्यत्वादिप्रकारकबोधस्याप्युत्पत्तेः।

एवं तत्पदस्य हर्यादिपदवन्नानाधर्मावच्छिन्नवाचकतया नानाऽर्थत्वप्रसङ्गो दुर्वारः।

न चार्थद्वये तस्यैकस्या एव शक्तेरुपगमान्न नानाऽर्थताऽऽपत्तिः; नानाशक्तिमत एव नानाऽर्थत्वोपगमादिति वाच्यम्?

चन्द्रत्वसूर्यत्वयोः प्रत्येकधर्मेण वाच्यत्वे पुष्पवन्तपदं सूर्ये शक्तमित्याकारादिवाच्यत्वग्रहस्यापि प्रमात्वेनाभ्रान्तस्यापि तादृशज्ञानाद् हर्यादिपदजन्यः केवलविष्ण्वादेर्बोध इव शुद्धसूर्यादिबोधो दुर्वारः कारणविरहादर्शनादित्याशङ्कते—अथेति। कारणाभावं सम्पादयन् कार्योत्पत्तिवारणमाशङ्कते—न चेत्यादि। सहकारित्वोपगमादिति। पुष्पवन्तपदशक्तिग्रहजन्यसूर्यत्वप्रकारकशाब्दबोधं प्रति पुष्पवन्तपदं चन्द्रत्वावच्छिन्ने शक्तमिति ज्ञानस्य पुष्पन्तपदशक्तिज्ञानजन्यचन्द्रत्वावच्छिन्नविषयकशाब्दं प्रति पुष्पवन्तपदं सूर्ये शक्तमिति ज्ञानस्य च फलानुरोधेन कारणत्वकल्पनादित्यर्थः। नानाऽर्थताग्रहदशायामिति। सूर्यत्वावच्छिन्ने चन्द्रत्वावच्छिन्ने च पृथग्वाचकताग्रहदशायामित्यर्थः,

उत्पत्तेरिति। तथा च तदानीं चन्द्रत्वप्रकारकशक्तिज्ञानादेरसत्त्वेन व्यभिचारात् तादृशज्ञानस्य सहकारिताया वक्तुमशक्यत्वादिति भावः।

तादृशनानाऽर्थताग्रहस्योक्तसहकारितायामुत्तेजकत्वोपगमेन व्यभिचारवारणसम्भवादाह——एवमिति। नानाधर्मावच्छिन्नेति। एकधर्मिविशेषणताऽनापन्ननानाधर्मावच्छिन्नेत्यर्थः, तेन स्वर्गादिपदानां न तदापत्तिः, नानाऽर्थताऽऽपत्तिः=नानाऽर्थशब्देन व्यवहार्यताऽऽपत्तिः, व्युत्पन्नानां पुष्पवन्तशब्दो नानाऽर्थ इति व्यवहाराभावादिष्टापत्तेरयोगादिति भावः।

यत्तु नानाऽर्थतेत्यस्य नानाशक्यताऽवच्छेदकतात्वेत्यर्थ इति।

तत्तुच्छं—तादृशार्थस्येष्टत्वेनापत्तेरयोगाद्, नानाधर्मावच्छिन्नवाचकतयेति हेत्वभिधानस्यासङ्गत्यापत्तेश्च। शक्यताऽवच्छेदकभेदेनेति। अत्रावच्छेदकत्वं निरवच्छिन्नं; तदाश्रयश्च विशेषण-

शक्यताऽवच्छेकभेदेन शक्तिभेदस्यावश्यकत्वादवच्छेदकभेदस्यावच्छेद्य-भेदनियतत्वाद्, अन्यथा हर्यादिपदेष्वपि शक्त्यैक्यापत्तेः।

अत्र शक्त्याख्यपदपदार्थसम्बन्धान्तरवादिमीमांसकानुयायिनःयथा धानकर्मत्व-गोत्वादिरूपशक्यताऽवच्छेदकभेदेऽपि धेन्वादिपदानां न शक्तिभेदः; अवच्छेदकताया व्यासज्यवृत्तित्वात्, तथा प्रकृते चन्द्रत्वसूर्यत्वयोर्व्यासज्यवृत्तिशक्यताऽवच्छेद-

---

विशेष्यताऽवच्छेदकादिभावानापन्नो ग्राह्यः, तेन पश्वादिपदानां शक्यताऽवच्छेदकस्य लोमादेः स्वर्गादिपदानां शक्यताऽवच्छेदकस्य दुःखासम्भिन्नत्वसुखत्वादेर्भेदेऽपि न क्षतिः।

अवच्छेदकपदस्यावच्छेदकतापरत्वेन लोमादौ दुःखासम्भिन्नत्वसुखत्वादौ चावच्छेदकताया ऐक्येन न क्षतिरित्यप्याहुः।

अवच्छेद्यभेदनियतत्वादिति। अथ तादृशभेदनियतत्वं न तादृशभेदप्रयोज्यत्वं, भेदस्य नित्यत्वेन तदसम्भवाद् नापि तादृशभेदव्याप्यत्वं तद्, अवच्छेद्यभेदाभाववत्यवच्छेद्योऽवच्छेद-कभेदस्य सत्त्वेन तद्विरहाद्, नापि तादृशभेदाभाववद्भिन्नानुयोगिकस्वरूपसम्बन्धावच्छिन्नं तादृश-भेदाभावव्यापकभेदप्रतियोगिताऽवच्छेदकत्वं तदित्यपि सम्यक् तथा सति हर्यादिपदानामपि विष्णुसिंहादिष्वेकशक्तिकत्वेऽपि तादृशव्याप्यत्वसम्भवेन तस्य शक्तिभेदासाधकतयाऽकिञ्चित्क-रत्वापत्तेरतो दुर्वचन्तदिति चेद्?

न–यतो नियतत्वं व्याप्यत्वमेव; तच्चावच्छेद्यभेदाभावव्यापकभेदप्रतियोगिताऽवच्छेद-कत्वम्, अत्राभावश्च स्वप्रतियोगिनिरूपितावच्छेदकतावद्भिन्नानुयोगिकस्वरूपसम्बन्धावच्छिन्न-प्रतियोगिताकः, भेदाभाववत्त्वञ्च-स्वप्रतियोगिभिन्नानुयोगिकस्वरूपसम्बन्धेन ग्राह्यं, स्वम्=अवच्छेद-कभेदः, अतो न हर्यादिपदस्य नानाशक्यताऽवच्छेदकेष्वेकशक्यताऽवच्छेदकत्वसम्भवः, न वाऽवच्छेदकभेदे व्याप्यत्वहानिरिति।

एवञ्च यो यदवच्छेदकः स तद्भेदव्याप्यभेदप्रतियोगीति व्याप्तौ तात्पर्यमिति।

ननु धेन्वादिपदानां शक्यताऽवच्छेदकभेदेऽपि न शक्तिभेद इति तादृशव्याप्तौ व्यभिचार इति चेद् ?

न–गोत्वविशिष्टधानकर्मत्वादौ शक्यताऽवच्छेदत्वकल्पनात् पूर्वोक्तविशेषणेन धर्त्तुमशक्यत्वाच्चेति भावः।

नव्यास्तु–अवच्छेदकभेदसमसंख्यकावच्छेद्यभेदकत्वादिति नियतत्वादित्यन्तस्यार्थ इति प्राहुः।

कतास्वीकारान्न शक्तिभेदः; न वैकं परित्यज्यान्यप्रतीतिः, केवलसूर्यत्वादिप्रकारकबोधे

व्यासज्यवृत्तित्वादिति। एकपर्याप्तिसम्बन्धेनोभयादिवृत्तित्वादित्यर्थः। न शक्तिभेद इति। तथा च शक्यताऽवच्छेदकताभेदस्य शक्तिभेदनियामकत्वादिति हृदयम्।

परित्यज्य=अविषयीकृत्य।

ननु न चैकं परित्यज्यान्यप्रतीतिरिति न युक्तं? पुष्पवन्तपदशक्यताऽवच्छेदकत्वस्य सूर्यत्वचन्द्रत्वोभयपर्याप्तत्वेन सूर्यत्वेऽपि पर्याप्तत्वमतः पुष्पवन्तपदं सूर्यत्वपर्याप्तावच्छेदकताकशक्यताकमित्यादिशक्तिप्रमातः सूर्यादिपदादिव केवलसूर्यादिबोधस्य दुर्वारत्वादिति? अत आह–केवलेत्यादि।

इतरप्रकारतायाः कार्यताऽवच्छेदकत्वाभावसूचनाय प्रथमकेवलपदमिति केचित्।

तन्न सम्यक्–सूर्यत्वपर्याप्तप्रकारताकशाब्दं प्रति सूर्यत्वमात्रपर्याप्तावच्छेदकताकशक्यताकं पदमिति ज्ञानत्वेन हेतुत्वे; यदा पुष्पवन्तपदं चन्द्रत्वसूर्यत्वोभयपर्याप्तावच्छेदकताकशक्तिमदित्यादिज्ञानाच्चन्द्रसूर्योभयविषयकशाब्दबोधो जायते; तत्र सूर्यत्वमात्रपर्याप्तावच्छेदकताकशक्तिज्ञानस्यासत्त्वेन तादृशशाब्दस्य कार्यताऽवच्छेदकाक्रान्तत्वेन च व्यभिचारापत्तेः।

यदि तु केवलेत्यनेन सूर्यत्वभिन्ननिष्ठप्रकारताशून्यत्वे सति सूर्यत्वनिष्ठप्रकारताकशाब्दं प्रति सूर्यत्वमात्रपर्याप्तावच्छेदकताकशक्तिज्ञानत्वेन हेतुत्वं कल्प्यते; तदाऽपि सूर्यपदं सूर्यत्वमात्रपर्याप्तावच्छेदकताकशक्यताकं; चन्द्रपदश्च चन्द्रत्वमात्रपर्याप्तावच्छेदकताकशक्यताकमित्यादिज्ञानात् सूर्याचन्द्रमसावित्यादिवाक्यात् चन्द्रसूर्योभयविषयकशाब्दबोधानुपपत्तिरिति।

अत्र वदन्ति–सूर्यत्वनिष्ठप्रकारताभिन्नं यत् प्रकारताविशिष्टप्रकारत्वं तच्छून्यत्वे सति सूर्यत्वनिष्ठप्रकारताशालिशाब्दं प्रति सूर्यत्वमात्रपर्याप्तावच्छेदकताकशक्यताकसूर्यादिपदज्ञानस्य हेतुत्वम्, प्रकारतावैशिष्ट्यञ्च–स्वभिन्नत्वस्वप्रयोजकशक्तिज्ञानप्रयोज्यत्वोभयसम्बन्धेन, स्वं प्रकारत्वं, पदान्तरशक्तिज्ञानप्रयोज्यचन्द्रत्वादिप्रकारतायां स्वप्रयोजकशक्तिज्ञानप्रयोज्यत्वाभावान्नासङ्ग्रहः, एवमन्यत्राप्यूह्यम्।

केचित्तु–हेतुत्वादिति पञ्चम्यन्तान्तस्य; अत इति पञ्चम्यन्तस्य च द्वयोर्न सूर्यत्वावच्छिन्नान्वयबोधप्रसङ्ग इत्यनेनान्वयः, ज्ञानस्य चेत्यत्रस्थचकारस्यात इत्यनन्तरं योजनया तत् समर्थनीयं, पञ्चम्यन्तान्तस्य प्रथमस्योपादानात् पुष्पवन्तपदस्य तादृशशक्तिभ्रमेण चन्द्राद्यनुपस्थितिकालेऽपि केवलसूर्यस्यान्वयबोधानुभवान्नान्वयबोधप्रसङ्ग इत्यस्यासम्भवयुक्तिकत्वशङ्कानिरास इत्याहुः।

केवलतद्धर्मनिष्ठशक्यतावच्छेदकतापर्याप्त्यवगाहिज्ञानस्य हेतुत्वात्, चन्द्रसूर्यत्वोभयांशे शक्यताऽवच्छेदकतापर्याप्त्यवगाहिज्ञानस्य चोभयप्रकारकबुद्धित्वं कार्यताऽवच्छेदकम्; अतस्तादृशशक्तिज्ञानाच्चन्द्रत्वाद्यवच्छिन्नान्वयबोधौपयिकयोग्यताज्ञानाद्यसत्त्वे न सूर्यत्वाद्यवच्छिन्नान्वयबोधप्रसङ्गः।

नानाऽर्थपदाच्च प्रत्येकधर्मावच्छिन्नस्यापि प्रतीत्या तत्र प्रत्येकमेवावच्छे-

---

यत्तु हेतुत्वादित्यनन्तरं नाभ्रान्तानां पुष्पवन्तपदशक्तिप्रमातः केवलसूर्यत्वप्रकारेण बोध इति पूरणसम्वलितव्याख्यानम्,

तदसद् - उक्तप्रकारेणान्वयसम्भवे पूरणेन व्यख्यानस्यान्यायत्वात्।

उभयप्रकारकबुद्धित्वमिति। चन्द्रत्वप्रकारत्वे सति सूर्यत्वप्रकारत्वशाब्दत्वमित्यर्थः।

ननु पुष्पवन्तपदादिव घटादिपदादपि शक्तिभ्रमेण लक्षयणा वा चन्द्रत्वसूर्यत्वोभयप्रकारकशाब्दोदयाद् व्यभिचारवारणाय तत्तत्पदशक्त्यादिज्ञानाव्यवहितोत्तरत्वस्य कार्यताऽवच्छेदककोटाववश्यं निवेशनीयत्वेन तादृशप्रकारकत्वादेः कार्यताऽवच्छेदककोटौ कुतः प्रवेशइति चेत्?

मैवं—मीमांसकमते तत्तच्छब्दजन्यबोधे तत्तच्छब्दस्यापि भानाङ्गीकारेण तत्तच्छब्दविषयकतादृशशाब्दबोधं प्रति तत्तच्छब्दशक्तिज्ञानस्य हेतुतया व्यभिचारवारणसम्भवात्; लक्षणाग्रहस्याहेतुत्वाच्च।

अथ वा यत्रादौ केवलसूर्यत्वावच्छिन्ने पुष्पवन्तपदस्य शक्तिभ्रमः चन्द्रत्वावच्छिन्नपदार्थान्तरस्य बाधनिश्चयात्मकः; ततः पुष्पवन्तपदं चन्द्रसूर्योभयशक्तमिति शक्तिग्रहः चन्द्रे पदार्थान्तरसम्बन्धाभावज्ञानं भ्रम इति वाक्यविषयकस्मरणात्मकः; ततः चन्द्रे योग्यताज्ञानविरहेण केवलसूर्यस्य शाब्दबोधो योग्यताग्रहात्मकः; ततः चन्द्रसूर्योभयस्य बोधः, तत्क्षणे केवलसूर्यस्यापि बोधप्रसङ्गः; तादृशाब्दस्योभयशक्तिग्रहस्याव्यवहितोत्तरत्ववत्त्वेन कार्यताऽवच्छेदकाक्रान्तत्वाद्, योग्यताज्ञानाद्यात्मकापादकसत्त्वाच्च, चन्द्रत्वप्रकारत्वस्य सूर्यत्वप्रकारत्वस्य च कार्यताऽवच्छेदकत्वे च केवलसूर्यत्वप्रकारकबोधस्य पुष्पवन्तपदशक्तिग्रहकार्यताऽवच्छेदकशून्यत्वमेवातो नापत्तिरिति।

अत इति। तादृशधर्मस्य पुष्पवन्तपदशक्तिज्ञानकार्यताऽवच्छेदकतापर्याप्त्यधिकरणत्वादित्यर्थः। न सूर्यत्वावच्छिन्नान्वयबोधप्रसङ्ग इति। पुष्पवन्तावुष्णकिरणाविति वाक्याच्चन्द्र उष्णकिरणाभाववानिति बाधनिश्चयकाले सूर्य उष्णकिरण इति बोधो न भवतीत्यर्थः, शुद्धसूर्यत्वप्रकारकशाब्दत्वस्य तादृशशक्तिज्ञानकार्यताऽवच्छेदकत्वविरहादिति भावः। नानाऽर्थपदात्=हर्यादिपदात्। प्रत्येकमित्यस्य सप्तम्यन्तस्य विष्णुत्वसूर्यत्वाद्येकैकस्मिन्नित्यर्थः।

दकतापर्याप्तेरवश्योपगन्तव्यतया शक्यताऽवच्छेदकताभेदेन शक्तिभेदः।

अथावच्छेदकताग्राहकमानेन धर्मिनिष्ठैकविशेष्यतानिरूपितविशेषणताऽऽपन्नेष्वेव नानाधर्मेष्ववच्छेदकत्वपर्याप्तिर्गृह्यतेऽतो महानसीयो नास्ति वह्निर्नास्तीत्याकारकं महानसीयत्ववह्नित्वादिपुरस्कारेण पृथक्-पृथक् प्रतियोगिविषयकं ज्ञानं महानसीयत्व- वह्नित्वादिपर्याप्तप्रतियोगिताऽवच्छेदकताकं विशेषाभावं नावगाहते; अपि तु शुद्धवह्नित्वावच्छिन्नाभावादिकमेवेति कथं दिवाकरनिशाकरशक्तं पुष्पवन्तपदमित्यादिशक्तिग्रहे चन्द्रत्वसूर्यत्वोभयस्मिन् शक्यताऽवच्छेदकत्वपर्याप्तिभानं; तत्र धर्मिणोश्चन्द्रसूर्ययोर्भेदेन तन्निष्ठविशेष्यताया ऐक्यासम्भवादिति चेद्?

न—यतो यत्रावच्छेदकीभूतव्यासज्यवृत्तिधर्मान्तरधर्मिताऽवच्छेदकतया धर्मद्वयादेर्भानं; तत्र विभिन्नधर्मिविशेषणताऽऽपन्नेष्वपि तावद्धर्मेष्वेकावच्छेद्यनिरूपितावच्छेदकतापर्याप्तिः प्रतीयते।

कथमन्यथा घटपटौ न स्त इत्याकारकोभयत्वावच्छिन्नाभावप्रतीतौ घटपटादिरूपप्रतियोगिविषयताया भेदेऽप्यभावविषयताया ऐक्येन समूहालम्बनविलक्षणायामुभयत्वादिधर्मिताऽवच्छेदकतया भासमानघटत्वादिषु तादृशाभावप्रतियोगिताऽवच्छेद-

---

ननु महानसीयत्ववह्नित्वादिधर्मद्वयादिष्वेकप्रतियोगिताऽवच्छेदकत्वं विना महानसीयवह्निर्नास्तीत्यादिप्रतीतेः प्रत्येकाभावावगाहिप्रतीतितो वैलक्षण्यं नोपपद्यते; अतो महानसीयत्ववह्नित्वादिधर्मद्वयादिष्वेकावच्छेदकत्वं सिध्यतु; पुष्पवन्तपदशक्यताऽवच्छेदकत्वावगाहिनी विलक्षणा प्रतीतिर्नास्त्यतः चन्द्रत्वसूर्यत्वधर्मद्वयादिष्वेकावच्छेदकत्वं कुतः सिध्येद्? इत्याशङ्कते— अथेत्यादि।

अवच्छेदकताग्राहकेति। अवच्छेदकतासाधकप्रत्यक्षादिनेत्यर्थः। धर्मिनिष्ठैकविशेष्यतेति। तथा च वह्निमति पर्वते वह्निशून्ये च महानसे महानसीयवह्निर्नास्तीति प्रतीतिर्जायते किन्तु महानसीयो नास्ति वह्निर्नास्तीति प्रतीतिस्तु न जायते; अत एतत्समूहालम्बनप्रतीतितः पूर्वप्रतीतौ वह्निनिष्ठैकविशेष्यतानिरूपितः प्रकारतारूपो विशेषः स्वीकार्य इति वह्निनिष्ठैकप्रतियोगिताऽवच्छेदकतापर्याप्त्यधिकरणत्वं महानसीयत्ववह्नित्वोभयस्मिंस्तत्रैव, अन्यथा वह्निमति पर्वतादौ तादृशप्रतीतिर्न स्यादिति भावः।

दिवाकरनिशाकरशक्तमित्यादि। अयम्भावः—अनेकधर्मिणोऽनेकविशेषणकतया भानेन तादृशशक्तिज्ञानस्य समूहालम्बनतयाऽनुभूयमानत्वेन नैकशक्तिविषयत्वसंभवः, दृष्टान्तान्तरेणोभयत्वभानाङ्गीकारेण च समूहालम्बनज्ञानात् तस्य विलक्षणत्वस्थापनेनोत्तरयति——यतो यत्रेत्यादिना।

कत्वपर्याप्तिभानम्?

एवञ्च दिवाकरनिशाकरयोः शक्तमेतत्पदमित्याकारकग्रहे शक्तिविषयताया ऐक्येन समूहालम्बनविलक्षण उभयत्वधर्मिताऽवच्छेदकताऽऽपन्नचन्द्रत्वसूर्यत्वयोरेकशक्यताऽवच्छेदकत्वपर्याप्तिभानमविरुद्धमिति न दोषः।

न चैवमुभयाभावप्रतियोगितायामुभयत्वस्येव प्रकृत उभयत्वस्याप्यवच्छेदककोटिप्रवेशप्रसङ्ग इति वाच्यम्?

अभावबुद्धौ प्रतियोग्यंश उपलक्षणस्याप्रकारत्वनियमादुभयत्वस्य प्रतियोगिताऽवच्छेदकत्वध्रौव्यात्।

अवच्छेदकीभूतेति। प्रतियोगित्वादिसम्बन्धावच्छिन्नप्रकारताऽवच्छेदकीभूतेत्यर्थः, तादृशशक्तिज्ञानएकविशेष्यताकत्वस्वीकारे बाधकमाह--घटपटौ न स्त इति। तादृशप्रतीतावुभयत्वादिव्यासज्यवृत्तिधर्म एव द्वयोरेकमित्यादिरीत्या घटत्वावच्छिन्ने पटत्वावच्छिन्ने च भासमानः सन् तत्तद्धर्मावच्छिन्नप्रतियोगिताऽवच्छेदकतया भासतेऽतस्तादृशप्रतीतिः प्रत्येकधर्मावच्छिन्नप्रतियोगिताकाभावतो विलक्षणोभयाभावावगाहिनी घटत्वादिप्रत्येकधर्मावच्छिन्नप्रकारताकनिश्चयेन न बाध्यते; तस्माच्च घटत्वपटत्वोभयत्वादित्रितयादिधर्मपर्याप्तैकावच्छेदकतानिरूपितैकप्रतियोगितासिद्धिरिति भावः।

एतच्च प्रात्यक्षिकप्रतीत्यभिप्रायेण, तादृशशाब्दे तु घटपटोभयत्वावच्छिन्ने वृत्तित्वाभावः प्रतीयते; अन्यथा स्त इत्यत्र द्विवचनानुपपत्तेः, आख्यातार्थविशेष्यबोधकपदस्यैव तत्समानवचनकत्वनियमादिति शाब्दाभिप्रायेणाप्येतत्सम्भवाच्च।

उपलक्षणस्येति। अभावप्रतियोगिताऽवच्छेदकताऽनापन्नस्येत्यर्थः, अन्यथा महानसीयवह्निर्नास्ति विशिष्टसत्ता नास्तीत्यादिप्रतीतेरपि वन्ह्यादिसामान्याभाववगाहिताऽऽपत्तेरिति भावः।

उपलक्षणस्य=शक्यताऽनवच्छेदकत्वनियतशक्तिनिष्ठविशेष्यताकप्रकारताऽऽश्रयस्य, शक्यताऽनच्छेदकत्वादिति। तदादिपदानां बुद्धिस्थत्वादेरिवेति भावः।

ननूभयत्वस्य शक्यांश उपलक्षणतया भानोपगमेन शक्तेरैक्यकल्पना यदि स्यात् तदा धेन्वादिपदानामपि गोत्वधानकर्मत्वादेरप्युपलक्षणतया गवादिनानाव्यक्तिषु शक्तेरैक्यं स्यात्; स्याच्च गोत्वधानकर्मत्वादौ शक्यताऽवच्छेदकत्ववैयर्थ्यमिति? अत आह=अस्तु वेति।

उभयत्वसहितमिति। तथा चोभयत्वचन्द्रत्वसूर्यत्वैतत्त्रितयमेव पुष्पवन्तपदशक्यताऽवच्छेदकमित्यर्थः।

शक्तिग्रहे च शक्यांश उपलक्षणस्योभयत्वस्य प्रकारत्वोपगमेन तस्य शक्यताऽनवच्छेकत्वाद्।

अस्तु वा प्रकृत उभयत्वसहितमेव चन्द्रत्वसूर्यत्वोभयं शक्यताऽवच्छेदकं; द्वावित्यत्रेव पुष्पवन्तावित्यत्रापि प्रकृतिविभक्तिभ्यामुपस्थापितस्य सकृदेव भानं; विरुद्धयोरेकावच्छेदकत्वपर्याप्तिरपि घटत्वपटत्वाद्योरुभयाभावप्रतियोगिताऽवच्छेदकत्वपर्याप्तिवत् प्रकृते न विरुध्यते।

न च घटपटौ न स्त इत्यत्रोभयत्व एव प्रतियोगिताऽवच्छेदकत्वं भासते न तु घटत्वपटत्वादाविति वाच्यम्?

केवलोभयत्वे तादृशाभावप्रतियोगिताऽवच्छेदकतायाः पर्याप्तौ यत्किञ्चिदुभयवति तादृशाभावप्रतीत्यनुपपत्तेः।

ननूभयत्वस्यापि शक्यताऽवच्छेदकत्वे पुष्पवन्तपदेनैवोभयत्वावच्छिन्नोपस्थापनात् पुष्पवन्तावित्यत्र द्विवचनोपस्थाप्योभयत्वस्य तत्रान्वयप्रसङ्गो निराकाङ्क्षत्वादिति? अत आह—द्वावित्येति।

सकृदेव भानमिति। न तत्र द्विवचनोपस्थाप्यद्वित्वान्वयः, अन्वयबोधानुत्पत्तेस्तत्रेष्टत्वादिति भावः।

प्रतियोगिताऽवच्छेदकतापर्याप्तिवदिति। तथा च परस्परं विरुद्धेऽपि घटत्वपटत्वादिधर्मिताऽवच्छेदकत्वं प्रतीतिबलात् स्वीकरणीयम्,

स्वीकार्यश्चोभयत्वादिसहितविरुद्धघटत्वपटत्वादावेकप्रतियोगिताऽवच्छेदकतापर्याप्त्यधिकरणत्वम्; अन्यथा तादृशप्रतीतेर्विलक्षणाभावविषयकत्वानुपपत्तिः स्यादिति भावः।

ननु यदि घटपटौ न स्त इति दृष्टान्तप्रतीतौ घटत्वपटत्वोभयत्वैतत्त्रितयपर्याप्तैकावच्छेदकताकप्रतियोगित्वं भासेत तदा पुष्पवन्तपदं चन्द्रसूर्योभयशक्तमिति प्रतीत्याऽपि चन्द्रत्वसूर्यत्वोभयत्वैतत्त्रितयधर्मपर्याप्तावच्छेदकताकशक्तिः सिध्येत् तयैव न? इत्याशङ्कते—न चेत्यादि।

केवलोभयत्व इति। उभयत्वत्वेनोभयत्वमात्र इत्यर्थः, यत्किञ्चिदुभयवतीति। दण्डमठोभयादिप्रकारकनिश्चयसत्त्व इत्यर्थः, तादृशधर्मपर्याप्तावच्छेदकताकप्रतियोगितासम्बन्धेन तादृशधर्मावच्छिन्नप्रकारताकाभावबुद्धिं प्रति तादृशधर्मावच्छिन्नप्रकारकनिश्चयत्वेन प्रतिबन्धकत्वकल्पनेन मठदण्डोभयवदिति निश्चये सामान्यत उभयत्वत्वावच्छिन्नप्रकारताकनिश्चयसत्वाद् घटपटौ न स्त इति प्रतीतिर्न भवितुमर्हतीति भावः।

न च सामानाधिकरण्यसम्बन्धेन घटत्वपटत्वरूपावच्छेदकत्वावच्छेदकधर्मेण व्यावृत्तोभयत्वविशेषस्यैव तत्रावच्छेदकत्वं प्रतीयत इति वाच्यम्?

तेन तेन प्रकारेण तत्रोभयत्वस्याभानात्तत्तद्रूपाणां तत्तद्धर्मिविशेषणतयैव भानादतिप्रसक्तधर्मप्रकारेण भासमाने चावच्छेदकतापर्याप्तिभानानुपगमात् तत्रोभयत्वविशेषेऽभावप्रतियोगिताऽवच्छेदकत्वपर्याप्त्युपगमेऽत्राप्युभयत्वविशेषे शक्यताऽवच्छे-

---

सामानाधिकरण्येति। सामानाधिकरण्यसम्बन्धेन पटत्वनिष्ठावच्छेदकतानिरूपिका सती तादृशसम्बन्धेन घटत्वनिष्ठावच्छेदकतानिरूपिका योभयत्वनिष्ठावच्छेदकता तन्निरूपकप्रतियोगिताकाभाव एव तादृशप्रतीतेर्विषयः।

एवञ्च तादृशविशेषणविशेष्यताऽऽपन्नोभयत्वस्यैवावच्छेदकत्वभानाद् विलक्षणाभावावगाहनमिति हृदयम्।

तेनेति। सामानाधिकरण्यसम्बन्धेन घटत्वेन पटत्वेन च, तत्र=तादृशप्रतीतौ, अभानाद्=अविषयत्वात्, तत्तद्रूपाणां=घटत्वपटत्वादीनां, धर्मिविशेषणतया=घटादिविशेषणतया, एवकारेणोभयत्वादिविशेषणतया भानव्यवच्छेदः, अतिप्रसक्तधर्मप्रकारेण=उभयत्वान्तरसाधारणोभयत्वत्वप्रकारेण। भासमान इति। घटपटादिवृत्तिद्वित्वविशेष इति हृदयम्। तत्र=तादृशप्रतीतौ, उभयत्वविशेष इति। सामानाधिकरण्यसम्बन्धेन घटत्वपटत्वविशिष्ट इत्यर्थः।

अयम्भावः—यत्र ज्ञाने यद्यद्धर्मविशिष्ट उभयत्वादिकं भासते तत्र तत्तद्धर्मसामानाधिकरण्येनाप्युभयत्वादिकं भासत इति नियमेनोक्तशक्यतादिग्रहे घटत्वपटत्वादिसमानाधिकरणतयाऽप्युभयत्वादेर्भानं भवत्येव।

एवञ्च घटपटौ न स्त इत्यादिवाक्यज्ञानस्य हि सामानाधिकरण्यसम्बन्धावच्छिन्नघटत्वपटत्वनिष्ठावच्छेदकताकोभयत्वत्वावच्छिन्नावच्छेदकताकप्रतियोगितासम्बन्धावच्छिन्ना या घटत्वावच्छिन्नविशेष्यताकपटत्वावच्छिन्नविशेष्यताकोभयत्वत्वावच्छिन्नप्रकारत्वावच्छिन्नघटत्वपटत्वोभयत्वैतत्त्रितयधर्मपर्याप्तावच्छेदकताकप्रकारता तन्निरूपिताभावत्वावच्छिन्नविशेष्यताकशाब्दबोधं प्रति हेतुतायाः कल्पनीयतया तादृशोभयत्वविशेषे प्रतियोगिताऽवच्छेदकत्वादिसम्भवः।

ननु नञर्थाभावे यत्सम्बन्धेन यादृशधर्मविशिष्टस्य विशेषणतया भानं तादृशसम्बन्धावच्छिन्नतद्धर्मनिष्ठावच्छेदकताकप्रतियोगिताया एव तत्संसर्गतया भाननियमः।

अन्यथा घटो नास्तीत्यादिप्रतीतेर्विषयित्वसम्बन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकप्रतियोगितासम्बन्धेन तद्व्यक्तित्वावच्छिन्नप्रतियोगितासम्बन्धेन चाभावादौ घटादेर्भानापत्त्या घटवत्यपि तादृशप्रतीत्यापत्तेः।

दकत्वपर्याप्त्युपगमेऽप्युभयत्वविशेषे शक्यताऽवच्छेदकत्वपर्याप्तिसम्भवाच्चन्द्रत्व-सूर्यत्वयोरवच्छेदकताऽवच्छेदकतयैव शाब्दबोधे भानोपपत्तिः।

न च शक्यताऽवच्छेदकताऽवच्छेदकमवच्छेदकविशेषणतयैव भासत इति चन्द्रत्वसूर्यत्वयोस्तथात्वे चन्द्रसूर्यांशे प्रकारतया शाब्दबोधे भानानुपपत्तिरिति वाच्यम्?

तयोरवच्छेदकताऽवच्छेकत्वेऽपि शक्तिग्रहेऽवच्छेदकाश्रयचन्द्रसूर्यविशेषणतयैव भानात् शाब्दबोधेऽपि तद्विशेषणतया भानसम्भवात्।

अथ शक्तिग्रहे साक्षात् शक्यताऽनवच्छेदकस्य तदुभयस्य शक्यचन्द्रसूर्योभयांशे साक्षात्प्रकारतया भानं न सम्भवतीति चेद्?

एवञ्च घटपटौ न स्त इत्यादिप्रतीतौ घटत्वादेः समवायेन घटाद्यंशे भानेन समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताया एव संसर्गत्वमावश्यकमिति चेद्?

न—यत्रोभयत्वादेर्धर्मिताऽवच्छेदकतया घटत्वादेर्भानं तत्र घटत्वपटत्वादिसामानाधिकरण्येनोभयत्वादेः पारतन्त्र्येण भानोपगमादुक्तप्रतियोगितायाः संसर्गत्वसम्भवादाकाङ्क्षाज्ञानस्य कारणताया विशेषतो विश्रमाच्च।

अवच्छेदकताऽवच्छेदकतयैवेति। शक्यताऽवच्छेदकताऽवच्छेदतयैवेत्यर्थः।

शक्तिज्ञानन्तु चन्द्रत्वसूर्यत्वावच्छिन्नोभयत्वनिष्ठावच्छेदकताकस्वनिरूपितशक्तिसम्बन्धेन चन्द्रसूर्योभयवत् पुष्पवन्तपदमित्याद्याकारकमिति ध्येयम्।

ननु पशुपदादिजन्यबोधे शक्यताऽवच्छेदकताऽवच्छेदकस्य लाङ्गूलत्वादेर्यथा शक्यविशेषणलाङ्गूलादिविशेषणतया भानं; तथा पुष्पवन्तपदजन्यबोधेऽपि शक्यताऽवच्छेदकताऽवच्छेदकचन्द्रत्वादेः शक्यविशेषणोभयत्वादिविशेषणतया भानं स्याद्? इत्याशङ्कते—न चेत्यादि।

तयोरिति। चन्द्रत्वसूर्यत्वावच्छिन्नोभयत्वनिष्ठावच्छेदकताकस्वनिरूपितशक्तिसम्बन्धेन चन्द्रसूर्योभयप्रकारकज्ञानस्य हेतुतया तादृशज्ञाने चन्द्रत्वेन चन्द्रस्य सूर्यत्वेन सूर्यस्य च भानेन तज्जन्योपस्थितेरपि तादृशचन्द्रसूर्यविषयतया शाब्दबोधोऽपि तादृशो युज्यतइति हृदयम्।

नन्ववच्छेद्यग्रहे स्वातन्त्र्येणावच्छेद्याश्रये यस्य भानं तत्रावच्छेद्यावच्छेदकत्वं तत्र यो विशेषणतया भासते तत्रावच्छेद्यावच्छेदकताऽवच्छेदकत्वं न तु पारतन्त्र्येण भासमानेऽवच्छेद्यावच्छेदकत्वमिति नियमः, रजतत्वेन रङ्गस्य ज्ञानं नास्तीत्यादिप्रतीतौ तु तृतीयाऽन्तार्थस्य रजतत्वप्रकारत्वस्य निरूपितत्वसम्बन्धेन षष्ठ्यन्तार्थरङ्गविशेष्यत्वेऽन्वयाद् रजतत्वप्रकारत्वनिष्ठावच्छेदकतानिरूपकरङ्गविशेष्यत्वनिष्ठावच्छेदकताकज्ञानत्वावच्छिन्नप्रतियोगिताकाभाव एव भासते।

घटपटौ न स्त इत्यादौ घटत्वपटत्वयो: साक्षात् प्रतियोगिताऽवच्छेदकत्वमन्तरेण प्रतियोगिविशेषणतया भानासम्भवस्तुल्य एवेत्याहु:।

ज्ञानशक्तिवादिनस्तु–चन्द्रत्वसूर्यत्वोभयप्रकारकज्ञानमेव पुष्पवन्तपदशक्यं पुष्पवन्तपदमुभयप्रकारकज्ञाने शक्तमित्याकारकशक्तिग्रहस्य तादृशज्ञानत्वमेव कार्यताऽवच्छेदकमिति व्युत्पत्तिमत: पुरुषस्य नैकैकबोधापत्तिरतोऽतादृशस्य भवत्येव तादृशबोध:।

न चैवमपि पुष्पवन्तपदं चन्द्रत्वप्रकारकज्ञाने शक्तमित्यादिबोधस्य प्रमात्वात् शक्तिभ्रमं विना प्रत्येकशाब्दबोधानुदय इति कथमुपपद्यत इति वाच्यम्?

केवलचन्द्रत्वप्रकारकबोधे तत्तत्प्रकारकबोधत्वांशे शक्तिनिरूपकताऽवच्छेदकताऽवच्छेदकतापर्याप्तिग्रहस्य हेतुत्वात्।

प्रकृत उभयप्रकारकबोधत्वाद्यंशे शक्तिनिरूपकताऽवच्छेदकत्वपर्याप्त्यभ्युपगमात्

एवञ्च रङ्गरजते इति समूहालम्बनज्ञानकाले तादृशप्रतीतिरुपपन्ना, एवञ्च पुष्पवन्तपदं चन्द्रसूर्यशक्तमित्यादिप्रतीत्या शक्त्यंशे विशेषणतया भासमाने चन्द्रे सूर्ये च साक्षाद् विशेषणयो: चन्द्रत्वसूर्यत्वयो: शक्यताऽवच्छेदकत्वमेव न तु शक्यत्वाद्यवच्छेदकताऽवच्छेदकत्वं सिध्यतीत्याह–अथ शक्तीति।

तुल्य एवेति। तथा च यत् साक्षादवच्छेदकं तदवच्छेद्याश्रये साक्षाद्विशेषणतया भासत इति नियमो न प्रामाणिक:; प्रामाणिकत्वे विरुद्धयोरपि घटत्वपटत्वयो: प्रतियोगितानिरूपितैकावच्छेदकत्वपर्याप्तिर्भवताऽपि स्वीकार्येति भाव:।

ज्ञानशक्तिवादिनां मतमाह–ज्ञानशक्तीति। चन्द्रत्वसूर्यत्वोभयप्रकारेति। चन्द्रत्वप्रकारकत्वे सति सूर्यत्वप्रकारकं ज्ञानमित्यर्थ:, तथा च चन्द्रत्वाद्यंशे उभयत्वाभानेऽपि न क्षति:।

पुष्पवन्तपदशक्यमिति। पुष्पवन्तपदनिष्ठशक्तिनिरूपितजन्यतावदित्यर्थ:। शक्तमिति। तादृशज्ञानजनकशक्तिमदित्यर्थ:। तादृशज्ञानत्वमिति। चन्द्रत्वप्रकारकं सत् सूर्यत्वप्रकारकं यत्तादृशज्ञानत्वमित्यर्थ:, तथा च तादृशधर्मत्रयमेव शक्यताऽवच्छेदकं शक्तिनिरूपितजन्यताऽवच्छेदकमिति तु यावद्, इति व्युत्पत्तिमत:=इति शक्तिग्रहवत:, शक्तिनिरूपकता=शक्त्यवच्छिन्नजनकतानिरूपकता, अन्यच्च सुगमम्।

न्यायमतमुत्थापयति–ईश्वरेति। पक्षे=मत इत्यर्थ:, चन्द्रत्वावच्छिन्नविषयताशालीति चन्द्रत्वप्रकारताशालीति वा तदर्थ:, न तथाविधबोध इति। अत्र शक्तिप्रमात इति पूरणीयम्।

चन्द्रत्वादिप्रकारकबोधजनकस्येति। पुष्पवन्तपदाच्चन्द्रत्वावच्छिन्नविषयकबोधो

तादृशस्य चन्द्रत्वप्रकारकज्ञाने शक्तमित्यादिबोधस्य भ्रमत्वनियमादित्याहुः।

ईश्वरेच्छारूपस्य सङ्केतस्य शक्तित्वमङ्गीकर्तृसिद्धान्तिपक्षे पुष्पवन्तपदाच्चन्द्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविषयकशाब्दबोधो भवत्वित्याकारक एव तादृशपदे भगवत्सङ्केतः केवलचन्द्रत्वावच्छिन्नविषयकबोधश्च न तत्पदजन्यत्वेन तद्विषय इति तादृशपदान्न तथाविधबोधः।

न च तादृशपदजन्यत्वेन केवलचन्द्रत्वावच्छिन्नविषयकबोधस्य सङ्केताविषयत्वेऽपि चन्द्रत्वाद्यवच्छिन्नविषयकबोधविषयकत्वेन सङ्केतविषयकग्रहस्य चन्द्रत्वादिप्रकारकबोधजनकस्य सूर्यत्वाद्यवच्छिन्नविषयकबोधविषयकत्वेन सङ्केतग्रहघटितसूर्यत्वाद्यवच्छिन्नविषयकबोधसामग्र्यामसत्यामपि सम्भवेन तद्बलादभ्रान्तस्य केवलचन्द्रत्वावच्छिन्नविषयकबोधो दुर्वार एवेति वाच्यम्?

तत्पदजन्यकेवलचन्द्रत्वादिप्रकारकबोधे तत्पदजन्यकेवलचन्द्रत्वावच्छिन्नविषयकबोधत्वपर्याप्तविषयताऽवच्छेदकताकत्वप्रकारकसङ्केतविषयकज्ञानस्य हेतुत्वात्।

पुष्पवन्तपदजन्यबोधत्वघटितभगवत्सङ्केतविषयताऽवच्छेदकशरीरे च सूर्यत्वा-

---

भवत्वित्याद्याधुनिकसङ्केतजन्यस्य तादृशशक्तिभ्रजन्यस्य वा केवलचन्द्रत्वादिप्रकारकशाब्दबोधस्यानुरोधेन चन्द्रत्वप्रकारकशाब्दं प्रति पुष्पवन्तपदजन्यत्वप्रकारतानिरूपितचन्द्रत्वावच्छिन्नविशेष्यताशालिसङ्केतग्रहो हेतुर्वाच्यः, तथा च तादृशशक्तिग्रहात् सूर्यत्वप्रकारकशाब्दसामग्रीं विनाऽपि चन्द्रत्वप्रकारकशाब्दबोधजननादिति भावः।

एतेन पुष्पवन्तपदघटितसामग्रीतः केवलचन्द्रादिविषयकबोधस्य कुत्राप्यजननात् तादृशसामग्र्याः केवलचन्द्रादिविषयकबोधस्यापादकत्वासम्भवात् केवलचन्द्रत्वावच्छिन्नविषयकबोधो दुर्वार एवेत्यस्यासङ्गतिरित्यपि निरस्तम्।

तादृशाधुनिकसङ्केतग्रहादिसत्त्वे केवलचन्द्रादिविषयकबोधस्योत्पत्त्या पुष्पवन्तपदघटितवाक्यज्ञानस्य कारणत्वस्यावश्यकत्वेन तद्घटितसमग्र्याः कुत्रचित् केवलचन्द्रादिविषयकबोधोत्पत्त्या आपादकत्वसम्भवात्।

केवलचन्द्रत्वादिप्रकारकशाब्दबोधतज्जनकशक्तिग्रहयोः चन्द्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविषयकशाब्दबोधतज्जनकशक्तिग्रहयोश्च कार्यकारणभावावच्छेदकवैलक्षण्यप्रदर्शनेन समाधत्ते–तत्पदजन्येति। पुष्पवन्तपदजन्येत्यर्थः, केवलचन्द्रत्वादिप्रकारकशाब्दत्वञ्च कार्यताऽवच्छेदकं पूर्वं निरुक्तं, तत्पदजन्यकेवलचन्द्रत्वावच्छिन्नेत्यादिना कारणताऽवच्छेदकमुक्तं, तच्च

वच्छिन्नविषयकत्वचन्द्रत्वावच्छिन्नविषयकत्वयोरेकत्र निवेशात् तत्पदजन्यप्रत्येकधर्मावच्छिन्नविषयकबोधत्वे सङ्केतविषयताऽवच्छेदकत्वपर्याप्तिविरहात् तदंशे तत्पर्याप्त्यवगाहिग्रहो भ्रम एवेति न शक्तिप्रमातः प्रत्येकधर्मप्रकारकबोधापत्तिः।

तत्पदजन्यचन्द्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविषयकबोधत्वपर्याप्तविषयताऽवच्छेदकताकत्वप्रकारकशक्तिग्रहस्य चोभयधर्मप्रकारकबुद्धित्वमेव कार्यताऽव-

---

पुष्पवन्तपदजन्यत्वप्रकारतानिरूपिता या चन्द्रत्वावच्छिन्नविषयकत्वनिष्ठावच्छेदकताभिन्ना सती शाब्दत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका तादृशधर्मद्वयावच्छिन्ना विशेष्यता तच्छालिसङ्केतग्रहत्वं–

तादृशसङ्केतश्च पुष्पवन्तपदजन्यः चन्द्रत्वावच्छिन्नविषयकशाब्दबोधो भवत्वित्याकारकः।

द्वितीयकारणताऽवच्छेदकश्च पुष्पवन्तपदजन्यत्वप्रकारतानिरूपिता या चन्द्रत्वावच्छिन्नविषयकत्वसूर्यत्वावच्छिन्नविषयकत्वशाब्दत्वैतत्त्रितयधर्मावच्छिन्नविशेष्यता तच्छालिसङ्केतग्रहत्वम्।

अथ कीदृशं सङ्केतज्ञानमत्र कारणम्? न तावच्चन्द्रत्वावच्छिन्नविषयकत्वसूर्यत्वावच्छिन्नविषयकत्वशाब्दत्वैतद्धर्मत्रयावच्छिन्नभगवत्संकेतीयविशेष्यतानिरूपितजन्यत्वप्रकारतानिरूपितपुष्पवन्तपदत्वावच्छिन्नावच्छेदकतावत् पुष्पवन्तपदमित्याकारकम्, तादृशज्ञानस्य पदपदार्थयोः सम्बन्धानवगाहनेनार्थस्मरणानुपपत्तेः।

नापि स्वनिष्ठं यत् पुष्पवन्तपदत्वावच्छिन्नावच्छेदकत्वं तन्निरूपितजन्यत्वप्रकारताकतादृशधर्मत्रयावच्छिन्नभगवत्सङ्केतीयविशेष्यतानिरूपितावच्छेदकताऽऽश्रयविषयत्वसम्बन्धेन पुष्पवन्तपदप्रकारकचन्द्रसूर्यविशेष्यकज्ञानम्।

अत्र स्वपदं पुष्पवन्तपदपरं परिचायकं, तादृशज्ञानस्य चन्द्रः सूर्यश्च पुष्पवन्तपदवानित्याकारकतया समूहालम्बनपर्यवसन्नत्वेनैकशक्तिविषयकत्वानुपपत्तेः।

न च द्वयोरेकमिति रीत्योक्तसम्बन्धेन पुष्पवन्तपदप्रकारकचन्द्रसूर्यविशेष्यकज्ञानस्य समूहालम्बनविलक्षणतयैकशक्त्यवगाहित्वेन नियतचन्द्रसूर्योभयविशेष्यकबोधजनकत्वोपपत्तिरित्यपि न सद्।

यस्माद् विरुद्धधर्मद्वयं धर्मिताऽवच्छेदकीकृत्य व्यासज्यवृत्तिधर्मप्रकारकमेव समूहालम्बनविलक्षणं स्वीक्रियते न त्वव्यासज्यवृत्तिधर्मप्रकारकम्।

अन्यथा विरुद्धघटत्वपटत्वादिकं धर्मिताऽवच्छेदकीकृत्य द्रव्यत्वादिकं धर्मिताऽवच्छेदकीकृत्य द्रव्यत्वादेर्भानापत्त्या द्रव्यघटपटवद् भूतलमित्याकारकस्य द्रव्यत्वादिधर्मत्रयावच्छि-

च्छेदकमतो न तद्घटितसामग्रीबलादेकधर्मावच्छिन्नान्वयबोधस्य यत्किञ्चित्कारणविरहदशायामपरधर्मप्रकारकशाब्दबोधापत्तिः।

उभयविषयकत्वावच्छिन्नाया बोधनिष्ठसङ्केतविषयताया ऐक्यात् शक्तेरैक्यमिति न तत्पदस्य नानाऽर्थतेति रमणीयः समाधिः।

"एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इत्यमरकोष उक्तिपदं शक्तिपरं पुष्पवन्तपदं तत्प्रतिपाद्यपरं, तथा च सूर्याचन्द्रमसावेकशक्त्या पुष्पवन्तपदप्रतिपाद्यावित्यर्थः।

उद्देश्यताऽवच्छेदकावच्छेदेन विधेयान्वये तात्पर्याच्चन्द्रत्वसूर्यत्वयोरेकशक्त्य-

---

न्नप्रकारताकं समूहालम्बनानात्मकं ज्ञानं स्यात्।

स्याच्च द्रव्यत्वघटत्वपटत्वादित्रितयधर्मावच्छिन्नप्रतियोगिताकोऽतिरिक्तोऽभाव इति चेद्?

उच्यते—स्वनिष्ठविषयत्वनिष्ठावच्छेदकतानिरूपिका या चन्द्रत्वावच्छिन्नविषयकत्वसूर्यत्वावच्छिन्नविषयकत्वशाब्दत्वैतद्धर्मत्रयावच्छिन्नभगवदिच्छीयविशेष्यता तन्निरूपितजन्यत्वप्रकारतानिरूपितपुष्पवन्तपदत्वावच्छिन्नावच्छेदकतावत्त्वसम्बन्धेन चन्द्रसूर्यवत् पुष्पवन्तपदमित्याकारकमेव सङ्केतज्ञानं हेतुः, अत्र स्वपदं चन्द्रादिपरम्।

अत्रैकत्र द्वयमिति रीत्या चन्द्रसूर्योभयस्य तादृशपदे प्रकारतया युगपद्भानेन न समूहालम्बनत्वम्; अत एतज्ज्ञानस्यैकशक्तिविषयत्वं नानुपपन्नमित्यलं विस्तरेण।

शक्तिग्राहककोषस्यापि पुष्पवन्तपदस्योभयस्मिन्नेकशक्तिकत्वपरत्वमुपपादयति—उक्तिपदमिति।

तदुत्तरतृतीयायाः प्रयोज्यत्वमर्थः; तस्य च पुष्पवन्तपदार्थतत्पदप्रतिपाद्यघटकप्रतिपत्तावन्वयः, सूर्याचन्द्रमसेति। चन्द्रसूर्यौ पुष्पवन्तपदजन्यैकशक्तिप्रयोज्यप्रतिपत्तिविषयतावन्ताविति तदर्थः।

नन्वेतावताऽपि चन्द्रसूर्यनिष्ठकथञ्चिदनुगतैकधर्मावच्छिन्नशक्तिस्वीकारेण तादृशधर्मप्रकारेण तयोः प्रतिपत्तिसम्भवेन न चन्द्रत्वादिप्रत्येकधर्मावच्छिन्न एकशक्तिसिद्धिः? इत्यत आह—उद्देश्यताऽवच्छेदकावच्छेदेनेति।

अयमाशयः—वाक्यं हि द्विविधम्—एकम् उद्देश्यताऽवच्छेदकसामानाधिकरण्येन विधेयान्वयपरम्—

द्वितीयम् उद्देश्यताऽवच्छेदकावच्छेदेन विधेयान्वयपरम्।

धीनप्रतिपत्तिविषयताऽवच्छेदकत्वलाभो नातस्तस्माद् नानाऽर्थादिव तादृश एकधर्माव-च्छिन्नविषयकबोधो; नानाऽर्थे शक्तिभेदेन विशेषादिति लभ्यते।

अथवैकयोक्त्या=एकोच्चारणेन सूर्याचन्द्रमसौ पुष्पवन्तपदप्रतिपाद्यावित्यर्थः।

तथा च यथा नानाऽर्थस्थले नावृत्तिमन्तरेण नानाऽर्थबोधस्तथा न प्रकृते; अत्र शक्तेरैक्येन सकृदुच्चरितात् सकृदर्थप्रत्यय एवेत्यस्याविषयत्वादिति भावः।

आद्यं यथा–नीरूपस्पर्शवन्मनः; अस्य च रूपशून्यस्पर्शवद् यत् तद् मनः मनःपदार्थ इत्यर्थः, अस्य च रूपशून्यत्वविशिष्टस्पर्शवत्त्वसामानाधिकरण्येन मनःपदशक्यत्वान्वये तात्पर्यं मनस्त्वजातेरेव शक्यताऽवच्छेदकत्वाद्।

एवं गौरिव गवय इत्यतिदेशवाक्यस्यापि।

द्वितीयं यथा–शङ्खो लक्ष्मीपतेः पाञ्चजन्य इत्यादि; अस्य च विष्णोः शङ्खः पाञ्चजन्यपदशक्य इत्यर्थः। तात्पर्यमस्य विष्णुसम्बन्धिशङ्खत्वावच्छेदेन तस्यैव शक्यताऽवच्छेदकत्वाद्।

एवञ्च पुष्पवन्तपदस्यैकशक्तिज्ञानजन्यत्वस्य चन्द्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविष-यकप्रतिपत्तौ लाभः।

ननु दिवाकरनिशाकरावित्यत्रोभयत्वस्याप्युद्देश्यताऽवच्छेदकत्वेनैकशक्त्यधीनप्रतिपत्ति-विषयताऽवच्छेदकतालाभोऽपि स्यात् पुष्पवन्तपदजन्यबोधे तादृशोभयत्वस्याभानादिष्टापत्तेरयोगा-दिति चेद्?

न–तादृशोभयत्वस्य धर्म्यंश उपलक्षणतया भानस्वीकारेणात्र विधेयताऽवच्छेदकत्वालाभात् स्वरूपसम्बन्धरूपावच्छेदकत्वस्यैकदेशेऽपि स्वीकाराच्चेति भावः।

एकयेत्यत्रैकत्वं सजातीयद्वितीयराहित्यं न तु संख्या धीविशेषविषयत्वं, तच्च पुष्पवन्तपद-जन्यप्रतिपत्तिप्रयोजकशक्तिनिष्ठभेदाप्रतियोगित्वम्।

एवञ्च पुष्पवन्तपदस्य नानाशक्तिमत्त्वेऽपि नैकयोक्त्येत्यस्य बाध इति निरस्तम्।

मिश्रमतानुसारेणाह–अथ वेति।

यत्तु पूर्वकल्प उक्तिपदस्य शक्तिपरत्वे लक्षणाऽऽपत्तिरित्यह आह–अथवेति; इति भाववर्णनं तत्तुच्छं–यतो गां वक्तीत्यादिना पूर्वोक्तेन भट्टाचार्येणैव वच्यादिधातोः शक्तौ शक्तिर्निरूढलक्षणा वा स्वीकृता। नावृत्तिमन्तरेणेति। तथा च हरिर्गच्छतीति सकृदुच्चरितात् सिंहसूर्यादेरेकतरस्यैव बोधो न तु सूर्यो गच्छति सिंहो गच्छतीत्यादिनानाविधबोधः।

पुष्पवन्तपदवत् सर्वनामपदानामपि शक्तेरैक्यान्न नानाऽर्थता।

अथ सर्वनामपदेन विशिष्य घटत्वपटत्वादिनैव बुद्धिस्था घटपटादयः प्रत्याय्यन्ते न तु बुद्धिस्थत्वेन; अत्र घटोऽस्ति तमानयेत्यादिवाक्यजघटकर्मकानयनादिबोधानन्तरं विशिष्यानयनं घटकर्मकं न वेति संशयानुत्पादस्य सर्वानुभवसिद्धतया दुरपह्नवत्त्वात्।

तथा च वक्तृबुद्धिस्थत्वं न सर्वनामशक्यताऽवच्छेदकम्; अपि तु घटत्वपटत्वाद्येव तादृशनानाधर्मावच्छिन्नेषु पुष्पवन्तादिपदवन्नैकशक्तिसम्भव एकैकधर्ममात्रप्रकारकतत्तदर्थबोधानुपपत्तेरिति सर्वनाम्नो नानाऽर्थत्वं दुर्वारमेव।

अत्र कल्पेऽनास्थासूचनाय वाकारः एकोच्चारितादप्युभयबोधस्य मणिकारादिसमतत्वाद्, अत एव तात्पर्यसत्त्वे सकृदुच्चरितादपि शब्दादुभयबोधस्येष्टत्वादिति मणिकारेणोक्तम्।

इति पुष्पवन्तपदटीका

सर्वनाम्नां शक्तिं परीक्षितुकाम आदौ सिद्धान्ताप्रदर्शन आशङ्कैव नोदेत्यतस्तत्सिद्धान्तमाह–पुष्पवन्तपदवदिति।

सर्वनामपदानां=तदेतदिदमादिपदानां, नानाऽर्थतेति। पृथक् पृथक्शक्त्या पृथक् पृथगर्थप्रतिपादकतेत्यर्थः।

परीक्षामारभते–अथेत्यादि। बुद्धिस्थाः=पूर्वबुद्धिविषयाः; बुद्धिस्थत्वेन=बुद्धिस्थत्वप्रकारेण।

ननु तदादिपदजन्यबोधे घटत्वादेरेव प्रकारत्वं न तु बुद्धिस्थत्वस्येति कुतोऽवधार्यते? इत्यत आह–अत्र घट इति।

संशयानुत्पादस्येति। तमानयेति वाक्याद् यदि बुद्धिस्थकर्मकमानयनमिति बोधो जायते तदाऽऽनयनं घटकर्मकत्वाभाववदिति बुद्धेर्ग्राह्यताऽवच्छेदकबुद्धिस्थत्वेन ग्राह्यघटादेरभावानवगाहितया तादृशनिश्चयाप्रतिबध्यत्वेन तादृशसंशयोत्पत्तिः कुतो न स्यादिति भावः।

तथा चेति। बुद्धिस्थत्वस्य तादृशबोधे भाने चेत्यर्थः। बुद्धिस्थत्वमिति। तत्पदजन्यबोधप्रकारस्यैव तत्पदशक्यताऽवच्छेदकत्वादिति भावः।

नैकशक्तिसम्भव इति। सकृदुच्चरितपुष्पवन्तपदाद् यथा चन्द्रसूर्योभयविषयकबोधः तथा न तदादिपदाद् अपि तु पृथक् पृथगुच्चरिततदादिपदात् प्रत्येकघटत्वपटत्वाद्यवच्छिन्नस्य बोध इष्यत एकशक्तिकत्वस्य वक्तुमशक्यत्वादिति हृदयम्।

न वा नानाऽर्थतोपगमेऽपि निर्वाहः, यद्रूपावच्छिन्नविषयकव्यवहारजनकत्वं येन पुंसा तदादिपदे न गृहीतं तदवच्छिन्ने तेन तच्छक्त्यग्रहेण प्रक्रान्तस्यापि तदवच्छिन्नस्य तत्पुरुषीयतदादिपदजन्यबोधविषयताऽनुपपत्तेः।

न च बुद्धिस्थत्वं प्रकारीभूतघटत्वादीनामेवानुगमकं तथा च बुद्धिप्रकारवांस्तत्पदशक्य इत्याकारक एव शक्तिग्रहः; स च तद्धर्मप्रकारेण सकलतद्धर्मविषयक एव सामान्यप्रत्यासत्या सम्भवतीति नापूर्वप्रकारेण बोधानुपपत्तिः।

सामान्यलक्षणाऽनभ्युपगमे तु शक्तिग्रहविशेष्यताऽवच्छेदकप्रकाराश्रयस्यापूर्वधर्मिणः शक्तिग्रहाविषयत्वेऽपि शाब्दबोधे भानवत् शक्तिग्रहधर्मिताऽवच्छेद-

---

ननु तदादिपदानां नानाऽर्थतैवाभ्युपेया क्षतिविरहाद्? इत्यत आह—न वेति। यद्रूपावच्छिन्नेति। यद्धर्मावच्छिन्ने यत्पदस्य वृद्धव्यवहारो येन पुंसा दृश्यते तद्धर्मावच्छिन्ने तत्पदस्य तेन पुरुषेण शक्तिरवगम्यते; अनन्तरं तत्पदस्य तद्धर्मावच्छिन्ने शक्तिसम्बन्धग्रहेण तत्पदार्थः स्मर्यते; प्रतिपद्यते च तेन पुंसा तदर्थः।

एवञ्च यद्धर्मावच्छिन्ने येन यत्पदव्यवहारो न दृष्टस्तदवच्छिन्ने यत्पदस्य तस्य शक्तिग्रहो नाभूत् कुतस्तद्धर्मावच्छिन्नाभिप्रायेण प्रयुक्ताद् देवदत्तो गच्छति तं पश्येत्यादौ तच्छब्दात् तस्य पुंसः तादृशदेवदत्तप्रतिपत्तिः? शक्त्यग्रहेण तद्धर्मावच्छिन्नानुपस्थितेरिति भावः।

प्रक्रान्तस्यापि=वक्तृबुद्धिस्थस्यापि, बुद्धिप्रकारत्वरूपानुगतधर्मेणापूर्वचैत्रत्वादेरपि शक्तिग्रहविषयत्वमुपपाद्य शाब्दबोधोपपादनमाशङ्कते—न चेति।

शक्तिग्रह इति। वृद्धव्यवहारादिना जायत इति शेषः, स च तादृशशक्तिग्रहः सम्भवतीत्यनेनान्वितः, तद्धर्म्प्रकारेण=बुद्धिप्रकारत्वरूपधर्मप्रकारेणेत्यर्थः। सामान्यप्रत्यासत्त्या=सामान्यलक्षणारूपप्रत्यासत्त्या। तथा च घटोऽस्ति तमानय पटोऽस्ति तमपसारयेत्यादिवक्तृबुद्धिस्थपरतत्पदघटितनानावृद्धव्यवहारतः सविधस्थस्य सामान्यतः पूर्वबुद्धिप्रकारत्वेन घटत्वपटत्वादिकं विषयीकृत्य बुद्धिप्रकारवान् तत्पदशक्य इति ग्रहो भवति, ततश्च तादृशप्रकारत्वज्ञानं सामान्यप्रत्यासत्तिः निखिलबुद्धिप्रकारत्वाश्रयघटत्वचैत्रत्वमैत्रत्वादिकं ग्राहयति; ततश्च बुद्धिप्रकारत्वेन निखिलघटत्वचैत्रत्वमैत्रत्वाद्यवच्छिन्ने तत्पदशक्यताज्ञानं मानसं सम्पद्यत इति भावः।

सामान्यलक्षणाऽनभ्युपगन्तृमतेऽप्याह—सामान्येति। शक्तिग्रहेति। बुद्धिप्रकारवान् तत्पदशक्य इति शक्तिग्रहविशेष्यताऽवच्छेदको यः प्रकारस्तदाश्रयस्येत्यर्थः, अपूर्वधर्मिण इति। अत्र गृहे गौरस्ति तं ताडयेत्यादिवृद्धव्यवहारतो बुद्धिप्रकारगोत्वाद्यवच्छिन्ने गोव्यक्तिविशेषे शक्तिग्रहः;

कताऽवच्छेदकानुगतरूपाश्रयस्यापूर्वधर्मस्यापि शक्तिग्रहविषयतां विना शाब्दबोधे न भानानुपपत्तिः, शक्तिधियः शाब्दज्ञानसमानविषयकत्वस्यातन्त्रत्वादिति वाच्यम्?

बुद्धिस्थत्वस्य शक्यताऽवच्छेदकताऽनच्छेदकत्वेन शक्यताऽवच्छेदकानुगमकत्वा-योगात्, तदवच्छेदकत्वे च तस्यापि शाब्दबुद्धौ शक्यताऽवच्छेदकघटत्वादिविशेषणतया नियमतो भानप्रसङ्गात् स्वरूपतो घटत्वादिप्रकारकशाब्दबोधानिर्वाहाद्, उपलक्षणेनापि शक्यताऽवच्छेदकानुगमे शक्यस्याप्युपलक्षणेनैवानुगमोऽस्तु किं विशिष्टे शक्त्या?

अथ द्रव्यादिपदाद् घटत्वादिप्रकारकबोधप्रसङ्गवारणाय विशिष्टेशक्तिरुपेयते प्रकृते च बुद्धिस्थत्वस्योपलक्षणत्वेऽपि तेनानुगमने न किञ्चिद्बाधकमिति चेत्?

अस्तु बुद्धिस्थत्वेनानुगतधर्मेणाननुगतानां प्रकाराणां शक्तिधीविषयत्वं; तथाऽपि सर्वनाम्नां नानाऽर्थत्वं दुष्परिहरमेव, साक्षात्परम्परया वा यदवच्छेदकं तदैक्यादेवावच्छे-

---

ततोऽपरगोव्यक्तिपदाद् गौर्धावति तं पश्येत्यादिवाक्यघटकाद् गोशब्दात् शक्तिसम्बन्धग्रहेण कारणेनानुभूतस्य गोपिण्डस्योपस्थितिः, ततश्च योग्यतावशेन गोत्वेन पूर्वागृहीता गोव्यक्तिरेव शाब्दबोधविषयो यथा भवति तद्वदत्र घटोऽस्ति तमानयात्र पटोऽस्ति तं परिधेहीत्यादिवृद्धव्यवहारतो बुद्धिस्थत्वरूपघटत्वपटत्वाद्यनुगमकधर्मेण घटत्वपटत्वादिविशिष्टे तच्छब्दस्य शक्तिग्रहाद् अत्र चैत्रोऽस्ति तं पश्येत्यादिवाक्यघटकेन पूर्वाननुभूतचैत्रत्वाद्यवच्छिन्नपरतत्पदेनाननुभूतचैत्रत्वाव-च्छिन्नस्य स्मरणासम्भवेऽप्यनुभूतघटत्वाद्यवच्छिन्नस्य स्मरणे सति योग्यतावशेनापूर्व-चैत्रत्वाद्यवच्छिन्नस्य शाब्दबोधे भाने बाधकाभाव इति भावः।

नन्वेकव्यक्तौ शक्तिग्रहेणापरव्यक्तेः कुतः शाब्दबोधो; यत्र शक्तिग्रहस्तस्यैव शाब्दबोधनियमाद्? इत्यत आह—शक्तिधिय इति। अतन्त्रत्वादिति। **अनियमादित्यर्थः।** शक्यताऽवच्छेद-कानुगमकत्वायोगादिति। **नानाशक्यताऽवच्छेदकनिष्ठशक्तिज्ञानीयविशेष्यतानिरूपितैक-प्रकारत्वायोगादित्यर्थः।** तदवच्छेदकत्वे च=**शक्यताऽवच्छेदकताऽवच्छेदकत्वे चेत्यर्थः।** उपलक्षणेनापीति। **शक्यताऽवच्छेदकताऽनवच्छेदकेनापीत्यर्थः।** उपलक्षणेनैवेति। **शक्यताऽव-च्छेदकताऽनापन्नेनैवेत्यर्थः।** अनुगमोऽस्तु=**नानाशक्यनिष्ठविशेष्यतानिरूपितगोत्वादिशक्यताऽव-च्छेदकनिष्ठैकप्रकारताशालिशाब्दधीरस्त्वित्यर्थः।** किं=**व्यर्थम्; विशेषणे शक्तिर्निष्प्रयोजनेति यावद्।**

ननु येषां पदानां विशेषणे शक्त्यकल्पने दोषः स्यात्तेषां विशेषणेऽपि शक्तिरस्तु यस्य च तत्र शक्त्यकल्पने न दोषस्तस्य तत्र कुतः शक्तिः कल्प्यते? इत्याशङ्कते—अथेति।

तत्स्वीकारमाह—अस्त्विति। अननुगतानां घटत्वपटत्वादीनाम्, साक्षादवच्छेदकं घटत्वादिकं; परम्परयाऽवच्छेदकं लाङ्गूलत्वादिकम्, अवच्छेद्यैक्यं घटपश्वभावादीनां घटपशुपदादीनाञ्च

द्यैक्याद् बुद्धिस्थत्वस्यातथात्वाद्, उपलक्षणैक्येन शक्तेरैक्ये हर्यादिपदशक्यताऽवच्छेदकानामप्युपलक्षणीभूतेनान्ततो बुद्धिविषयत्वादिनाऽनुगमसम्भवेन नानाऽर्थमात्रोच्छेदप्रसङ्गाद्।

एवं बुद्धिस्थप्रकारवान् तत्पदशक्य इत्याकारकशक्तिज्ञानात् स्वरूपतो घटत्वादिप्रकारकस्मरणशाब्दबोधौ न सम्भवतः; जातिमान् हस्तिपकसम्बन्धीत्यादिज्ञानात् स्वरूपतो हस्तित्वप्रकारकस्मरणानुदयात् स्वरूपतस्तद्धर्मप्रकारेण यस्य सम्बन्धो गृहीतस्तादृशसम्बन्धिज्ञानस्य कारणत्वाद्।

यथा याभ्यां रूपाभ्यां धर्मिणोः सम्बन्धो गृहीतस्तदेकतररूपप्रकारकसम्बन्धिज्ञानादेवापरतद्रूपेणैव सम्बन्ध्यन्तरस्मरणमित्यनुभवस्तथा यादृशरूपाभ्यां धर्मिणोः सम्बन्धग्रहस्तादृशैकधर्मप्रकारकज्ञानादेव तादृशापरधर्मप्रकारेण धर्मिस्मरण-

---

प्रतियोगित्वशक्त्याद्यैक्यम्। अतथात्वात्=साक्षात्परम्परया वाऽनवच्छेदकत्वाद्, अन्ततः= इतरधर्माणामनुगमाननुसन्धानेः नानाऽर्थमात्रोच्छेदप्रसङ्ग इति। हर्यादिपदानां नानाशक्तिमतोच्छेदप्रसङ्ग इत्यर्थः।

ननु हर्यादिनानाऽर्थपदानां बुद्धिविषयत्वादेरनुपस्थितिकालेऽपि सूर्यादिशाब्दबोधोदयेन बुद्धिविषयत्वाद्युपलक्षितधर्मावच्छिन्न एकशक्तिकल्पना न सम्भवति तदादिसर्वनाम्नान्तु बुद्धिप्रकारत्वादेरनुपस्थितौ शाब्दबोधाजननस्य सर्वजनीनत्वेन तत्कल्पने बाधकाभावः? अत आह—एवमिति।

असम्भवप्रयोजकं कारणाभावं दर्शयति—जातिमानिति। जातित्वावच्छिन्नहस्तित्वनिष्ठवच्छेदकताकविशेष्यतानिरूपितहस्तिपकसम्बन्धप्रकारताकज्ञानादित्यर्थः। स्वरूपतो=जातित्वाद्यप्रकारेण, तद्धर्मप्रकारेणेत्यनन्तरं धर्मिणीति पूरणीयम्।

यस्येति। यद्धर्मावच्छिन्नस्येत्यर्थः। तथा च स्वरूपतस्तद्धर्मनिष्ठप्रकारताकधर्मिनिष्ठविशेष्यतानिरूपितयद्धर्मावच्छिन्नसम्बन्धप्रकारताशालिज्ञानं जातमित्यर्थः। तादृशसम्बन्धिज्ञानस्येति। तद्धर्मप्रकारकधर्मिविशेष्यकज्ञानस्येत्यर्थः।

याभ्यामिति। अविशेषितधर्मप्रकारेणेत्यर्थः। तदेकतरेति। अविशेषिततदेकतरधर्मनिष्ठप्रकारतानिरूपितविशेष्यताज्ञानादित्यर्थः। स्वरूपतो धर्मप्रकारकज्ञानजन्यानां स्वरूपतो धर्मपुरस्कारेण स्मरणानां बाहुल्येन शीघ्रानुभावकतया दृष्टान्ततयोपन्यासः। यादृशरूपाभ्यामिति। किञ्चिद्धर्मविशेषितरूपाभ्यामित्यर्थः। धर्मिणोः=प्रतियोग्यनुयोगिनोः। तथा च तद्धर्मावच्छिन्नावच्छेदकताकप्रकारतानिरूपितसम्बन्धनिष्ठविशेष्यत्वावच्छिन्नप्रकारतानिरूपिततद्धर्माव-

मित्यपि।

तथा च यत्र किञ्चिद्विशेषितधर्मप्रकारकसम्बन्धज्ञानं तत्राविशेषिततद्धर्म-प्रकारकस्मरणस्यानानुभविकतयेष्टापत्तेरयोगाद्।

अन्यथा कदाचित् स्वरूपतस्तत्प्रकारिका कदाचिद्धर्मान्तरावच्छिन्नतत्प्र- कारिका स्मृतिरित्यत्र नियामकाभावप्रसङ्गात्।

सामान्यलक्षणामनङ्गीकुर्वतां पुनरनिष्कृतिरेव, शक्तिग्रहाविषयस्यापूर्वधर्मस्य स्वरूपतः कथमपि भानासम्भवाद्, न हि बुद्धिविषयताऽवच्छेदकत्वेन धर्मान्तरवि-षयकज्ञानं स्वरूपतोऽपरधर्मप्रकारकं ज्ञानं जनयितुं प्रभवति तथा सति समानप्रकारकत्व-नियमस्यापि भङ्गप्रसङ्गादिति।

च्छिन्नावच्छेदकताकविशेष्यताशालिज्ञानोत्तरं तद्धर्मावच्छिन्नप्रकारताकज्ञानात्तद्धर्मावच्छिन्नप्रकार-ताशालिस्मरणं जायत इत्यर्थः।

इदमुपलक्षणं यद्यादृशरूपाभ्यां धर्मिणोः सम्बन्धग्रहः तादृशैकतरधर्मपुरस्कारेणापरतद्ध-र्मावच्छिन्ने सम्बन्धज्ञानादपि तद्धर्मप्रकारेण स्मरणम्, एवं यादृशयद्रूपाभ्यामपि ज्ञेयम्।

तथा चेति। सम्बन्धज्ञानस्मरणयोरेकरूपावच्छिन्नविषयकत्वानुभवे चेत्यर्थः। अन्यथेति। तद्धर्मान्यधर्मानवच्छिन्नतद्धर्मनिष्ठावच्छेदकताकविशेष्यतानिरूपितसम्बन्धनिष्ठप्रकारताशालिज्ञानत्वेन तद्धर्मेतरधर्मानवच्छिन्नतद्धर्मनिष्ठप्रकारताशालिस्मरणं प्रति कारणत्वकल्पनया तादृशनियमास्वी-कारेणेष्टापत्तौ चेत्यर्थः।

नियामकाभावप्रसङ्गादिति। तथा च किञ्चिद्धर्मपुरस्कारेण तद्धर्मावच्छिन्नेऽपरसाम्बन्ध-ज्ञानादनियमेन तादृशद्विविधस्मरणापत्तेरिति भावः।

सामान्यलक्षणाऽङ्गीकारे तु बुद्धिविषयताऽवच्छेदकत्वरूपसामान्यधर्मेण तदादिपदस्य प्रथमशक्तिग्रहात् पूर्वमपूर्वचैत्रत्वादिज्ञानसम्भवेन तादृशग्रहस्य तादृशचैत्रत्वादिप्रकारकत्व-सम्भवादाह—सामान्यलक्षणामनङ्गीकुर्वतामिति। अनिष्कृतिरेव=अनुपपादनमेव।

नन्वत्र गृहे घटोऽस्ति तमानयेत्यादिवृद्धव्यवहारतः प्रथमं तत्पदस्य बुद्धिविषयताऽवच्छेद-कत्वेन घटत्वेन घटे शक्तिसम्बन्धग्रहो जातः पश्चादत्र चैत्रोऽस्ति तं पश्येत्यादिवाक्यघटका-पूर्वचैत्रत्वावच्छिन्नपरतत्पदस्यापि बुद्धिविषयताऽवच्छेदकत्वेन घटत्वावच्छिन्ने जायमानः शक्तिसम्बन्धग्रह एव स्वरूपतोऽपूर्वचैत्रत्वादिप्रकारकस्मरणं जनयेत्तथैव हेतुहेतुमद्भावकल्पनादित्यत आह—न हीति। भङ्गप्रसङ्गादिति। स्मरणानुभवयोः समानप्रकारकत्वस्य सर्वानुभवसिद्धत्त्वेन

मैवम्—भगवत्सङ्केतरूपायां शक्तौ शक्यताऽवच्छेदकीभूतघटत्वपटत्वादावुपलक्षणीभूतबुद्धिविषयताऽवच्छेदकत्वप्रकारेण भासमाने तदादिपदजन्यबोधविषयताऽवच्छेदकत्वं भासते।

एवञ्च बुद्धिविषयताऽवच्छेदकरूपावच्छिन्नस्तत्पदाद्बोद्धव्य इत्याकारकस्य तत्पदं बुद्धिविषयताऽवच्छेदकरूपावच्छिन्नं बोधयत्वित्याकारकस्य वा संकेतस्य विषयताया अननुगतघटत्वपटत्वादिनिष्ठाया अप्यनुगतबुद्धिविषयताऽवच्छेदकत्वरूपावच्छिन्नतया शक्तेरैक्यम्।

घटपदादिसंकेतविषयतानां नानाघटादिव्यक्तिनिष्ठानां घटत्वाद्यनुगतधर्मावच्छिन्नत्वेन पश्वादिपदसंकेतविषतानां प्रकारीभूतनानालोमादिव्यक्तिनिष्ठानां लोमत्वाद्यनुगतधर्मावच्छिन्नत्वेन तत्तत्पदशक्त्यैक्यवदननुगतसिंहत्वादिनिष्ठानां नानाऽर्थहर्यादिपदसङ्केतविषयतानामनुगतयत्किञ्चिद्धर्मावच्छिन्नत्वाभावाद् न शक्तेरैक्यम्।

तत्रोपलक्षणीभूतकिञ्चिद्धर्मप्रकारेणाभासमानस्यैव सिंहत्वादेर्भगवत्सङ्केतरूपायां

तस्यापलपितुमशक्यत्वादिति भावः।

सिद्धान्तमारभते—मैवमिति। शक्तिसम्बन्धस्यातिरिक्तत्वे घटत्वपटत्वादिरूपशक्यताऽवच्छेदकभेदेन न तस्या ऐक्यसम्भव इत्यत आह—भगवदिति। शक्ताविति। शक्तिपदार्थ इत्यर्थः। अत्र सप्तम्यर्थो विषयतानिरूपितत्वं तस्य च भासमाने भासत इत्युभयत्र भासधात्वर्थविषयतायामन्वयः। प्रकारेणेत्यत्र तृतीयाऽर्थः प्रकारतानिरूपितत्वं तस्य च भासमानएतद्घटकीभूतभासधात्वर्थे विषयतायामन्वयः। घटत्वपटत्वादावित्यन्तं विशेष्यं भासमानेत्यन्तं विशेषणं, तदुत्तरसप्तम्या विषयत्वमर्थः; तस्य च निरूपितत्वसम्बन्धेन भासत इत्यत्र भासधात्वर्थेऽन्वयः, भासत इत्यत्राख्यातार्थ आश्रयत्वं विषयताऽवच्छेदकत्वमिति प्रथमान्तार्थेऽन्वेति, अत्रोपलक्षणत्वं पदजन्यशाब्दबोधीयविषयताऽवच्छेदकत्वावच्छिन्नशक्तिविषयताशून्यत्वम्।

तथा च भगवत्सङ्केतविषयतानिरूपिततादृशबुद्धिविषयतयाऽवच्छेदकत्वनिष्ठप्रकारतानिरूपितविषयताऽऽश्रयीभूतं यद् घटत्वपटत्वादिकं तन्निष्ठविषयतानिरूपितविषयताऽऽश्रयतदादिपदजन्यबुद्धिविषयताऽवच्छेदकत्वमित्यन्वयबोधः।

एवञ्च=घटत्वादावुपलक्षणीभूतबुद्धिविषयताऽवच्छेदकत्वावच्छिन्नशक्तिविषयत्वे च, घटत्वाद्यनुगतधर्मेण शक्यांशे विषयतैक्ये दृष्टान्तमुक्त्वाऽनुगतधर्मेण शक्यताऽवच्छेदकांशे विषयतैक्ये दृष्टान्तमाह—पश्वादिपदेत्यादि।

शक्तौ हर्यादिपदजन्यबोधविषयताऽवच्छेदकत्वं भासत इति न नानाऽर्थमात्रोच्छेद इति।

इयांस्तु विशेषः—तत्र घटत्वलोमत्वादिषु तत्तत्पदजन्यबोधविषयताऽवच्छेदकत्वं भासत इति तानि विशेषणान्युच्यन्ते; प्रकृते च बुद्धिविषयताऽवच्छेदकत्वे सर्वनामपदजन्यबोधविषयताऽवच्छेदकत्वं संकेतेन नावगम्यतेऽपि तु तादृशविषयतासामानाधिकरण्यमात्रमिति तदुपलक्षणमिति गीयते।

यद्यपि घटादिपदसङ्केतस्य घटत्वादिशिष्टविषयकत्ववत् सर्वनामसङ्केतेन बुद्धिविषयताऽवच्छेदकत्वे बोधविषयताऽवच्छेदकत्वानवगाहनेऽपि सङ्केतस्य तद्विशिष्टविषयकत्वमक्षतमेवेति सङ्केतविषये तद्विशेषणमेव।

ननु भगवत्सङ्केतरूपायां शक्तौ पशुपदादिशक्यताऽवच्छेदकलोमाद्यंशे लोमत्वाद्यवगाहनेन तत्तत्पदजन्यशाब्दबोधेऽपि लोमत्वादेर्भानवत् शक्तौ तत्पदशक्यताऽवच्छेदकांशे बुद्धिविषयताऽवच्छेदकत्वस्य भाने शाब्दबोधे तस्य कथं भानं न स्याद्? इत्यतस्तयोः शाब्दबोधे भानाभानप्रयोजकवैलक्षण्यमाह—

इयांस्तु विशेष **इति। तत्रेति। शक्तावित्यर्थः।** विशेषणानीति। **तथा च तत्पदजन्यबोधविषयताऽवच्छेदकत्वनिष्ठविषयतानिरूपितशक्तीयविषयतावत्त्वं साक्षात् परम्परया वा तत्पदशक्यविशेषणत्वं, सङ्केतीयतादृशविषयत्वस्यैव शाब्दबोधे प्रकारतया भानप्रयोजकत्वादिति भावः।**

प्रकृते च=सर्वनामस्थले चेत्यर्थः। बुद्धिविषयताऽवच्छेदकत्व **इति। अत्र विषयतानिरूपितत्वं सप्तम्यर्थः; तस्य चावगाह्यत इत्यत्रावगाह्यर्थविषयतायामन्वयः, सङ्केतेनेत्यत्र निरूपकत्वरूपकर्तृत्वं तृतीयाऽर्थः, अस्यापि तत्रान्वयः, अवगाह्यत इत्यत्र कर्माख्यातार्थाश्रयत्वस्यावच्छेदकत्वमित्यन्तप्रथमान्तार्थान्वितनञर्थाभावेऽन्वयः।** तादृशविषयतासामानाधिकरण्यमात्रमिति। **सर्वनामपदजन्यबोधविषयतासामानाधिकरण्यमित्यर्थः। अस्य चावगाह्यत इत्यनेनान्वयः। तदुपलक्षणं=शक्योपलक्षणम्।**

ननु तत्पदजन्यबोधविषयताऽवच्छेदकत्वेन सङ्केतविषयत्वरूपविशेषणत्वं शक्यविशेषणमिति व्यवहारप्रयोजकमेवास्तु, शाब्दबोधे प्रकारतया भानप्रयोजकन्तु यद्विशिष्टे सङ्केतस्तत्त्वं,

तच्च सङ्केतीयविशेष्यतानिरूपितवैशिष्ट्यरूपसम्बन्धविषयताकविषयत्वमेव।

एवञ्च बुद्धिविषयताऽवच्छेदकत्वे सर्वनामपदसङ्केतीयतादृशविषयतायाः सत्त्वेन कुतो न तस्य शाब्दबोधप्रकारतया भानमित्याशङ्कते—यद्यपीति।

एवं शक्यविशेषणघटत्वादिनिष्ठे बोधविषयताऽवच्छेदकत्वरूपबोधविषयतानिष्ठसङ्केतविषयतानिरूपितविषयतारूपशक्यत्वे तदवच्छेदकमपि; तथाऽपि बोधविषयतया सङ्केतविषयत्वरूपशक्यतायास्तत्रासत्त्वेन शक्ये न तद्विशेषणं, शक्यव्यावर्त्तकशक्यस्यैव शक्यविशेषणत्वादिति तस्य शक्योपलक्षणतयाऽऽकाशपदजन्यशाब्दबोधे शब्दाश्रयत्वभानानियमवत् तदादिपदजन्यबोधे तदभाननिर्वाहः।

तद्बीजन्तु तदुपलक्षितघटत्वादिविषयकत्वेन तदविषयकघटत्वादिबोधस्यापि सङ्केतविषयत्वं, घटादिपदसङ्केतस्य च घटत्वादिविशिष्टविषयकबोध एव विषय

ननु तर्हि घटत्वादेरिव बुद्धिविषयताऽवच्छेदकत्वस्य घटादौ साक्षाद्भानं न कुतः? इत्यतश्छलत आह–एवमिति। शक्यत्व इति। अत्र सप्तम्यर्थनिरूपितत्वस्यावच्छेदकपदार्थघटकावच्छेदकतायामन्वयः। तदिति। बुद्धिविषयताऽवच्छेदकत्वमित्यर्थकं। शक्यांशे शाब्दबोधीयविषयत्वेन सङ्केतविषयत्वरूपविशेषणत्वस्य शक्यविशेषणव्यवहारप्रयोजकतावत् शाब्दबोधप्रकारताप्रयोजकत्वाद् न तदापत्तिरिति समाधत्ते–तथाऽपीति।

तत्रेति। बुद्धिविषयताऽवच्छेदकत्व इत्यर्थः। न तद्विशेषणमिति। तद्=बुद्धिविषयताऽवच्छेदकत्वं, न विशेषणं शाब्दबोधप्रकारताप्रयोजकविशेषणत्वाभाववदित्यर्थः।

ननु शक्तौ शक्यांशे भासमानत्वे सति तदनुगमकस्यैव विशेषणत्वेन बुद्धिविषयताऽवच्छेदकत्वस्य कुतो न सर्वनामपदशक्यविशेषणत्वमत आह–शक्यव्यावर्त्तकशक्यस्यैवेति। शक्यव्यावर्त्तकत्वं शक्यानुगमकत्वं, तच्च नानाशक्यनिष्ठविशेष्यतानिरूपितैकप्रकारत्वं न त्वितरव्यवच्छेदकत्वं सर्वादिपदशक्यताऽवच्छेदकस्य सर्वत्वादेरितरव्यवच्छेदकत्वासम्भवात्, शक्यस्यैवेति। तत्तत्पदजन्यबोधविषयत्वेन सङ्केतविषयताऽऽश्रयस्यैवेत्यर्थः।

शक्यविशेषणत्वादिति। तथा च शक्यानुगमकत्वे सति पदजन्यबोधविषयत्वेन सङ्केतीयविषयत्वस्यैव शक्यविशेषणतात्वमिति भावः।

शब्दाश्रयत्वभानानियमवदिति। आकाशपदस्य स्वरूपतः शक्त्यङ्गीकर्त्तॄणां मते शब्दाश्रयत्वस्योपलक्षणत्वादिति भावः। तदभाननिर्वाहः=बुद्धिविषयताऽवच्छेदकत्वाविषयत्वनिर्वाहः।

ननु शक्तौ बुद्धिविषयताऽवच्छेदकत्वस्योपलक्षणत्वं न तु विशेषणत्वमित्यत्र किं नियामकम्? इत्यत आह–तद्बीजन्त्विति। यथा यद्विशिष्टविशेष्यकबोधविषयत्वमिति। तद्विशिष्टनिष्ठविशेष्यताऽऽत्मकविषयताप्रकारताकत्वमित्यर्थः।

स्वरूपतो घटत्वादिना घटादेः शाब्दबोधोपपादिकां तद्रूपेण तच्छब्दे शक्तिं व्युत्पाद्य;

इति तज्जन्यबोधे तादृशधर्मभाननियमः, यथा यद्विशिष्टविशेष्यकबोधविषयत्वं सङ्केतविषयस्तच्छक्यताऽवच्छेदकतया व्यवह्रियते, तथा यद्विशिष्टप्रकारविशिष्टविशेष्यकबोधविषयत्वं तथा तच्छक्यताऽवच्छेदकताऽवच्छेदकमित्युच्यते प्रकृते च बुद्धिविषयताऽवच्छेदकत्वन्तथेति न तच्छक्यताऽवच्छेदकं न वा तत्त्वावच्छेदकं, जातित्वादिविशिष्टघटत्वाद्यवच्छिन्नस्य तदादिपदाद्यधीनबोधे तु बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मविशिष्टावच्छिन्नविषयकत्वावगाही सङ्केतः प्रयोजक इति तत्र जातित्वावच्छिन्नघटत्वादिनिष्ठप्रकारतैव विषय इति न जातिमानित्यादिबोधकाले घट

जातित्वादिकिञ्चिद्धर्मपुरस्कारेण घटत्वादिना घटादेः शाब्दबोधप्रयोजिकां शक्तिं व्युत्पादयति–जातित्वादिविशिष्टेति। अथ तत्पदजन्यजातित्वावच्छिन्नघटत्वनिष्ठप्रकारताकशाब्दबोधं प्रति तत्पदजन्यप्रकारताकविशेष्यत्वावच्छिन्नप्रकारतानिरूपिता या बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वनिष्ठसामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदकताकावच्छेदकतात्वावच्छिन्नावच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकताकविषयतानिष्ठप्रकारताकजातिमत्त्वावच्छिन्नविशेष्यताशालिसङ्केतविषयकज्ञानत्वेन हेतुता वक्तव्या।

सङ्केताकारस्तु–जातिमान् तत्पदजन्यबोधीयबुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नप्रकारताकविषयतावान् भवत्विति तु न वक्तुं शक्यते; यतो यत्र घटत्वत्वादिना घटत्वाद्यवच्छिनो वक्तृबुद्धिस्थस्तत्तात्पर्येणापि तच्छब्दप्रयोगस्तत्र घटत्ववान् तत्पदबोधीयबुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नप्रकारताकविषयतावान् भवत्वित्यादिरीत्या सङ्केता वाच्याः।

तथा च सङ्केतस्य नानात्वेन तस्य नानाऽर्थत्वापत्तेः, अपि तु तत्पदं बुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नप्रकारताकविषयताशालिबोधजनकं भवत्वित्याकारो वाच्यः।

एवञ्च तत्पदं बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तमित्याकारकसङ्केतज्ञानात् कदाचिज्जातित्वेन घटत्वावच्छिन्नस्योपस्थितिः कदाचित् घटत्वत्वादिना घटत्वावच्छिन्नस्योपस्थितिरिति क्वचिज्जातित्वादिना क्वचिद्घटत्वत्वादिना शाब्दबोध इति नियमस्यानुपपत्तिरिति चेद्?

न–श्रोता पुरुषो यदा जातित्वादिना घटत्वावच्छिन्नो वक्तृबुद्धिविषय इति प्रकरणादिना ज्ञात्वा जातित्वविशिष्टावच्छिन्नस्तत्पदशक्य इति जातिविशिष्टे शक्तिं गृह्णाति तदा जातित्वेन घटत्वावच्छिन्नं–प्रतिपद्यते।

यदा तु घटत्वत्वेन घटत्वावच्छिन्ने प्रकरणादिना वक्तृबुद्धिविषयत्वं गृह्णाति तदा तत्तुल्यरीत्या तद्रूपेण तत्र शक्तिमवधार्य तं शब्दाद्बुध्यत इत्येवं शक्तिग्रहशाब्दबोधकल्पनेऽनुप-

इत्याकारकबोधः।

अथ किञ्चित्प्रकारेण भासमानधर्मेऽवच्छेकत्वे भासमाने तद्विशिष्ट एव भासते

पत्त्यभावाद्, एतच्चाग्रेव्यञ्जयिष्यामः।

नन्वेवमपि सर्वनामपदाज्जातित्वादिनाघटत्वावच्छिन्नशाब्दबोधोत्पत्तये बुद्धिविषयताऽवच्छेकताऽवच्छेदकत्वोपलक्षितधर्मविशिष्टावच्छिन्ने पृथक् शक्तिकल्पने नानाऽर्थत्वापत्तिर्दुर्वारैवेति चेत्?

अत्र केचित्–साक्षात्परम्परासाधारणबुद्धिविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यधिकरणत्वेनोपलक्षणेन स्वरूपतो घटत्वावच्छिन्ने जातित्वादिना च घटत्वाद्यवच्छिन्न एकैव शक्तिः कल्प्यते, जातित्वादिविशिष्टेत्यादिग्रन्थस्तु तद्रूपेणैकशक्तिग्रहपरः। अन्यथा नित्यत्वे सत्यनेकसमवेतत्वरूपजातित्वस्य सखण्डतया बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वेन तस्यानुगमासम्भवाद्, घट एकत्ववानितिज्ञानीयविशेष्यताऽऽख्यविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यधिकरणत्वस्य स्वरूपतो घटत्वे जातिमानेकत्ववानित्यादिज्ञानीयविशेष्यतारूपविषयताऽवच्छेदकतात्वावच्छिन्नपर्याप्त्यधिकरणत्वस्य च जातित्वविशिष्टघटत्वादौ वृत्तेः।

अथवा तत्तद्बुद्धिविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्तिसम्बन्धेन तादृशावच्छेदकतात्वावच्छिन्नवत्वस्य घटत्वादौ तादृशजातित्वाद्यवच्छिन्ने च सत्त्वेन तादृशतादृशज्ञानमादाय तादृशतादृशतत्तद्धर्मेऽनुगतोपलक्षिततत्तद्धर्मेणानुगतशक्यताऽवच्छेदकत्वसम्भव इत्याहुः।

नव्यास्तु बुद्धिविषयताऽवच्छेदकत्वेन घटत्वपटत्वचैत्रत्वादीनां बुद्धिविषयताऽवच्छेदकत्वेन स्वरूपत एकशक्यताऽवच्छेदकत्वम्, अतो न तत्तद्धर्मभेदेन शक्तेर्भिन्नत्वं, समवेतत्वादिना जातित्वादिना च घटत्वादौ जातित्वादौ च बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वेन तदवच्छेदकत्वेन च पृथक्शक्यताऽवच्छेदकत्वं; सर्वनाम्नो नानाऽर्थता च स्वरूपतः शक्यताऽवच्छेदकताऽवच्छेदकादिभेदेनेष्यत एवेति प्राहुः।

वस्तुतस्त्वनुगमघटितवक्ष्यमाणसिद्धान्तकल्पे सर्वसाधारणैकशक्तिकल्पनप्रकारो दर्शयिष्यत एवातोऽत्राशङ्कासमाधानाभ्यामलमिति ब्रूमः।

न जातिमानिति। सङ्केतेन यादृशबोधोऽवगाह्यते तादृशबोधं प्रति तादृशसङ्केतज्ञानस्य कारणत्वादिति भावः।

तदवच्छेदकताऽनापन्नेन धर्मेण भासमानेऽवच्छेदकत्वमङ्गीकर्त्तुं न शक्यत इति शङ्क्यते–अथ तद्विशिष्ट एवेति। विशेषणेऽवच्छेदकत्वं भासत इति भावः। न जातिमान् नास्तीत्यतकारिकेति। तथा

न तदुपलक्षित इति नियमः, कथमन्यथा स्वरूपतो घटत्वावच्छिन्नाभावस्य न जातिमान्नास्तीत्याकारिका प्रतीतिः?

एवञ्च बुद्धिविषयताऽवच्छेदकत्वोपलक्षिते कथं बोधविषयताऽवच्छेदकत्वं सङ्केतेनावगाहनीयमिति चेद्?

न–अवच्छेदकताया अवच्छेद्याश्रयविशेषणताऽऽपन्नस्य संसर्गविधया भान एव तथा नियमाद्।

अन्यथा धूमव्यापकताऽवच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववानित्याकारकव्यापकताऽवच्छेदकत्वोपलक्षितवह्नित्वाद्यवच्छिन्नाभावप्रतीत्यनुपपत्तेः।

च जातिमान् नास्तीत्याकारकप्रतीतेः स्वरूपतो घटत्वाद्यवच्छिन्नाभाव- विषयकत्वे घटशून्यपटवति देशे जातिमान्नास्तीति प्रतीत्यापत्तेरिति भावः।

यो धर्मो भासते येन तद्विशिष्टे हि भासते।
तत्रावच्छेदकत्वं वै न तु तेनोपलक्षिते॥

संसर्गविधया भाने नियमोऽयं प्रकीर्त्तितः।
अन्यथा तत्पदाच्छक्तेर्भानमेव हि दुर्लभम्।
इति कारिकोक्तदिशा सिद्धान्तमारभते–

अवच्छेदकताया इति। अवच्छेद्याश्रयः=प्रतियोगित्वाद्याश्रयः, तत्र विशेषणत्वं तन्निष्ठविशेष्यताकप्रकारताऽऽश्रयत्वं, तदापन्नस्य=तदाश्रयस्य, संसर्गविधया=तन्निरूपितसांसर्गिकविषयतया, अत्र च तृतीयाऽर्थोऽभेदस्तस्य च भाष्धात्वर्थविषयतायामन्वयः। तथा नियमादिति। तद्विशिष्टे हि भासत इति नियमादित्यर्थः।

अयमाशयः–घटो नास्तीत्यादिप्रतीतौ घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन घटादेरभावादौ भानेन तत्रावच्छेदकतायाः संसर्गविधया भानाद्; अवच्छेद्यप्रतियोगित्वाश्रये घटे घटत्वं विशेषणमेव, तथा च तत्र घटत्वादिकमवच्छेदकमेव न तूपलक्षणमिति।

ननु किञ्चिद्धर्मप्रकारेण भासमाने यत्रावच्छेदकत्वं भासते तद्विशिष्ट एव तदिति सामान्यनियम एवादरणीयो लाघवादित्यतस्तत्र बाधकमाह–अन्यथेति।

अवच्छेदकतायाः संसर्गविधया भान एव तादृशनियम इत्यस्वीकार इत्यर्थः। धूमव्यापकताऽवच्छेदकेत्यादि। धूमाभावरूपव्याप्याभावानुमापकतादृशप्रतीत्यनुपपत्तेरित्यर्थः, तथा च तादृशानुमित्यनुत्पादभयेनोक्तज्ञानस्यापह्नोतुमशक्यत्वादिति भावः।

प्रकृते च तत्पदं बुद्धिस्थप्रकारावच्छिन्नविषयताकबोधं जनयत्वित्याकारकोऽवच्छेद्यावच्छेदकभावप्रकारक एव सङ्केतोऽङ्गीकार्य इत्यनुपपत्तेरभावाद्, स्वरूपतो घटत्वादिप्रकारकस्मरणाद्युपयोगी शक्तिग्रहः स्वरूपतो घटत्वादिप्रकारक एव; यदा स्वरूपतो यद्धर्मप्रकारकज्ञानसामग्री तदैव स्वरूपतस्तद्धर्मप्रकारेण शक्तिं गृहीत्वा स्वरूपतस्तत्प्रकारेण धर्मिणं स्मरत्यनन्तरमनुभवति च; मानसे च शक्तिग्रहे न व्यवहारदर्शनादेरपेक्षा; अपि त्वसंसर्गाग्रहसहितोपस्थितेरेवेति, यद्धर्माऽवच्छिन्ने तदादिपदघटितवाक्याद् व्यवहारो न दृष्टस्तदवच्छिन्नस्यापि मानसशक्तिग्रहाद् बोधः सुघट एव।

न च तत्र धूमव्यापकताऽवच्छेदकत्वावच्छिन्नवह्नित्वनिष्ठावच्छेदताकप्रतियोगिताकाभाववत्त्वज्ञानस्यैव व्याप्याभावानुमितिहेतुत्वमिति वाच्यम्?

तादृशरूपेण कारणत्वे व्यापकताऽवच्छेदकवान्नास्तीत्याकारकज्ञानस्यैव हेतुतया प्रमेयत्वादेरपि धूमव्यापकताऽवच्छेदकतया तदवच्छिन्नाभावाप्रसिद्ध्या विशेषदर्शिनां तादृशज्ञानानुपपत्तेः।

न च धूमव्यापकताऽवच्छेदकत्ववह्नित्वत्वोभयधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावज्ञानत्वेन हेतुता; तथा च धूमव्यापकताऽवच्छेदकवह्नित्ववान्नास्तीत्याद्याकाराभावज्ञानस्यैव प्रसिद्धत्वान्न तद्दोष इति वाच्यम्?

तादृशरूपेण हेतुत्वे धूमव्यापकताऽवच्छेदकत्वादेरप्यभावप्रतियोगिताऽवच्छेदककोटिप्रविष्टस्य विषयतायाः कारणताऽवच्छेदकघटकतया महागौरवापत्तेः, गुरुधर्मस्याभावप्रतियोगिताऽनवच्छेदकत्वे तादृशाभावाप्रसिद्धेश्च तादृशनियमस्य सङ्कोचकल्पनाया न्यायत्वाद्।

न चेदमप्रामाणिकं? येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभाववत्ताज्ञानं हेतुरित्यादिना दीधितिकृता तथा लिखितत्वाद्।

एतच्चाभावसाध्यकस्थले व्यापकत्वविशिष्टवैशिष्ट्यानवगाहिज्ञानस्यापि कारणत्वमत उक्तं, तेन मतविशेषे धूमादिव्यापकताऽवच्छेदकत्वविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानस्यापि कारणत्वे न क्षतिरिति मन्तव्यम्।

ननु स्वरूपतो घटत्वादिप्रकारकशक्तिग्रहः कदाचित् कुतो जायत इत्यत आह–यदा स्वरूपत इति। घटोऽस्य वक्तुर्बुद्धिस्थ इत्याकारकश्रोतृज्ञानसामग्रीत्यर्थः। श्रोतेति कर्त्तृपदमध्याहार्यम्।

नन्वत्र घटोऽस्ति तमानयेत्यादिव्यवहारदर्शनादिना घटादौ तत्पदस्य शक्तिग्रहः सुघटोऽस्तु; यत्र व्यवहारो न दृष्टस्तत्र शक्तिग्रहः कुतो जायत इत्यत आह–मानसे चेति। असंसर्गाग्रहे सतीत्यादि। असंसर्गाग्रहः=तद्धर्मावच्छिन्ने तत्पदशक्यत्वबाधनिश्चयाभावः, तत्सहिता या

न च व्यवहारदर्शनाद्यविषये मनसा शक्तिर्निश्चेतुं न शक्यते विपरीतकोटेरप्युपस्थितिमात्रेण मानसज्ञाने भानसम्भवादिति वाच्यम्?

उपस्थितस्यापि बाधितस्य दोषमन्तरेणाभानान्निश्चयस्याप्युपपत्तेः।

एवं सति कतिपयविषयेषु सर्वनामघटितवाक्याद् प्रयोज्यस्य प्रवृत्तिमुपलभमानः प्रवर्त्तकज्ञानविषयकतिपयविषये शक्तिं कल्पयन् बुद्धिविषयताऽवच्छेदकधर्मावच्छेदेन तत्पदशक्यत्वं सामान्यतोऽवधारयति।

एवञ्च चैत्रोऽस्य बुद्धिविषयताऽवच्छेदकधर्मवानिति यदा तेन गृह्यते तदानीमस्य चैत्रस्तत्पदवाच्यो न वेति सन्देहो नावतरितुमर्हति।

तत्पदशक्यत्वतत्पदार्थोपस्थितिस्तस्या इत्यर्थः। मानसशक्तिग्रहाद्=उपनयजन्यालौकिकमानसशक्तिग्रहात्।

ननु बाधनिश्चयाभावसहकृततत्तद्विशेषणोपस्थित्या यदि विशिष्टशक्तिग्रहो जायते; तदा शक्तिविपरीतकोटेरपि बाधकाभावेनोपस्थितिसम्भवेन तत्तत्संशयो जायत एवति कथं शक्तिनिर्णय इत्याशङ्कते—न चेति। बाधितस्य=शक्त्यादिविरहस्य।

ननु लौकिकप्रत्यक्षादौ विषयस्य बाधितस्य भाने पित्तादिदोषापेक्षाऽस्तु यत्रालौकिकसन्निकर्षादिनैककोटिरपि निर्णेतुं न शक्या तत्र बाधिता कोटिरुपस्थितिबलाद् दोषमनपेक्ष्यैव भासताम् अन्यथा धूमादौ वह्निव्यभिचारस्य च सन्देहः कदापि न स्यात् स्याच्च तर्कानुसरणस्य शास्त्रकाराणां युक्त्यन्तरप्रदर्शनस्य वैकल्यमिति तत्तद्विपरीतकोटेः स्वतो भानं बाधकं दर्शयितुमाह—एवं सतीति।

कतिपयविषयेष्विति। गोघटादिष्वित्यर्थः। सर्वनामघटितवाक्यतोऽत्र गृहे गौरस्ति तमानयेत्यादिवाक्यात्। प्रयोज्यस्य=नियोज्यपुरुषस्य। प्रवृत्तिं=गवानयनादिषु प्रवृत्तिम्। उपलभमानः=निश्चिन्वन्। समीपस्थपुरुष इति शेषः। कल्पयन्=अनुमिन्वन्। बुद्धिविषयताऽवच्छेदकधर्मावच्छेदेनेति।

न च यदि प्रवर्त्तकज्ञानविषयकतिपयपदार्थे शक्तिज्ञानेन सामान्यतो बुद्धिविषयताऽवच्छेदकावच्छेदेन शक्त्यवधारणं जायते; तदा तुरीतन्तुप्रभृतिकतिपयद्रव्येषु पटादिजनकत्वदर्शनेन द्रव्यत्वावच्छेदेन पटादिजनकत्वं गृह्णीयादिति वाच्यम्?

यथा कतिपयदण्डेषु घटजनकत्वं दृष्ट्वा व्यभिचारदर्शनलाघवज्ञानादिसहकारेण दण्डत्वावच्छेदेन तदवधारयति तद्वदत्रापि तादृशज्ञानजनने बाधकाभावाद्; अन्यथा निखिलधर्मिज्ञानासम्भवेन जलाद्यवच्छेदेन वह्निमत्त्वादिज्ञानं कदाऽपि नोत्पद्येत, द्रव्यत्वाद्यवच्छेदेन

यादृशधर्मावच्छेदेन यदवधारितं तादृशधर्मनिश्चयस्य स्वसमानधर्मिताऽवच्छेदकतद्विरोधिकोटिभानविरोधित्वादिति सम्भवत्येवापूर्वविषयेऽपि मानसः शक्तिनिश्चयः।

अथैवमपि तत्पदे चैत्रत्वविशिष्टवाचकतासन्देहस्य दुरुच्छेदतया तत्पदाद्व्यहारदर्शनाविषयचैत्रत्वावच्छिन्नविषयकशाब्दबोधो दुरुपपाद एव, तद्धर्मप्रकारकशाब्दबोधे तद्धर्मविशिष्टवाचकतानिश्चयस्य हेतुत्वाद्, अन्यथा गवादिपदादभ्रान्तस्य शक्त्या सास्नाऽऽदिमत्त्वप्रकारेण शाब्दबोधापत्तेरिति चेद्?

न–तत्पदप्रयोजकबुद्धिप्रकारतया गृहीतघटत्वपटत्वादिविशिष्टे व्यवहारदर्शनात् तत्पदस्य शक्तिं गृहीत्वा; यद्यत्तत्पदं यादृशयादृशधर्मावच्छिन्नविषयकबुद्ध्या प्रयुज्यते तत्तत् तत्पदं तद्धर्मविशिष्टशक्तमिति सामान्यतो व्याप्तिमवधारयति।

तदनन्तरञ्च प्रत्यक्षगृहीतचैत्रत्वादिविशिष्टविषयकबुद्धिप्रयोज्यत्वं प्रकरणादिना

पटादिजनकत्वग्रहस्तु व्यभिचारदर्शनेन न जायत इति।

ननु बुद्धिविषयताऽवच्छेदकावच्छेदेन तत्पदशक्यत्वनिश्चयसहकृतस्य चैत्रत्वावच्छिन्ने बुद्धिविषयताऽवच्छेदकवत्तानिश्चयस्य विपरीतकोटिनिरासद्वारा सामान्यतश्चैत्रत्वावच्छिन्ने तत्पदशक्यत्वनिश्चायकत्वेऽपि तत्पदशक्यत्वं चैत्रत्वावच्छिन्नं किमन्यधर्मावच्छिन्नमिति सन्देहानिरासात् तत्पदे चैत्रत्वविशिष्टवाचकतासन्देहोदयेन तादृशनिश्चयाजननात् कुतस्तत्पदाच्-चैत्रत्वविशिष्टस्य शाब्दबोध इत्याशङ्कते–अथैवमपीति। गवादिपदं सास्नाऽऽदिमत्त्वादिविशिष्टवाचकमिति भ्रमवतः सास्नाऽऽदिमत्त्वेन शाब्दबोधस्येष्टापत्तेराह–अभ्रान्तस्येति।

सिद्धान्तमारभते–तत्तत्पदप्रयोजकेति। शक्तिं गृहीत्वेत्यन्तेन तत्तद्धर्मविशिष्टवाचकत्वस्य च परस्परं सहचारदर्शनं व्यभिचारादर्शनञ्च व्याप्तिग्राहकं पूर्वमस्तीति सूचितम्, सामान्यतो व्याप्तिमवधारयतीति। सामान्यतो व्याप्त्यवधारणञ्च यत्र प्रकृतसाध्यसाधनयोः सहचाराद्यनिश्चयेन व्याप्तिग्रहासम्भवेऽपि तत्सजातीयसाध्यसाधनयोः सहचारदर्शनादिजन्यव्याप्तिनिश्चय तादृशव्याप्तिनिश्चयसहितेन।

अथवा सजातीयनानाहेतौ सजातीयनानासाध्यसहचारग्रहस्य प्रकृतहेतौ प्रकृतसाध्यव्याप्तिग्रहं प्रति स्वातन्त्र्येण हेतुताकल्पनात् प्रकृतहेतोः पक्षधर्मतामात्रग्रहेण सजातीयसाध्यहेतुसहचारदर्शनजन्यव्याप्तिग्रहेण वा प्रकृतसाध्यानुमितिरिति भावः।

न च प्रकृतसाध्यव्याप्यहेतुनिश्चयासत्त्वेन कुतोऽनुमितिरिति चेद्?

न–व्यतिरेकसाध्यकस्थले प्रतियोगिताऽवच्छेदकावच्छिन्नव्यापकाभावनिश्चयस्येव तादृशज्ञानस्यापि स्वातन्त्र्येणैव हेतुत्वाद्।

यत्र तत्पदे गृह्णाति तत्र पक्षे तादृशहेतुना चैत्रत्वविशिष्टवाचकत्वस्य प्रागसिद्धस्यापि पक्षधर्मताबलादनुमित्यात्मकनिश्चयेनावगाहनसम्भवाद् न काऽप्यनुपपत्तिः।

केचित्तु बुद्धिविषयताऽवच्छेदकत्वेनानुगतधर्मेण सकलधर्मविषयकसंस्कारस्य सामान्यप्रत्यासत्त्यधीनानुभवजन्यस्य सत्त्वे प्रमुष्टबुद्धिविषयताऽवच्छेदकतांशं स्वरूपतश्चैत्र-

---

अन्यथा स्वकीयस्तनादिविषयककृतिसाध्यत्वज्ञानप्रवृत्त्योः सहचारदर्शनेन यो यत्र प्रवर्त्तते स तं कृतिसाध्यतया जानातीति सामान्यव्याप्तिमवधार्य; बालकस्य गवानयनादौ प्रवृत्तिदर्शनेन गवानयनादिविषयकप्रयोज्यपुरुषीयकृतिसाध्यत्वज्ञानानुमित्यनुत्पत्तेरनुपत्तेश्च लिङस्तदधीनकार्यत्व-शक्तत्वज्ञानस्य।

ननु साधनसजातीये साध्यसजातीयव्याप्तिनिश्चयादेव यदि प्रकृतसाध्यानुमितिर्भवति तदा दीधितिकारस्य यो यदीययावद्विशेषाभावनान् इत्यादिना सामान्यव्याप्तिं प्रदर्श्याग्रे यत्त्वतत्त्व-योरननुगमादित्यनेन तद्दूषणदानस्यासङ्गत्यापत्तेः, यत्त्वतत्त्वयोरननुगमस्य तद्विघटकत्वादिति चेद्?

न–यो यदीयेत्यादिवाक्यस्य प्रकृतसाध्यतत्सजातीयसाधारणाद्यनुगतरूपेणैकव्या-प्तिपरत्वमभिप्रेत्य प्रथमतो दूषणं प्रदर्श्य; तत उक्तरीत्या दोषासम्भवेनैकावच्छेदेनेत्यनेन दोषान्तर-प्रदानात्, साजात्यश्चात्र स्वसाध्यकानुमितिप्रयोजकोदाहरणघटकद्विरुक्तयत्पदतात्पर्यविषयत्वेन, एवमन्यत्रापि यथायथं बोध्यम्।

तादृशहेतुनेति। चैत्रत्वादिविशिष्टविषयकबुद्धिप्रयोज्यतत्पदत्वहेतुनेत्यर्थः, चैत्रत्ववि-शिष्टवाचकत्वस्य जन्यबोधीयचैत्रत्वनिष्ठनिरवच्छिन्नावच्छेदकताकविषयतात्वावच्छिन्नप्रकारकता-केच्छीयविशेष्यतायाः परम्परया निरूपकत्वस्य, प्रागसिद्धस्यापि=प्रागननुभूतस्यापि।

तत्पदं बुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मविशिष्टवाचकमिति वृद्धव्यवहारतो जायमानं शक्तिज्ञानं बुद्धिविषयताऽवच्छेदकत्वरूपसामान्यप्रत्यासत्त्या ज्ञायमानघटत्वचैत्रत्वादिनिखिलविषयकं भवति तज्जन्यसंस्कारोऽपि तथा, तदधीनस्मरणञ्च बुद्धिविषयताऽवच्छेदकत्वानवगाहि तत्पदं चैत्रत्वादिविशिष्टवाचकमित्याद्याकारकं जायते तदंश उद्बोधकाभावात्, फलबलेन च तत्तद्विष-यकसंस्कारस्यापि तत्तदंश उद्बोधकाभावसहकारेण तत्तदविषयकस्मरणं प्रत्यपि हेतुत्वकल्पनादिति वदतां केषाञ्चिन्मतमाह–केचित्त्विति।

प्रमुष्टबुद्धिविषयताऽवच्छेदकतांशं=प्रमुष्टं त्यक्तं स्वाविषयकबुद्धिविषयताऽवच्छेद-कतांशमिति यावद्। अनपेक्षणादिति। तथा च जातित्वेतरधर्मानवच्छिन्नघटत्वनिष्ठप्रकारताक-विशेष्यताशालिस्मरणादिकं प्रति जातित्वावच्छिन्न घटत्वनिष्ठप्रकारताकविशेष्यताशालिसंस्कारत्वेन तादृशविषयताऽऽदिशाल्यनुभवत्वेन च कारणत्वमिति भावः।

त्वादिप्रकारकशक्तिस्मरणं निराबाधमिति; तन्मूलकमेव स्वरूपतोऽपूर्वचैत्रत्वादिप्रकारकशाब्दज्ञानं भविष्यतीति; किमनुपपन्नं? स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारकसंस्कारानुभवयोरनपेक्षणाद्, उद्बोधकवैचित्र्यादेव कदाचिज्जातिमान् इत्याकारकं कदाचिद् घट इत्याकारकं स्मरणमिति नियमोपपत्तेः, स्वरूपतो घटत्वादिप्रकारकानुभवजनितसंस्कारवतोऽपि जातित्वादिना घटत्वादिप्रकारकात् संस्कारात् कदाचित् स्वरूपतोघटत्वाद्यप्रकारकस्य जातिमानित्याकारकस्मरणोदयेन स्वरूपतस्तत्प्रकारिकायां स्मृतौ तादृशसंस्कारानुभवयोर्विशिष्य हेतुत्वेऽप्युद्बोधकविशेषविरहस्य तादृशस्मृतिविरहप्रयोजकताया आवश्यकत्वात्, तादृशहेतुताया अप्रामाणिकत्वात्।

कथमन्यथा विशेषणान्तरानवच्छिन्नाऽस्मदाद्यदृष्टशरीरविशेषनिष्ठजातिविशेषावच्छिन्नसङ्केतितरामरावणादिपदेभ्यो वाक्यार्थधीरस्माकम्–

कथं वा निर्विशेषणकातीन्द्रियजातिविशेषावच्छिन्नवाचकमनःपदात् शाब्दधीस्तत्र जातित्वादिना जातिविशिष्टे शक्तिग्रहेण प्रमुष्टजातित्वांशं मनस्त्वादिप्रकारकं शक्तिस्मरणं तत्रापि विशेषणांशमोषमन्तरेण गत्यन्तराभावादिति वदन्ति।

नन्वेवं सति जातित्वेन घटत्वप्रकारकसंस्काराज्जातित्वेन घटत्वप्रकारकं स्वरूपतो घटत्वप्रकारकञ्च स्मरणं नियतं स्यादत आह–उद्बोधकवैचित्र्यादेवेति। उद्बोधकवैलक्षण्यादेवेत्यर्थः। तथा च यदा जातित्वेन स्मरणप्रयोजकम् उद्बोधकं सम्भवति तदा तद्रूपेण स्मरणं, यदा स्वरूपतो घटत्वप्रकारकस्मरणप्रयोजकमुद्बोधकं तदा तादृशं स्मरणमित्यनियमो नेत्यर्थः स्वरूपतस्तत्प्रकारकस्मरणं प्रति स्वरूपतस्तत्प्रकारकसंस्कारानुभवयोः कारणत्वेऽप्युद्बोधकस्य नियामकत्वमावश्यकं। न तु मन्मत एवेत्याह–स्वरूपत इति। आवश्यकत्वादिति। उद्बोधकविशेषविरहस्य स्मृतिविशेषविरहाप्रयोजकत्वं युगपदेव स्वरूपतो घटत्वप्रकारकस्मृतिः, जातित्वादिना च घटत्वप्रकारकस्मृतिश्चोपपद्येतोभयोः सामग्रीसत्त्वादिति भावः।

अत एव प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणमिति न्यायसूत्रेण तथैवोक्तं, प्रणिधानादिकन्त्वनुपदं व्याख्यास्यामः, तादृशहेतुताया इति। स्मृतिसंस्कारयोर्विशेष्यहेतुताया इत्यर्थः, किञ्चिद्धर्मप्रकारेण तद्धर्मप्रकारकसंस्कारात् स्वरूपतस्तद्धर्मप्रकारकस्मरणास्वीकारे दशमुखाद्यवच्छिन्नशरीरवृत्तिजातिविशेषावच्छिन्नवाचकरामरावणादिपदेभ्यः स्वरूपतस्तादृशजात्यवच्छिन्नस्यास्मदाद्यननुभूतत्वेन शक्तिग्रहासम्भवात् स्मरणासम्भवेन शाब्दबोधानुदयः स्यादित्याह–कथमन्यथेति। तत्रेति। रामरावणमनःपदादावित्यर्थः। जातित्वादिनेति। शक्तिग्रहेण स्वरूपतः स्मरणद्वारा शक्तिग्रहप्रयोजकतादृशसंस्कारेणेत्यर्थः, तथा च जातित्वावच्छिन्नजातिनिष्ठप्रकारताकेन शक्तिग्राहकसंस्कारेणेत्यर्थः।

विवदन्तेऽप्यत्र बहवः–स्मृतेर्विलक्षणप्रकारतायां संस्कारानुभवयोः प्रयोजकत्वस्योद्‌बोधकविशेषप्रयोजकतामाश्रित्योच्छेदने विशेष्यविशेषणभावांशेऽप्युद्‌बोधकविशेषस्यैव नियामकत्वसम्भवात्, प्रकारत्वविशेष्यत्वानन्तर्भावेण सामान्यतस्तद्विषयकस्मृतौ तद्विषयकत्वेनैव संस्कारानुभवयोर्हेतुताऽऽपत्तेः, रावणादिपदेभ्यः लक्षणया तत्तत्पदार्थत्वादिप्रकारक एवान्वयबोधः।

एतेन रामादिपदानां जातित्वेन तादृशजात्यवच्छिन्नशक्तिग्राहकाभावात्तादृशशक्तिग्रहासम्भवेऽपि न क्षतिः।

अयम्भावः–जातित्वादिना यत्किञ्चिद्धटत्वादिप्रत्यक्षानन्तरं सामान्यप्रत्यासत्त्या निखिलजातिमद्विषयकानुभवेनोपनयेन जातिविशिष्टानुभवजनिततादृशसंस्कारात् प्रमुष्टजातित्वांशो रामरावणादिशरीरवृत्तिजातिपुरस्कारेण तादृशजातिमद्विषयकः स्मरणात्मकस्तत्तत्पुराणकोषादिभ्यः स्वरूपतस्तादृशजात्यवच्छिन्नः शक्तिग्रहो जायते, तदनन्तरं तादृशशक्तिग्रहवशात् स्वरूपतस्तादृशजात्यवच्छिन्नस्य स्मरणं शाब्दबोधश्च भवतीति।

स्वरूपतस्तद्धर्मप्रकारकस्मृतौ स्वरूपतस्तद्धर्मप्रकारकसंस्कारत्वेन हेतुत्वेऽपि रामरावणादिपदेभ्यः शाब्दबोधमुपपादयति–रावणादीति।

न च रावणादिपदानां शक्त्यग्रहे शक्यसम्बन्धरूपलक्षणाया ग्रहासम्भवात् कथं तत्तत्पदार्थत्वादिना शाब्दबोध इति वाच्यम्?

यत् पदं साधु पूर्वपूर्वैर्व्युत्पन्नैः प्रयुक्तं तत्पदं किञ्चिद्वाचकमिति सामान्यव्याप्त्या तत्तत्पदशक्यत्वग्रहसम्भवाल्लक्षणाग्रहे शक्यताऽवच्छेदकावगाहनस्यानपेक्षणादिति भावः।

केचिच्चिदानीन्तनपुरुषे शक्तस्य रामादिपदस्य लक्षणया तादृशबोधो भवतीत्याहुः।

तदसद्–रावणदशास्यादिपदस्येदानीन्तनपुरुषे शक्तिग्रहो न यस्य पुरुषस्य जातस्तस्यापि तादृशपदात् पुराणादितः शाब्दबोधजननात्।

ननु सामान्यतस्तद्विषयकस्मृतित्वावच्छिन्नं प्रति तद्विषयकसंस्कारत्वेन हेतुत्वे घटवद् भूतलमित्यनुभवजन्यतादृशसंस्काराद् घटो भूतलश्चेत्याकाराकस्मरणापत्तिरनुपपत्तिश्च तादृशविशिष्टस्मरणस्य, प्रकारताऽऽदेः प्रयोजकत्वाभावात् तत्तदुद्बोधकानां तादृशतादृशविशिष्टस्मरणजनकत्वेऽनुभवसंस्कारयोः स्मृतित्वावच्छिन्नं प्रति कारणत्वानुपपत्तिरतो विशिष्टस्मरणं प्रत्येतन्मतेऽपि विशिष्टसंस्कारस्य हेतुत्वमावश्यकमित्यालोच्याह–वस्तुतस्त्विति। अनुगतोद्बोधकेति। अनुगतोद्बोधकश्च सुस्मूर्षितचिह्नज्ञानचित्रादिधर्मिकसादृश्यज्ञानादि, व्यक्तश्चैतत् प्रणिधाननिबन्धाभ्यासेत्यादिसूत्रे, तत्र च तत्तदर्थविषयकस्मरणं प्रति सुस्मूर्षिततत्तदर्थचिह्नज्ञानत्वेन तादृशसा–

वस्तुतस्तु–अनुगतोद्बोधकस्थले स्वरूपतस्तत्प्रकारकशक्तिज्ञानसत्त्वे स्वरूपतस्तत्प्रकारकस्मरणापत्त्या तत्र तादृशज्ञानस्य हेतुत्वमावश्यकमित्यलमतिपल्लवितेन।

अथ सामान्यतो वक्तृबुद्धिविषयताऽवच्छेदकधर्मावच्छिन्नस्य सर्वनामशक्यत्वे शक्तिभ्रमं विना कालान्तरीणपुरुषान्तरीणबुद्धिविषयताऽवच्छेदकत्वधर्मावच्छिन्नविषयिका प्रतीतिः सर्वनाम्ना न जन्यते।

अपितु यो यदा यस्य बुद्धिस्थस्तदा तदुच्चरितपदात्तत्प्रकारावच्छिन्नविषयिकैवेति नियमानुपपत्तिः, स्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नस्य शक्तिविषयत्वे च स्वपदस्य तत्तद्व्यक्तिपरतया तत्तत्पदव्यक्तिभेदेन शक्तिभेदप्रसङ्गः, अननुगमाद् व्युत्पत्तिविरोधश्च।

एवं युष्मदस्मत्पदयोरात्ममात्रे न शक्तिः; अपि तु सम्बोध्योच्चारणकर्त्रोरिव, सम्बोध्यताऽवच्छेदकत्वोच्चारयितृताऽवच्छेदकत्वरूपानुगतधर्मोपलक्षितचैत्रात्मत्वादिकमेव

दृशज्ञानत्वेनानुगतरूपेण हेतुतया तादृशस्थल उद्बोधकवैलक्षण्यज्ञाने बोधस्य कल्पयितुमशक्यत्वमिति भावः। स्वरूपत इति। जातित्वादिना गोत्वावच्छिन्ने शक्तिभ्रमसत्त्वे, स्वरूपत इति। किञ्चिदविशेष्यतयेत्यर्थः।

व्युत्पत्तिविरोधश्चेति। सर्वनाम्न एका शक्तिरिति व्युत्पत्तिविरोधश्चेत्यर्थः। तथा च पूर्वाननुभूतचैत्रत्वादिप्रकारकशाब्दबोधानुपपत्तिरिति ध्येयम्।

युष्मदस्मत्पदयोरप्यनुगतशक्यताऽवच्छेकं दिदर्शयिषुर्लाघवायात्रैव तत्पदद्वयं धारयति–एवं युष्मदिति। आत्ममात्र इति। तयोरात्ममात्रशक्तत्वे त्वं गच्छेः; अहं न गच्छेयमिति विधिनिषेधयोरनुपपत्तिः, उद्देश्यताऽवच्छेदकस्यात्मत्वस्यैक्याद्, आत्मत्वसामानाधिकरण्येनोभयान्वयसमर्थने त्वं गच्छसीति निश्चयकाले त्वं न गच्छसीति प्रतीत्यापत्तेरिति भावः। सम्बोध्यतेति। वक्त्रुच्चरितवाक्यजन्यबोधावच्छेदकताऽवच्छेदकत्वेन वक्त्रभिप्रायविषयताऽवच्छेदकत्वोपलक्षितजात्यवच्छिन्नशरीरविशिष्टात्मत्वम्, उच्चारणानुकूलकृत्यवच्छेदकताऽवच्छेदकत्वोपलक्षितजातिमच्छरीरावच्छिन्नात्मत्वञ्च तयोः शक्यताऽवच्छेदकमित्यर्थः। चैत्रात्मत्वादिकमेवेति। चैत्रमैत्रतत्तच्छरीरविशेषावच्छिन्नात्मत्वमेवेत्यर्थः। सम्बोध्यतेति। तच्च वाक्यजन्यबोधाश्रयत्वेन, मैत्रादेरेति। अत्र षष्ठ्यर्थो विषयित्वं तस्य च प्रतीतिप्रसङ्ग इत्यत्र प्रतीतावन्वयः। स्वजन्येति। स्वपदं युष्मच्छब्दपरम् स्वोच्चारणेति। स्वपदमस्मच्छब्दपदपरम् स्वोच्चारणेति। स्वपदं तच्छब्दपरम्। उच्चारणञ्च वर्णोद्देश्यककृत्यधीनो जनकतावदभिघातसंयोगानुकूलो व्यापारः। शब्दमुच्चरतीत्यादौ द्वितीयाऽर्थो निरूपितत्वं तस्य च तादृशधात्वर्थघटकजनकतायामन्वयः, तथा च स्वोच्चारणानुकूला या

प्रवृत्तिनिमित्तमित्यप्यसङ्गतं, सामान्यतः सम्बोध्यताऽवच्छेदकत्वादेरनुगमकत्वे चैत्रस्य यत्पदसम्बोध्यता तस्माद् युष्मत्पदात् पदान्तरसम्बोध्यमैत्रादेश्चैत्रोच्चारितादस्मत्पदात् पदान्तरोच्चारयितुश्च मैत्रादेः प्रतीतिप्रसङ्गो दुर्वार इति।

स्वजन्यबोधाश्रयतया प्रयोक्त्रभिप्रायविषयताऽवच्छेदकत्वरूपस्वसम्बोध्यता-ऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युस्मत्पदस्य; स्वोच्चारणकर्त्तृत्वावच्छेदकत्वो-पलक्षितधर्मावच्छिन्ने चास्मत्पदस्य; शक्तेः स्वीकरणीयतया स्वत्वान्तर्भावेणाननुग-मतादवस्थ्यादिति चेद्?

न—स्वोच्चारणानुकूलबुद्धिप्रकारावच्छिन्नविषयताकत्वस्वजन्यत्वोभयसम्बन्धेन तदादिसर्वनामपदप्रकारको बोधविषयकसङ्केतोऽभ्युपेयते।

बुद्धिस्तदीयप्रकारतावद्धर्मावच्छिन्नविषयकत्वमेकः सम्बन्धः, जन्यत्वश्चापरः।

न चात्र घटोऽस्ति तमानयेत्यादौ वक्त्रा घटादिकं बुद्धिविषयीकृत्य तच्छब्दप्रयोगेऽपि; तदुच्चारणप्रयोजकत्वं कुतो घटज्ञानादौ मन्यत इति वाच्यम्?

बुबोधयिषाऽधीनवाक्योच्चारणं प्रति वाक्यार्थज्ञानस्य हेतुतया तत्सम्पादकतया घटज्ञानस्य तदुच्चारणप्रयोजकत्वावश्यकत्वादिति।

तदादीति। आदिना त्यच्छब्दपरिग्रहः, अभ्युपेयत इति। उक्तोभयसम्बन्धेन तत्पदवान् बोध इत्याकारको भगवतः सङ्केतः स्वीक्रियते गत्यन्तरविरहादिति भावः।

अत्र तादृशसङ्केतविषयकं कीदृशाकारं ज्ञानं तत्पदजन्यशाब्दबोधे हेतुरिति चेद्?

अत्र नव्याः—स्वजन्यत्वस्वविशिष्टविषयतावत्त्वोभयसम्बन्धेन तत्पदवान् बोधो भवत्वेतादृश-सङ्केत ईश्वरीयः स्वीकार्यः, स्वं तत्पदं, स्ववैशिष्ट्यञ्च स्वोच्चारणप्रयोजकबोधीयप्रकारतासमाना-धिकरणनिरवच्छिन्नावच्छेदकताकत्वस्वोच्चारणप्रयोजकबुद्धिविषयवृत्तित्वोभयसम्बन्धेन।

एवञ्च तत्पदजन्यबुद्धिप्रकारत्वसमानाधिकरणनिरवच्छिन्नप्रकारताकविशेष्यताशालिशाब्दं प्रति स्वनिष्ठप्रकारताकबोधत्वावच्छिन्नसङ्केतीयविशेष्यतानिरूपिततादृशोभयत्वावच्छिन्नसंसर्गता-निरूपितवैशिष्ट्यनिष्ठसांसर्गिकविषयतानिरूपितोभयत्वावच्छिन्नसांसर्गिकविषयताकनिष्ठत्वनिष्ठ-सांसर्गिकविषयताका या निरूपितत्वसम्बन्धावच्छिन्नविषयता तादृशविषयतासम्बन्धेन तत्पदवान् बुद्धिप्रकारावच्छिन्न एतादृशसङ्केतज्ञानं हेतुः।

एवम् उक्तसङ्केतीयसांसर्गिकविषयतावत्त्वमेव पदार्थत्वम्, इतरपदार्थान्वयबोधं प्रत्यपि सङ्केतीयतादृशविषयताज्ञानं प्रयोजकमिति।

तत्र च स्वपदार्थस्य सम्बन्धाघटकतया तत्तत्पदव्यक्तित्वेन पदानां न विषयता;

ननु यत्र दोहनयोग्यगवीबुद्ध्या तामानयेति वाक्यं प्रयुक्तवान्; तत्र तच्छब्दस्य शुद्धगोत्व-विशिष्टे शक्तत्वज्ञानस्य भ्रमत्वं मा भूत् शक्तिभ्रमाधीनतज्जन्यशुद्धगोत्वप्रकारकशाब्दीयतत्तत्पद-जन्यत्वतत्पदोच्चारणानुकूलबुद्धिप्रकारकताऽऽश्रयगोत्वावच्छिन्नविषयतावत्त्वस्य च सत्त्वादिति।

न च स्वजन्यत्वस्वोच्चारणानुकूलबुद्धिप्रकारतात्त्वपर्याप्त्यधिकरणधर्मपर्याप्तावच्छेद-कताकविषयतावत्वोभयसम्बन्धेन पदप्रकारकबोधविषयकसङ्केतस्यैव प्रयोजकता; तथा च दोहनयोग्यगवीबुद्ध्या प्रयुक्तस्य तच्छदस्यैवोच्चारणप्रयोजकज्ञानीयप्रकारतायाः पर्याप्तिश्च दोहनयोग्यत्वे गोत्वे च वर्त्तते; अतः शुद्धगोत्वे तत्पर्याप्त्यधिकरणत्वेन सङ्केतावगाहिज्ञानस्य भ्रमत्वमेवेति वाच्यम्?

प्रकारताया व्यासज्यवृत्तित्वाभावेन पर्याप्तिसम्बन्धे मानाभावाद्, द्वित्वादेस्तु तत्त्वेऽयमेको न द्वावित्यादिविलक्षणप्रतीतेर्मानत्वादिति चेद्?

न–स्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयता-वत्त्वघटितसम्बन्धस्य विलक्षणत्वाद् अवच्छेदकतायाः पर्याप्तेस्तु बहुतरासामञ्जस्यभयेन ग्रन्थका-रादिभिः स्वीकारात्।

न चैवमपि यत्र घट इतिमात्रबुद्ध्या वक्त्रा तच्छब्दः प्रयुक्तस्तत्र तादृशज्ञानीयविषयताऽव-च्छेदकत्वविरहेण तादृशनिवेशो न सम्भवतीति वाच्यम्?

विशेष्यतायाः प्रकारावच्छिन्नत्वमते तत्र घटनिष्ठविशेष्यताया घटत्वेऽवच्छेदकत्वसत्त्वाद्।

वस्तुतस्तु घट इत्याद्याकारकमात्रज्ञानेन न तच्छब्दः प्रयुज्यते; अपि तु घटादिनाऽमुमर्थं साधयामीत्यादिकं मनसि कृत्यैव; तथा च तादृशघटत्वविशिष्टवैशिष्ट्यावगाहिज्ञानीयविषयताऽ-वच्छेदकत्वसत्त्वेनानुपपत्त्यभावाद्।

नन्वेवमपि स्वोच्चारणानुकूलेत्यादिसम्बन्धे स्वत्वस्य परिचायकत्वेन सामान्यत उच्चार-णानुकूलज्ञानीयविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यधिकरणत्त्वं न घटत्वेऽपि तु पटत्वमठत्वादावपि पटादिकं प्रक्रम्यापि तच्छब्दप्रयोगात्; तथा च कथं तच्छब्देन घटादिमात्रबोध इति चेद्?

मैवं–सामान्यतो ज्ञानीयविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकाया घटत्वादि-समुदायनिष्ठैकपर्याप्तेरसत्त्वेन यत्किञ्चिद्विषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्तेरेव संसर्गघटकत्वाद् यत्किञ्चिद्घटद्वयवति सामान्यतो घटद्वयवानिति प्रतीत्या द्वित्वप्रतियो-गिकपर्याप्तिरिव साक्षात्परम्परासाधारणावच्छेदकतायां निरूपकत्वस्वीकारेण यत्र दण्ड्यादि-तात्पर्येण तच्छब्दप्रयोगस्तत्र तस्य न शक्तिभेदः।

अपि तु तत्तत्पदत्वादिरूपानुपूर्वीविशेषप्रकारेणैवेति न पदव्यक्तिभेदेन शक्तिभेदः।

सामान्यतस्तत्पदत्वादिरूपानुपूर्वीविशेषावच्छेदेनैवोभयसम्बन्धावच्छिन्नबोधविषयतानिरूपितसङ्केतप्रकारता ग्राह्येति न व्युत्पत्त्यनुपपत्तिः।

कालान्तरीणपुरूषान्तरीणबुद्धिश्च नेदानीन्तनैतत्पुरुषीयतत्पदादिपदोच्चारणानुकूलेति; तद्विषयताऽवच्छेदकावच्छिन्नबोधे नोपदर्शितोभयसम्बन्धेनैतत्तत्पदादिवैशिष्ट्यम्, अतो नेश्वरेच्छायां तादृशबोधस्यैतत्तदादिपदप्रकारेण भानमिति न कालान्तरीणपुरुषान्तरीणबुद्धिविषयताऽवच्छेदकावच्छिन्नस्यैतत्तदादिपदवाच्यता।

भगवत्सङ्केतीयतत्पदव्यक्तिप्रकारतानिरूपिततथाविधसंसर्गविषयताऽन्तःपातिबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयताया एव तद्वाच्यतारूपत्वाद्; अतो न भ्रमं

अन्यथा स्वोच्चारणानुकूलबोधविषयताऽवच्छेदकताऽवच्छेदकावच्छिन्नावच्छेदकताकविषयताऽऽदिघटितसम्बन्धेन वैशिष्ट्यं निवेश्य भिन्नभिन्नशक्तेर्वक्तव्यतया नानाऽर्थताऽऽपत्तिः।

ननु स्वोच्चारणेत्यादौ स्वत्वस्य तत्तद्व्यक्तित्वातिरिक्तस्य दुर्वचत्वेन तत्तद्व्यक्तित्वस्य सम्बन्धघटकत्वेऽननुगमतादवस्थ्यमित्यत आह—स्वपदार्थस्येति।

तथा चोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयतावत्त्वजन्यत्वोभयस्यैव संसर्गत्वं, जन्यत्वञ्च स्वनिष्ठान्यथासिद्ध्यनिरूपकत्वे सति स्वाव्यवहितोत्तरत्वरूपं तत्रापि स्वत्वस्य परिचायकत्वेन नाननुगमः, अतिरिक्तं वेति ध्येयम्।

नन्वत्र तादृशसम्बन्धोऽनुगतस्तथाऽपि भगवत्सङ्केतो यदि तत्तत्पदत्वरूपेण तत्पदं बोधेऽवगाहते तदाऽवच्छेदकभेदेन सङ्केतविषयताभेदात् शक्तिभेद इति कथं सकलतत्पदशक्तिग्रहः? इत्यत आह—सामान्यतइति। व्युत्पत्त्यनुपपत्तिः=अपूर्वव्यक्तिग्रहानुपपत्तिरिति, एकदोच्चरितघटतात्पर्यकतत्पदस्यान्यदोच्चरिततत्पदजन्यपटविषयकबोध एकपुरुषोच्चरितघटतात्पर्यकतत्पदस्य पुरुषान्तरोच्चरिततत्पदजन्यार्थान्तरविषयकबोधे तत्पदसत्त्वाभावप्रयोजकसम्बन्धाभावं दर्शयितुं वाच्यत्वापत्तिं वारयति—कालान्तरीणेति।

वाच्यतारूपत्वादिति। तथा च भगवत्सङ्केतीया या बोधत्वावच्छिन्नविशेष्यताकतत्पदत्वावच्छिन्नप्रकारतानिरूपितपारम्परीणसांसर्गिकविषयतावद्विषयतावत्त्वं तत्पदवाच्यत्वमिति पर्यवसितम्।

हेतुरपि शाब्दबोध इच्छीयबोधत्वावच्छिन्नविशेष्यताकजन्यत्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयतावत्त्वोभयसम्बन्धावच्छिन्नतत्पदत्वावच्छिन्नस्वनिष्ठप्रकारतानिरूपितोच्चारणत्वावच्छिन्नसांसर्गिकविषयताकानुकूलत्वनिष्ठसांसर्गिकविषयताकबुद्धित्वावच्छिन्न-

विना तदवच्छिन्नबोधः।

तद्धर्मावच्छिन्नविषयताशालिबोधे पदांशे तद्धर्मावच्छिन्नविषयताघटितोक्तोभयसम्बन्धावच्छिन्नाया बोधनिष्ठविशेष्यतानिरूपितसङ्केतीयप्रकारताया वाचकतारूपायाः प्रकारतया संसर्गतया वा ज्ञानस्य हेतुत्वाद्, अन्यधर्मावच्छिन्नं बुद्धिस्थीकृत्य प्रयुक्ते पदेऽन्यधर्मावच्छिन्नविषयताघटितोभयसम्बन्धावच्छिन्नसङ्केतीयप्रकारताया असत्त्वात्; तत्र तदवगाहिज्ञानस्य भ्रमत्वनियमात्।

युष्मदस्मत्स्थलेऽपीदृश्येव रीतिश्चिन्तनीया।

अथ स्वसम्बोध्ये युष्मदः स्वोच्चारयितरि चास्मदः शक्तौ; "देव्युवाच–मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवता" इत्यादिऋष्यादिवाक्याद् देवीकर्त्तृकमहिषासुरकर्मकघातादिबोधानुपपत्तिस्तत्र देव्युच्चरितत्वस्य महिषासुरसम्बोध्यत्वस्य चाभावाद्, ऋष्यादिकर्तृकसुरथकर्मकघातादिबोधस्य च योग्यताभ्रमादापत्तिश्च, ऋष्यादेस्तादृशवाक्यप्रयोक्तृत्वात् सुरथादेश्च तत्सम्बोध्यत्त्वादिति चेद्?

सांसर्गिकविषयताकविषयतात्वावच्छिन्नविषयताकावच्छेदकतात्वावच्छिन्नविषयताकधर्मनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नविषयताकविषयतात्वावच्छिन्नसांसर्गिकविषयतावद्विषयतावत्त्वसम्बन्धेन तत्पदप्रकारकघटादिपदार्थविशेष्यकज्ञानम्।

अथ वा तत्पदजन्यतद्धर्मावच्छिन्नविषयताशालिशाब्दबोधे स्वनिष्ठविषयतानिष्ठसांसर्गिकविषयतायाः परम्परया निरूपिका या जन्यत्वस्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयतावत्त्वोभयत्वावच्छिन्नसांसर्गिकविषयता तन्निरूपकबोधनिष्ठविशेष्यताकतत्पदत्वावच्छिन्नसङ्केतीयप्रकारतासम्बन्धेनार्थप्रकारकपदविशेष्यकज्ञानमित्यवधेयमित्यलं पल्लवितेन।

ईदृशरीतिरिति। उक्तानुगमप्रणालीत्यर्थः, सा चाग्रे प्रदर्शनीया।

युष्मदस्मत्पदयोः शक्तिं निर्वक्तुमारभते–अथेत्यादि। स्वसम्बोध्ये=स्वघटितवाक्यजन्यबोधाश्रयत्वेन वक्त्रभिप्रेते, स्वं युष्मत्पदम्, अस्य च शक्तावित्यनेनान्वयः। स्वोच्चारयितरि चेति। अत्र स्वपदमस्मच्छब्दपरम्। देव्युवाचेति। सुरथराजर्षिणा पृष्टः मेधामहर्षिस्तमुद्दिश्य देवीमाहात्म्यं देवीमहिषासुरयोः संवादं जगाद तत्स्वरूपमित्यर्थः। तत्रेति। तादृशवाक्यघटके युष्मत्पदेऽस्मत्पदे चेत्यर्थः। महिषासुरसम्बोध्यत्वस्य=महिषासुरसम्बोध्यकत्वस्य तादृशवाक्यजन्यबोधाश्रयत्वेन ऋष्यभिप्रेतत्वस्य सुरथ एव सत्त्वादिति भावः।

तादृशपदार्थाप्रसिद्ध्या योग्यताज्ञानस्य प्रमात्वासम्भवादाह–योग्यताभ्रमादिति। समाधत्ते–

न–तत्र तादृशानुपूर्वीप्रकारेण सामान्यप्रत्यासत्त्या देव्यादिवाक्यस्यापि ज्ञानाद्देवी-महिषादिषु तादृशवाक्यप्रयोक्तृत्वस्वसम्बोध्यत्वप्रतिसन्धानादेवास्मद्युष्मद्भ्यां देवीमहिषादिप्रतीत्युपपत्तिः।

यदि च तत्र वक्त्रनुवक्तृवाक्योर्विभिन्नैवानुपूर्वी तदाऽनुवादकवाक्ये तद्व्यक्तित्वादिना विशेषदर्शनेऽप्यानुपूर्वीप्रकारेण देव्युच्चरितत्वभ्रमादेव श्रोतुर्देव्यादिप्रतीतिस्वीकारेणानुपपत्त्यभावाद्।

यत्र च तादृशानुपूर्व्यवच्छेदेनापि विशेषदर्शनं तत्र नेष्यत एव तत्प्रतीतिः।

एवमन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणरूपं स्वतन्त्रोच्चा-

---

तत्रेत्यादि। तत्र=मयेत्यादिमहावाक्ये, सप्तम्यर्थो घटकत्वं, तस्य च देव्यादिवाक्यस्येत्यत्रान्वयः। अत्र वाक्यं तत्तत् खण्डवाक्यमतो नानुपपत्तिः। तादृशेति। सुरथादेस्तादृशतादृशानुपूर्वीप्रकारेण ऋष्याद्युच्चरितवाक्यश्रावणप्रत्यक्षानन्तरं देवीवाक्यस्य सामान्यलक्षणया ज्ञानम्, इतरेषान्तु पुस्तकस्थतत्तद्वर्णचिह्नज्ञानादिनाऽनुभूततत्तद्वर्णस्मरणेन मनसा मत्वादिसामान्यप्रत्यासत्या जायमाननिखिलमादिवर्णज्ञानसहकारेण ऋष्यादिवाक्यज्ञानोत्तरमेकदैव वा देव्यादिवाक्यज्ञानं जायते, ततश्च देत्युच्चरिततादृशवाक्यघटकास्मत्पदोच्चारणकर्तृत्वं देव्यास्तद्घटकयुष्मत्पदसम्बोध्यत्वञ्च महिषासुरादौ प्रतिसन्दधतो निराबाधं तत्र तत्र तत्तत्पदस्य शक्तिज्ञानं सम्भवत्येवेति भावः, भवत्येवं यदि वक्तृदेव्या वाक्यमनुवादकमहर्षिवाक्यञ्चैकानुपूर्वीकं स्याद्, विभिन्नानुपूर्वीकञ्चेत् का गतिः? इत्यत आह–यदि चेति। विशेषदर्शनेऽपि=देव्युच्चरितवाक्यभेदनिश्चयेऽपि; ऋष्युच्चरितवाक्यमिदं न देव्युच्चरितमित्यादिनिश्चय इति यावद्, आनुपूर्वीप्रकारेणेति। मयेत्याद्यानुपूर्वीकं किञ्चिद् वाक्यं देव्युच्चरितमित्यादिभ्रमादित्यर्थः, तथा च तत्र तादृशास्मत्पदोच्चारणकर्तृताऽवच्छेदकत्वोपलक्षितात्मत्वावच्छिन्नशक्तिभ्रमादेव शाब्दबोध इति भावः।

तादृशानुर्व्यवच्छेदेनापि=मयेत्याद्यानुपूर्व्यवच्छेदेनापि। विशेषदर्शनं=देव्याद्युच्चरितत्वाभावनिश्चयः।

न च यदि देव्युच्चरितवाक्यस्य विभिन्नानुपूर्व्या निश्चयः स्यात् तदा ऋषिवाक्ये देव्युच्चरितानुपूर्व्यवच्छिन्नवाक्यभेदनिश्चयो भवितुमर्हति; स चास्माकं श्रोतुर्वाऽसम्भवीति कुतो विशेषदर्शनमिति वाच्यम्?

श्रोतुश्च कथञ्चित् सम्भवात्, अस्माकञ्च; तद्बोधकवाक्यान्तरघटितपुराणान्तरदर्शने तत्संशयसम्भवाच्च पुराणादिवाक्यविभिन्नकालिदासाद्युच्चरितवाक्ये तादृशबाधनिश्चयोदयाच्चेति।

ननूक्तरीत्याऽनुपपत्तिवारणेऽपि तत्रस्थास्मदादिपदेन ऋष्यादेर्बोधो दुर्वार इत्यत

रणमस्मत्पदप्रवृत्तिनिमित्तानुगमकम्।

उक्तस्थल ऋष्याद्युच्चारणश्च न तथा तस्यार्थप्रतिपादनद्वारा देव्युच्चारणाधीनत्वादिति नास्मत्शब्दादृष्यादिबोधः, स्वातन्त्र्येणाहं गच्छामीत्युच्चारणस्यापि को गच्छतीत्यादिप्रश्नवाक्यशक्तिग्राहकवाक्योच्चारणाधीनतया स्वार्थपरत्वमुच्चारणविशेषणम्, प्रश्नवाक्यस्य चाहं गच्छामीत्यादिप्रकृतवाक्यतात्पर्यविषयपरत्वाभावात्तदुच्चारणे विशिष्टव्यतिरेकः सुघटः।

आह—एवमिति। यत्र स्वीयगमनप्रतिपादनेच्छया मैत्रेणाहं गच्छामीत्युक्तौ सम्यगश्रुतवता चैत्रेण किमित्युक्तमिति जिज्ञासितेन मैत्रेणाहं गच्छामीति पुनरुक्तं, तत्र स्वतन्त्रोच्चरितास्मत्पदेऽव्याप्तिवारणाय—अन्यदियेति। अन्यदीयं प्रकृतास्मत्पदोच्चारणकर्त्तृभिन्नकर्त्तृकं यत् स्वार्थतात्पर्यकोच्चारणं; तच्च प्रकृतास्मत्पदघटितवाक्यजन्यबोधाश्रयत्वेनेच्छाप्रयोज्योच्चारणं, तादृशश्च प्रकृते देव्युच्चारणं तदधीनोच्चारणं प्रकृते ऋष्यादिकर्त्तृकं तद्भिन्नमित्यर्थः।

अस्मत्पदेति। स्वीयान्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणकर्तृत्वोपलक्षितात्मत्वावच्छिन्ने शक्तिः स्वतन्त्रोच्चरितास्मत्पदस्येति भावः।

न च ऋष्याद्युच्चरितास्मत्पदस्य शक्त्यभावेन स्वार्थतात्पर्यस्यैवासम्भवात् कुतस्तद्घटितस्योपलक्षणत्वमिति वाच्यम्?

अन्यदीययादृशार्थतात्पर्यकवाक्योच्चारणं तादृशतात्पर्यविषयार्थातिरिक्तार्थतात्पर्यकत्वाभावे सति तादृशोच्चारणाधीनं यदुच्चारणं तदन्यदित्यर्थ एव पर्यवसानाद्।

वस्तुतस्त्वस्वतन्त्रोच्चरितर्ष्यादिवाक्यघटकास्मत्पदस्यापि स्वघटितवाक्यार्थकर्मकवाक्यान्तरस्थक्रियाकर्त्तृत्वोपलक्षितवाचकतया ऋषिकविप्रभृतिभिरुच्चारिततद्घटितवाक्यस्यापि स्वार्थतात्पर्यसत्त्वात्।

स्वार्थतात्पर्यकेत्यस्य व्यावृत्तिमाह। स्वातन्त्र्येणेति। अन्योच्चारणानधीनतयेत्यर्थः। असमानानुपूर्वीकवाक्योच्चारणाधीने तद्व्यावृत्तिं दर्शयित्वा समानानुपूर्वीकवाक्योच्चारणेऽपि तद्व्यावृत्तिमाह—शक्तिग्राहकवाक्येति। मया गन्तव्यं पश्चात् त्वयेत्यादिवाक्यमुच्चारितन्ततस्तादृशगमनादिदर्शनेनास्मच्छब्दस्योच्चारयितरि शक्तिं गृहीतवतो मया गन्तव्यमिति वाक्योच्चारणस्य तादृशसमानानुपूर्वीकशक्तिग्राहकवाक्योच्चारणाधीनतयेत्यर्थः। आनुपूर्व्येति। अत्र तृतीयाऽर्थोऽभेदस्तस्य सजातीयैकदेशे साजात्येऽन्वयः, शब्दानुकरणस्थल एवेति। शब्दानुवादस्थल एवेत्यर्थः, एवकारेणार्थानुवादस्थलव्यवच्छेदः, शब्दानुवादस्तु पूर्ववाक्यसमानानुपूर्वीकसमानार्थकवाक्यं,पूर्ववाक्यार्थस्य शब्दान्तरेण पुनर्वचनमर्थानुवादः।

आनुपूर्व्या सजातीयं यद् वाक्यान्तरं तदुच्चारणानधीनत्वञ्च निवेशयितुमशक्यं, शब्दानुकरणस्थल एव समानानुपूर्वीकोच्चारणापेक्षानियमाद्।

वाक्यार्थानुवादस्थले समानार्थवाक्यमात्रोच्चारणापेक्षणात् स्वातन्त्र्यापत्ते-र्दुर्वारत्वाद्।

वस्तुतस्तु वाक्यान्तरस्थक्रियाकर्मताऽऽपन्नस्वघटितवाक्यार्थप्रत्यायनेच्छाऽनधीनं स्वोच्चारणमेव स्वतन्त्रोच्चारणम्।

अनुवादस्थले चेत्युवाचेतिवाक्यान्तरस्थोक्तिक्रियाकर्मतया तदर्थघटितवाक्यार्थं प्रतिपादयितुमेवानुवादकोऽस्मदर्घटितं वाक्यं प्रयुङ्क्ते इति न स्वातन्त्र्यम्,

मत्पुत्रम्पश्येत्यादौ प्रकृतवाक्यस्थज्ञानरूपक्रियाकर्मतया स्वं प्रतिपादयितुमेवास्मदः प्रयोगात् तदुच्चारणस्य स्वातन्त्र्यनिर्वाहाय वाक्यान्तरस्थेति।

एतेन यत्र चैत्रेणान्यदीयाच्चैत्रः सुन्दर इत्यादि वाक्यादेव वाक्यार्थं प्रतीत्याहं सुन्दर इति प्रयुज्यते; तत्र स्वसमानार्थकवाक्योच्चारणसापेक्षत्वेऽपि न स्वातन्त्र्यक्षतिः।

वक्ष्यमाणदोषभिया पूर्वकल्पं परित्यज्य कल्पान्तरमाह—वस्तुतस्त्विति। वाक्यान्तरस्थेति। स्वघटितवाक्यभिन्नवाक्यघटकेत्यर्थः, स्वमस्मत्पदं, स्वघटितवाक्यभिन्नत्वञ्च स्वघटितवाक्य-जन्यताऽवच्छेदकमुख्यविशेष्यताभिन्नमुख्यविशेष्यताशालिशाब्दबोधजनकवाक्यत्वं,नातः शाब्दबोधौ-पयिकाकाङ्क्षावत्पदसमूहरूपवाक्यभेदस्य प्रत्येकं पदे सत्त्वेऽपि स्वस्मिन् तादृशवाक्यान्तरत्वं, समानाकारकज्ञानीयविषयताया ऐक्येन न भिन्नभिन्नज्ञानमादाय तद्दोषः। क्रियाकर्मताऽऽपन्नेति। तादृशक्रियाकर्मत्वनिष्ठप्रकारतानिरूपितस्वघटितवाक्यार्थविशेष्यताको यः प्रत्ययस्तज्ज-ननेच्छाऽनधीनमित्यर्थः। अनुवादेति। ऋष्याद्युच्चरिते मया त्वयि हत इत्यादिस्थले चेत्यर्थः,तदर्थघटितेति। अस्मत्पदार्थघटितेत्यर्थः। प्रतिपादयितुं=प्रतिपादनेच्छयेत्यर्थः। स्वातन्त्र्यमिति। तदुच्चारणस्येति शेषः।

ननु क्रियाकर्मताऽऽपन्नेत्यादिनिवेशेनैवोपपत्तौ वाक्यान्तरस्थेति कथम्? इत्यत आह—मत्पुत्रं पश्येति। प्रकृतवाक्यस्थेति। अस्मत्पदघटितवाक्यस्थेत्यर्थः। वाक्यान्तरस्थेतीति। तथा च पश्येत्यस्यास्मत्पदघटितवाक्यजन्यास्मत्पदार्थघटितार्थबोधजनकत्वाद् न वाक्यान्तरघटकत्वमिति।

एतेनेति। वस्तुतस्त्वित्यादिकल्पादरेणेत्यर्थः। वाक्यार्थम्=अभेदेन सुन्दरान्वितस्वात्मानम्, प्रतीत्य=ज्ञात्वा। प्रयुज्यत इति। तथा चाहं सुन्दर इति वाक्यप्रयोगस्य प्रयोजकवाक्यार्थज्ञा-नजननद्वाराऽन्यदीयतादृशवाक्योच्चारणप्रयोज्यत्वस्याक्षतेरिति भावः।

न वा स्वपाण्डित्याभिमानिमौनिपुरुषज्ञानपरस्यायमहं पण्डितइति जानातीत्यन्यदीयोच्चारणस्य स्वातन्त्र्यापत्तिः।

अथैवं रीत्याऽव्यवहितोक्तस्थलेऽहंपदेनोच्चारयितृपुरुषविषयकप्रतीतिवारणेऽप्यभिमानिनस्तेन प्रत्ययो दुरुपपाद एव तस्योच्चारणाभावेनास्मदवाच्यत्वादिति चेत्?

सत्यं; स्वतन्त्रोच्चारयितुः सर्वत्रास्मदर्थत्वे स्यादेवेयमनुपपत्तिः, तदेव न; स्वतन्त्रोच्चारितास्मत्पदस्यैव तद्वाचकत्वाद्, निरुक्तस्वतन्त्रोच्चारणरहितस्य चास्मदः स्वघटितवाक्यार्थकर्मकवाक्यान्तरस्थक्रियाकर्त्तर्येव शक्तिः।

पूर्वकल्पेऽनुपपत्तिं दर्शयित्वाऽऽपत्तिं दर्शयति—न वेति। अस्य स्वातन्त्र्यापत्तिरित्यनेनान्वयः। अस्मत्पदार्थमौनिपुरुषे तादृशज्ञानसत्त्वज्ञापनाय स्वपाण्डित्याभिमानीति, वक्तुः पाण्डित्याभिमानिपुरुषीयवाक्यादेव ज्ञात्वा तादृशवाक्योच्चारणश्चेद्? न तदापत्तिरतस्तदसम्भवप्रदर्शनाय—मौनीति। अत्र चाहं पण्डित इत्येकं वाक्यं पण्डिताभिन्नाहमित्यर्थकम्, अपरश्चायमिति जानातीति, इतिशब्दोऽत्र तादृशवाक्यार्थपरस्तथा च पण्डिताभिन्नास्मत्पदार्थकर्मकज्ञानवानयमित्यर्थः।

आशङ्कते—अथैवमिति। अव्यवहितेति। स्वपाण्डित्येत्यत्राभिमानिन पुरुषस्येति यावत्। तेन=अस्मच्छब्देन। अवाच्यत्वादितीति। स्वतन्त्रोच्चारयितर्येवास्मत्पदस्य शक्तत्वादिति भावः।

स्वतन्त्रोच्चरितास्वतन्त्रोच्चरितभेदेन द्विविधास्मत्पदस्य शक्तेर्द्वैविध्यं कल्पयित्वा समाधत्ते—सत्यमित्यादि। स्वतन्त्रोच्चरितेति। वाक्यान्तरस्थक्रियाकर्मतया स्वघटितवाक्यार्थप्रतिपादनेच्छाऽनधीनोच्चारणकर्मास्मत्पदस्यैवेत्यर्थः। तद्वाचकत्वादिति। वाक्यान्तरस्थक्रियाकर्मतया स्वघटितवाक्यार्थप्रतिपादनेच्छाऽनधीनोच्चारणकर्तृत्वोपलक्षितात्मवाचकत्वादित्यर्थः। निरुक्तेत्यादेः वाक्यान्तरस्थक्रियाकर्मतया स्वघटितवाक्यार्थप्रतिपादनेच्छाऽऽधीनोच्चारणकर्मास्मत्पदस्येत्यर्थः। पूर्वोक्तभ्रमं विनाऽपि=ऋष्याद्युच्चरितमयात्वयीत्याद्यानुपूर्व्यवच्छिन्नवाक्ये देव्युच्चरितत्वभ्रमं विनाऽपीत्यर्थः।

एवं "मया त्वमाप्थाःशरणं भयेष्वि"त्यादिभट्टिकाव्यादिवाक्ये विश्वामित्राद्युच्चरितत्वाभावनिश्चयस्य विशेषदर्शिनां सदा सत्त्वेऽपि तद्घटकास्मच्छब्दादिना न विश्वामित्रादेर्बोधानुपपत्तिरिति, ऊच इति वाक्यान्तरक्रियाकर्त्तृत्वाद्, अत एव "किमसुभिर्ग्लपितैर्जड! मन्यसे मयि निमज्जतु मीमसुतमनः" इत्यादावपि सप्तम्यन्तास्मच्छब्देनापि "इति मन्यसे" इति वाक्यान्तरस्थक्रियाकर्त्तृश्चन्द्रादेरपि बोधोदयः।

नन्वेवमपि शुम्भासुरं प्रति देवयुच्चरितस्यैकैवाहमित्यादेः मयेव विशन्त्यस्मद्विभूतय

एवञ्च मया त्वयि हतेऽत्रैवेत्यादौ तादृशक्रिया=देव्युवाचेतिवाक्यान्तरस्थोक्तिक्रियैव; तत्कर्त्तृत्वं देव्या इति पूर्वोक्तभ्रमं विनाऽपि तत्प्रतीतिरुपपादयितुं शक्यते, स्वघटितवाक्यार्थकर्मकवाक्यारन्तस्थक्रियात्वञ्च तादृशार्थकर्मकत्वेन वाक्यान्तरप्रतिपाद्यत्वं, तेनाहं पण्डित इति विद्वांसं पश्येत्यादौ दर्शनादिक्रियाया अस्मच्छब्दघटितवाक्यार्थविषयकत्वसम्भवेऽपि तेन रूपेण समभिव्याहृतवाक्यान्तराप्रतिपाद्यतया

इत्यन्तस्य चास्मत्पदघटितवाक्यस्योच्चारणे; इति त्वं पश्येति वाक्यान्तरस्थदर्शनक्रियाकर्मतया तादृशास्मत्पदघटितवाक्यार्थप्रतिपादनेच्छाऽधीनतया स्वातन्त्र्यविरहेण तत्रस्थास्मत्पदस्य देवीबोधकताया अनुपपत्तिः, आपत्तिश्च वाक्यान्तरस्थदर्शनक्रियाकर्त्तुः शुम्भासुरस्य प्रतीतेः।

न च तादृशवाक्यस्यानुवादकमहर्ष्युच्चरिततया तद्घटकास्मच्छब्दस्य देवीत्युवाचेतिवाक्यान्तरस्थकथनक्रियाकर्त्र्या देव्या बोधकत्वं नानुपपन्नमिति वाच्यम्?

तद्वाक्यस्य ऋष्युच्चरितत्वेऽपि तत्समानानुपूर्वीकस्य तत्समानार्थकविभिन्नानुपूर्वीकस्य वा वाक्यस्य देव्युच्चरितत्वेन तत्र तद्दोषस्य दुर्वारत्वादिति चेद् ?

न—यस्मात् पश्येतिदर्शनक्रियायां तादृशपरस्परोपश्लिष्टवाक्यार्थकर्मकत्वान्वये न तात्पर्यम्; अपि तु स्वसजातीयद्वितीयरहितभगवत्याः कर्मतया भगवत्यां शक्तीनां प्रवेशनक्रियाया वा तत्र कर्मतयाऽन्वयतात्पर्यम्।

एवञ्च तादृशवाक्योच्चारणस्य वाक्यान्तरस्थक्रियाकर्मत्वेनास्मत्पदघटिततादृशवाक्यार्थप्रतिपादनेच्छाऽधीनत्वमेव नास्ति; अतस्तत्र स्वतन्त्रोच्चरित एवास्मच्छब्दः, अहं पण्डित इति त्वं जानीहीतिवक्तृतात्पर्यकास्मत्पदघटितवाक्यस्थले तु वक्तुः प्रतीतिः स्वयमग्र उपपादयिष्यते।

ननु स्वघटितवाक्येत्यत्र क्रियापदेन धात्वर्थो वाच्यः; तत्र वाक्यान्तरस्थत्वं न वाक्यान्तरघटकत्वं तत्र तदभावाद्, धात्वर्थैकदेशे धातावन्वयासम्भवाच्च।

एवमहं पण्डित इत्ययं जानातीत्यत्रेतिजानातीतिवाक्यान्तरस्थज्ञानक्रियाकर्तुरभिमानिपण्डितस्येव स पण्डित इति देवदत्तोऽपिजानानीति तादृशवाक्यार्थकर्मताऽऽपन्नज्ञानक्रियाकर्त्तुर्देवदत्तस्याप्यस्मच्छब्देन बोधापत्तिर्दुर्वारेत्यत आह—स्वघटितवाक्येति।

अत्र क्रियेति सम्पातायातम्। अन्यथा प्रतिपाद्यत्वमित्यन्तव्याख्याया असङ्गतेः। प्रतिपाद्यत्वमित्यन्तस्य वा प्रतिपाद्यक्रियात्वमर्थः। तादृशार्थकर्मकत्वेनेति। अस्मत्पदघटितवाक्यार्थकर्मकत्वनिष्ठप्रकारतानिरूपितवाक्यान्तरजन्यप्रतिपत्तीयविशेष्यत्वं, न तु स्वघटितवाक्यार्थकर्मकत्वनिष्ठविषयताशालिवाक्यान्तरजन्यप्रतिपत्तीयविषयत्वं साक्षात्परम्परासाधारणतादृशविषयतानिरूपितविषयत्वं वेति त्वर्थतो लब्धम् तेन=उक्तार्थकरणेन। विद्वांसमिति। जानन्तमित्यर्थः।

न तत्क्रियाकर्त्तुरस्मच्छब्दतः प्रतीतिः।

अथ—इतिपदघटितवाक्यान्तरात् क्रियाप्रतिपत्तावेव तत्कर्त्तुर्वाक्यान्तरप्रतिपाद्यक्रियाकर्त्तृत्वं सुग्रहं; तद्ग्रह एव च तद्घटितानुगमकरूपग्रहेणास्मच्छब्दशक्तिग्रहेऽस्मच्छब्दघटितवाक्याद् वाक्यार्थप्रतीतौ तस्येतिपदादुपस्थित्या वाक्यान्तरात् क्रियाप्रतिपत्तिरित्यन्योन्याश्रय इति चेद्?

न—वाक्यान्तरप्रतिपाद्यतया वक्तृबुद्धिस्थत्वस्यैव क्रियायां विशेषणत्वोपगमात्,

---

आशङ्कते—अथेति। इतिपदघटितेति। देवी महिषासुरमित्युवाचेति वाक्यान्तरादित्यर्थः। क्रियेति। उक्त्यादिक्रियाशाब्दबोध एवेत्यर्थः, तादृशवाक्यार्थकर्मकत्वेन क्रियायाः शाब्दबोध इति यावत्। तत्कर्त्तुः=उक्त्यादिक्रियाकर्त्तुः वाक्यान्तरेति। तादृशकर्त्तृत्वरूपो विशिष्टो धर्मः। सुग्रहमिति। ग्रहविषयो भवतीत्यर्थः। तद्ग्रह एवेति। इतिपदघटितवाक्यान्तरप्रतिपाद्यक्रियाकर्त्तृत्वग्रहे सत्येवेत्यर्थः। तद्घटितानुगमकरूपग्रहेण=वाक्यान्तरप्रतिपाद्यक्रियाकर्त्तृत्वोपलक्षितात्मत्वादिधर्मग्रहेणेत्यर्थः। अत्र तृतीयाऽर्थः प्रयोज्यत्वं, तस्य चास्मच्छब्दशक्तिग्रह इत्यनेनान्वयः, अस्मच्छब्दशक्तिग्रहस्य तादृशधर्मविशिष्टवैशिष्ट्यावगाहितया तज्ज्ञानस्य तत्र हेतुत्वाक्षतेः। अस्मच्छब्दघटितेति। मया त्वयीत्यादिवाक्याद्। वाक्यार्थेति। देवीकर्त्तृकमहिषासुरकर्मकहननोत्तरं शीघ्रं भविष्यद्वर्जनकर्त्तृत्वापन्नदेवतारूपार्थप्रतीतावित्यर्थः। तस्य=तादृशवाक्यार्थस्य। उपस्थित्या=शक्त्या स्मरणेन; इतिशब्दस्य सन्निहितबुद्धिस्थ एव शक्तत्वादिति भावः। अन्योन्याश्रय इति। अस्मच्छब्दशक्तौ तद्ग्रहमपेक्षमाणो यस्तादृशवाक्यान्तरप्रतिपाद्यक्रियाकर्त्तृत्वग्रहस्तमपेक्षमाणो यः स्वस्य शक्तिग्रहस्तद्विषयत्वेनास्मत्पदशक्तिर्यदि स्वग्रहसापेक्षग्रहसापेक्षग्रहिका स्यात् तदा स्वभिन्ना स्यादित्यापत्तिरित्यर्थः।

ननु मया त्वयि हतेऽत्रैवेत्यादिवाक्यस्यास्मत्पदघटिततया तादृशवाक्यजन्यप्रतीतेरस्मत्पदशक्तिग्रहाधीनित्वमस्त्येव, तादृशवाक्यार्थपरेतिपदघटितवाक्यान्तरजन्यप्रतिपत्तेरपि तदधीनत्वं सम्भवति, किन्तु तादृशवाक्यार्थकर्मकत्वप्रकारताकवाक्यान्तरजन्यप्रतिपत्तिविषयत्वेन क्रियाया ज्ञाने तदधीनत्वं कुतो मन्यत इति चेद्?

न—तादृशक्रियाज्ञानेऽपीतिशब्दार्थास्मत्पदघटितवाक्यार्थस्य विशेषणतया भानेन तत्र तादृशविशेषणापेक्षत्वेन विशेषणज्ञानस्य त्वस्मत्पदशक्तिग्रहाधीनत्वेन तादृशक्रियाज्ञानस्यापि तच्छक्तिग्रहाधीनत्वाक्षतेः, एवमितिपदघटितवाक्यजन्यप्रतीतेरपि तादृशज्ञानविषयत्वेन तादृशविषयसम्पादनद्वारा तदधीनत्वस्य तत्र सत्त्वाच्चेति निगर्वः।

समाधत्ते—वाक्यान्तरेति। अस्मत्पदघटितवाक्यार्थकर्मकत्वनिष्ठप्रकारताकवाक्यान्तरजन्य-

प्रतिपत्तेः पूर्वमपि प्रकरणादिना तादृशवक्तृबुद्धेर्ग्रहसम्भवेनान्योन्याश्रयाभावात्।

स्वघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्त्तृतया वाक्यान्तरप्रतिपाद्यत्वेन या वक्तृबुद्धिस्तद्विषयताऽवच्छेदकत्वं प्रवृत्तिनिमित्तानुगमकमिति तु सारम्।

प्रतिपत्तीयविषयताप्रकारताकवक्तृज्ञानीयविषयताऽऽपन्नक्रियाकर्त्तर्यस्मत्शब्दस्य शक्तिरिति भावः।

वक्तुस्तादृशज्ञानञ्च–बुबोधयिषया वाक्यप्रयोगं प्रति वाक्यार्थज्ञानस्य कारणतया बुबोधयिषायाः कारणेष्टसाधनताज्ञानस्य धर्मिताऽवच्छेदकज्ञानविधया वा देवीकर्त्तृकमहिषासुर-कर्मकहननोत्तरकालीनशीघ्रभविष्यद्गर्जनकर्त्तृतावद्देवताकर्मकत्वनिष्ठप्रकारतानिरूपिता सती देवीकर्तृकत्वनिष्ठविशेष्यतानिरूपिता येतिपदघटितवाक्यजन्यप्रतिपत्तीयविषयता तद्वत्युक्ति-क्रियेत्याकारकम्।

ननु तादृशार्थकर्मकत्वनिष्ठविषयतानिरूपितकथनक्रियानिष्ठविषयतानिरूपितकृतिनिष्ठ-विषयतानिरूपितदेवीनिष्ठविशेष्यताशालिज्ञानं तादृशवाक्यजन्यं भवत्वित्याकारिकेच्छैव तत्र बुबोधयिषा वाच्या।

एवञ्च तादृशज्ञानं तादृशवाक्यजन्यमित्याकारकं वक्तुर्ज्ञानमपि तादृशतात्पर्यप्रयोजकं वाच्यं, कुतस्तादृशज्ञानमादायोक्तानुगमकधर्मः सम्पादनीय इति चेद्?

न–विनिगमनाविरहेणोक्तबुबोधयिषाद्वयमेव हेतुः कल्प्यते, अत उक्तज्ञानस्यापि तत्र सम्भवादिति भावः, तादृशवाक्योच्चारणं प्रत्युक्तबुबोधयिषायाः कारणत्वस्याप्रामाणिकत्वेन तादृशज्ञानस्य नियतसत्त्वाभावमालोक्य स्वघटितवाक्येत्यादिना पर्यवसितार्थस्योक्तत्वाच्चेति भावः।

प्रकरणादिनेति। तथा च तादृशशाब्दबोधात् पूर्वं सैन्धवमानयेत्यादाविव प्रकरणादि-लिङ्गज्ञानादिना तादृशविशिष्टार्थविषयकवक्तृज्ञानविषयकज्ञानजनने बाधकाभावादित्यर्थः।

अन्योन्याश्रयाभावादिति। वाक्यान्तरजन्यप्रतिपाद्यतया तादृशविशिष्टार्थविषयवक्तृज्ञानजनने श्रोतुरपि तादृशज्ञानविषयकज्ञानजनने पूर्वंतादृशवाक्यजन्यप्रतिपत्तेः, तज्जनकास्मत्पदस्य शक्तिग्रहस्य चानपेक्षणाद् वाक्यजन्यत्वप्रतिपत्त्यादीनां खण्डश उपस्थित्यैव तादृशविशिष्टज्ञा-नसम्भवादिति भावः। स्वघटितवाक्यार्थेति। स्वघटितवाक्यार्थकर्मकत्वनिष्ठविषयतानिरूपितक्रिया-निष्ठविषयतानिरूपितकर्त्तृत्वनिष्ठविषयतानिरूपिता या वाक्यान्तरजन्यप्रतिपत्तिविषयता तत्प्रकारता-निरूपितवक्तृबुद्धीयविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नमस्मत्पदशक्यताऽवच्छेदकमित्यर्थः। सारमिति। निर्दोषत्वेन तदेवानुगमकमित्यर्थः।

एवञ्च बुद्धिविषयताऽवच्छेदकत्वस्य प्रवृत्तिनिमित्तानुगमकत्वप्रवादोऽपि सङ्गच्छते।

उच्चारणकर्तृत्वानुगमकशरीरेऽपि मिश्राणां बुद्धिस्थत्वनिवेशबीजन्तु नावधारयामः।

एवं युष्मत्पदप्रवृत्तिनिमित्तानुगमकगर्भनिविष्टं स्वसम्बोध्यत्वमपि वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थानवगाहिनी या स्वजन्यप्रतीत्याश्रयत्वेनेच्छा तद्विषयत्वम्, अनुवादकपुरुषीयवाक्यार्थकर्मकोक्तिक्रियाघटितमहावाक्यार्थघटकयुष्मदर्थघटितावान्तरवाक्यार्थप्रतीत्याश्रयत्वेनाभिप्रायविषयत्वेऽपि तादृशाभिप्राये तादृशावान्तरवाक्यार्थस्य वाक्यान्तरस्थक्रियाकर्मत्वेन भानाद्।

यदि च–इतिपदघटितवाक्यार्थप्रतीतिरूपफलेच्छाऽधीना युष्मद्घटितवाक्यार्थप्रतीतिविषयिणी तादृशवाक्यार्थांशे वाक्यान्तरस्थक्रियाकर्मत्वानवगाहिन्यपि तादृश-

---

एवञ्च=वाक्यान्तरप्रतिपाद्यतया वक्तृबुद्धिविषयत्वस्यानुगमकशरीरे प्रवेशे चेत्यर्थः।

उच्चारयितृत्वावच्छेदकधीप्रकारावच्छिन्नेऽहम्पदस्य शक्तिरिति मिश्रोक्तमाक्षिपति– उच्चारणकर्तृत्वेति। एवमिति। मया त्वयीत्यादावस्मत्पदेन तदुच्चारकमहर्षिबोधवारणायोक्तनिवेशवत् तद्घटकयुष्मत्पदेन ऋषिसम्बोध्यसुरथराजबोधवारणायैतादृशविषयत्वं वाच्यमित्यर्थः। युष्मत्पदेत्यादि, अग्रे विषयत्वमित्यनन्तरं वाच्यमिति पूरणीयम्।

अनुगमकेति। स्वसम्बोध्यताऽवच्छेदकेत्यर्थः। गर्भेति। घटकेत्यर्थः। वाक्यान्तरस्थेति। वाक्यान्तरस्थक्रियाकर्मत्वनिष्ठविषयतानिरूपितस्वघटितवाक्यार्थनिष्ठविषयताशून्या या स्वघटितवाक्यजन्यप्रतीतिमत्त्वप्रकारेच्छा तद्विशेष्यत्वमित्यर्थः। एतादृशसम्बोध्यताऽवच्छेदकत्वं स्वतन्त्रोच्चरितयुष्मत्पदस्य प्रवृत्तिनिमित्तानुगमकं, स्वमनुवादकानुच्चरितयुष्मत्पदम्, अत्र चानुवादकर्षेरिच्छा च मया त्वयीत्यादिवाक्यार्थविषयकशाब्दबोधानुकूलव्यापारानुकूलातीतकृतिमती देवीत्याकारकदेव्युवाचेत्यादिमयात्वयीत्याद्यन्तमहावाक्यजन्यप्रतीत्याश्रयः सुरथो भवत्वित्याकारा, तथा चात्र तादृशेच्छीयविशेष्यत्वरूपस्यातादृशतयोक्तसम्बोध्यत्वस्य सुरथेऽसत्त्वाद् न युष्मत्पदेन तस्य बोधः।

गुरो! त्वं मामध्यापयस्वेत्यादिस्वतन्त्रयुष्मच्छब्दस्थले च स्वतन्त्रोच्चारयितुरेतादृशवाक्यजन्यप्रतीत्याश्रयो गुरुर्भवत्वित्याकारैवेच्छा; अतो गुरौ तादृशसम्बोध्यत्वस्य सत्त्वेन तस्य बोधः।

देवी महिषासुरमित्युवाचेति वाक्यान्तरं, तत्रस्थेतिपदार्थतादृशवाक्यार्थप्रकाशनाय मया त्वयीत्यादिवाक्यान्तरं प्रयुज्यते, यथा तमानयेत्यादिवाक्यघटकतच्छब्दार्थव्यक्तये गौरस्तीत्यादिवा-

वाक्योच्चारणानुकूलाऽनुवक्तुरिच्छा सम्भवतीति तादृशेच्छामादायानुवादकसम्बोध्यस्य सम्बोध्यताऽऽपत्तिरिति मन्यते?

तदा वाक्यान्तरार्थप्रतीतीच्छाऽनाधीनत्वमपीच्छाविशेषणं देयमिति मया त्वयि हतेऽत्रैवेत्यादौ युष्मच्छब्दान्न सुरथादिप्रतीति:।

एवमभ्रान्तस्य ततो महिषादिप्रतीतिनिर्वाहाय वाक्यान्तरस्थस्वघटितवाक्यार्थकर्मकक्रियाकर्मण्यपि युष्मद: शक्त्यन्तरं स्वीकार्य्यं, तत्र देवी महिषासुरमित्युवाचेतिवाक्यस्थक्रियाकर्मत्वं महिषासुरादेरिति तस्यापि त्वयीत्यादिशब्दार्थतोपपत्ति:।

क्यान्तरं, तथा चादावित्युवाचेत्यन्तवाक्यजन्यबोधरूपफलविषयकेच्छा भवति, तदनन्तरं मया त्वयीत्यादिवाक्यजन्यबोधरूपोपायविषयकेच्छेत्यभिमन्वान: शङ्कते यदि चेत्यादि।

अथात्र महावाक्यार्थबोध: फलम्, अवान्तरवाक्यार्थबोध उपाय इति मया त्वयीत्याद्यवान्तरवाक्यमात्रजन्यबोधो भवत्वित्याकाराया इच्छाया अपि तादृशवाक्योच्चारणानुकूलत्वात्तस्याश्च वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थस्यानवगाहनात्तद्विशेष्यत्वमादायानुवादकसम्बोध्यस्य निरुक्तसम्बोध्यताऽऽपत्तिरित्याशङ्कते—यदि चेत्यादि। अत्र गवित्ययमाहेत्यादावितिशब्दस्य कर्मत्वार्थकतया गोशब्दकर्मताकोच्चारणकर्त्ताऽयमित्येकविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वमिव, मया त्वयीत्यादिवाक्यस्यापि मयेत्यादिवाक्यार्थकर्मताकप्रतिपत्त्यनुकूलशब्दकर्त्री देवीत्येकविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वमितिपदस्य कर्मत्वार्थकस्य तादृशबोधप्रयोजकाकाङ्क्षासम्पादकत्वादिति पूर्वोक्तरूपेच्छैव तादृशवाक्योच्चारणानुकूला; न त्ववान्तरवाक्यार्थबोधमात्रविषयिणीच्छेति विवादग्रस्ततया यदि चेत्युक्तम्।

अथ वा महावाक्यार्थबोधरूपफलेच्छया तत्प्रयोजकमयात्वयीत्यादिखण्डवाक्यजन्यबोधरूपोपायविषयिका कथनक्रियाकर्मत्वानवगाहिनीच्छा भवति; तादृशेच्छामादाय शङ्कते—यदि चेत्यादि।

महावाक्यजन्यमहावाक्यार्थविषयकबोधेच्छायामेव तादृशवाक्योच्चारणप्रयोजकत्वं स्वीक्रियते; न तु खण्डवाक्यजन्यबोधेच्छायां मानाभावादित्यतो वा यदि चेति।

नन्वेतावता मया त्वयीत्यादौ युष्मत्पदेन सुरथादेर्बोधो माभूत्; किन्तु महिषासुरादीनां शक्तिभ्रमाजन्यबोधो जायते, तत् कुत: सम्पद्यते? इत्यत आह—एवमिति। शक्त्यन्तरमिति। स्वतन्त्रास्वतन्त्रयुष्मच्छब्दभेदेन शक्तिद्वयी स्वीकार्येति भाव:, अत्राप्यन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणत्वं स्वातन्त्र्यं, तादृशोच्चारणाधीनोच्चारणकत्वं चास्वातन्त्र्यं बोध्यम्। पूर्ववदिति। अत्राप्यस्मच्छब्दरीत्या त्वं पण्डित इति विद्वांसं पश्यामीत्यादावप्यन्यपरयुष्मत्पदस्य दर्शनक्रियाकर्मणि शक्तेर्वारणाय स्वघटितवाक्यार्थकर्मत्वनिष्ठप्रकारतानिरूपिता या वाक्यान्त-

अत्रापि पूर्ववत् स्वघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्मतया वाक्यान्तरप्रतिपाद्यत्वेन या वक्तृबुद्धिस्तद्विषयताऽवच्छेदकत्वेनानुगतानां चैत्रात्मत्वादीनां प्रवृत्तिनिमित्तत्वं बोध्यम्।

सम्बोध्यत्वघटितानुगमकशरीरे च बुद्धिविषयताऽवच्छेदकत्वनिवेशनं मिश्रोक्तमनुपादेयमेव; सम्बोध्यताऽवच्छेदके बुद्धिप्रकारकत्वस्याव्यावर्त्तकत्वात्।

अथ तात्पर्यसत्त्वेऽहमत्रास्मीति मैत्रो जानातीत्यादौ चैत्रवाक्यस्थास्मच्छब्दाच्चैत्रोऽपि प्रतीयते तत्र चैत्रस्य स्वघटितवाक्यार्थकर्मकक्रियाकर्त्तृत्वाभावात् तदुच्चारणस्य निरुक्तस्वातन्त्र्यत्वाभावाच्चानुपपत्तिः।

एवं चैत्र! त्वया भुक्तमिति मया श्रुतमित्यादौ चैत्रस्य युष्मच्छब्देन प्रत्यायनात्तस्य च वाक्यान्तरस्थक्रियाकर्मान्यत्वाद् निरुक्तेच्छाविषयत्वरूपसम्बोध्यत्वस्य चाभावात्तत्कथमुपपद्यतामिति चेत्?

रजन्यप्रतिपत्तीयविशेष्यता तदाश्रयक्रियाकर्मण्येव शक्तिर्वाच्या, अतः पूर्वोक्तरीत्याऽन्योन्याश्रयापत्तिः, तद्वारणाय; पूर्ववद्=निवेशवदित्यर्थः।

स्वघटितेत्यादि। प्रतीपत्तिनिरूपिता या स्वघटितवाक्यार्थविषयतानिरूपितविषयित्वनिष्ठविषयतानिरूपितक्रियानिष्ठविषयतानिरूपितकर्मत्वनिष्ठविषयतानिरूपकविषयता तादृशविषयतावती वक्तृबुद्धिः, तथा च स्वघटितवाक्यार्थनिष्ठविषयताकविषयित्वनिष्ठविषयताकक्रियानिष्ठविषयताककर्मत्वनिष्ठविषयतानिरूपितप्रतिपत्तीयविषयतावान् चैत्रादिरित्याकारा, तादृशबुद्धिश्च पूर्वोक्तयुक्त्या शाब्दबोधात् पूर्वमावश्यकी। प्रवृत्तिनिमित्तत्वमिति। स्वघटितवाक्यार्थविषयताकविषयित्वनिष्ठविषयताकक्रियानिष्ठविषयताककर्मत्वनिष्ठविषयताकप्रतिपत्तीयविषयत्वप्रकारकवक्तृबुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य शक्तिरिति ध्येयम्।

उक्तानुगमकमाक्षिपति—अथ तात्पर्येति।

अस्मत्पदमिदमुच्चारयितारं मां बोधयत्वित्येतादृशेच्छासत्त्व इत्यर्थः।

ननु स्वतन्त्रास्मच्छब्दस्योच्चारयितरि शक्तत्वेन तस्य बोध इत्यत आह—तदुच्चारणस्येति।

निरुक्तेति। वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थप्रतिपादनेच्छाऽनधीनोच्चारणकत्वेत्यर्थः। वाक्यान्तरस्थक्रियाकर्मान्यत्वादिति। वाक्यान्तरस्थस्वघटितवाक्यार्थकर्मकक्रियाकर्मणि शक्त्यन्तरस्वीकारेऽपि न तया निर्वाह इति भावः।

ननु तादृशशक्त्या निर्वाहासम्भवेऽपि स्वतन्त्रोच्चरितयुष्मत्पदस्य सम्बोध्यशक्ततया

तर्हि; स्वातन्त्र्यमुच्चारणविशेषणं सम्बोध्यत्वघटकेच्छायां निरुक्तेच्छाऽधीनत्वादि-विशेषणं च त्याज्यमेव, मया त्वयीत्यादौ तात्पर्यविरहादेवानुवादकतत्सम्बोध्ययोर्मया त्वयीत्यादिनाऽप्रतिपादनोपपत्तेः।

न चैवं बुद्धिविषयताऽवच्छेदकरूपावच्छिन्न एव युष्मदोऽस्मदश्च शक्तिरास्तां; किं सम्बोध्योच्चारयितृताऽवच्छेदकावच्छिन्ने शक्तिस्वीकारेण तात्पर्यत एवातिप्रसङ्गभ-ङ्गसम्भवादिति वाच्यम्?

तात्पर्यसत्त्वेऽपि चैत्रोच्चरितादहंकरोमीत्यादिवाक्याद् मैत्रंबोधयितुं प्रयुक्तात्, चैत्रं बोधयितुं प्रयुक्ताच्च त्वं गच्छेत्यादिवाक्याच्चोच्चारयितृत्वसम्बोध्यत्वभ्रमं विना मैत्रादिबोधस्यानुभवविरुद्धत्वाद्, अन्यथाऽन्यतात्पर्येण स्वरसतस्तथा प्रयोगापत्तेः।

इदन्त्ववधातव्यम्–अयमहं पण्डित इति जानाति; इत्युवाचेत्यादिस्थले सर्वत्र वाक्यार्थस्य कर्मता न सम्भवति बाधितवाक्यार्थस्थले तदसम्भवाद्?

तेनैवोपपत्तिर्भवेदित्यत आह–निरुक्तेच्छेति। वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्या-र्थानवगाहिनीया स्वजन्यप्रतीत्याश्रयत्वेनेच्छा तद्विषयत्वरूपेत्यर्थः, तथा चैतद्युष्मत्पदस्य स्वतन्त्रोच्चा-रणाभावाद् न तादृशशक्त्या निर्वाह इति भावः।

त्याज्यमेवेति। तथा चास्मत्पदस्योच्चारयितरि स्वघटितवाक्यार्थकर्मताऽऽपन्नवा-क्यान्तरस्थक्रियाकर्त्तरि च शक्तिद्वयी।

एवं युष्मत्पदस्य सम्बोध्ये वाक्यान्तरस्थस्वघटितवाक्यार्थकर्मकक्रियाकर्मण्यपि च शक्तिद्वयीति भावः।

नन्वेवं मया त्वयीत्यादावस्मत्पदेनोच्चारयितुर्ऋषेयुष्मत्पदेन तत्सम्बोध्यस्य सुरथस्य कथं न बोध इत्यत आह–तात्पर्यविरहादेवेति। अनुवादकतत्सम्बोध्ययोरिति। महर्षिसुरथयोरित्यर्थः।

सम्बोध्य इत्यादि, इदमुपलक्षणं, तेन वाक्यान्तरस्थस्वघटितवाक्यार्थकर्मताऽऽपन्नक्रिया-कर्त्तृतादृशक्रियाकर्मणोरपि किं शक्तिस्वीकारेणेत्यर्थ इति ध्येयम्।

बाधितवाक्यार्थस्थल इति। अविदुष्ययमहं पण्डित इत्यादिवाक्यस्थले; मया बन्ध्या सुतो दृष्ट इति; देवदत्त उवाचेत्यत्र च स्थले इत्यर्थः, भ्रान्तिज्ञेनेति। अयमहं पण्डित इतीत्यादौ तादृशज्ञानमपण्डिते पाण्डित्यप्रकारकमित्याकारकज्ञानादिवतेत्यर्थः। वाक्यार्थज्ञानासम्भवेनेति। परस्परार्थविशिष्टज्ञानासम्भवेनेत्यर्थः।

न च बाधितवाक्यार्थस्थले भ्रमरूपैव तत्कर्मत्वप्रतीतिरिति वाच्यम्?

विशेषदर्शिनाऽपि भ्रान्तिज्ञेन तथा प्रयोगात्तस्य च वाक्यार्थज्ञानासम्भवेन तदनुपपत्तेः।

न चाहार्यवाक्यार्थज्ञानादेव विनाऽपि विशिष्टवाक्यार्थबुद्धिविशेषणप्रकारकत्वविशेष्यविशेष्यकत्वाभ्यां विशिष्टज्ञानज्ञानादेव वा विशेषदर्शी तथा प्रयुङ्क्त इति वाच्यम्?

एवमपि विशेषदर्शिनो भ्रान्तिज्ञपुरुषीयतथाविधवाक्याच्छाब्दबोधानुपपत्तेर्वज्रलेपत्वात्तस्मात्तत्रेतिपदं न तद्वाक्यप्रतिपाद्यताऽवच्छेदकीभूततत्तद्धर्मावच्छिन्नपरम्।

अपि तु तत्तद्वाक्यजन्यज्ञानसमानाकारकपरं, तादृशश्चेतिपदार्थोऽभेदसम्बन्धेन यथासम्भवं धात्वर्थे तत्त्वावच्छेदके च ज्ञाने विशेषणमित्येवोपगन्तव्यं; तथा च सर्वत्रैव युष्मदस्मद्घटितावान्तरवाक्यस्थल इतिपदं तत्परमेव, तादृशवाक्येन च गवित्ययमाहेत्यादौ गवादिपदवत् स्वरूपमेवेतिशब्देन परामर्शार्थमुपस्थाप्यते; न तु युष्मदस्मच्छब्दार्थघटितो वाक्यार्थ इति सम्बोध्योच्चारणकर्त्रोरेव युष्मदस्मदोः शक्तिः।

ननु सर्वत्र बाधितवाक्यार्थस्थले तादृशवाक्यार्थज्ञान इष्टसाधनताभानोत्पत्तौ मानाभावेनेच्छाऽनुदयेनाहार्यज्ञानासम्भवादाह—विनाऽपीति। विशेषणप्रकारकत्वेति। अत्राप्येकार्थप्रकारताकापरार्थनिष्ठविशेष्यताकत्वेन पाण्डित्यादिप्रकारकभ्रमज्ञानविषयज्ञानादेवेत्यर्थः। विशेषदर्शन इति। तादृशपुरुषे पाण्डित्यं बाधितमित्यादिज्ञानवत इत्यर्थः। शाब्दबोधानुपपत्तेरिति। शाब्दबोधस्याहार्यत्वास्वीकारेण तस्याहार्यरूपस्याप्यसम्भवात्, शाब्दबोधस्याहार्यत्ववादिमतेऽपि सर्वत्र तादृशेच्छायां मानाभावेनाहार्यत्वासम्भवाच्चेति भावः, तद्वाक्यजन्यज्ञानेति। अत्र वाक्यजन्यत्वं तत्तज्ज्ञानविशेषपरिचायकम्, अन्यथेतिपदस्य शक्तिज्ञानात् पूर्वं तादृशवाक्यजन्यत्वासम्भवेन तद्रूपेण ज्ञानासम्भवात्, तादृशज्ञानन्तु प्रकरणादिनैव सम्भवतीति हृदयं, धात्वर्थे=जानातीत्यादौ ज्ञाऽऽदिधात्वर्थे। धात्वर्थताऽवच्छेदके=उवाचेत्यादौ प्रतिपत्त्यनुकूलशब्दरूपवक्त्यर्थताऽवच्छेदकप्रतिपत्त्यादौ। सर्वत्रैवेति। अहं पण्डित इत्यादौ, इत्युवाचेत्यादौ चेत्यर्थः। शक्तिरिति।

अत्र विवेचनीयमेतद्—युष्मदस्मदोः सर्वत्रैव सम्बोध्योच्चारयित्रोरेव शक्तत्वे मया त्वयीत्यादिवाक्याद्देव्यादेरुच्चारयितृत्वाभावेन तद्घटकास्मत्पदस्य देव्यादौ शक्तिज्ञानासम्भवात् शब्दबोधानुपपत्तिः।

न च तत्रेष्टापत्तिः; तत्तत्पदानां प्रयोगस्य त्वितिपदपरामृष्टतादृशज्ञानतात्पर्यग्राहकतया सार्थक्यादिति वाच्यम्?

त्वं स्थूलः, अहं स्थूलः, त्वं स्वर्गं भोक्ष्यसे, अहं स्वर्गं भोक्ष्य इत्युभयत्रैव युष्मदस्मदोर्मुख्यत्वात् सम्बोध्योच्चारयितृशरीरतादृशात्मनोर्द्वयोरेव युष्मदस्मदर्थत्वं बोध्यम्।

सर्वे घटा रूपवन्त इत्यादौ सर्वपदादुद्देश्यताऽवच्छेदकघटत्वाद्यवच्छिन्नस्याशेषताप्रतीतेरशेषत्वं सर्वपदार्थः।

तत्र तत्र सर्वानुभवसिद्धशाब्दस्यापलपितुमशक्यत्वाद्, अन्यथा शब्दमात्रस्याप्रामाण्यापत्तेः। अस्मत्पदादेः शक्तिग्रहे देव्यादेरुपस्थित्यसम्भवेन तादृशतात्पर्यग्राहकत्वासम्भवाच्च, प्रकरणादिनेतिपदस्य तादृशतात्पर्यग्रहे तत्तच्छब्दप्रयोगवैयर्थ्याच्च।

न च तत्र देव्याद्युच्चरितत्वभ्रमादेव शक्तिग्रहसम्भव इति वाच्यम्?

विशेषदर्शिनां तदसम्भवाद्, "मया त्वमापृथा" इत्यादि काव्ये विश्वामित्राद्युच्चरितत्वाभाववनिश्चयेऽपि व्युत्पन्नानां शाब्दबोधोदयाच्च, युष्मदस्मत्पदघटितपुराणादिवाक्यानां शाब्दबोधाजनने बहुतरासामञ्जस्यापत्तेरिति चेद्?

अत्र नव्याः—भट्टाचार्येणेदमापातत उक्तं, वस्तुगत्या पूर्वोक्तद्विविधे शक्तिर्वाच्या, अहं पण्डित इत्ययं जानातीत्यादिबाधितस्थल एवागत्या इतिपदस्य तादृशज्ञानपरत्वं कल्पनीयम्।

वक्तव्यश्च स्वघटितवाक्यजन्यज्ञानपरेतिपदघटितवाक्यान्तरस्थक्रियाकर्त्तृतादृशक्रियाकर्मणोश्च शक्त्यन्तरम्, उच्चारयितर्यस्मत्पदस्य शक्तिं कल्पयित्वा तत्र स्वातन्त्र्यविशेषणं दत्तवतां मिश्राणामप्येतदनुमतं भातीति प्राहुः।

शरीरात्मरूपशक्यभेदेन तयोः शक्तिभेदमाह—त्वं स्थूल इत्यादि, सम्बोध्य इति। अवच्छेदकतासम्बन्धेन तत्तत्पदजन्यबोधाश्रयत्वेनेच्छाविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य, स्वोच्चारणानुकूलकृत्यवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नेऽस्मत्पदस्य च शक्तिरित्यर्थः, स च धर्मः शरीरनिष्ठतत्तज्जातिविशेषः, सम्बोध्योच्चारयित्रोरात्मनोस्तु तादृशयोस्तत्तच्छरीरावच्छिन्नात्मनोरेव तयोः शक्तिर्वाच्या, अन्यथा त्वमहं वा जानामीत्यादौ विकल्पानुपपत्तेः, उभयपदजन्योपस्थितयोरात्मत्वेनात्मनोरविशेषाद्।

एवमहं जानामीत्यादावात्मत्वसामानाधिकरण्येन ज्ञानादेरन्वयोपगमेन तादृशनिश्चयकालेऽहं न जानामीत्यादिप्रतीत्यापत्तेः, धर्मिविशेषमन्तर्भाव्य प्रतिबध्यप्रतिबन्धकभावस्य तु नव्यैरस्वीकाराच्चेति दिक्।

इति युष्मदस्मत्पदशक्तिविचारविवृतिः

यदवगाहमानं सत् समग्र एवोद्देश्यविधेयमवगाहते स एव धर्म इति फलितम्, सर्वपदार्थ इति। अत्र पदार्थत्वं पदार्थताऽवच्छेदकसाधारणं तत्पदजन्यबोधविषयत्वेनेश्वरेच्छाविषयत्वं,

नन्वशेषत्वं न विधेयशून्यावृत्तितदुद्देश्यताऽवच्छेदकवत्त्वं, केवलान्वयिनो यत्र विधेयता तत्र विधेयशून्यत्वस्याप्रसिद्धेः, यत्र वा विधेयशून्य उद्देश्यताऽवच्छेदकीयसम्बन्धविशेषेण वृत्तेरप्रसिद्धिः; तत्र सर्वे घटा जातिमन्त इत्यादौ गत्यन्तराभावापत्तेश्च, पदान्तरादुपस्थित उद्देश्याऽवच्छेदकघटत्वादिविशिष्टे सर्वपदोपस्थाप्यविधेयव्याप्तिविशिष्टघटत्वाद्यवच्छिन्नस्य कथञ्चिदन्वयसम्भवेऽप्यनुभवविरोधाच्च।

घटत्ववत्त्वाद्यनुपस्थितिदशायामपि सर्वे घटा इत्यादिवाक्यादन्वयबोधस्यानुभविकतया व्याप्यत्वेनैव घटत्वादेः सर्वपदार्थत्वस्य स्वीकरणीयतया तज्जन्यव्याप्तिबोधस्य निर्धर्मिताऽवच्छेदककतयाविपरीतज्ञानाविरोधित्वेनाकिञ्चित्करतापाताच्च।

नापि तदुद्देश्यताऽवच्छेदकव्यापकतत्तद्विधेयवत्त्वं; तदवच्छिन्ने विधेयानन्वयप्रसङ्गाद्।

तेनाशेषत्वस्य प्रवृत्तिनिमित्तत्वेऽपि न क्षतिः।

येन समग्र एवोद्देश्यविधेयवत्ताप्रतीतिस्तादृशाशेषत्वं निर्वक्ति–

नन्वशेषत्वमिति। यत्रेति। सर्वे घटाः प्रमेया इत्यादौ,

ननु व्यतिरेकिविधेयस्थले तथाऽस्तु केवलान्वयिविधेयस्थले तु सर्वपदस्योद्देश्यताऽवच्छेदकव्यापकसमुदायत्वावच्छिन्नबोधकत्वमस्त्वित्यत आह–यत्र वेति।

ननूद्देश्यताऽवच्छेदकताघटकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन सम्बन्धसामान्यावच्छिन्नविधेयशून्यवृत्तित्वाभाववदुद्देश्यताऽवच्छेदकवत्त्वविवक्षणे नोक्तदोष इत्यह आह–पदान्तरेति। घटादिपदादित्यर्थः। अन्वयसम्भव इति। तदंशे तादृशव्याप्त्यधिकावगाहितयेति भावः।

अनुभवविरोधस्य सविवादतया दोषान्तरमाह–घटत्ववत्त्वाद्यनुपस्थितीति। विपरीतज्ञानाविरोधित्वेनेति। घटत्वं रूपाभाववद्वृत्तीति निश्चयकाले सर्वे घटा रूपवन्त इति प्रत्ययापत्त्येति भावः, तत्तद्विधेयवत्त्वमिति। अशेषत्वमिति शेषः, स्वरूपतो घटत्वादेरुद्देश्यताऽवच्छेदकत्वं घटनिष्ठाभावाप्रयोगित्वं घटत्वत्वेन तादृशस्थले घटत्ववन्निष्ठाभावाप्रतियोगित्वं व्यापकत्वम्। तदवच्छिन्ने=तादृशविधेयवदवच्छिन्ने, अनन्वयप्रसङ्गादिति। उद्देश्यताऽवच्छेदकविधेययोरैक्यादिति भावः। व्यापकतापर्यन्तम्=उद्देश्यताऽवच्छेदकव्यापकतामात्रम्, तस्य च विधेय एवान्वयो भवेदिति लाभाय विधेयान्वयीति विशेषणम्। भेदान्वयस्य=भेदसंबन्धेनान्वयस्य। तथा च रूपाभाववदवृत्तिघटत्ववदभिन्ना घटा रूपवदभिन्ना इत्याकारको बोध इति स्वरूपसंबन्धेन घटपदार्थादौ तस्यान्वयो न भवितुमर्हतीति भावः। रूपवदात्मकविधेयेति। मतुपः सम्बन्ध्यर्थकतया रूपसम्बन्धिविधेयेत्यर्थः, अत्र व्याप्यता चोद्देश्यताऽवच्छेदकताघटकसम्बन्धेन, व्यापकता च

नापि विधेयान्वयिव्यापकतापर्यन्तमेव सर्वपदार्थः, नामार्थद्वयस्य भेदान्वयस्याव्युत्पन्नत्वाद्।

नाप्यभेदेन रूपवदाद्यात्मकविधेयान्वयी घटत्वादिव्यापकएव तदर्थ; तथा सति सर्वे वेदाः प्रमाणमित्यादौ सर्वपदस्य प्रमाणपदेनैव सामानाधिकरण्यात् तत्समानलिङ्गवचनत्वापत्तेः।

सर्वे घटा वर्त्तन्त इत्यादौ क्रियारूपविधेये व्यापकस्याभेदान्वये सर्वपदस्य नपुंसकत्वापत्तेर्व्यापकताया भेदान्वयोपगमे नामार्थधात्वर्थयोर्भेदान्वयविरहनियमभङ्गापत्तेः।

विधेयताऽवच्छेदकसम्बन्धेन, अत्र च विधेयत्वं तादात्म्यसम्बन्धेन।

एवञ्च घटत्वव्यापकाभिन्नरूपसम्बन्ध्यभिन्नो घट इत्याकारकशाब्दबोधः। तथा सति= सर्वपदार्थस्य विधेयांशे विशेषणत्वे सति। सामानाधिकरण्यादिति। अभेदेन तदर्थेन सह स्वार्थान्वयबोधसाकाङ्क्षत्वादिति, विभिन्नप्रवृत्तिनिमित्तकत्वे सत्येकधर्मिप्रतिपादकत्वासाधकत्वादित्यपि व्याचक्षते।

तत्समानेति। सर्वे वेदाः प्रमाणमित्येव प्रयोगः स्यात्, सविभक्तिकनामद्वयजन्याभेदान्वयस्थलेऽसति बाधके समानलिङ्गवचनस्यैव तन्त्रत्वात्, तथा च प्राच्यैरुक्तम्–

विशेष्यस्यैव यल्लिङ्गं विभक्तिवचने च ये।
तानि सर्वाणि योज्यानि विशेषणपदेष्वपि॥ इति

नन्वेवं वेदा इत्यनेन प्रमाणमित्यस्य कथं समानवचनलिङ्गकत्वं नेति चेद्?
न–प्रमाणपदस्य सर्वदैव नपुंसकलिङ्गकत्वरूपबाधकसत्त्वाद्, असमानवचनकत्वस्य तु व्युत्पत्तिवादग्रन्थादौ स्वयमुपपादितत्वादिति।

धात्वर्थविधेयकस्थलेऽपि दोषं दर्शयति–सर्वे घटा वर्त्तन्त इति। नपुंसकत्वापत्तेरिति। इदमुपलक्षणम्, एकवचनत्वापत्तिरपि ज्ञेया, तथा च सर्वं घटा वर्त्तन्त इति प्रयोगापत्तिरिति, क्रियाविशेषणानामेकत्वं नपुंसकत्वञ्चेत्यनुशासनादिति भावः।

इदञ्च–आख्यातार्थाविवक्षावादिमणिकारमते, अन्यथाऽऽख्यातार्थाश्रयत्वस्यैव विधेयत्वेन धात्वर्थस्य विधेयत्वासम्भवः स्यात् तादृशव्यापकत्वार्थकल्पेऽप्युक्तदोषासम्भवेन दोषान्तरमाह–नामार्थेति।

प्रकारान्तरं दूषयितुमुपन्यस्यति–यत्त्विति। तल्लाभोपपत्तेः=अशेषत्वलाभोपपत्तेः।

यत्त्वशेषत्वं न सर्वपदार्थः; उद्देश्यताऽवच्छेदकावच्छेदेन विधेयान्वयोपगमादेव तल्लाभोपपत्तेः, किन्त्वनेकत्वमेव।

अनेकत्वञ्च–उद्देश्यताऽवच्छेदकसमानाधिकरणभेदप्रतियोगित्वम्, अत एव सर्वं गगनं शब्दवदित्यादयो न प्रयोगाः।

एवञ्च सर्वे घटा इत्यादौ घटनिष्ठान्योन्याभावप्रतियोग्यभिन्नाघटा इत्ययमर्थः प्रतीयते।

न चैवं घटत्वादिसामानाधिकरण्यमात्रेण विधेयान्वयतात्पर्येण सर्वे घटा नीला इत्यादिप्रयोगापत्तिः?

सर्वपदार्थविशेषित उद्देश्यताऽवच्छेदकावच्छेदेनैव विधेयान्वयनियमात्, सर्वं प्रमेयमित्यादौ प्रमेयादिविधेयक उद्देश्यवाचकवस्त्वादिपदमध्याहृत्यैव प्रतीतिः, अन्यथोद्देश्यताऽवच्छेदकीभूतव्याप्यधर्मानुपस्थित्या तद्व्यापकत्वार्थकत्वेऽप्यनुपपत्तेरिति।

तदपि न युज्यते–गगनादावपि द्वित्वाद्यवच्छिन्नतद्भेदसत्त्वेन सर्वपदस्यानेकार्थत्वमुपगम्यापि सर्वं गगनमित्यादिप्रयोगस्य दुर्वारत्वात्, तत्तदुद्देश्यताऽवच्छेदकसमा-

---

उद्देश्यताऽवच्छेदकावच्छेदेनेति। उद्देश्यताऽवच्छेदकावच्छेद्यत्वञ्च=उद्देश्यताऽवच्छेदकव्यापकविधेयप्रतियोगित्वं, तच्च संसर्गमर्यादया विधेयताऽवच्छेदकसंसर्गांशे भासते, तथा च संसर्गांशेऽपि भ्रमत्वस्वीकारेण नीलांशे घटत्वव्यापकत्वबाधात् सर्वे घटा नीला इति नाभ्रान्तानां बोध इति हृदयम्। न प्रयोगा इति। विशेषदर्शिनामिति शेषः, गगनस्यैकत्वेन गगननिष्ठभेदप्रतियोगित्वस्य गगने बाधादिति। तद्भेदसत्त्वेन=गगनभेदसत्त्वेनेत्यर्थः, गगनं न घटपटोभयमित्यादिप्रतीत्यैकदेशवृत्तिधर्मावच्छेदेन व्यासज्यवृत्तिधर्मावच्छिन्नभेदस्वीकाराद्, एवञ्च गगननिष्ठभेदप्रतियोगित्वं गगनेऽबाधितमिति।

ननूद्देश्यताऽवच्छेदकसमानाधिकरणभेदप्रतियोगिताऽवच्छेदकोद्देश्यताऽवच्छेदकत्वमेवानेकत्वं, तथा च सर्वं गगनमित्यादौ गगनत्त्वादिमात्रस्योद्देश्यताऽवच्छेदकतया न तद्द्वित्वाद्यवच्छिन्नभेदमादाय दोष इत्यत आह–तत्तदुद्देश्यताऽवच्छेदकेति।

बाधितत्वेनेति। घटत्वादौ घटत्वसमानाधिकरणभेदप्रतियोगिताऽवच्छेदकत्वस्य बाधितत्वेनेत्यर्थः।

ननु द्वित्वाद्यवच्छिन्नभेदस्याव्याप्यवृत्तितया प्रतियोगिवृत्तित्वेन प्रतियोग्यवृत्तित्वविशेषणेनैव तद्वारणं भवेदित्यतस्तद् दूषयति–सामान्यत इति। स्वत्वानन्तर्भावेणेत्यर्थः। वृत्तिमदवृत्तित्वादिति।

नाधिकरणभेदप्रतियोगिताऽवच्छेदकत्वस्य तत्तदुद्देश्यताऽवच्छेदके सर्वत्र बाधितत्वेन तत्प्रतीतेः दुरुपगमत्वात्।

सामान्यतः प्रतियोगिवृत्त्यन्तत्त्वस्य वृत्तिमदवृत्तित्वात्, स्वप्रतियोगिवृत्तयो ये ये तद्भेदकूटस्य दुरुपगमतया तद्विशेषणेन द्वित्वाद्यवच्छिन्नभेदव्यावृत्तेरपि हेयत्वाद्।

अस्तु वा यथा कथञ्चित् तद्व्यावृत्तिः, तथाऽप्यनेकत्वमात्रस्यसर्वपदार्थत्वेऽवच्छेदकावच्छेदेनान्वयेऽवच्छेदकैकदेशव्यापकतया बोधस्यानुभवविरुद्धतया सर्वे घटा रूपवन्त इत्यादौ घटनिष्ठभेदप्रतियोगिघटत्वस्योद्देश्यताऽवच्छेदकतया शुद्धघटत्वादिव्यापकत्वभानानुपपत्त्या घटत्वसामानाधिकरण्येन रूपादिमदन्यत्वनिश्चयदशायां तादृशवाक्याच्छाब्दबोधापत्तिर्दुर्वारैव।

एवं विशेष्यताऽवच्छेदकव्यापकताया विशेषणसंसर्गांशे संसर्गविशेषणी-

---

वृत्तिमन्मात्रस्यैव वृत्तित्वसत्त्वादिति, दुरुपगमतयेति। द्वित्वाद्यवच्छिन्नप्रतियोगितानां स्वप्रतियोगिवृत्तीनां भेदानामनन्ततया तत्तद्व्यक्तित्वेन तेषां योगजधर्मं विनाऽबोध्यतयेत्यर्थः।

ननु स्वनिरूपकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यत्वस्य विशेषणीयत्वेन तज्ज्ञानस्य सुलभतया दोषान्तरमाह–तथाऽपीति। अनुभवविरुद्धतयेति। पुरुषत्वसामानाधिकरण्येन पुरुषो न दुःखवानिति निश्चयानन्तरं रोगवान् पुरुषो दुःखवानिति बोधमात्रस्यैतादृशनिश्चयमात्रानन्तरं पुरुषो न दुःखवानिति तादृशबोधस्य च सर्वानुभवसिद्धत्वाद्, धूमवद् द्रव्यं वह्निमदिति निश्चयासत्त्वे वह्न्यर्थिनां द्रव्यान्तरे, कमलं पुष्पं सुगन्धीति निश्चयानन्तरं पुष्पान्तरे सर्वस्यावच्छेदकावच्छेदेन प्रवृत्त्यभावदर्शनाच्च, एकदेशीभूतवह्नित्वपुष्पत्वाद्यवच्छेदेन तद्वत्ताभानोपगमे तादृशप्रवृत्त्युत्पत्तेर्दुर्वारत्वादिति भावः।

दुर्वारैवेति। तादृशज्ञानजन्यबोधस्य शुद्धघटत्वव्यापकताघटितरूपघटत्वाद्यवच्छेद्यत्वानवगाहितया, अतस्तादृशबोधं प्रति घटत्वसामानाधिकरण्येन रूपवदन्यत्वनिश्चयस्याप्रतिबन्धकत्वात्, प्रतिबन्धकत्वाच्च तादृशव्यापकत्वावगाहितादृशबुद्धिं प्रतीति।

यदि च नीलघटो नास्तीत्यादिप्रतीतौ नीलादेस्तादृशाभावप्रतियोगिताऽवच्छेदकत्वानवगाहनेऽपि प्रतियोग्यंश उपलक्षणविधया भानवदत्रापि तादृशानेकत्वस्य व्यापकत्वांशेऽनवगाहनेऽप्युद्देश्यताऽवच्छेदकघटकतया भानं यदि प्रामाणिकं तदाऽप्याह–

एवं विशेष्यतेति। अवच्छेद्यत्वावगाहिबुद्धौ विधेयताऽवच्छेदकसंसर्गांशे उद्देश्यताऽवच्छेदकव्यापकत्वस्य भाने समवायस्यैक्यमते तस्य द्रव्यत्वव्यापकतया द्रव्यत्वावच्छेदेन द्रव्यं रूपवदिति प्रतीतेरबाधितार्थकतयाऽभ्रान्तस्यापि तादृशप्रतीत्यापत्तेः, विशिष्टवैशिष्ट्यानवगाहिबोधे

भूतविशेषणांशे वा भानात् सर्वेषु घटेषु रूपमित्यादौ घटत्वादेर्विशेष्यताऽनवच्छेदकत्वेन रूपादौ तद्व्यापकत्वभानं दुर्लभमापद्येत।

न च तत्र सप्तम्यर्थाधेयत्वादौ निरूपकत्वसम्बन्धावच्छिन्नव्यापकतासम्बन्धेनैव प्रकृत्यर्थस्य घटादेरन्वयः स्वीक्रियते घटादेर्विशेष्यता च तादात्म्यसम्बन्धेन, व्यापकता च यादृशरूपावच्छिन्नआधेयत्वादेरन्वयस्तदवच्छिन्ननिष्ठाधेयतात्वसंसर्गावच्छिन्ना, अतोरूपनिष्ठाधेयत्वादेराधेयतात्वादिना द्रव्यादिव्यापकत्वेऽपि नातिप्रसङ्गः, रूपनिष्ठाधेयत्वादिनाऽऽधेयत्वादेः पदानुपस्थितत्वेऽपि न क्षतिः, तथा सत्यपि तादृशस्य संसर्गघटकतया भानेऽविरोधादिति वाच्यम्?

उक्तव्यापकतायाः संसर्गत्वे मानाभावाद्।

अस्तु वोद्देश्यविधेययोर्विशेष्यविशेषणता, वैपरीत्येऽपि विधेयांश उद्देश्य-

---

विधेयप्रतियोगित्वेन तादृशसंसर्गस्य भाने मानाभावाच्चात आह– संसर्गविशेषणीभूतविशेषणांश इति। विषयताऽवच्छेदकसंसर्गांशे विशेषणस्य विधेयप्रतियोगित्वस्य तद्घटकविधेयांश इत्यर्थः।

तथा चावच्छेदकावच्छेद्यत्वावगाहिगबुद्धावुद्देश्यताऽवच्छेदकव्यापकविधेयप्रतियोगित्वस्यैव भानाद् रूपादौ द्रव्यत्वव्यापकत्वविरहेण तद्भाने भ्रम एवेति नाभ्रान्तानां तथाविधबोधः, निरूपकतासम्बन्धावच्छिन्ने तादात्म्यसम्बन्धेन प्रकृत्यर्थवन्निष्ठाभावीया या निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिता तदभावः।

तथा च स्वनिष्ठावच्छेदकताकसम्बन्धिनिष्ठावच्छेदकताकवृत्तितात्वावच्छेदकताकाभावत्त्वावच्छिन्नावच्छेदकताकप्रतियोगितात्वावच्छिन्नावच्छेदकताकाभाववत्त्वमेव सम्बन्धो; नातः स्वस्य व्यापकताघटकतया प्रथमपदार्थे स्वस्मिन् स्वप्रतियोगित्वविरहेऽपि न क्षतिः।

केचित्तु–आपाततः प्रतियोगित्वं स्वीकृत्य शङ्कितं; तदभावेनाग्रे खण्डितमित्याहुः।

तदवच्छिन्ननिष्ठेति। तथा च प्रकृत्यर्थवन्निष्ठाभावप्रतियोगिताऽवच्छेदकघटादिनिष्ठाधेयतात्वमेव सम्बन्धः, नातिप्रसङ्ग इति। न सर्वेषु घटेषु नील इत्यादिप्रत्ययप्रसङ्गः। न क्षतिः=न तादृशशाब्दबोधानुपपत्तिरिति।

मानाभावादिति। तादृशव्यापकतायाः संसर्गत्वस्यान्यत्राक्लृप्तत्वाद्, अत्र तत्कल्पने तादृशसम्बन्धघटिततात्पर्यज्ञानादेरपि कारणत्वकल्पनाऽऽपत्त्या गौरवस्यैव बाधकत्वादिति।

यत्तु यत्र मासमधीत इत्यादावनुशासनं; तत्रैव व्यापकतायाः संसर्गतया भानमिति भाव इति।

ताऽवच्छेदकव्यापकत्वस्योद्देश्यविधेयभावमहिम्नैव संसर्गतयैव भानम्।

भवतु चोद्देश्यस्य विशेषणतयोपस्थितस्यापि विधेये पारतन्त्र्येणान्वयो व्युत्पत्त्यविरुद्धः नामार्थयोरपि पारतन्त्र्येण भेदेनान्वयो मा व्युत्पत्तिं विरौत्सीत्, तथाऽपि सर्वपदस्य यत्र विधेयवाचकपदसामानाधिकरण्यं तत्र विधेयताऽवच्छेदकांश उद्देश्यस्य तत्सम्बन्धस्य वाऽनुभवसिद्धो व्याप्तिबोधो दुरुपपादः।

एवं घटे न सर्वाणि रूपाणि; अपि तु कानिचिदेवेत्यादौ रूपनिष्ठभेदप्रतियोगिरूपत्वावच्छिन्नाभावो घटादौ बाधित एवेत्ययोग्यताऽऽपत्तिः।

न च तादृशरूपत्वादिसामानाधिकरण्येन घटादिवृत्तित्वाभावः

तत्तुच्छं—फलमुखगौरवं न दोषायेत्यतस्तत्स्वीकृत्य; दोषान्तरमाह—अस्तु वेति। वैपरीत्येऽपीति। अत्रोद्देश्यस्य विशेषणत्वं विधेयस्य रूपत्वादेर्विशेष्यत्वमिति वैपरीत्येऽपि, विधेयांश इति। पारतन्त्र्येणोद्देश्यभानमभिप्रेत्य। महिम्नैवेति। उद्देश्यविधेयभावप्रयोजकसामग्र्यैवेत्यर्थः, तृतीयाऽर्थः प्रयोज्यत्वं, तस्य च भानमित्यत्रान्वयः।

ननु सप्तम्यर्थाधेयत्वविशेषणतयोपस्थितस्य घटादेर्घटत्वादिव्यापकतासम्बन्धेन विधेये रूपादौ कुतोऽन्वयः? एकविशेषणतयोपस्थितस्यान्यत्र विशेषणतयाऽन्वयस्य व्युत्पत्तिविरुद्धत्वादित्यत आह—भवतु चेति।

तथा च तादृशनियमः स्वातन्त्र्येणान्वय एवेति नामार्थयोर्भेदान्वयस्य व्युत्पत्तिविरुद्धत्वं स्वातन्त्र्येणान्वय एवेत्याह—नामार्थेति। यत्रेति। द्रव्ये सर्वाणि रूपाणीत्यादौ, सामानाधिकरण्यमित्यन्तस्य तादृशपदेनाभेदान्वयसाकाङ्क्षत्वमर्थः। विधेयताऽवच्छेदकांशे=रूपत्वादौ। उद्देश्यस्य=द्रव्यादेः। तत्सम्बन्धस्य=तत्प्रतियोगिकसम्बन्धस्य। अनुभवसिद्ध इति। अन्यथा घटे सर्वाणि रूपाणीत्यादिप्रयोगापत्तेः, रूपनिष्ठभेदप्रतियोगिरूपे घटवृत्तित्वस्याबाधादिति।

व्याप्तिबोध इति। व्याप्यताऽवच्छेदकत्वबोध इत्यर्थः, व्यापकता च तादात्म्येन, व्याप्यता च विधेयान्वयिवृत्तिताघटकसम्बन्धेन, तथा च तादात्मेन द्रव्यवदन्यावृत्तित्वरूपव्याप्यत्वलाभः।

अथ वा सर्वे घटा इत्यादौ यथा विधेय उद्देश्यताऽवच्छेदकव्यापकत्वं भासते तथा द्रव्ये सर्वाणीत्यादौ विधेयताऽवच्छेदकव्यापकत्वस्योद्देश्ये भानमभिप्रेत्य विधेयताऽवच्छेदके व्याप्यत्वमुक्तम्। दुरुपपाद इति। तद्बोधकपदाभावाद्, उद्देश्यविधेयभावप्रयोजकसामग्र्या व्यापकताबोधकत्वस्यैव कल्पितत्वाच्चेति भावः।

ननु यथोद्देश्यपदसमानाधिकरणसर्वपदस्थल उद्देश्यविधेयभावमहिम्नैव पारतन्त्र्येणोद्देश्यताऽवच्छेदकव्यापकत्वस्य विधेये भानं भवति तथा विधेयवाचकपदसमानाधिकरण-

प्रतीयते स चाबाधित एव; नञ्समभिव्याहारस्थलेऽशेषत्वभानानुपगमे क्षतिविरहादिति वाच्यम्?

एवं सति तत्र घटस्योद्देश्यत्वानिर्वाहाद्, न च तत्र रूपस्योद्देश्यत्वं? प्रथममनिर्दिष्टत्वात्।

अत्रोच्यते—उद्देश्यताऽवच्छेदकव्यापकविधेयव्याप्यपर्याप्तिकोधर्मः सर्वपद-प्रवृत्तिनिमित्तं, सर्वे घटा इत्यादौ तथाविधधर्मो घटादिनिष्ठयावत्त्वमेव, तस्य व्यासज्य-

---

सर्वपदस्थले विधेयताऽवच्छेदकव्यापकत्वमुद्देश्ये व्याप्यताऽवच्छेदकत्वं विधेयताऽवच्छेद-केऽवगाहते, एवञ्च तन्मते न कोऽपि दोष इत्यत आह—एवं घटे न सर्वाणीति। रूपनिष्ठभेदप्रतियोगीति। अत्र सर्वपदार्थरूपघटत्वादिसमानाधिकरणभेदप्रतियोगिविशेषितरूपपदार्थान्वितनञर्थाभावो घटादौ प्रतीयते, तत्र नञर्थाभावादावनेकत्वरूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तादृशरूपादेरन्वयः, अतो रूपत्वावच्छिन्नेत्युक्तम्।

उद्देश्यत्वनिर्वाहादिति। स्वांशे मुख्यविशेष्यताऽऽपन्नस्य स्वांशे मुख्यप्रकारताऽऽपन्न-स्याधेयत्वसम्बन्धावच्छिन्नवृत्तित्वद्वारा प्रकारताऽऽपन्नस्यैव वा स्वांश उद्देश्यत्वनियमादभावस्य विधेयत्वाच्चेति भावः।

प्रथमेति। उद्देश्यविधेयभावेन पर्वतो वह्निमानित्यादिव्यवहारादसति बाधक उद्देश्यवा-चकपदस्य प्राङ्निर्देशावश्यकत्वात्, तथा च प्राच्यैरुक्तम्—

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेदिति।

अत एव "न्यक्कारो ह्ययमेवे"त्यादावुद्देश्यवाचकस्येदम्पदस्य परवर्त्तित्वेनालङ्कारिकाणां विधेयाप्रतिपत्तिरूपविधेयाविमर्शदोषदानं सङ्गच्छते।

वस्तुतस्तु—एतद्दोषे ग्रन्थकारस्य न निर्भरः, किन्त्वेतत्कल्पे कुसृष्टिकल्पनाऽऽपत्तावेव, अत एव विधेयवाचकपदस्य नोत्तरवर्त्तित्वमावश्यकं सति तात्पर्ये योजनयाऽप्युत्तरवर्त्तित्वादिज्ञाने-नोद्देश्यविधेयभावप्रतिपत्तिर्भवतीत्यवयवग्रन्थे स्वयमेव लिखितम्।

एतेन दध्ना जुहोतीत्यादावुत्तरवर्त्तिजुहोतेरर्थस्य; एवं "निःशेषच्युतचन्दनं स्तनतटमि"त्यादा-वुद्देश्यस्य स्तनतटादेरुत्तरवर्त्तित्वेऽपि न तदर्थस्योद्देश्यत्वहानिः, न वा तस्य दुष्टकाव्यत्वमित्य-लं विस्तरेणेति पूर्वपक्षः।

घटत्वव्यापकत्वादिति। व्यासज्यवृत्तिधर्मप्रतियोगिकपर्याप्तेरधिकरणभेदेन भेदाभावादे-कत्वादिति भावः। घटत्वादीति। घटत्वादिव्यापकत्वरूपादिव्याप्यत्वयोर्लाभ इत्यर्थः, पर्याप्ताविति

वृत्तितया तत्पर्याप्तेर्घटत्वव्यापकत्वाद् रूपादिव्याप्यत्वाच्च, शब्दाद् घटत्वादिव्यापक-रूपादिव्याप्यत्वलाभे तयोरपि व्याप्यव्यापकभावोऽर्थत एव लभ्यते, द्रव्यत्वव्यापक-पर्याप्तेः रूपाद्यव्याप्यत्वात् सर्वाणि द्रव्याणि रूपवन्तीत्यादावयोग्यता।

उद्देश्यताऽवच्छेदकव्यापकत्वञ्च—तत्समानाधिकरणान्योन्याभावप्रतियोगिताऽनवच्छे-दकत्वं, तेन रूपादिव्याप्यपर्याप्तेर्द्रव्यत्वादिमन्निष्ठात्यन्ताभावप्रतियोगिताऽनवच्छेद-कधर्मवत्त्वेऽपि न क्षतिः, घटत्वादिव्यापकयावत्त्वपर्याप्तिश्च न घटादिव्यक्तिभेदाद्भि-

---

शेषः। तयोरपीति। घटत्वादिरूपाद्योरित्यर्थः।

न च सर्वे घटा रूपवन्त इति निश्चयस्यैकदेशव्यापकताभानानङ्गीकर्त्तृनये घटत्वावच्छे-द्यत्वानवगाहनादप्रतिबन्धकत्वेन तदुत्तरं सामानाधिकरण्येन घटो न रूपवानिति बुद्ध्युत्पत्तिर्दुर्वारेति वाच्यम्?

अगत्या सर्वपदार्थविशेषिततत्तद्धर्मावच्छिन्ने रूपादिमत्तानिश्चयस्य स्वातन्त्र्येण प्रतिबन्धकत्वकल्पनाद्।

वस्तुतस्तु=अर्थत एव=स्वतन्त्रसामग्रीवशेनैव, पारतन्त्र्येणेति शेषः, तथा च पारतन्त्र्येण घटत्वावच्छेदेन रूपवत्त्वावगाहनान्न तदापत्तेरिति भावः।

अथ वा—अर्थत एव=तन्मूलकादनुमानत एव, लभ्यते=ज्ञायते, तथा च यद्व्यापकं यद्व्याप्यं भवति तत्तद्व्याप्यं भवतीत्युदाहरणादिति भावः।

तत्समानाधिकरणान्योन्याभावेति। उद्देश्यताऽवच्छेदकसामानाधिकरण्यञ्च तदधिकरणवृत्तित्वं, तदधिकरणत्वञ्च—उद्देश्यताऽवच्छेदकसम्बन्धेन, तेन जन्यनिष्ठयावत्त्वप्रतियोगिकपर्याप्तेरपि कालिकेन महाकालान्यद्रव्यत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगिताऽवच्छेदकत्वेऽपि न सर्वं काला-न्यद्रव्यं जन्यमित्यादिप्रयोगः, न वा घटाद्यनुयोगिकसमवायेन द्रव्यत्ववन्निष्ठान्योन्याभावप्रतियोगि-ताऽनवच्छेदकघटादिनिष्ठयावत्त्वपर्याप्तिमादाय; सर्वं द्रव्यं रूपवदित्यादयोऽपि, तत्र प्रतियोगित्वञ्च अवच्छेदकताविशिष्टान्यत्वेन विशेषणीयं, तेन तत्पर्याप्तिमत्पटोभयं नेत्यादिभेदप्रतियोगिता-ऽवच्छेदकत्वेऽपि न व्यापकत्वभङ्गः, वैशिष्ट्यञ्च, स्वनिरूपितत्वस्वभिन्नावच्छेदकता-निरूपितत्वोभयसम्बन्धेन, स्वमवच्छेदकत्वम्, तादृशप्रतियोगिताऽवच्छेदकत्वमपि तादृशं निवेशनीयं, तेन तद्घटवृत्तित्वविशिष्टतत्पर्याप्तिमद्भेदमादाय न दोषः।

ननु तद्वन्निष्ठात्यन्ताभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वरूपव्यापकत्वविवक्षणे का क्षतिः? इत्यत आह—तेनेत्यादि। तादृशप्रतियोगिताऽनवच्छेदकधर्मश्च सम्बन्धत्वादिः।

ननु घटादिनिष्ठयावत्त्वप्रतियोगिकपर्याप्तेर्घटादिभेदेन भिन्नत्वे चालनीन्यायेनान्य-

द्यतेऽतो न घटत्वादिव्यापकताया अनुपपत्तिः।

विधेयव्याप्यत्वञ्च—व्यभिचारित्वसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विधेयताऽवच्छेदकावच्छिन्नतत्तद्विधेयाभाववत्त्वम्, अतो विधेयताऽवच्छेदकावच्छिन्नस्य यत्र केवलान्वयित्वं तत्र नाप्रसिद्धिः, व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकस्यैव तथाविधाभावस्य प्रसिद्धत्वाद्, अत्रोद्देश्यताविधेयताऽवच्छेदकघटत्वरूपत्वादीनामुपलक्षणतयाऽनुगमकं तादृशावच्छेदकत्वमेवातो न शक्त्यानन्त्यं न वाऽपूर्वधर्मव्यापकत्वभानानुपपत्तिः।

यद्यपि सामान्यत उद्देश्यताऽवच्छेदकत्वमव्यावर्त्तकमेव, उद्देश्यताऽवच्छेदकविधया स्वसमभिव्याहृतपदप्रतिपाद्यत्वञ्च तादृशपदजन्यशाब्दबोधात् प्राक् दुर्ग्रहं; तथाऽपि तादृशपदप्रतिपाद्यत्वेन वक्तृबुद्धेर्वक्तृतात्पर्यस्य वा विषयत्वं तथा वाच्यं, तच्च प्रकरणादिना पूर्वमपि ग्रहीतुं शक्यते, स्वत्वाननुगमः पूर्ववत् समाधेयः।

घटनिष्ठभेदप्रतियोगिताऽवच्छेदकत्वस्यान्यघटानुयोगिकपर्याप्तौ सत्त्वेन व्यापकत्वं दुर्लभमित्यत आह—घटादीति। केवलान्वयिविधेयकस्थल उपपादयितुमाह—विधेयव्याप्यत्वञ्चेति। व्यभिचारित्वमत्र विधेयताऽवच्छेदकसम्बन्धेनाभावघटितं, तेन न सर्वं जलं द्रव्यत्वमित्यादिप्रयोगाः।

इदमुपलक्षणं—सर्वे नीला घटा रूपमित्यादिस्वरूपतो विधेयस्थले विधेयवद्भिन्नवृत्तित्वाभाववत्त्वस्यैव व्याप्तित्वं बोध्यं, सावच्छिन्ननिरवच्छिन्नविधेयभेदेन शक्तिभेदस्येष्टत्वात्, केवलान्वयिधर्मस्य स्वरूपतो भानासम्भवेन न तत्र गतिविरहः।

नन्वेवं रीत्या सर्वपदस्य शक्तिनिर्वचन उद्देश्यताऽवच्छेदकविधेयभेदेन नानाऽर्थत्वप्रसङ्ग इत्यत आह—अत्रोद्देश्येत्यादि। अपूर्वेति। व्यवहारादितः पूर्वागृहीतशक्तिकभानानुपपत्तिरित्यर्थः। अव्यावर्त्तकम्=इतराव्यवच्छेदकं, दुर्ग्रहमिति। केनापि प्रमाणेन निश्चेतुमशक्यमित्यर्थः। प्रकरणादिना=हेतुनेति यावद्। ग्रहीतुम्=अनुमातुं। तथा चेदं वाक्यं स्वजन्यप्रतिपत्तीयोद्देश्यताऽवच्छेदकत्वविधेयताकत्वेन तत्तद्धर्मविषयताकवक्तृबुद्धिप्रयोज्यं तत्तत्प्रकरणीयत्वादित्यादिरीत्या श्रोतुरनुमितिसम्भवादिति भावः। स्वं सर्वपदघटितं तादृशं वाक्यम्। पूर्ववद्= अस्मच्छब्दविचारवत्। समाधेय इति। उद्देश्यताऽवच्छेदकत्वेन स्वघटितवाक्यजन्यप्रतिपाद्यत्वप्रकारकवक्तृबुद्धिविषयतासम्बन्धेन सर्वपदविशिष्टधर्मव्यापकत्वे सति विधेयताऽवच्छेदकत्वेन तादृशविषयतासम्बन्धेन सर्वपदविशिष्टधर्मवद्व्याप्या या पर्याप्तिस्तत्प्रतियोगि यावत्त्वस्य प्रवृत्तिनिमित्ततयोपपादनीय इत्यर्थः।

ननु सर्वे घटा गुणवन्तः; सर्वं द्रव्यं रूपवदित्यादिवाक्यद्वयजन्यसमूहालम्बनबोधमा-

उद्देश्यविधेयभावश्च न विशेष्यविशेषणभावनियतोऽतः सर्वेषु घटेषु रूपमित्यादावपि घटत्वादिरूपत्वाद्योरुद्देश्यविधेयताऽवच्छेदकभावोऽक्षत एवेति न

दाय तादृशवाक्यद्वयस्य प्रामाण्यापत्तिर्दुर्वारैव, द्रव्यगतयावत्त्वेऽपि तादृशवाक्यजन्यसमूहालम्बन-बोधीयविधेयताऽवच्छेदकत्वस्य गुणत्वादावपि सत्त्वेन तद्धर्मावच्छिन्नव्याप्यत्वस्य सत्त्वाद्।

एवं व्यापकताकुक्षौ सर्वपदगतानुपूर्वीरूपानुगतधर्मपुरस्कारेण प्रवेशे सर्वपदवैशिष्ट्यस्य घटत्व इव पटत्वेऽपि सत्त्वेन घटमात्रगतयावत्त्वादेः सर्वपदविशिष्टधर्मव्यापकत्वासम्भवेन तादृशरूपेण शक्तिर्न निर्वाच्येति चेद्?

न–सर्वपदविशिष्टपर्याप्तिकधर्मस्यैव तत्र सर्वपदशक्यताऽवच्छेदकत्वाद्, वैशिष्ट्यञ्च–स्वविशिष्टोद्देश्यतावत्त्वसम्बन्धेन, स्वं सर्वपदं, स्ववैशिष्ट्यञ्च स्वघटितवाक्यप्रयोज्यत्वसम्बन्धेन, उद्देश्यतावैशिष्ट्यञ्च–स्वविशिष्टविषयतावद्धर्मवन्निष्ठभेदप्रतियोगिताऽवच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वस्वविशिष्टविषयतावद्धर्मावच्छिन्नव्यभिचारित्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वोभयसम्बन्धेन, स्वद्वयमुद्देश्यत्वपरम्,प्रथमस्ववैशिष्ट्यञ्च–स्वावच्छेदकत्वनिष्ठप्रकारतानिरूपितत्वस्वप्रयोजकवाक्योच्चारकपुरुषीयबुद्धिनिरूपितत्वोभयसम्बन्धेन।

द्वितीयं वैशिष्ट्यञ्च–स्वनिरूपितविधेयताऽवच्छेदकत्वनिष्ठप्रकारतानिरूपितत्वस्वप्रयोजकवाक्योच्चारकपुरुषीयबुद्धिनिरूपितत्वोभयसम्बन्धेन।

एवञ्चैकैकसमुदाय एकैकसर्वपदवैशिष्ट्येनोद्देश्यताविधेयतयोर्निरूपितत्वलाभेन न पूर्वोक्तदोषः।

भगवत्सङ्केतोऽपि सर्वपदवैशिष्ट्योपलक्षितपर्याप्तिकधर्मावच्छिन्नः सर्वपदाद्बोद्धव्य इत्याकारकः, स्वप्रयोज्यत्वस्वविशिष्टपर्याप्तिकधर्मावच्छिन्नविषयकत्वोभयसम्बन्धेन सर्वपदवान् बोधो भवत्वित्याकारको वा बोध्यः, अत्र धर्मपदम्–एकत्वावच्छिन्नपर्याप्तिकान्यत्वे सति द्वित्वावच्छिन्नानुयोगिताकपर्याप्तिकान्यधर्मपरं, तेन सर्वं गगनं द्रव्यं, सर्वौ गगनमहाकालौ द्रव्यमित्यादयो न प्रयोगाः।

नन्वेवंसर्वेषु घटेषु रूपमित्यत्र का गतिः? तत्र घटस्य प्रकारतयोद्देश्यत्वाभावाद्, रूपस्यापि विशेष्यतया विधेयत्वासम्भवाच्च, घटत्वव्यापकरूपव्याप्यपर्याप्तिकयावत्त्वावच्छिन्नस्य बोधयितुमशक्यत्वादित्य आह–उद्देश्यविधेयेति।

उद्देश्यवाचकेति। तत्सामानाधिकरण्यञ्च=तदर्थेन सममभेदान्वयिस्वार्थकत्वम्। विधेयताऽवच्छेदकव्यापकेति। तदव्यापकत्वञ्च–तद्वन्निष्ठभेदप्रतियोगिताऽनवच्छेदकत्वं, तद्वत्त्वं च विधेयताऽवच्छेदकताघटकसम्बन्धेन, नातो वृत्तिमन्मात्रवृत्तिपर्याप्तेः कालिकेन वृत्तिमत्त्वाधिकरण-महाकालनिष्ठभेदप्रतियोगिताऽवच्छेदत्वेऽपि व्यापकत्वहानिः, न वा यत्किञ्चित्कालिकसम्बन्धेन

घटत्वादिव्यापकरूपत्वावच्छिन्नव्याप्यपर्याप्तिकयावत्त्वभानानुपपत्तिः।

इयञ्च व्युत्पत्तिरुद्देश्यवाचकपदसमानाधिकरणसर्वपदे, विधेयवाचकपद-समानाधिकरणसर्वपदस्य च विधेयताऽवच्छेदकव्यापकोद्देश्यताऽवच्छेदकावच्छि-न्नसम्बन्धव्याप्यपर्याप्तिकयावत्त्वमर्थः, अतः काले सर्वे वृत्तिमन्तः, कालःसर्व-धर्मवानित्यादौ सर्वपदेन वृत्तिमत्त्वादिव्यापककालादिसम्बन्धव्याप्यपर्याप्तिकं यावत्त्वं प्रतीयते।

अथ वा स्वार्थान्वयिताऽवच्छेदकधर्मव्यापकतादृशधर्मावच्छिन्नान्वयिता-वऽच्छेदकधर्मावच्छिन्नव्याप्यपर्याप्तिकधर्मावच्छिन्नः सर्वपदार्थ इत्युद्देश्यविधेयभावं

महाकालान्यपदार्थत्वाधिकरणजन्यनिष्ठभेदप्रतियोगिताऽनवच्छेदकतद्गतपर्याप्तिमादाय काले सर्वे महाकालातिरिक्तपदार्था इति प्रयोगप्रसङ्गः।

उद्देश्यताऽवच्छेदकावच्छिन्नेति। तत्सम्बन्धश्च–उद्देश्यानुयोगिकविधेयताऽवच्छेदकसम्बन्धः, तद्व्याप्यत्वञ्च–प्रतियोगित्वाख्यस्वरूपसम्बन्धावच्छिन्नतदभाववदवृत्तित्वं, काले सर्वे वृत्तिमन्त इत्यादौ वृत्तिमति यथा विधेयत्वमनुभवसिद्धं; तथा कालिकादिविशेषसम्बन्धावच्छिन्नमपि तद्, न तु केवलं विधेयत्वं निरनुभवादव्यावर्त्तकत्वाच्च।

एवञ्च कालानुयोगिककलिकविशेषणत्वाप्रतियोगिनि गगनादौ वृत्तिमन्निष्ठपर्याप्तेरसत्त्वेन तद्व्याप्यत्वं, शाब्दबोधोऽपि वृत्तिमत्त्वव्यापककालानुयोगिकसम्बन्धव्याप्यपर्याप्तिकयावत्त्वा-वच्छिन्नाभिन्नवृत्तिमन्तः कालवृत्तय इत्याद्याकारक ऊह्यः।

प्रतीयत इति। अन्यथैतत्कालस्यापि कतिपयवृत्तिमद्विशिष्टत्वेनेदानीं सर्वे वृत्तिमन्तः; एतत्कालः सर्वधर्मवानित्यादिप्रतीत्यापत्तेरिति भावः।

स्वार्थान्वयिताऽवच्छेदकेति। अत्र सर्वपदं स्वपदार्थः, स्वार्थान्वयिताऽवच्छेदकत्वञ्च–स्ववृत्तिग्रहजन्योपस्थितिप्रयोज्यस्वार्थनिष्ठविषयतानिरूपितविषयताऽवच्छेदकत्वं, तदाश्रयधर्मव्या-पकत्वञ्च–तद्वन्निष्ठान्योन्याभावप्रतियोगिताऽनवच्छेदकत्वं, तद्वत्त्वञ्च–स्वार्थान्वयिताऽवच्छेद-कताघटकसम्बन्धेन।

व्यावृत्तिस्तु पूर्वोक्तैव, तादृशधर्मावच्छिन्नान्वयिताऽवच्छेदकत्वञ्च स्वार्थनिष्ट-तादृशविषयतानिरूपितविषयतावच्छेदकत्वं। तद्धर्मव्याप्यत्वञ्च व्यभिचारित्वसम्बन्धावच्छिन्नतद-भाववत्त्वं, व्यभिचारश्च–स्वार्थान्वयिताऽवच्छेदकावच्छिन्नान्वयिताविशिष्टसम्बन्धावच्छिन्न-प्रतियोगिताकाभावघटितो बोध्यः, तादृशान्वयितावैशिष्ट्यञ्च–स्वावच्छेदकत्वस्वावच्छिन्नविधेय-ताऽवच्छेदकत्वान्यतरसम्बन्धेन, काले सर्वे वृत्तिमन्त इत्यादौ सर्वपदार्थान्वयन्वयित्वरूपं

विशिष्यानिवेश्य सर्वसाधारणैकव्युत्पत्तिः स्वीक्रियते।

अन्वयित्वञ्च विशेष्यविशेषणसाधारणं, सर्वं प्रमेयमित्यादौ वस्त्वादिपदाध्याहारमन्तरेण बोधोपगमे तदनुरोधेनान्योन्याभावप्रतियोगिताऽनवच्छेदकविधेयव्याप्यपर्याप्तिकयावत्त्वार्थकताऽपि सर्वपदस्य स्वीकार्या।

अयं सर्वं घटं वेत्तीत्यादावेतदीयज्ञानविषयत्ववत्त्वादिना विषयताऽनन्वयात्

यत्कालवृत्तित्वादिनिष्ठप्रकारत्वं तदवच्छेदकस्वरूपादिसम्बन्धेन, सर्वे घटा रूपवन्तः, सर्वेषु घटेषु रूपमित्यादौ च तादृशविधेयताऽवच्छेदकसम्बन्धेन व्याप्यत्वलाभार्थमन्यतरत्वेन सम्बन्धद्वयनिवेशः, मत्वर्थीयप्रत्ययस्य नामार्थयोर्भेदेनान्वये तात्पर्यग्राहकत्वेन समवायेन रूपस्य प्रकारता विधेयताऽपि, अतो न तत्र स्वार्थान्वयन्वयित्वहानिरिति, सर्वे घटा द्रव्यमित्यादौ तु तादात्म्येन द्रव्यस्यैव विधेयत्वेन व्याप्यत्वं बोध्यम्।

अत्रापि स्वार्थान्वयिताऽवच्छेदकत्वविधया स्वसमभिव्याहृतपदप्रतिपाद्यत्वेन या वक्तृबुद्धिस्तद्विषयधर्मव्यापकत्वे सति स्वार्थान्वयन्वयिताऽवच्छेदकत्वविधया स्वसमभिव्याहृतपदप्रतिपाद्यत्वेन या वक्तृबुद्धिस्तद्विषयतावद्धर्मावच्छिन्नव्याप्या या पर्याप्तिस्तत्प्रतियोगिकयावत्त्वावच्छिन्ने सर्वपदस्य शक्तिर्वाच्याऽतो न पूर्वोक्तदोषः।

अनुगमकन्तु—स्वविशिष्टविषयतावत्त्वसम्बन्धेन सर्वपदविशिष्टपर्याप्तिकवत्त्वं प्रवृत्तिनिमित्तं, विषयतायां वैशिष्ट्यञ्च—स्वजन्योपस्थितिप्रयोज्यत्वस्वार्थनिष्ठत्वोभयसम्बन्धेन, प्रथमसम्बन्धनिवेशात् सर्वे घटा इत्यादिस्थलीयं सर्वपदार्थं सर्वपदञ्चादाय न सर्वाणि द्रव्याणि रूपवन्तीत्यादिप्रयोगाः, सर्वपदार्थघटकपर्याप्तिविषयताया अपि सर्वपदजन्योपस्थितिप्रयोज्यतया तामादाय न सर्वाणि दधीनि द्रव्यवन्तीत्यादिप्रयोगाः।

विषयतावत्त्वञ्च—स्वनिरूपितविषयताऽवच्छेदकत्वनिष्ठविषयताकवक्तृबुद्धिविषयतावद्व्यापकत्वस्वनिरूपितविषयतानिरूपितविषयताऽवच्छेदकत्वनिष्ठप्रकारताकवक्तृबुद्धिविषयतावद्धर्मावच्छिन्नव्याप्यत्वोभयसंबन्धेन, सङ्केतोऽप्युक्तसंबन्धेन सर्वपदवत्पर्याप्तिकयावत्त्वावच्छिन्नबोधकं सर्वपदं भवत्वित्याकारको बोध्यो; न तु स्वजन्यत्वस्वविशिष्टपर्याप्तिकयावत्त्वावच्छिन्नविषयकत्वोभयसम्बन्धेन बोधः सर्वपदवान् भवत्वित्याकारकः, तथा सति सर्वपदवत्पर्याप्तिकत्वरूपानुगतधर्मेण सङ्केतग्रहानुपपत्तेः, अस्तु वा कथञ्चित् तथेत्यलं पल्लवितेन।

सर्वं प्रमेयमित्यादौ सर्वं वस्तु प्रमेयमिति यदि वस्त्वादिपदमध्याह्रियते; तदा सर्वे घटा इत्यादिसमशीलतया तत्स्थलीयव्युत्पत्त्यैवोपपत्तिर्भवेदत आह—अध्याहारमन्तरेणेति।

अतिप्रसञ्जकेति। यत्किञ्चिद्घटज्ञानदशायामपि सर्वं घटं वेत्तीत्यादिप्रयोगापत्तिरित्यर्थः।

तादृशधर्मो नान्वयिताऽवच्छेदक; अन्वयिताऽवच्छेदकविषयत्वत्वाद्यवच्छिन्नव्याप्यत्वमतिप्रसञ्जकमिति तत्रापि व्युत्पत्त्यन्तरं स्वयमूहनीयम्।

अत्र न सर्वाणि रूपाणीत्यादौ नञर्थप्रतियोगिविशेषणार्थकसर्वपदस्य स्वार्थान्वयिताऽवच्छेदकरूपत्वादिव्यापकपर्याप्तिनिरूपकयावत्त्वार्थकतया तदवच्छिन्नाभाव एव प्रतीयते।

व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्तादृशाभावो घटादावबाधित एवेति नायोग्यता।

व्युत्पत्त्यन्तरमिति। स्वार्थान्वयिताऽवच्छेदकत्वेन वक्तृतात्पर्यविषयधर्मव्यापकत्वे सति स्वोच्चारणप्रयोजकं यत्स्वघटितवाक्यजन्यस्वार्थान्वयन्वयिकर्मताकक्रियाकर्तृत्वप्रकारकप्रतिपत्तीयतादृशविषयताऽऽश्रयत्वेन वक्तृतात्पर्यं तदीयतादृशविषयताऽऽश्रयकर्तृनिष्ठत्वविशिष्टस्वार्थान्वयन्वयिकर्मताकक्रियाकर्मताव्याप्या या पर्याप्तिस्तत्प्रतियोगिकयावत्त्वावच्छिन्ने शक्त्यन्तरमित्यर्थः, सर्वत्र स्वपदं सर्वपदपरम्, अनुगमकञ्च रूपं सर्वपदवत्त्वं, वैशिष्ट्यञ्च–स्वार्थान्वयिताऽवच्छेदकत्वेन वक्तृतात्पर्यविषयतावन्निष्ठभेदप्रतियोगिताऽवच्छेदकत्वसम्बन्धावच्छिन्नावच्छेदकताकभेदवत्त्वस्वविशिष्टक्रियाकर्मत्वव्याप्यत्वोभयसम्बन्धेन, क्रियायां स्ववैशिष्ट्यञ्च–स्वार्थनिष्ठविषयताकप्रतिपत्तीयकर्मत्वनिष्ठविषयताकविषयतावत्त्वस्वजन्यप्रतिपत्तीयस्वार्थान्वयन्वयकर्मकक्रियाकर्तृत्वनिष्ठविषयतानिष्ठस्वोच्चारणप्रयोजकवक्तृतात्पर्योभयविषयताऽऽश्रयवृत्तित्ववत्त्वोभयसम्बन्धेनेति नव्याः।

द्वितीयाऽर्थकर्मत्वविषयतायामाधेयतासम्बन्धेन घटस्यान्वयेन पारतन्त्र्येण स्वाश्रयपर्याप्तिमद्वृत्तित्वसम्बन्धेन घटत्वस्याप्यत्रान्वयोऽभ्युपेयते, स्वाश्रयत्वञ्च–स्वसमानकालीनतत्पुरुषीयज्ञानविषयत्वसम्बन्धेनातो नानुपपत्तिरिति कश्चित्।

वस्तुतस्तु सर्वं घटं वेत्तीत्यादौ ज्ञानादौ तत्कालीनतत्पुरुषीयज्ञानविषयताप्रतियोगिकस्वरूपसम्बन्धेन घटकर्मत्वस्यान्वयोपगम आवश्यकः, अन्यथा ज्ञानत्वावच्छेदेन घटविषयित्वस्य बाधेन तदवच्छेदेनान्वयोपगमासम्भवाद्, ज्ञानत्वसामानाधिकरण्येनान्वयोपगमावश्यकत्वे तदानीमयं घटं न वेत्तीत्यादिप्रयोगापत्तेः, तदानीं पुरुषान्तरे घटज्ञानसत्त्वेन ज्ञानत्वावच्छेदेन घटविषयित्वाभावस्याप्यन्वयासम्भवात्, तथा च स्वार्थान्वयन्वयिताऽवच्छेदकसंसर्गताऽवच्छेदकव्याप्यत्वं पर्याप्तौ, अनुगमकं वक्तृतात्पर्यविषयत्वेन सम्भवज्ज्ञानकमपि बोध्यम्।

सर्वं वेत्तीश्वर इत्यादौ वस्त्वादिपदाध्यारं विना प्रतिपादकत्वे सामान्यतोऽन्योन्याभावप्रतियोगिताऽनवच्छेदकत्वे सति ज्ञानविषयत्वव्याप्यपर्याप्तिकयावत्त्वमपि प्रवृत्तिनिमित्तं सर्वपदस्यावश्यकमिति।

न चाव्यासज्यवृत्तिगुणत्वादिपर्याप्तेरपि रूपत्वादिव्यापकतया गुणत्वादिसाधारणरूपत्वादिव्यापकपर्याप्तिकधर्मावच्छिन्नाभावो न घटादाविति कथमत्र योग्यतेति वाच्यम्?

अव्यासज्यवृत्तिगुणत्वादेरेकैकवृत्तिधर्मावच्छिन्नपर्याप्तिकूटस्यैव सर्वाणि रूपाणि गुणा इति प्रतीत्याऽवगाहनात्, सर्वसाधारणैकपर्याप्तौ मानाभावात्, प्रत्येकवृत्तिधर्मावच्छिन्नपर्याप्तिषु रूपत्वादेर्निरुक्तव्यापकत्वाभावात् सर्वं द्रव्यं न रूपवदित्यादौ द्रव्यत्वादिव्यापकयावत्त्वसामानाधिकरण्यमभावस्य प्रतीयतेऽतो नायोग्यता।

अनुयोगिविशेषणावच्छेदेनैव नञाऽभाव: प्रत्यायते–द्रव्यं न रूपवदित्यादिप्रयोगादर्शनादिति कथमेतदुपपद्यतामिति तु नाशङ्कनीयम्?

व्यासज्यवृत्तिधर्माविशेषितानुयोगिकाभावबोधे तथा नियमोपगमात्।

यत्तु स्वरूपसम्बन्धात्मकमभावानुयोगिताऽवच्छेदकत्वमनुयोगिविशेषणे नञ्पदजन्याभावप्रतीत्या गृह्यते।

द्रव्यत्वादौ न तादृशं रूपवद्भेदाद्यनुयोगिताऽवच्छेदकत्वमतो न द्रव्यं न रूपव-

---

नञ्समभिव्याहारस्थले पूर्वोक्तव्युत्पत्त्याऽनिर्वाहाद् व्युत्पत्यन्तरमाह–अत्र न सर्वाणीति।

कथमत्र योग्यतेति।

ननु रूपत्वव्यापकपर्याप्तिकत्वस्य रूपमात्रगततया यावत्त्वे सत्त्वेन तदवच्छिन्नाभावमादाय तादृशप्रतीत्युपपत्तौ कथमत्र योग्यतेति शङ्कनमयुक्तमिति वाच्यम्?

वृत्तिमत्त्वव्यापकपदार्थगतयावत्त्वाच्छिन्नाभावमादाय काले न सर्वधर्मा इति प्रतीत्यापत्तिवारणाय स्वार्थान्वयिताऽवच्छेदकव्यापकयावत्त्वत्वावच्छिन्नप्रतियोगिताकसामान्याभावस्य नञा बोधावश्यकत्वेन तत्र तादृशसामान्याभावासत्त्वेन योग्यताविरहात्।

पर्याप्तिकूटस्यैवेति। तादृशपर्याप्तित्वेनेति शेष:। अवगाहनादिति। विधेयताऽवच्छेदकताऽऽत्मकसंसर्गतयेति भाव:। निरुक्तेति। अन्योन्याभावघटितेत्यर्थ:। अत इति। द्रव्यत्वव्यापकयावत्त्वसामानाधिकरण्यावगाहनादित्यर्थ:, तद्व्यापकत्वघटितावच्छेद्यत्वावगाहने त्वयोग्यता स्यादिति भाव:। तथा नियमोपगमादिति। अनुयोगिताऽवच्छेदकावच्छेद्यत्वावगाहननियमोपगमादित्यर्थ:। तादृशमिति। स्वरूपसम्बन्धरूपमतिप्रसक्तत्वेन तदसम्भवादिति भाव:।

दित्यादयः प्रयोगाः, व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावाभ्युपगमेन च सर्वं द्रव्यं न रूपवदित्यादिप्रयोगा उपपादनीयाः।

न च व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावाभ्युपगमे कस्यापि रूपादेः सर्वघटादिपर्याप्तिर्नास्तीति सर्वघटत्वाद्यवच्छिन्नेऽपि रूपादिमद्भेदसत्त्वेन सर्वे घटा न रूपवन्त इत्यादिप्रयोगापत्तिरिति वाच्यम्?

रूपादिपर्याप्तित्वेनानुगतपर्याप्तीनामनतिप्रसक्तेन घटादिनिष्ठयावत्त्वादिनाऽप्यवच्छेदात्, तदवच्छेदेन रूपादिमद्भेदवृत्तौ विरोधाद्, द्रव्यत्वादिव्यापक- यावत्वस्य चातिप्रसक्ततया रूपादिपर्याप्तित्वावच्छिन्नानामप्यनवच्छेदकतया तदवच्छेदेन रूपादिमद्भेदवृत्तावविरोधादिति।

तदसद्–उक्तरीत्योपपत्तौ प्रतियोगिताऽवच्छेदकादिमति तच्छून्यसाधारणव्यासज्यवृत्तिधर्मावच्छेदेनान्योन्याभावादिवृत्तौ मानाभावात्, तादृशाभावोपगमे प्रतिबन्धकसमवहितेऽपि देशे व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकप्रतिबन्धकाभावबलात् कार्यापत्तेः, तत्र कारणताऽवच्छेदककोटौ विशेषणान्तरं प्रक्षिप्यापत्तिवारणे तु गौरवाद्।

अथ सर्वं द्रव्यं न रूपवदित्यादौ द्रव्यत्वादिव्यापकपर्य्याप्तौ विधेयीभूतरूपवद्भेदव्याप्यत्वस्य बाधितत्वादयोग्यत्वं दुर्वारमेवेति चेद्?

व्यासज्यवृत्तिधर्मस्याभावानुयोगिताऽवच्छेदकत्वेऽतिप्रसक्तत्वं न बाधकं, सर्वं द्रव्यं न नित्यमित्यादिप्रयोगदर्शनादित्यत आह–व्यासज्यवृत्तीति। नास्तीति। तथा च घटनिष्ठयावत्त्वस्य रूपपर्याप्त्यनुयोगिताऽवच्छेदकत्वं न सम्भवतीति भावः।

यत्तुमतं दूषयति–तदसदिति। उक्तरीत्येति। सर्वत्वसामानाधिकरण्यमात्रभानेनैवेत्यर्थः। प्रतिबन्धकसमवहिते=दाहादिप्रतिबन्धकमण्यादिविशिष्टे। व्यासज्यवृत्तीति। तदधिकरणतदनधिकरणगतयावत्त्वावच्छेदेनेति भावः। विशेषणान्तरं=व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकत्वाभावादिरूपमित्यर्थः।

गौरवादिति। अतिरिक्ताभावकल्पनेन गुरुधर्मस्य कारणताऽवच्छेदकत्वेन चेत्यर्थः, खण्डश इत्यादि स्वार्थान्वयिताऽवच्छेदकव्यापकत्वे स्वार्थान्वयितावच्छेदकावच्छिन्नान्वयिताऽवच्छेदकावच्छिन्नव्याप्यत्वे पर्याप्तिप्रतियोगियावत्त्वावच्छिन्ने च पृथक्शक्तिस्वीकारेणेत्यर्थः, व्युत्पत्तिवैचित्र्याच्च पृथक् शक्त्युपस्थापितस्य स्वार्थान्वयिताऽवच्छेदकव्यापकत्वस्य तादृशव्याप्यत्वस्य च, शक्यताऽवच्छेदकैकदेशे पर्याप्तावन्वय उपगम्यते, भावान्वयस्थले च शक्यत्रयस्यैव विशेष्यविशेषणभावेनान्वयबोधसामग्रीणां परस्परं सहकारित्वोपगमाद् नैकं परित्यज्यापरस्य

न–तत्र विधेयव्याप्यत्वभानानुपगमात्, खण्डशो विभिन्नशक्त्युपगमेन क्वचित्तदंशपरित्यागे विरोधविरहात्।

सर्वं गगनमित्यादिप्रयोगाभावाद् यावत्त्ववदनेकत्वमपि सर्वपदार्थः।

तच्च स्वार्थाभेदान्वयोद्देश्यताऽवच्छेदकसमानाधिकरणभेदप्रतियोगित्वमेव।

भेदश्च सामानाधिकरण्यनिरूपकत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यो ग्राह्यो नातो द्वित्वाद्यवच्छिन्नभेदमादायातिप्रसङ्गः।

एतादृशोभयधर्मावच्छिन्ने शक्तिरेकैवातो नैकधर्मं परित्यज्यापरमादाय बोधः कदाचिदपीति न कतिपयानेकतात्पर्येणाशेषैकतात्पर्येण वा सर्वपदं प्रयुज्यते।

चैत्रो दधि भुङ्क्ते, मैत्रः पयो भुङ्क्ते, देवदत्तो घृतं भुङ्क्ते, विष्णुमित्रः सर्वमेवेत्यादौ

बोधः, तथा च सर्वं द्रव्यं रूपवदित्यादयो न प्रयोगाः, नञर्थविधेयस्थले च स्वार्थान्वयिताऽवच्छेदकधर्मावच्छिन्नव्याप्यत्वान्वयबोधे सामग्र्यपेक्षत्वं न कल्प्यते, अत एकं परित्यज्यापरान्वयबोधेऽपि न क्षतिः।

सर्वपदार्थ इति। सर्वपदप्रवृत्तिनिमित्तमित्यर्थः।

ननु गगने यावत्त्वस्यापर्याप्तत्वात् तादृशयावत्त्वावच्छिन्ने शक्त्यैव तादृशप्रयोगापत्तिविरहेण कुतः शक्त्यन्तरं कल्पनीयमिति चेद्?

न–घटादिगगनगतयावत्त्वमादाय तादृशप्रयोगापत्तेर्दुर्वारत्वात्, समुदायस्य प्रत्येकानतिरिक्तत्वेनैकस्यापि यावत्वाधिकरणत्वाच्च।

ननु सर्वपदस्यानेकत्वावच्छिन्ने शक्त्यन्तरस्वीकारे तदर्थमादाय सर्वं द्रव्यं, रूपवदित्यादिप्रयोगस्य स्वार्थान्वयिताऽवच्छेदकेत्याद्युक्तशक्यार्थमादाय सर्वं गगनं द्रव्यमित्यादिप्रयोगस्य चापत्तिर्दुर्वारैवेत्यत आह–एतादृशोभयेति।

शक्तिरेकैवेति। पुष्पवन्तपदरीत्या ज्ञेयः, शाब्दबोधोऽपि सर्वे घटा रूपवन्त इत्यादौ घटत्वव्यापकरूपव्याप्यपर्याप्तिकयावत्त्वावच्छिन्नघटत्वसमानाधिकरणप्रतियोगिताविशिष्टान्यभेदप्रतियोगित्वावच्छिन्नाभिन्नाघटा रूपवन्त इत्याद्याकारकः।

सर्वपदस्य व्युत्पत्त्यन्तरमाह–चैत्र इत्यादि। पदान्तरोपस्थाप्यार्थ इति। पदान्तरम् अम्पदादि, कर्मतासम्बन्धेन प्रकृत्यर्थस्यान्वयवादिमते भुजादिधातोस्तदुपस्थाप्यार्थे कर्मत्वादौ स्वार्थान्वयः, स्वार्थान्वयितया स्वघटितवाक्यजन्यप्रतिपत्तिविषयत्वेन वक्तृतात्पर्यविषयताऽवच्छेदको यो धर्म

सर्वपदेन प्रत्येकं दधिपयोघृतानां भोजनकर्मतया प्रतिपादनाद्, यद्रूपावच्छिन्ने पदान्तरोपस्थाप्यार्थे स्वार्थान्वय; तद्रूपावच्छिन्नान्विततया यद्यद्धर्मावच्छिन्ना उपक्रान्ताः प्रत्येकं तावद्धर्मावच्छिन्नेषु सर्वपदस्य शक्त्यन्तरमङ्गीकार्यमुपक्रान्तैकधर्मावच्छिन्नान्वययोग्यताविरहे वाक्यस्याप्रामाण्यात्तादृशस्थले तथाविधसकलधर्माणामेवान्वयिताऽवच्छेदकतया भाननियमः।

तन्निर्वाहिका च तथाविधयावद्धर्मप्रकारकं बोधं जनयतु सर्वपदमित्याकारकसङ्केतरूपा विलक्षणशक्तिरेव, तादृशशक्तिज्ञानेनैकधर्मप्रकारकबोधजननेऽपरापरतथाविधधर्मप्रकारकबोधसामग्र्याः पुष्पवन्तपदशक्तिज्ञानेन चन्द्रत्वसूर्यत्वयोरेकतरप्रकारकबोधजननेऽपरप्रकारकबोधसामग्र्या इव प्रयोजकत्वोमगमात्।

इति लाभः।

सामान्यतो विषयतानिवेशाच्चैत्रेण दधि मैत्रेण दुग्धं देवदत्तेन पयो भुज्यते, विष्णुमित्रेण सर्वम् इत्यादेरपि संग्रहः, चैत्रेण दधि मैत्रेण पयो भुज्यते विष्णुमित्रः सर्वं भुङ्क्ते इत्यादयस्तु न प्रमाणं, तद्रूपावच्छिन्नान्विततया तद्रूपावच्छिन्नविषयतानिरूपितविषयता तृतीयार्थोऽभेदः, तस्य चोपक्रान्तपदार्थैकदेशे विषयतायामन्वयः।

एतच्चोपक्रान्तस्य चैत्रादेः सर्वपदस्य शक्यत्ववारणाय दत्तम्। उपक्रान्ता इति। पूर्वकालोच्चरितवाक्यजन्यप्रतिपत्तिविषया इत्यर्थः। तथाविधयावद्धर्मेति। दधित्वप्रकारताकविशेष्यताकं पयस्त्वप्रकारताकविशेष्यताकं घृतत्वप्रकारताकविशेष्यताकं बोधमित्यर्थः, सङ्केते दधित्वप्रकारताकविशेष्यत्वादेः "खले कपोतन्यायेन" युगपद्भानं; तथा च दध्यादिविषयकसमूहालम्बनबोध एव सङ्केतविषयः, अतस्तादृशवाक्यजन्यबोधोऽपि समूहालम्बनरूपः अत एवाग्रे वाक्यभेदकथनमपि सङ्गच्छते। विलक्षणेति। वैलक्षण्यञ्च– हर्यादिपदस्य नानाशक्तिमपेक्ष्य; तादृशनानाविशेष्यतानिष्ठनानाप्रकारताकैकविशेष्यताशालित्वम्, एवञ्च विशेष्यताया ऐक्येन शक्तेरैक्यम्।

ननु दधित्वादितत्तद्धर्मप्रकारकं बोधं जनयत्वित्याद्याकारकसङ्केतस्य शक्तित्वे; चैत्रो व्याकरणं, मैत्रः शिक्षां, देवदत्तो वेदमधीते, विष्णुमित्रः सर्वमित्यादेरसङ्ग्रहः, तत्रानुचितशक्त्यन्तरकल्पने शक्तिभेदापत्तेः इष्टापत्तौ च यद्रूपावच्छिन्ने पदान्तरोपस्थाप्यार्थ इत्याद्यनुगतबोधकवाक्याभिधानस्यानुचिततया वैयर्थ्यापत्तिरिति चेद्?

न–सर्वपदविशिष्टविषयताऽवच्छेदकयावद्धर्मविशिष्टबोधं जनयत्वित्याकारक एव तात्पर्याद्।

न च प्रक्रान्तानां दध्यादीनां प्रत्येकमन्वये वाक्यभेदापत्त्या साहित्यप्रकारेण तावत्पदार्थवाचकत्वमेव सर्वपदस्य किन्नोपेयत इति वाच्यम्?

साहित्यविशिष्टान्वयस्य समभिव्याहृतपदार्थे यत्र बाधस्तत्रापि तथा प्रयोगात्, वाक्यभेदस्य गत्यन्तरविरहेणेष्टत्वाद्, अत एव प्रत्येकं पुत्रपश्वादिरूपफल-कामकर्त्तव्यतया; यज्ञक्रतूनभिधायाभिहितेन सर्वेभ्यो दर्शपूर्णमासावित्यनेन मिलितानां तावत्फलानां दर्शपूर्णमासकर्त्तव्यताप्रयोजककामनाविषयत्वं न प्रतिपाद्यते, प्रकृतवाचिना

विषयातायां सर्वपदवैशिष्ट्यञ्च—स्वार्थान्वयितया स्वजन्यप्रतिपत्तिविषयत्वेन वक्तृतात्पर्यविषयताऽवच्छेदकावच्छिन्नविषयतानिरूपकत्त्वस्वोच्चारणप्रयोजकवाक्यजन्यबोधीयत्वो-भयसम्बन्धेन, स्वपदं सर्वपदपरम्।

यावद्धर्मवैशिष्ट्यञ्च—स्वनिष्ठप्रकारताकविशेष्यताकत्वसम्बन्धेन चैत्रो दधि भुङ्क्त इत्यादिवाक्यप्रयोजकत्वस्यानुभवसिद्धत्वान्न तादृशसम्बन्धाप्रसिद्धिः, तादृशयावत्त्वं शक्यताऽव-च्छेदक उपलक्षणतया निविष्टमतो न तदंशमन्तर्भाव्य शाब्दबोधः।

प्रयोजकत्वोपगमादिति। यादृशधर्मावच्छिन्नत्यागादिबोधकपदसमभिव्याहरः सर्वपदे तत्र तद्धर्मावच्छिन्नबोधकसामग्र्यपेक्षत्वं न कल्प्यते, अतो विष्णुमैत्रो दधि विहाय सर्वमेवेत्यादौ नानुपपत्तिः, साहित्यं धीविशेषविषयत्वम्; अतिरिक्तपदार्थ इति मतविशेषः।

गत्यन्तरविरहेति। न च धवखदिरपलाशांश्छिनत्तीत्यादौ धवकर्मकच्छेदनस्य खदिरा-दिकर्मकच्छेदनस्य भिन्नत्वेनैकस्मिन् भेदे खदिरादिसमुदायकर्मत्वस्य बाधेनान्वयासम्भवात्; तत्तत्कर्मकच्छेदनकर्त्तृत्वस्य पृथक्पृथगन्वयेन वाक्यभेदापत्तिमाशङ्क्य; छेदनत्वावच्छिन्ने प्रत्येक-कर्मत्वस्यान्वयेन तत्र प्रत्येककर्मत्वनिष्ठप्रकारताकविशेष्यताया भेदेऽपि तादृशतादृशविशेष्य-ताऽवच्छेदकतानां परस्परावच्छेद्यावच्छेदकभावमङ्गीकृत्य; व्युत्पत्तिवादादौ स्वयं वाक्यभेदं परिजहार; तद्वदत्रापि भोजनत्वाद्यवच्छिन्ने दध्यादिकर्मत्वस्यान्वयेनैकवाक्यत्वसम्भवे कुतो गत्यन्तरविरह इति वाच्यम्?

अत्र कथञ्चिदेकवाक्यतासम्भवेऽपि सर्वेभ्य इत्यत्रैकवाक्यत्वस्याङ्गीकर्त्तुमशक्यत्वात् तेन प्रत्येकं पश्वादिकामनाविशिष्टे कर्त्तृत्वस्यैव प्रतिपादनाद्, यज्ञः ससोमकः, क्रतुरसोमकोऽतो यज्ञक्रतूनिति, योगसिद्ध्यधिकरणेति। सर्वेभ्य इत्यत्र ल्यब्लोपे पञ्चमी, निमित्तार्थकचतुर्थी वा तथा च सर्वाणि पश्वादिचतुर्दशफलान्युद्दिश्य दर्शपौर्णमासौ यागौ कुर्यादित्यर्थः, अत्रैकदैव पश्वादिसमुदायविषयककामनया तादृशयागाद्यनुष्ठाने कथं न फलसिद्धिरिति संशये; सिद्धान्तसूत्रं—"योगसिद्धिर्वाऽर्थस्योत्पत्त्ययोगादि"ति, वाशब्दः सिद्धान्तसूचकः। अर्थस्य=पश्वा-दिफलस्य। योगेन=प्रयोगभेदेन। सिद्धिः=उत्पत्तिः। उत्पत्त्ययोगाद्=उत्पत्तौ सर्वेभ्य इति

सर्वनामपदेन मिलितत्वेन फलानुस्थापनाद्, अपि तु प्रत्येकमेवेति, प्रत्येकफलकामस्यैव तत्राधिकार इति योगसिद्ध्यधिकरणसिद्धान्तोऽपि सङ्गच्छते।

किम्पदस्य जिज्ञासिते शक्तिः, अत एव स्वीयजिज्ञासाज्ञापनाय किंपदघटितं प्रश्नवाक्यं प्रयुज्यते।

तत्रोद्देश्यवाचककिंपदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकधर्मावच्छिन्नविधेयतानिरूपितोद्देश्यताऽवच्छेदकत्वेन वक्तृजिज्ञासितो धर्मः प्रवृत्तिनिमित्तम्, उपस्थाप्यताऽवच्छेदकत्वान्तमुपलक्षणतयाऽनुगमकं, शाब्दबोधे तदभानात्।

एवञ्च कः पचतीत्यादितः पाककृतित्वावच्छिन्नविधेयतानिरूपितोद्देश्यताऽवच्छेदकत्वेन वक्तृजिज्ञासितो यो धर्मस्तद्वान् पचतीत्याकारकोऽन्वयबोधः, किञ्चिद्धर्मावच्छिन्नोद्देश्यकपाककर्तृत्वविधेयकज्ञानं भवत्वित्याकारकजिज्ञासायास्तादृशबोधविषयकतया तादृशेच्छाविषयीभूतज्ञानजनकाद् ब्राह्मणः पचतीत्युत्तरवाक्यात्तन्निवृत्तिरिति तादृशप्रश्नानन्तरं तथैवोत्तरं प्रयुज्यते।

विधिवाक्येऽयोगात्। साहित्याभावात्=साहित्याप्रतिपादनादिति यावत्। योगः=साहित्यम्।

ननु सर्वेभ्य इति विधिवाक्येन कामनाया फलान्तराविषयकत्वाप्रतिपादनात् कथं समुचितफलकामनया तादृशयागाचरणं न फलसाधकमिति चेद्?

न—पुत्रकामो दर्शपौर्णमासौ कुर्यादित्यादिवाक्येन पुत्रकामनाऽऽदिविशिष्टे तादृशयागकृतेरन्वयेन विशिष्टबोधमर्यादया तादृशकृतौ पारतन्त्र्येण पुत्रकामनाया जन्यत्वसम्बन्धेन पुत्रविषयकत्वस्य च स्वप्रयोज्यत्वस्वेतराविषयत्वाप्रयोज्यत्वोभयसम्बन्धेनान्वयोपगमाद्, अन्यथा यागमात्रस्यैव नानाविधफलकामनयाऽऽचरणे नानाविधफलजनकत्वापत्तेरित्यलं विस्तरेण।

इति सर्वशब्दशक्तिविचारटीका

अत एवेति। जिज्ञासायाः किम्पदप्रवृत्तिनिमित्तत्वावच्छेदकत्वादेवेत्यर्थः। स्वसमभिव्याहृतेति। स्वं किम्पदं। समभिव्याहृतत्वं=स्वजन्यप्रतिपत्तिजनकत्वं। पदोपस्थाप्येति। पदोस्थाप्यत्वञ्च—पदप्रतिपाद्यत्वं; तेन पाककृतित्वावच्छिन्नस्य केनापि पदेनोपस्थित्यसम्भवेऽपि न क्षतिः। अवच्छेदकत्वेनेति। अत्र तृतीयाऽर्थो विषयत्वं; तस्य च निरूपितत्वसम्बन्धेन जिज्ञासित इत्यत्र क्तप्रत्ययार्थे ज्ञानकर्मत्वरूपविषयत्वेऽन्वयः, यस्य च शक्तौ शाब्दबोधीयप्रकारतया भानं तस्यैव तत्र विशेषणत्वं शाब्दबोधेऽपि तस्यैव प्रकारतयाऽवगाहनमित्यत आह—शाब्दबोध इति।

अन्वयबोध इति। स्वविषयज्ञानीयपाककृतित्वावच्छिन्नविधेयताकोद्देश्यताऽवच्छेद-

न चैवं प्रमेयः पचतीत्युत्तरवाक्यमेव न कथं तादृशप्रश्नानन्तरं प्रयुज्यते; तज्जन्यज्ञानस्यापि तादृशेच्छाविषयत्वादिति वाच्यम्?

जिज्ञासाविषयीभूतविधेयन्यूनवृत्तिधर्मावच्छिन्न एव तादृशकिंपदस्य शक्त्युपगमाद्, अभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्तरसमभिव्याहृतकिंपदशक्यताऽवच्छेदकगर्भे च स्वार्थाभेदान्वयिताऽवच्छेदकत्वोपलक्षितधर्मन्यूनवृत्तित्वमपि धर्मांशे विशेषणं देयम्, अतः को ब्राह्मणः पचतीत्यादिप्रश्नानन्तरं चैत्रः पचतीत्याद्याकारकमुत्तरवाक्यं प्रयुज्यते, न तु मनुष्यः पचतीत्यादिकं, मनुष्यत्वादेर्ब्राह्मणत्वाद्यन्यूनवृत्तित्वात्, तदवच्छिन्नोद्देश्यकत्वेन ज्ञानविषयकेच्छायास्तत्राप्रतीतेः।

एवं यत्रोद्देश्यताऽवच्छेदके किंपदार्थस्याभेदेनान्वयस्तत्र तदन्वयिताऽवच्छेदकावच्छिन्ने विशेषणताऽऽपन्नतदन्वयिताऽऽवच्छेदकधर्मन्यूनवृत्तिधर्मावच्छिन्नो-

---

कत्वविषयतानिरूपिता या वक्तृज्ञानेच्छीयविषयता तद्वत्त्वान् पाककृतिमानित्यन्वबोध इत्यर्थः। न्यूनवृत्तीति। तत्त्वञ्च–विधेयसमानाधिकरणभेदप्रतियोगिताऽवच्छेदकत्वे सति तत्सामानाधिकरण्यं, न तु तद्व्याप्यत्वं, तेन कः पचतीति प्रश्नानन्तरं श्यामः पचतीत्युत्तरवाक्यमपि सङ्गच्छते, तादृशोत्तरवाक्यस्याप्रामाण्ये व्याप्यत्वमेव तदिति ध्येयम्। तादृशकिम्पदस्येति। उद्देश्यवाचककिम्पदस्येत्यर्थः। न्यूनवृत्तित्वमपीति। अपिना स्वसमभिव्याहृतप्रतिपाद्यताऽवच्छेदकावच्छिन्नविधेयताकोद्देश्यतानिरूपिताभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितत्वं समुच्चीयते, तथा च स्वार्थान्वयिताऽवच्छेदकत्वोपलक्षितधर्मन्यूनवृत्तित्वे सति तादृशावच्छेदकत्वेन जिज्ञासितो धर्मोऽभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्तरसमभिव्याहृतकिम्पदस्य प्रवृत्तिनिमित्तं, जायते च को ब्राह्मणः पचतीत्यादिना पाककृतित्वावच्छिन्नविधेयताकोद्देश्यतानिरूपिताभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितो ब्राह्मणत्वन्यूनवृत्तिश्च योधर्मस्तद्वदभिन्नो ब्राह्मणः पाककृतिमानित्याद्यन्वयबोधः।

प्रयुज्यते च को ब्राह्मणः पचतीति वाक्यं ब्राह्मणत्वन्यूनवृत्तिकिञ्चिद्धर्मावच्छिन्नाभेदसम्बन्धावच्छिन्नावच्छेदकताकब्राह्मणत्वावच्छिन्नोद्देश्यतानिरूपितपाककृतित्वावच्छिन्नविधेयताशालिज्ञानं भवत्वितीच्छाज्ञापनाय।

तत्रेति। तादृशवाक्य इत्यर्थः, सप्तम्यर्थो घटकत्वं, तस्य चोत्तरस्थकिमितिशब्देनान्वयः। तदन्वयिताऽवच्छेदकावच्छिन्ने=किम्पदार्थान्वयिताऽवच्छेदकावच्छिन्ने विशेषणताऽऽपन्नो यस्तदन्वयिताऽवच्छेदकधर्मन्यूनवृत्तिधर्म इत्यन्वयः।

बोध्यत इति। शक्यताऽवच्छेदकघटकतयेति भावः, तथा चाभेदेन स्वार्थान्वयिताऽवच्छेद-

द्देश्यताऽवच्छेदकताकप्रकृतविधेयज्ञानगोचरेच्छा किंपदेन बोध्यते, अतः कति घटाः सन्तीत्यादौ डतिप्रत्ययार्थसंख्याऽऽदौ किंपदार्थस्य जिज्ञासितधर्मावच्छिन्नस्याभेदे-नान्वयात्, संख्यात्वन्यूनवृत्तिदशत्वत्वाद्यवच्छिन्नोद्देश्यताऽवच्छेदकताकबोधजनकं दशत्वसंख्यका घटाः सन्तीत्याद्युत्तरं प्रयुज्यते।

यत्र चोद्देश्यताऽवच्छेदकीभूतविभक्त्याद्यर्थे भेदेन किंपदार्थान्वयः कस्य पुत्रः सुन्दरः इत्यादौ; तत्र यादृशसम्बन्धेन यदवच्छिन्ने तदन्वयस्तत्र तादृशसम्बन्धेन विशेषधर्मावच्छिन्नविशेषिततदवच्छिन्ननिष्ठोद्देश्यताऽवच्छेदकताकप्रकृतविधेयज्ञा-नगोचरेच्छा प्रतीयते।

कधर्मन्यूनवृत्तित्वे सति स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकधर्मावच्छिन्नविधेयताकोद्देश्यता-निरूपितस्वार्थान्वयिताऽवच्छेदकावच्छिन्नावच्छेदकतानिरूपिताभेदसम्बन्धावच्छिन्नावच्छेदकताऽ-वच्छेदकत्वेन वक्तृजिज्ञासितो धर्म उद्देश्यताऽवच्छेदकेऽभेदेनान्वयिस्वार्थककिम्पदस्य शक्यताऽवच्छेदकम्। कति घटा इत्यादि। एतद्देशवृत्तितात्वावच्छिन्नविधेयतोद्देश्यतानिरूपितपर्याप्ति-सम्बन्धावच्छिन्नसंख्यात्वावच्छिन्नावच्छेदकतानिरूपिताभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेद-कत्वेन वक्तृजिज्ञासितधर्मवदभिन्नसङ्ख्यावन्तो घटा एतद्देशवृत्तय इत्यन्वयबोधस्तत्रेति यावद्। दशत्वसंख्यका इति।

ननु डतिप्रत्ययस्य संख्यावाचकत्वे तस्या घटादौ पर्याप्तिसम्बन्धेन कति घटाः सन्तीत्यादिप्रश्नवाक्येन जनितबोधे प्रकारतया भानमुपगन्तव्यं; दशत्वसंख्यका इत्याद्युत्तरवाक्येन जनितबोधे च दशत्वसंख्याविशिष्टस्याभेदो घटादौ भासते, एवञ्च जिज्ञासाविषयज्ञानं न तादृशवाक्येन जन्यत इति चेद्?

न–यतो दशत्वसंख्यका इत्याद्युत्तरवाक्यजज्ञानानन्तरं मनसैव तादृशज्ञानजननात्तन्निवृत्तिः।

अथ वा डतिप्रत्ययस्य सङ्ख्याविशिष्ट एव शक्तिः, डतिप्रत्ययार्थसङ्ख्याऽऽदावित्यत्रार्थशब्दस्य च प्रवृत्तिनिमित्तपरत्वम् अतो नानुपपत्तिः, अत एव दश घटाः सन्तीत्यादिवाक्यादपि तादृशजि-ज्ञासानिवृत्तिर्दृश्यते, अत्र दशसङ्ख्यका इत्यपि पाठः क्वचित्, स च दशपदस्य दशत्वपरतयो-पपादनीय इति।

यदवच्छिन्न इति। षष्ठ्याद्यर्थसम्बन्धत्वाद्यवच्छिन्न इत्यर्थः। तदन्वयः=किंपदार्थान्वयः। तादृशसम्बन्धेनेत्यस्य विशेषितेत्यनेनान्वयः विशेषेति। किम्पदार्थान्वय्यन्वय्यनुयोगिककिम्पद-समभिव्याहृतविभक्त्यर्थसम्बन्धे प्रतियोगित्वव्याप्यत्वं तत्त्वम्। प्रतीयत इति। शक्यताऽवच्छेद-कघटकतयेति भावः, तथा च सुन्दरत्वावच्छिन्नविधेयताकपुत्रत्वावच्छिन्नोद्देश्यताऽवच्छेद-कतानिरूपितसम्बन्धत्वावच्छिन्नावच्छेदकतानिरूपितसम्बन्धत्वावच्छिन्नावच्छेदकताकनिरूपित-

एवं विधेयवाचककिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयताऽऽवच्छेदकतया जिज्ञासितो यो विशेषधर्मस्तदवच्छिन्ने शक्तिः।

अयं कः इत्यादाविदन्त्वावच्छिन्नांशे विधेयताऽवच्छेदकत्वेन जिज्ञासितधर्मवानित्याकारको बोधः, तेन तद्विषयकजिज्ञासाविषयीभूतज्ञानजनकश्चायं ब्राह्मणइत्याद्युत्तरवाक्यं तादृशप्रश्नानन्तरं प्रयुज्यते।

त्वसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितपुत्रानुयोगिकसम्बन्धप्रतियोगित्वव्याप्यधर्मावच्छिन्ननिरूपितसम्बन्धवत्पुत्रः सुन्दराभिन्न इत्यन्वयबोधः, इच्छा च पुत्रनिष्ठसम्बन्धप्रतियोगित्वव्याप्यकिञ्चिद्धर्मावच्छिसम्बन्धवत्पुत्रत्वावच्छिन्नोद्देश्यताकसुन्दरत्वावच्छिन्नविधेयताशालिज्ञानं भवत्वित्याकारिका।

प्रवृत्तिनिमितञ्च–उद्देश्यतावच्छेदकविभक्त्यर्थेन भेदान्वयिकिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकावच्छिन्नविधेयताकोद्देश्यताकभेदसम्बन्धावच्छिन्नावच्छेदकताकभेदसम्बन्धावच्छिन्नावच्छेदकत्वेन वक्तृजिज्ञासितो यः स्वार्थान्वय्यनुयोगिकस्वसमभिव्याहृतविभक्त्यर्थसम्बन्धप्रतियोगित्वव्याप्तो धर्मः स इति।

विशेषधर्म इति। अत्र विशेषत्वं तादृशोद्देश्यताकविधेयताऽवच्छेदकत्वेन वक्तृज्ञानविषयत्वं, तच्च प्रकरणादिना ज्ञायते।

एवञ्चायं क इति प्रश्नस्य यदेदन्त्वावच्छिन्ने प्राणित्वादिना विधेयस्य वक्तृज्ञानमस्ति, न तु मनुष्यत्वादिनेति प्रकरणादिना निश्चीयते; तदाऽयं मनुष्य इत्याद्युत्तरं, यदा तु मनुष्यत्वेन ज्ञानमस्ति न तु ब्राह्मणत्वादिना तदाऽयं ब्राह्मण इत्युत्तरं प्रयुज्यते।

यत्तु–स्वसमभिव्याहृतपदोपस्थाप्यताऽच्छेदकीभूतावच्छेदकन्यूनवृत्तित्वं विशेषत्वम्, इदन्त्वस्य च ब्राह्मणभिन्नसाधारणतया सामान्यधर्मत्त्वञ्चेति कथनम्।

तत्तुच्छम्–इदन्त्वस्याननुगतत्वाद्, अन्यथेदन्त्वस्य कथञ्चिदनुगतत्वेन मनुष्यत्वादिसमशीलतयाऽयं क इति प्रश्नस्य मनुष्यो ब्राह्मण इत्याद्युत्तरञ्च प्रयुञ्जीत। पूर्ववदूहनीयेति। इदं किं द्रव्यमित्यादौ विधेयवाचकपदसमानाधिकरणकिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकावच्छिन्नोद्देश्यतानिरूपितस्वार्थाभेदान्वयिताऽवच्छेदकावच्छिन्नविधेयतानिरूपिताभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितः स्वार्थान्वयिताऽवच्छेदकव्याप्यधर्मः प्रवृत्तिनिमित्तम्।

प्रतिपत्तिश्चेदन्त्वावच्छिन्नविशेष्यताकद्रव्यत्वावच्छिन्नाभेदसम्बन्धावच्छिन्नविधेयताकाभेद-

एवं यत्र विधेये विधेयताऽवच्छेदके वा किंपदार्थस्याभेदेन भेदेन वाऽन्वय:; इदं किं द्रव्यं? किं धनं? भवत: पुत्रा: कति?, भवान् कस्य पुत्र:? इत्यादौ; तत्र रीति: पूर्ववदूहनीया।

"किमिन्दु: किं पद्ममि"त्यादौ चाव्ययकिमो वाशब्दस्येव वितर्कोऽर्थ:, वितर्कश्च प्रयोक्तु: सम्भावनाऽऽत्मकज्ञानं, तदर्थस्य च विशेष्यतासम्बन्धेन प्रथमाऽन्तपदोपस्थाप्ये

सम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितद्रव्यत्वव्याप्यधर्मवदभिन्नद्रव्याभिन्नमिदमित्याकारिका, तादृशजिज्ञासाऽनन्तरश्च—इदं पृथिवी द्रव्यमित्युत्तरश्च प्रयुज्यते।

पदार्थविभाजकधर्मावच्छिन्नविशेषणबोधककिम्पदमुदाहृत्य; धनत्वादिविशेषधर्मावच्छिन्नविशेणवाचककिम्पदमुदाहरति—किं धनमिति। अत्र पूर्वस्थेदम्पदं योजनीयम्।

विधेयांशे विशेषणबोधकं किम्पदमुदाहृत्य विधेयताऽवच्छेदकांशेऽभेदसम्बन्धभेदसम्बन्धभेदेन विशेषणबोधकं किम्पदमुदाहरति—भवत: कतीत्यादि।

अत्र स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकावच्छिन्नोद्देश्यताकस्वार्थान्वय्यन्वयिताऽवच्छेदकावच्छिन्ने विधेयतानिरूपितावच्छेदकत्वेन जिज्ञासित: स्वार्थान्वयिताऽवच्छेदकन्यूनवृत्तिश्च यो धर्म: तदवच्छिन्ने तादृशकिम्पदस्य शक्तिरित्यादिरीत्या ज्ञेया सेत्यर्थ:।

किमिन्दुरित्यादि—

किमिन्दु:? किं पद्मं? किमु मुकुरबिम्बं? किमु मुखं?
किमब्जे? किं मीनौ? किमु मदनवाणौ? किमु दृशौ?।
नगौ वा? गुच्छौ वा? कनककलसौ वा? किमु कुचौ?
तडिद्वा? तारा वा? कनकलतिका वा? किमबला?॥

इति पूर्णम्।

संभावनेति। सम्भावना चात्रैकधर्मिकविरुद्धकोटिद्वयावगाहिज्ञानरूपसंशय एव न तूत्कटकोटिकज्ञानम्; अत एव काव्यप्रकाशादौ—

"अयं मार्त्तण्ड: किं? स खलु तुरगै: सप्तभिरित:
कृशानु: किं? सर्वा" इत्यादि सन्देहालङ्कारोदाहरणमपि सङ्गच्छते।

संशयत्वञ्च—प्रकारताविशिष्टप्रकारताशालिज्ञानत्वं पर्यवसितम्, प्रकारतावैशिष्ट्यञ्च—स्वतादात्म्यस्वविशिष्टप्रकारताकाभावत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारताकविशेष्यतानिरूपित्वोभयसम्बन्धेन, स्ववैशिष्ट्यञ्च—स्वावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वसम्बन्धावच्छिन्नत्वस्वावच्छे-

विशेष्ये प्रकारितासम्बन्धेन च तत्र विशेषणस्य चन्द्रादेरन्वयः, नामार्थेनाव्ययार्थस्य भेदान्वयेऽविरोधाद्।

कुत्सार्थकमपि क्वचित् किंपदं, यथा किंगौरित्यादौ।

यत्र विशेषणवाचकपदमपि प्रथमाऽन्तं तत्राभेदसम्बन्धावच्छिन्नप्रकारिता संसर्गः, यत्र च प्रकृत्यर्थविशेष्यतया स्वार्थबोधकविभक्त्यन्तं विशेषणपदं; तत्र किंपदासत्त्वे तादृशविभक्त्यन्तसमुदायार्थस्य विशेष्ये यादृशसम्बन्धेनान्वयस्तादृशसंसर्गावच्छिन्नप्रकारितैव तादृशार्थस्य किंपदार्थे संसर्गः, अतः किमिन्दुरित्यादावभेदेन चन्द्रादि-

---

दकावच्छिन्नत्वोभयसम्बन्धेन, भेदत्वञ्च—तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्।

एवं चेदमिन्दुर्न वेत्यादिसंशस्यापि संग्रहः।

प्रकारित्वावच्छिन्नप्रकारिताशालिज्ञानत्वमिति केचित्। तदर्थस्येति। किम्पदार्थस्येत्यर्थः, विशेष्य इति। अध्याहृतेदम्पदार्थे, तत्रेति। किम्पदार्थसम्भावनायामित्यर्थः, इदञ्चापाततः।

वस्तुतस्तु—किम्पदार्थताऽवच्छेदकतादृशप्रकारतायामेवाधेयत्वसम्बन्धेनेन्द्वादेरन्वयः, तेन पदार्थान्तरे संशय एव यत्रेदमिन्दुरित्यारोपात्मकः, तादृशज्ञानमादाय न किमिन्दुरित्यादिप्रयोगः।

अविरोधादिति। तथा चाव्ययातिरिक्तनामार्थयोरेव भेदान्वयो न स्वीक्रियत इति भावः।

अत्र नव्याः—अत्राव्ययपदं निपातपरं, तेन स्वराद्यव्ययस्याभेदान्वय एव किंशब्दस्य चादिगणान्तर्गतत्वेन निपातत्वादिति प्राहुः।

ननु किम्पदार्थसम्भावनायां प्रकारितासम्बन्धेनेन्द्वादेरन्वये किम्पदार्थसम्भावनायाश्चेदम्पदार्थमुखादौ विशेष्यतासम्बन्धेनान्वये च स्वीकृत इन्दुपदेदम्पदाद्योः सामानाधिकरण्यासम्भवेनेदं जलं किंनादेयमित्यादौ जलं किं नादेया इमे, घटाः किं नील इत्यादिरेव प्रयोगः स्यात्, समानाधिकरणयोरेव विशेष्यविशेषणवाचकपदयोः समानलिङ्गवचनकत्वनियमादिति चेत्?

न—समानाधिकरणविशेषणविशेष्यबोधकपदयोः समानलिङ्गवचनकत्वनियमवत् प्रकारितासम्बन्धेन यदर्थस्य किम्पदार्थादिसम्भावनायामन्वयस्तस्याश्च विशेष्यतासम्बन्धेन यदर्थेऽन्वयः तादृशपदयोरप्यसति बाधके समानवचनलिङ्गकत्वकल्पनाद्।

न च व्युत्पत्तिकल्पनमपसिद्धान्ततया हेयमिति? लोहितवह्निं जानातीत्यादावेतत्तुल्यव्युत्पत्तेः स्वयमेव कल्पितत्वाद्, एवं किमिन्दुरित्यादौ प्रकारितासम्बन्धेनेन्द्वादिविशिष्टसम्भावनाया विशेष्यतासम्बन्धेन मुखादावन्वयबलात् पारतन्त्र्येण स्वनिरूपितप्रकारित्वावच्छिन्नविशेष्यता-

प्रकारिका, धनमिदं किं चैत्रस्येत्यादावाश्रयत्वादिसम्बन्धेन चैत्रस्वत्त्वादिप्रकारिका सम्भावना नियमतः प्रतीयते, किमिन्दुरित्यादौ सम्भावनाबोधोत्तरं तत्प्रयोजकाह्लादकत्वादिसाधर्म्यप्रतीतिस्त्वर्थादिति।

कत्वसम्बन्धेनेन्द्वादेर्मुखादावन्वयाद्, अयमिन्दुर्न वा मुखश्च सुन्दरं न वेति समूहालम्बनसंशयमादाय मुख इदं किमिन्दुरिति न प्रयोगः।

ननु प्रकारितासम्बन्धेनेन्द्वादेः सम्भावनायामन्वयोपगम इदं संयोगादिसम्बन्धेनेन्दुमन्न वेत्यादिसंशयस्यापि किम्पदेन बोधः स्याद्? इष्टापत्तौ च तादृशबोधानन्तरं मुखादाविन्द्वादिसाधर्म्याप्रत्ययेन तादृशवाक्यस्य काव्यत्वहानिः, आलङ्कारिकमते तु व्यञ्जनया तत्प्रतीतिरिति ध्येयम्।

कुत्साऽर्थकमपीति। प्रवृत्तिनिमित्ततयेति भावः, कुत्सितार्थकमिति स्यादित्यतस्तादृशसंशयव्यावृत्तय आह—यत्र विशेषणेति। अर्थादितीति। तादृशबोधानन्तरं सम्बलितमानससामग्र्या इति तु यावद्, अन्यथा किंराजेत्यादौ कर्मधारयसमासानुपपत्तिः स्यात्। किं गौरिति। कुत्सितत्वञ्च—प्रकृष्टहलवहनयोग्यत्वविरहादीति।

एवं "नमस्तस्मै कस्मै चिदमिते" त्यत्र, "कोऽपि गोपतनय" इत्यत्र, "दधत्यन्तस्तत्वं किमपी"त्यादौ च किम्पदस्यानिर्वचनीयविशेषधर्मके शक्तिर्वाच्या तथा च कस्मैचिदित्यादेरनिर्वचनीयविशेषधर्मावच्छिन्नायेत्यर्थः, विशेषत्वञ्च—तत्तन्मात्रवृत्तित्वम्, अनिर्वचनीयत्वं शब्दानिर्देश्यत्वम्, अतस्तादृशधर्मस्य योगजमात्रजन्यप्रत्यक्षविषयत्वेऽपि न क्षतिः, "कश्चित् कान्ताविरहगुरुणेत्यादौ" "कोऽपि ब्राह्मणो वर्त्तते" इत्यादौ चोभयावृत्तिधर्मावच्छिन्ने शक्तिरपि किम्पदस्य वाच्या, उभयावृत्तित्वञ्च——स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वरूपोऽनुगतधर्मः प्रवृत्तिनिमित्तताऽवच्छेदकः।

एवञ्च "पार्थान्यः कः शूर" इत्यादौ,

"कः सन्नद्धे विरहविधुरां त्वयुपेक्षेत जायां—
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः"

इत्यादौ च शूरादिपदस्य, उपपूर्वेक्षादिधातोश्च विरोधसम्बन्धेन शूरादिभिन्ने, उपेक्षाऽऽद्यभावे च लक्षणा।

कल्प्यते च—तादृशकिम्पदघटितवाक्यस्यावच्छेदकावच्छेदेनान्वयोपयोगित्वं, तथा च पार्थान्याभिन्नोभयावृत्तिधर्मावच्छिन्नः शूराभिन्नइत्याद्याकारकः, पराधीनवृत्तिकजनभिन्नोभयावृत्तिधर्मावच्छिन्नो जायाकर्मकोपेक्षाभावाश्रय इत्याद्याकारकश्च बोधः, अपिशब्दसमभिव्याहृतकिम्पदस्थले च न विरुद्धे लक्षणा, न वाऽवच्छेदकावच्छेदेनान्वयोपयोगित्वञ्च कल्प्यते,

तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने यत्पदस्य शक्तिः, अत एव यत्पदेनार्थप्रत्यायने नियमतस्तत्पदापेक्षा, तत्पदसमभिव्याहारज्ञानं विनोक्तानुगमकधर्माग्रहेण शक्तिपरिच्छेदस्यैवासम्भवात्, तच्छब्दजन्यप्रतिपत्तिपूर्वमपि तत्प्रतिपाद्यतया वक्तुरभिसन्धिः प्रकरणादिना सुग्रह इति न तच्छब्दजन्यप्रतीतेर्यत्पद-शक्तिग्रहेऽपेक्षा।

इयञ्च व्युत्पत्तिः प्रक्रम्यमाणपरामर्शकयच्छब्दस्य चैत्रः समागतो यस्तत्रावलोकित इत्यादौ चैत्रादिपदेनाप्युपस्थापितस्य तस्य यच्छब्देन बोधनाद्, अत एव–

"साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिके"

कल्प्यते च सामानाधिकरण्येनैवातस्त्वदन्यः कोऽपि ददातीत्यादौ त्वद्भिन्नः कश्चिज्जनो दानकर्तृत्व-वानित्याकारकतादृशजनत्वसामानाधिकरण्येन।

एवञ्च–सामानाधिकरण्येन तद्विरहनिश्चयदशायामपि तादृशबोधो जायत एव।

केचित्तु–पार्थान्यः कः शूर इत्यादावन्योन्याभावप्रतियोगिताऽनवच्छेदकपर्याप्तिक-यावत्त्वावच्छिन्ने किम्पदस्य शक्तिं कल्पयित्वा पार्थभिन्नान्योन्याभावप्रतियोगिताऽनवच्छेदक-पर्याप्तिकयावत्त्वावच्छिन्नः शूराभिन्न इत्याद्यन्वयबोधं कल्पयन्तीत्यास्तां विस्तरः।

इति किम्पदशक्तिविचारविवृतिः

वक्तृबुद्धीति। घटस्तत्पदजन्यबोधीयविषयतावान् भवत्वित्याद्याकारकतात्पर्यजनकं यत् तत्पदजन्यबोधीयविषयतावान् घटो मदिष्टसाधनमित्यादिवक्तृज्ञानं तदीयतत्पदजन्यबोधीयविष-यत्वनिष्ठप्रकारताकविशेष्यताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्न इत्यर्थः। शक्तिपरिच्छेदस्यैव= शक्तिग्रहस्यैव। वक्तुरभिसन्धिरिति। वक्तृबुद्धिरित्यर्थः।

ननु तत्पदजन्यप्रतिपत्तिश्च तत्पदघटितवाक्यजन्या, तत्पदघटितवाक्यञ्च यत्पदघटितमतो यत्पदस्य शक्त्यग्रहे तत्पदजन्यप्रतीत्यसम्भवेन तादृशप्रतीतिघटितानुगमकधर्मज्ञानं कुतः? परस्परसापेक्षत्वेनान्योन्याश्रयश्चेत्यत आह–

प्रकरणादिनेति। प्रक्रम्यमाणेति। पूर्वपदानुपस्थापितवक्तृबुद्धिविषयपरामर्शकत्वं, बोधनादिति। तथा च चैत्रस्तद्देशाधिकरणातीतदर्शनविषय इति पृथगन्वयबोधः।

साधु चन्द्रमसीति।

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिके।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः॥

इत्यादौ तत्पदासत्त्वेऽपि न दोषः, पूर्वप्रक्रान्तस्य कृतपदोपस्थाप्यव्यापार-स्यैवाभेदेन मीलनान्वयितया यच्छब्देन बोधनाद्।

एवं "यं सर्वशैला" इत्यादावपि तदनुरोधेन पूर्वप्रयुक्तपदोपस्थापितेऽपि तस्य शक्त्यन्तरं स्वीकरणीयम्, अतिप्रसङ्गश्च स्वप्रयोजकबुद्धिस्थत्वमन्तर्भाव्यैव वारणीयः।

एवं यत्पदोपस्थाप्ये तत्पदशक्तिर्बोध्या, अत एव प्रक्रम्यमाणवाचकतच्छब्देनापि

इति सम्पूर्णम्।

अस्यार्थः—अभिरामताऽधिके चन्द्रमसि सति पुष्करैः पद्मैः कृतमाचरणं साधु सम्यक्, तत्किमित्यत आह—यद् मीलितं तादृशाचरणं मीलनमिति, जयिनि कामिनीमुखे सति; उद्यता उद्गच्छता तेन चन्द्रेण अनुष्ठितमाचरणम् अर्थादुद्गमनरूपं साहसं सहसा कृतं; न तु विवेचनया तथा च तदनुचितं न साध्विति पर्यवसितम्। कृतपदोपस्थाप्येति। एवञ्च व्यापाराभिन्नं मीलनमित्यन्वयबोधः।

यत्तु—कृष्णभट्टेन साधुकरणाभिन्नं मीलनमित्यन्वबोध उक्तः।

तत्तुच्छं—कृतपदोपस्थाप्यव्यापारस्यैवेत्यस्यासङ्गत्यापत्तेः, व्यापारमात्रप्रतिपादनेन चरिता-र्थत्वाच्चेति। यं सर्वशैला इति। यं हिमालयनामकं पर्वतमित्यर्थः। तदनुरोधेनेति। तच्छब्दं विनाऽपि यच्छब्देन चैत्रव्यापारादिबोधानुरोधेनेत्यर्थः। पूर्वप्रयुक्तेति। स्वोच्चारकपुरुषकर्तृकपूर्वकालोच्च-रितेत्यर्थः।

ननु यथा हिमालयः प्रक्रान्तस्तथा तोयनिधिरपि; कुतस्तस्यापि यं सर्वशैला इत्यादौ यत्पदेन न बोधः? इत्यत आह—अतिप्रसङ्गश्चेति। स्वप्रयोजकबुद्धिविषयताऽवच्छेदकत्वे सति पूर्वपदजन्योपस्थितिविषयताऽवच्छेदको यो धर्मस्तदवच्छिन्नेऽपि यत्पदस्य शक्तिरिति, स च धर्मो यो ब्राह्मणायावगुरेत् तं शतेन यातयेदित्यादावुभयावृत्तित्वेन तत्तद्व्यक्तित्वादिः।

एवं यो यो धूमवान् स वह्निमानित्यादौ महानसत्वमहानसान्यत्वादिः, स च प्रकारणादिनैव ज्ञायते; अत एव "कार्त्तिक्यादौ यत्र दानं तदनन्तविनिन्दितमि"त्यत्र यत्पदार्थस्याभेदेन दानाभावेऽ-न्वय इति जगदीशेनोक्तं, तत्र यत्पदार्थस्योभयावृत्तिधर्मावच्छिन्न एव इति भावः, तथा च तोयनिधेः प्रक्रान्तत्वेऽपि न बुद्धिस्थत्वम्, अतो न तत्र यत्पदेन तस्य बोधः, केवलतद्विषयकबुद्ध्या यच्छब्दप्रयोगे तेन न तस्य बोधः; अतः प्रकान्तत्वमप्युपलक्षणतया प्रवेशितम्।

सङ्केतश्च—स्वविशिष्टधर्मावच्छिन्नविषयकत्वस्वजन्यत्वोभयसम्बन्धेन यत्पदविशिष्टबोधो भवत्वित्याकारकः। स्वपदं यच्छब्दपरं। स्वत्त्वस्य संसर्गपरिचायकतया नाननुगमः। स्ववैशिष्ट्यञ्च—स्वोच्चारकपुरुषकर्तृकपूर्वोच्चरितपदजन्यबोधीयविषयताऽवच्छेदकत्वस्वप्रयोजकबुद्धिविषयताऽ-

नियमतो यत्पदमपेक्ष्यते, तमानय य इहास्तीत्यादाविव; तमानय घट इहास्तीत्यादितो घटानयनादिप्रतीतेरनुभवविरुद्धत्वात्, प्रक्रान्तपरामर्शकस्य च न तदपेक्षानियमः "तदन्वये शुद्धिमती"त्यादौ वैवस्वतादिपदोपस्थाप्यस्यापि तच्छब्देन परामर्शात्, तदनुरोधेन च तच्छब्दस्यापि पूर्ववत् पूर्वप्रयुक्तपदोपस्थापिते शक्त्यन्तरमङ्गीकार्यम्।

उपस्थितिश्च स्वविशेष्यकवृत्तिज्ञानाधीना ग्राह्या; अतः पशुरस्ति तं पश्येत्यादौ पश्वादिपदोपस्थाप्यतत्तल्लोमादीनां तदादिशब्देन न परामर्शः।

प्रसिद्धार्थकमपि तत्पदं यथा—"कला च सा कान्तिमती"त्यादौ।

इदमेतदोः प्रत्यक्षबुद्धिविषये,

वच्छेदकत्वोभयसम्बन्धेन, तादृशसङ्केतीययत्पदनिष्ठप्रकारतानिरूपितधर्मनिष्ठसांसर्गिकविषयताकविषयताप्रकारकं ज्ञानं हेतुरिति ध्येयम्।

यत्पदोपस्थाप्य इति। यत्पदजन्योपस्थितिविषयत्वेन वक्तृबुद्धिविषयताऽवच्छेदकावच्छिन्न इत्यर्थः। तदन्वय इति।

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुक्षीरनिधाविव—

इति समस्तम्।

वैवस्वतादिपदोपस्थाप्यस्येति। तत्पूर्वप्रयुक्तवैवस्वतो नाम मनुरित्याद्यन्तर्गतवैवस्वतपदोपस्थाप्यस्येत्यर्थः। पूर्वप्रयुक्तेति। अत्राप्यतिप्रसङ्गभङ्गाय वक्तृबुद्धिस्थत्वमपि देयम्। स्वविशेष्यकेति। स्वं शक्यत्वेनाभिमतं। पश्वादिपदोपस्थाप्येति। लोमादिमान् पशुपदशक्य इत्यादिशक्तिज्ञानोपस्थाप्येत्यर्थः। तथा च तादृशज्ञाने शक्तौ लोमादिमानेव विशेष्यः, न तु लोम, अतो न तस्य तच्छब्देन परामर्शः।

"पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहा"
इत्यादौ,
"दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमा"—

इत्यादौ च, तस्येतितच्छब्देन पटोलराजादिपरामर्शकत्वन्तु तत्पुरुषघटकपटोलादिपदस्य तत्पदसम्बन्धिनि लक्षणाऽनङ्गीकर्त्तृमते सुलभं तदङ्गीकर्त्तृमतेऽपि पटोलादेर्लक्ष्यताऽवच्छेदकत्वेऽपि पटोलादिपदं पत्रादिसम्बन्धिनि पटोले शक्तं पटोलपदमित्याकारकलक्षणाज्ञानस्य पटोलविशेष्यकतया नानुपपन्नमिति तु विवेचनीयम्।

अदसश्च परोक्षविषये शक्तिः।

प्रसिद्धार्थकमपीति। प्रसिद्धत्वं बहुतरजनज्ञानविषयत्वं। कला च सेति।

"द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतः त्वमस्य लोकस्य च नेत्रकौमुदी॥"

इति तु श्लोकः।

कपालिनो महादेवस्य समागमप्रार्थनया प्राप्तिकामनया त्वं कलावतश्चन्द्रस्य सा प्रसिद्धा कला च द्वयमुभयं सम्प्रति शोचनीयतामाक्षेपणीयतां गतं प्राप्तं, कला तु पूर्वमात्रं सम्प्रति द्वयमिति भावः, छद्मवेषिणः शिवस्य स्वापकृष्टत्वप्रकाशार्थं भगवतीं प्रत्युक्तिरियम्।

एवं "ते लोचने प्रतिदिशं विधुरे क्षिपन्ती"त्यादावतीतानुभवविषयेऽनुभूतार्थेऽपि तच्छब्दस्य शक्तिर्वाच्या, तथा च ते अनुभूते लोचने इति तदर्थः, यच्छब्दवद् अव्ययमपि तच्छब्दो हेत्वर्थकं "यत्तद्यतस्ततो हेतावि"ति कोषात्।

प्रत्यक्षबुद्धिविषय इति। वक्तृप्रत्यक्षज्ञाननिरूपितलौकिकविषयतावतीत्यर्थः। तेनातीन्द्रियस्य गगनादेरलौकिकप्रत्यक्षविषयत्वेऽपीदं गगनम्, एतन्मन इत्यादयो न प्रयोगाः।

नन्वेवमिदं द्व्यणुकं नित्यमणुत्वादित्यादौ अतीन्द्रिये द्व्यणुक इदम्पदं दीधितिकृता प्रयुक्तं, तत् कथं सङ्गच्छत इति चेद्?

न–तत्तद्व्यक्तित्वावच्छिन्नेऽपीदमेतदोः शक्त्यन्तरस्वीकाराद्।

ननु तत्तद्व्यक्तित्वस्य प्रतिव्यक्तिभिन्नतया तदवच्छिन्ने शक्तिकल्पने शक्त्यानन्त्यप्रसङ्गोऽपूर्वभानानुपपत्तिश्चेति वाच्यम्?

भेदविशिष्टान्यत्वरूपोभयावृत्तित्वस्य वाऽनुगमकत्वाद्।

अथ घटादिनिष्ठतत्तद्व्यक्तित्वं नातिरिक्तपदार्थो भानाभावात् किन्तु घटादिव्यक्तिरेव तथा च जात्यतिरिक्तस्य तादात्म्येन स्वरूपतो भानासम्भवेन कुतस्तत्र स्वरूपतः शक्तिरिति चेद्?

न–जात्यखण्डोपाध्यतिरिक्तपदार्थस्यापि स्वरूपतो भानाङ्गीकारात्, तदनङ्गीकारे त्वतिरिक्तमेव तत्तद्व्यक्तित्वमिति, एतदेव श्रेयोऽन्यथाऽयं घट एतत्त्वादित्यादावेतत्पदार्थताऽवच्छेदकस्यैतत्त्वस्य घटादेर्हेतुत्वे तस्य स्वरूपतो हेतुत्वमसम्भवि स्यात्।

स्याच्च घटत्वेन हेतुत्वे पक्षमात्रवृत्तित्वाभावेनासाधारणोदाहरणासङ्गतिरिति, सोऽयं

स्वशब्दस्य समभिव्याहृतपदोपस्थाप्ये शक्तिः, समभिव्याहृतत्वन्त्वेकवाक्य-घटकत्वम्।

अथैवं चैत्रः स्वपुत्रं पश्यतीत्यादाविव स्वं चैत्रपुत्रः पश्यति चैत्रभ्राता वा स्वपुत्रं पश्यतीत्यादौ न कथं स्वशब्देन चैत्रः प्रत्याय्यते? मुख्यविशेष्यवाचकताव्युत्पत्त्य-भ्युपगमे स्वपुत्रदर्शिनं चैत्रं मैत्रः पश्यतीत्यादौ चैत्रपुत्रबोधानुपपत्तिः।

न चावान्तरवाक्यार्थबोधे चैत्रस्य मुख्यविशेष्यतया नेयमनुपपत्तिरिति वाच्यम्?

अन्तराऽवान्तरवाक्यार्थबोधमन्तरेणाहत्यैव विशेष्ये विशेषणमिति रीत्या

देवदत्त इत्ययं जानातीत्यादिप्रत्यभिज्ञाबोधकवाक्ये तत्पदमनुभूतार्थकम्, इदम्पदञ्च प्रत्यक्षविषयपरं, तथा चानुभूताभिन्नप्रत्यक्षविषयाभिन्नो देवदत्त इत्याकारकज्ञानवानिति तज्जन्यबोधः।

परोक्षेति। लौकिकप्रत्यक्षभिन्नज्ञानविषयेऽदःशब्दस्य शक्तिरित्यर्थः, तथा च "देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहल" इत्यादौ परमेश्वरस्य लौकिकप्रत्यक्षाविषयत्वेऽप्यलौकिक-प्रत्यक्षविषयत्वमादायासावित्यादिना तस्य बोधः।

वस्तुतस्तु– "क्रमादमुं नारद इत्यबोधि सः" "दधति परममी सायकानिष्यतन्त" इत्यादयो लौकिकप्रत्यक्षविषयेऽपि भूरितरप्रयोगदर्शनाद्, अतिसंनिकृष्टनिष्ठलौकिकविषयताभिन्नप्रत्य-क्षीयविषयताविशिष्टेऽदसः शक्तिर्वाच्या, परोक्षपदं तादृशविषयताशालिप्रत्यक्षपरम्, अत एव मिश्रैर्व्यवहितप्रत्यक्षविषयेऽदसः शक्तिरित्युक्तं, शाब्दिकैरपि–

"अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादि"ति गीतम्।

सन्निकृष्टत्वन्तु वक्तृनिरूपितं, नारदादेः किंचिद्दूरस्थत्वेन न तादृशविषयत्वानु-पपत्तिरित्यलं पल्लवितेन।

एकवाक्यघटकत्वमिति। स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वमिति पर्यवसितार्थः, एवमिति। स्वशब्दस्य तादृशपदोपस्थाप्ये शक्यत्व इत्यर्थः। स्वं चैत्रपुत्र इत्यत्रासमस्तस्वपद आपत्तिं दर्शयित्वा; समस्तस्वशब्द आपत्तिं दर्शयति–चैत्रभ्राता वेति। चैत्रः प्रत्यायत इति। इदन्तु तत्पुरुषे लक्षणाऽनङ्गीकर्तृमते बोध्यम्, अन्यथा चैत्रपुत्र इत्यादौ चैत्रपदेन चैत्रसम्बन्धिन एवोपस्थापनाच्चैत्र इत्यस्यासङ्गतिः स्याद्। मुख्यविशेष्येति। स्वघटितवाक्यजन्यबोधीयमुख्य-विशेष्यताऽवच्छेदकावच्छिन्नवाचकतास्वीकार इत्यर्थः। तथा च चैत्रपुत्र इत्यादौ चैत्रादेर्मुख्यविशे-ष्यत्वाभावान्न तस्य बोध इति भावः। चैत्रपुत्रेति। स्वपुत्रेतिवाक्येनेति शेषः, तत्र मैत्रस्यैव मुख्यविशेष्यतया भानादिति। मुख्यविशेष्यतयेति।

महावाक्यार्थबोधे यत्र तात्पर्यं तत्रैव तदनुपपत्तेर्दुर्वारत्वात्।

न च स्वार्थस्य साक्षात् परम्परया वा यदर्थे विशेषणत्वं तादृशार्थवाचकताव्युत्पत्तेर्नायं दोष इति वाच्यम्?

नन्ववान्तरवाक्यश्च–स्वपुत्रदर्शिनं चैत्रमित्यन्तम्; तेन च द्वितीयाऽर्थकर्मत्वमुख्यविशेष्यस्वपुत्रदर्शिचैत्रप्रकारक एव बोधो जायते, संख्याकालातिरिक्तविभक्त्यर्थस्य प्रकृत्यर्थविशेष्यतया भाननियमात्, तथा च चैत्रे मुख्यविशेष्यत्वविरहेण कुतः स्वपदेन तस्य बोध इति चेद्?

न–सुबर्थकर्मत्वादिकं प्रकृत्यर्थविशेषणतयैव भासत इति प्राचीनमतमवलम्ब्यैवोक्तत्वात्,

ते तु ग्रामं गच्छतीत्यादौ गमनाद्यर्थे कर्मताऽऽपन्नग्रामादेः कर्मतासम्बन्धेनान्वयं वदन्ति, लिखितश्चैतत् स्वयमेव नञ्वादटीकायाम्।

यत्तु–अवान्तरवाक्ये कर्मत्वाविवक्षणेनैकत्वप्रकारकतादृशमुख्यविशेष्यकबोधसम्भव इत्यभिप्रायेण तदुक्तमिति।

तदसद्–अवान्तरवाक्यजन्यबोधे कर्मत्वाभाने महावाक्यजन्यबोधे तद्भानानुपपत्तेः। महावाक्यार्थबोधोपपत्तय एवावान्तरवाक्यार्थबोधकल्पनाच्चेति।

आहत्यैवेति। महावाक्यघटकप्रत्येकपदजन्यप्रत्येकपदार्थोपस्थित्यव्यवहितोत्तरमेवेत्यर्थः, विशेष्ये विशेषणेति। शाब्दबोधो हि द्विविधः–विशिष्टवैशिष्ट्यावगाही; उपलक्षितावगाही च, तत्र विशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति विशेषणताऽवच्छेदकप्रकारेण विशेषणज्ञानस्य हेतुतया तत्सम्पादनार्थं महावाक्यघटकखण्डवाक्यजन्यबोध आवश्यकः, उपलक्षितावगाहिज्ञाने च विशेषणज्ञानस्यानावश्यकतया महावाक्यघटकप्रत्येकपदार्था उपस्थिताः, "खले कपोतन्यायेन" एकं विशेषणम् अपरश्च विशेष्यमिति रीत्या युगपद्भासन्ते, तत्र कुत्र कस्यचिद् विशेषणत्वं कस्यचिद्विशेष्यत्वमिति नियमस्त्वाकाङ्क्षाज्ञानादेवोपपद्यत इति भावः।

कुत्रचिद्विशिष्टवैशिष्ट्यावगाहि कुत्रचिदुपलक्षितावगाहि ज्ञानमित्यत्र तात्पर्यस्य नियामकतयाऽऽह–यत्र तात्पर्यमिति। विशेषणत्वमिति। विशेष्यतया वक्त्रभिप्रेतत्वं तथा च स्वार्थनिष्ठप्रकारताकविशेष्यताऽवच्छेदकत्वेन वक्त्रभिप्रायविषयतावद्धर्मावच्छिन्ने स्वशब्दस्य शक्तिरिति तु पर्यवसितार्थः। नायं दोष इतीति। स्वं चैत्रपुत्रः पश्यतीत्यादौ स्वपदार्थे चैत्रपुत्रादेर्विशेष्यतया स्वपुत्रदर्शनमित्यादौ च स्वार्थे चैत्रादेर्विशेष्यतया च स्वपदेन तस्य तस्य बोध इति भावः।

एवमपि स्वपुत्रश्चैत्रेण दृश्यत इत्यादौ चैत्रपुत्रबोधानुपपत्तेः, स्वसमभिव्याहृतक्रियाऽन्वयिवाचकत्वमपि न विचारं सहते; परम्परया क्रियाऽन्वयित्वस्य चैत्रभ्रातास्वं पश्यतीत्यादौ चैत्रादिसाधारणत्वात् साक्षात् क्रियाऽन्वयित्वस्य चैत्रः स्वं पश्यतीत्यादावप्यभावात् तत्र विभक्त्यर्थद्वारैव नामार्थधात्वर्थयोर्भेदान्वयस्य व्युत्पन्नत्वात्।

क्रियाऽन्वयिप्रत्ययार्थे साक्षादन्वयित्वविवक्षणान्न दोष इति चेद्?

एवमपि स्वव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्यादौ स्वशब्देन धूमादिपरामर्शानुपपत्तिवारणमशक्यमेव।

एवं चैत्रेणानीतं स्वपुत्रं मैत्रः पश्यतीत्यादौ चैत्रपुत्रबोधापत्तिवारणमपि।

न च स्वपदार्थो यदर्थघटितविशेषणस्य विशेष्यताऽवच्छेदककोटौ यदर्थस्य

क्रियाऽन्वयीति। तत्त्वश्च–क्रियानिष्ठविषयतानिरूपितविषयतावत्त्वं। साक्षादन्वयित्वेति। तच्च न प्रत्ययार्थविषयतानिरूपितविषयताशून्यत्वे सति प्रत्ययार्थनिष्ठविषयतानिरूपित विषयतावत्त्वं वाच्यं तथा सति स्वपुत्रदर्शिनं चैत्रं मैत्र इत्यादौ दृशधातूत्तरेनप्रत्ययार्थकर्त्तृनिष्ठविषयतानिरूपितचैत्रपदोत्तरद्वितीयाऽर्थविषयतानिरूपितविषयतायाश्चैत्रे सत्त्वेन तादृशविषयताशून्यत्वविरहात् तद्बोधानुपपत्तेः।

न चेनप्रत्ययार्थनिष्ठविषयतानिरूपितत्वं चैत्रनिष्ठविषयतायामेव; न तु कर्मत्वनिष्ठविषयतायां स्वीक्रियते व्यवहितत्वादिति वाच्यम्?

तथा सति परम्पराक्रियाऽन्वयित्वस्य दुर्वचतया पूर्वग्रन्थासङ्गतेः, साक्षादित्यस्य कथनासङ्गतेश्च।

न च साक्षान्निरूपितत्वं परम्परानिरूपितत्वश्चातिरिक्तमेवेति वाच्यम्?

मानाभावादिति चेत्?

सत्यं–स्वनिरूपितनिरूपकत्वस्वनिरूपितत्वान्यतरत्वं तद्, विशेष्यताऽऽदौ प्रकारताऽऽदिनिरूपितत्वमेव न तु तन्निरूपकत्वं, प्रकारताऽऽदावपि विशेष्यताऽऽदिनिरूपकत्वमेव, न तु तन्निरूपितत्वम् अन्यथा बहुतरासामञ्जस्यापत्तेः, एवञ्च नानुपपत्तिलेशोऽपीति ध्येयम्।

धूमादिपरामर्शेति। तत्र धूमे क्रियाऽन्वयिप्रत्ययार्थे साक्षादन्वयित्वविरहादिति।

ननु समानाधिकरणेतिबहुव्रीहिघटकल्युट्प्रत्ययस्य लक्षणयाऽधिकरणसम्बन्धिलाक्षणिकतया तादृशसम्बन्धिनोऽभेदेन धूमादावन्वयेन क्रियाऽन्वयिप्रत्ययार्थे साक्षादन्वयित्वस्य तत्र सत्त्वेन

विशेषणकोटौ वा निविशते; स एव पदार्थः स्वशब्दवाच्य; चैत्रपुत्रः स्वं पश्यतीत्यादौ चैत्रस्य भ्राता स्वपुत्रं पश्यतीत्यादौ च स्वपदार्थश्चैत्रस्य विशेषणकोटौ चैत्रघटितार्थस्य धर्मिताऽवच्छेदककोटौ वा न निविशत इति नातिप्रसङ्गः, चैत्रावलोकितं स्वपुत्रं मैत्रः पश्यतीत्यादौ चैत्रपदस्य चैत्रकर्त्तृके लक्षणया चैत्रः पदार्थैकदेशो न तु पदार्थ इति स्वशब्दान्न तत्प्रतीतिः, चैत्रेणावलोकितमित्यादौ तु तात्पर्यसत्त्व इष्यत एव ततस्तत्प्रतीतिः, स्वपुत्रदर्शिचैत्रधनमित्यादौ चैत्रपुत्रदर्शिचैत्रसम्बन्धित्वाद्यवच्छिन्ने चैत्रान्तस्य वाक्ये लक्षणाविरहे पूर्वभागं परित्यज्य तादृशलक्ष्यार्थपरस्य केवलचैत्रादि-पदस्यैव वा तत्र लक्षणया तत एव चैत्रपुत्रादिप्रतीत्युपपत्तिरिति वाच्यम्?

एवं सति चैत्रस्य भ्रात्रा स्वपुत्रो दृश्यत इत्यादौ स्वपदेन चैत्रप्रतीत्यापत्ते-र्दुर्वारत्वाद्।

मैवं—साक्षात् परम्परया वा यः स्वार्थस्य विशेष्यः; यश्च समभिव्याहृत-क्रियाकारकपदार्थस्तदुभयत्रैव स्वपदस्य शक्तिः, स्वव्यापकवह्निसामानाधिकरण्यं धूम

नानुपपत्तिरित्यतो दोषान्तरमाह—चैत्रेणानीतमिति। चैत्रपुत्रेति। आनयनक्रियाऽन्वयितृतीयाऽर्थकर्त्तृत्वे साक्षादन्वयित्वस्य चैत्रे सत्त्वादिति भावः।

यदर्थघटितेति। विशेषणस्येत्यत्र षष्ठ्यर्थः प्रकारताकत्वं, तस्य चोत्तरवर्त्तिविशेष्यतायामन्वयः; कोटावित्यनन्तरं निविशत इति योजनीयं, तथा च स्वार्थनिष्ठावच्छेदकताकविशेष्यतानिरू-पितप्रकारताऽवच्छेदकत्वेन वक्त्रभिप्रेते स्वशब्दस्यैका शक्तिरिति स्वार्थनिष्ठप्रकारताकविशेष्यत्वेन वक्त्रभिप्रेते चापरा शक्तिरिति चैत्रेण स्वपुत्रो दृश्यत इत्यत्र चैत्रः स्वपुत्रं पश्यतीत्यत्र स्वव्यापकवह्निसमानाधिकरणधूमवानित्यादौ च; स्वशब्देन चैत्रधूमादेर्बोधोपपत्तिः।

अतिप्रसङ्गवारणं दर्शयति—चैत्रपुत्र इत्यादि। न तत्प्रतीतिरिति। न चैत्रप्रतीतिरित्यर्थः। चैत्रकर्त्तृकस्य त्वयोग्यत्वान्न प्रतीतिरिति भावः।

ननु तत्पुरुषे तत्तद्विभक्त्यर्थविशिष्टे प्रकृतिपदं यदि लाक्षणिकं तदा स्वपुत्रदर्शिचैत्रधनमित्यादौ कुतः स्वपदेन चैत्रादेर्बोधः? तत्र चैत्रादिपदानां चैत्रसम्बन्ध्यादौ लाक्षणिकत्वादित्यत आह—स्वपुत्रेति। चैत्रान्तस्येति। शाब्दिकमताभिप्रायेण।

सिद्धान्तमारभते—मैवमिति। मतुपो भेदसम्बन्धेनान्वयतात्पर्यग्राहकत्वं न तु सम्बन्ध्यर्थकत्वमिति मते तादात्म्येन शुक्लस्ववान् घट इत्यादौ स्वपदार्थे साक्षाद्विशेष्यस्य घटस्य बोधाय साक्षादिति। स्वव्यापकवह्निसमानाधिकरणो धूमः स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिका

इत्यादावस्तीति क्रियाऽध्याहाराद् धूमस्य समभिव्याहृतक्रियाकारकत्वमक्षतमेवेति न स्वपदात्तत्प्रतीत्यनुपपत्तिः।

एवं "कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारिता गुण"इत्यावपि क्रियाऽध्याहारात् स्वपर्यायनिजपदात् कलसादिप्रतीतिः, स्वव्यापकवह्निसामाना-

---

सिद्धिरित्यादौ च; स्वपदेन धूमसिद्ध्यादेर्बोधनार्थं–परम्परयेति। चैत्रः स्वं पश्यति चैत्रेण स्वपुत्रो दृश्यत इत्यादौ चैत्रमभिवन्दते स्वपुत्र इत्यादौ स्वपदेन चैत्रादिबोधार्थं–समभिव्याहृतक्रियेति। चैत्रभ्राता स्वपुत्रं पश्यति चैत्रभ्रात्रा स्वपुत्रो दृश्यत इत्यादौ चैत्रस्य तु पदार्थस्य विशेष्यत्वाभावेन समभिव्याहृतक्रियाकारकपदार्थत्वाभावेन च न स्वपदेन बोधः। क्रियाकारकत्वञ्च–क्रियाऽन्वित-विभक्त्यर्थान्वयित्वं, तच्च चैत्रभ्रातर्येवेति बोध्यम्।

ननु स्वव्यापकवह्निसमानाधिकरणधूमवानित्यादौ वह्न्यादेरपि स्वपदार्थस्य परम्परया विशेष्यतया तस्य कुतो न बोधः?

एवं देवदत्ताय स्वपुत्रं ददाति मैत्रो देवदत्ते स्वपुत्रं पश्यति मैत्र इत्यादौ देवदत्तादेः समभिव्याहृतक्रियाकारकपदार्थतया स्वपदेन तस्य बोधप्रसङ्ग इति।

न च स्वार्थस्य यश्चरमविशेष्यः, यच्च समभिव्याहृतक्रियाकर्तृकारकं तथा च स्वव्याप-केत्यादौ धूमादिरेव चरमविशेष्यः, चैत्र एव च कर्तृकारकमतो न वह्निदेवदत्तादेर्बोध इति वाच्यम्?

तथा सति स्वव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्यादौ स्वव्यापकवह्निसामानाधि-करण्यं धूमेऽस्तीत्यत्र धूमस्य बोधानुपपत्तेरिति चेद्?

न–स्वपदजन्यबोधत्वेन वक्तृतात्पर्यविषयत्वे सति तादृशविशेष्यो यः, यच्च तादृशकारकं तदुभयत्रैव स्वपदस्य शक्तत्वेन वह्निदेवदत्तादौ तादृशतात्पर्यविषयत्वाभावाद्।

अथैवं सति तादृशवक्तृतात्पर्यविषय एव शक्तिकल्पनेनातिप्रसङ्गवारणसम्भवे विशेष्यत्वादिनिवेशस्य वैयर्थ्यमिति चेद्?

न–चैत्रभ्राता स्वपुत्रं पश्यति, चैत्रस्य गेहे मैत्रः स्वपुत्रं पश्यतीत्यादौ स्वपदस्य चैत्रादौ वक्तृतात्पर्यविषयत्वसत्त्वेऽपि चैत्रादेर्बोधविरहात् स्वव्यापको वह्निरित्यत्रेव यदा स्वव्यापकवह्नि-समानाधिकरणो धूम इत्यादावपि स्वपदस्य वह्नौ तात्पर्यमस्ति, न तु व्याप्तौ तदा वह्निबोध इष्ट एवेति ध्येयम्।

कलस इत्यादि। शेषार्द्धन्तु–

धिकरण्यं धूमस्येत्यादयश्च न प्रयोगाः।

इदन्तु चिन्त्यते—यद्रूपेण समभिव्याहृतपदादुपस्थितिस्तद्रूपावच्छिन्नस्य स्वपदार्थत्व एकेन ब्राह्मणेन ब्राह्मणान्तरपुत्रदर्शनदशायां ब्राह्मणः स्वपुत्रं न पश्यतीत्यादिप्रयोगानुपपत्तिः, अन्वयिताऽवच्छेदकावच्छिन्नाभावस्य विशेष्ये बाधात्, समभिव्याहृतपदार्थनिष्ठतत्तद्व्यक्तित्वावच्छिन्नस्य तदर्थत्वेऽपि वह्निकालीनद्रव्यवति ह्रदादौ स्वाव्यापकवह्निकालीनद्रव्यं नास्तीति प्रयोगानुपपत्तिः, तत्र द्रव्यपदस्यापि लक्षणया तत्तद्व्यक्तित्वावच्छिन्नपरत्वे महानसादावपि तथाप्रयोगापत्तिस्तथाविधयत्किञ्चित्व्यक्त्यभावस्य तत्राबाधात्, तादृशसमभिव्याहृतस्थले यद्यद्व्यक्तिव्यापकता वह्नेस्तत्तद्व्यक्तित्वावच्छिन्नाभावकूट एव नियमतः प्रतीयत इति चेद्?

न—तथाविधसकलव्यक्तिनिष्ठतत्तद्व्यक्तित्वानां युगसहस्रेणापि ज्ञातुमशक्यत्वात्, कदाचित् कस्यचिज्ज्ञानसम्भवेऽपि कतिपयतत्तद्व्यक्तित्वमात्रोपस्थितिदशायां कतिपयाभावमात्रगोचरप्रतीतेरप्यङ्गीकार्यतया तादृशनियमस्य सुदूरपराहतत्वादिति।

"स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यदि"ति,

निजस्य स्वस्य हेतुर्निमित्तकारणं यो दण्डस्तज्जन्यः चक्रभ्रमणकारित्वं गुणो धर्मः कलसे कार्यरूपे किमु? अस्तीत्यन्वयः, तस्य च तादृशास्तित्वेन तादृशधर्मः सम्भाव्यत इत्यर्थः, कारणगुणः कार्यगुणमारभत इति न्यायाद्।

ननु तादृशधर्मे दमयन्त्याः स्तनवृत्तित्वमेव सम्भाव्यते न तु कलसवृत्तित्वम् इत्यतस्तदुपपादयति—स इति। स कलसस्तस्यादमयन्त्या उच्चकुचावुन्नतस्तनौ भवन् प्रभाझरे कान्तिप्रवाहे चक्रवाकस्य भ्रमं भ्रान्तिमातनोति यद् यस्मादित्यर्थः।

अथ वा यदिति—आतनोतीतिक्रियाविशेषणं, तथा च तादृशक्रियैव निजहेतुदण्डजचक्रभ्रमकारिता गुणत्वेन सम्भाव्यत इति।

अन्वयिताऽवच्छेदकेति। स्वपदेन ब्राह्मणत्वेन ब्राह्मणस्योपस्थित्या ब्राह्मणपुत्रकर्मकदर्शनाश्रयतात्वावच्छिन्नाभावस्य, विशेष्ये कर्त्तरि ब्राह्मणे, समभिव्याहृतेति। समभिव्याहृतपदजन्योपस्थितिप्रकारवृत्त्युभयावृत्तित्वरूपसामान्यधर्मोपलक्षिततत्तद्व्यक्तित्वावच्छिन्नस्येत्यर्थः।

एवञ्च तत्तद्व्यक्तित्वभेदेन न शक्त्यानन्त्यं न वाऽपूर्वव्यक्तिभानानुपपत्तिः, स्वपुत्रमित्यत्र स्वपदेन तात्पर्यवशात् तत्तद्दर्शनकर्त्तृत्वाभावस्य ब्राह्मणे सत्त्वेन नायोग्यतेति भावः, प्रतियोगिताऽवच्छेदकावच्छिन्नाधिकरणत्वसत्त्वसूचनाय—वह्निकालीनेति।

अत्र केचिद्–ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ स्वपदं ब्राह्मणत्वावच्छिन्नार्थकमेव, विशेष्यीभूतब्राह्मणत्वाद्यवच्छिन्ने च स्वपदार्थघटितस्य ब्राह्मणपुत्रदर्शनकर्तृत्वादिरूपविशेषणस्य न केवलस्याश्रयत्वादिसम्बन्धेनान्वयः; अपि त्वाश्रयत्वस्वनिरूपकदर्शनविषयपुत्रजनकत्वोभयसम्बन्धेनैव, एवञ्च तत्र नञा तादृशोभयसम्बन्धावच्छिन्नतदभाव एव प्रत्यायतेऽतो नोक्तदोष इति वदन्ति।

एकशब्दस्य कैवल्यादिविशिष्टे शक्तिः, कैवल्यञ्च–स्वसजातीयद्वितीयराहित्यं, तच्च–स्वसजातीयनिष्ठभेदाप्रतियोगित्वं, स्वसजातीयत्वञ्च उद्देश्यविशेष्यवाचकैक–

तत्तद्व्यक्तित्वावच्छिन्नाभावकूट एवेति। इदञ्च तात्पर्यसत्त्वे सकृदुच्चरितशब्दस्याप्यनेकार्थगमकतामङ्गीकृत्यैव, अन्यथा सकृदुच्चरितद्रव्यपदेनानन्ततत्तद्व्यक्तित्वावच्छिन्नानां कथमपि बोधासम्भवाद्, अङ्गीकार्यतयेति। असर्वज्ञपुरुषीयतादृशवाक्यस्य प्रामाण्यान्यथाऽनुपपत्त्येति भावः। स्वेनादृश्यमानपुत्रस्यान्यकर्तृकदर्शनकाले स्वपुत्रं पश्यतीति वारणायाश्रयत्वेति प्रथमसम्बन्धः।

स्वनिरूपकेति। स्वं तिङर्थाश्रयत्वादि, चैत्रेण स्वपुत्रो दृश्यत इत्यादावाख्यातार्थविषयत्वस्याश्रयत्वस्वनिरूपकदर्शनकर्तृजन्यत्वोभयसम्बन्धेन पुत्रादावन्वयः, चैत्रः स्वधनं पश्यतीत्यादौ त्वाश्रयत्वस्वनिरूपकदर्शनविषयधनस्वामित्वोभयसम्बन्धेनान्वयः; स्वव्यापकवह्निकालीनद्रव्यवान् पर्वत इत्यादौ तु स्वपदं तत्तद्धूमव्यक्तिपरं, तादृशद्रव्यस्य पर्वतादौ संयोगः, स्वांशे परम्परया विशेषणवह्निनिष्ठव्यापकतानिरूपकतत्तद्व्यक्तिप्रतियोगिकसंयोगश्चैतदुभयसम्बन्धेन तत्तद्व्यक्तिप्रतियोगिसंयोगेन वाऽन्वयोऽतो ह्रदस्तादृशद्रव्यवान्, तादृशोभयसम्बन्धावच्छिन्नत्वस्य ह्रदवृत्तित्वे विरहेण ह्रदे तादृशद्रव्यमित्यादयस्तु न प्रयोगाः, अपि तु ह्रदे तादृशद्रव्यं नास्तीत्यादय एव।

केचित्तु–स्वव्यापकवह्निकालीनस्य तादात्म्यं स्वांशे विशेषणवह्निनिष्ठव्यापकतानिरूपकतादात्म्यञ्चैतदुभयसम्बन्धेन द्रव्येऽन्वयाद् न तादृशापत्त्यनुपपत्ती इत्याहुः।

वदन्तीति। अस्वरससूचनाय, तद्बीजञ्च–ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ स्वपदार्थस्य ब्राह्मणत्वाद्यवच्छिन्नस्य यस्य ब्राह्मणस्य पुत्रोऽप्रसिद्धस्तमादायापि ब्राह्मणः स्वपुत्रं न पश्यतीत्यादिप्रयोगापत्तिः, निरुक्तोभयसम्बन्धेन ब्राह्मणपुत्रकर्मकदर्शनाश्रयत्वाभावस्य तत्र सत्त्वात्।

अत्र ब्रूमः–ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ ब्राह्मणादिपदानां देवदत्तादिपरत्वम्; अन्यथाऽव्यावर्त्तकताऽऽपत्तेः, स्वव्यापकवह्निकालीनद्रव्यं ह्रदे नास्तीत्यादौ द्रव्यादिपदानां धूमादिपरत्वमपि वाच्यं, तत्र तत्र स्वपदस्यापि तत्तद्धर्मावच्छिन्नवाचकत्वं विवक्षणीयमतो न कोऽपि दोषः पदमादधातीति ध्येयम्।

भेदाप्रतियोगित्वमिति। भेदश्च स्वनिरूपकत्वस्वसामानाधिकरण्योभयसम्बन्धेन प्रतियोगि–

शब्दात् कैवल्यघटकत्वेन प्रकृतविधेयवत्त्वरूपं प्रतीयते, तथा चात्रायमेको भुङ्क्तइत्यादावेतद्देशाधिकरणकभोजनकर्तृनिष्ठभेदाप्रतियोग्ययमत्र भुङ्क्त इत्याद्याकारकबोधः, शक्यताऽवच्छेदकानुगमश्चोक्तदिशा चिन्तनीयः।

अयं फलमेकं भुङ्क्ते, फलमेकं भुञ्जानस्तिष्ठतीत्यादौ विधेयत्वाद्यवच्छेदककोटिप्रविष्टार्थैकैकपदाच्च यादृशार्थविशेषणताऽऽपन्ने यदवच्छिन्ने स्वार्थान्वयिनो विशेषणत्वं तादृशार्थानुयोगिकान्वयप्रतियोगित्वविशिष्टतद्रूपावच्छिन्नान्वयप्रतियोगित्वरूपसाजात्यं

ताविशिष्टान्यत्वेन विशेषणीयः; तेन नोभयभेदादिकमादाय कैवल्याप्रसिद्धिः, उदासीननिष्ठभेदप्रतियोगित्वमादायाप्रसिद्धिवारणाय–स्वसजातीयेति।

प्रतीयत इति। तथा च विधेयत्वेन स्वसमभिव्याहृतपदप्रतिपाद्यवन्निष्ठभेदाप्रतियोगिन्युद्देश्यविशेषणवाचकैकशब्दस्य शक्तिरिति, इदमुपलक्षणं, क्वचिच्च स्वसमभिव्याहृतपदप्रतिपाद्यविधेयविशिष्टस्यान्वयिताऽवच्छेदकरूपेणापि साजात्यं बोध्यं; तेन शूद्रेणाप्यन्नभोजनकाल एको ब्राह्मणोऽन्नं भुङ्क्त इत्यादिप्रयोगोपपत्तिः।

चिन्तनीय इति। परिष्कार्य इत्यर्थः, एवञ्च स्वसमभिव्याहृतपदजन्यप्रतिपत्तीयविधेयत्वेन वक्त्रभिप्रायविषयताऽवच्छेदकत्वानुगतधर्मः स एवोपलक्षणतया शक्यताऽवच्छेदकानुगमकः।

नन्वेवमपि स्वत्वस्यानुगमकघटकत्वेऽननुगमतादवस्थ्यं, तद्घटकत्वे समभिव्याहृतपदजन्यप्रतिपत्तीयविधेयताऽवच्छेदकत्वस्य भोजनकर्त्तृत्वादावपि सत्त्वादप्रसिद्धिरिति चेद्?

न–एकपदविशिष्टबोधो भवत्वित्याकारकसङ्केतस्वीकाराद्, वैशिष्ट्यञ्च–स्वजन्यत्त्वस्वसमभिव्याहृतपदजन्यप्रतिपत्तीयविधेयताऽवच्छेदकत्वेन स्वोच्चारकपुरुषीयेच्छाविषयत्वोपलक्षितधर्मावच्छिन्नवन्निष्ठभेदाप्रतियोगित्वप्रकारतावत्त्वोभयसम्बन्धेन, स्वत्वस्य सम्बन्धाघटकतया नाननुगमः तत्तदेकशब्दस्य सम्बन्धघटकतया समभिव्याहृतविधेयताऽवच्छेदकत्वस्य तत्तद्भोजन- कर्त्तृत्वादावेव सत्त्वान्न वाऽप्रसिद्धिः। अधिकन्तु सूक्ष्मविवेकेनानुसन्धेयम्, एवमुत्तरत्रापि।

भुङ्क्ते इत्यादिप्रयोगद्वयम् एकपदार्थस्य विधेयताऽवच्छेदककोट्युद्देश्यताऽवच्छेदककोटिप्रविष्टभेदेनानुसृतं। यादृशार्थेति। एतत्कर्त्तृकभोजनत्वाद्यवच्छिन्नेत्यर्थः। यदवच्छिन्न इति। कर्मतात्वाद्यवच्छिन्न इत्यर्थः। स्वार्थान्वयिन इति। एकपदार्थान्वयिफलादेरित्यर्थः।

अथ यादृशार्थपदेनैतत्कर्त्तृकभोजनत्वं धर्त्तुं न शक्यते यस्मात् तादृशवाक्याद् भोजनस्य कृतौ कृतेश्चैतस्मिन्नन्वयोऽवगाहते; न त्वेतद्वृत्तित्वं कृतौ कृतेश्चभोजन इति चेद्?

न–एतस्य धात्वर्थमुख्यविशेष्यकान्वयबोधवादिशाब्दिकमत उक्तत्वाद्।

प्रतीयते; अतस्तत्रैतत्कर्तृकभोजनादिनिष्ठसंसर्गप्रतियोगिकर्मत्वादिनिष्ठसंसर्गप्रतियोगिनिष्ठभेदाप्रतियोगित्वं फलादौ प्रतीयते।

एकसमानार्थकमात्रादिपदस्थलेऽप्येतादृशी रीतिरिति कृतं पल्लवितेन।

इति शक्तिवादे विशेषकाण्ड:

अथ वा स्वसमभिव्याहृतप्रथमाऽन्तपदोपस्थाप्यार्थनिष्ठकृतिनिरूपकत्वविशिष्टधात्वर्थताऽवच्छेदकावच्छिन्नविशेषणताऽऽपन्न इत्यत्र तात्पर्याद्।

वस्तुतस्तु–स्वसमभिव्याहृतधात्वर्थान्वितप्रत्ययार्थो यद्धर्मावच्छिन्नेऽन्वेति तद्धर्मावच्छिन्नकर्तृकतद्धात्वर्थताऽवच्छेदकावच्छिन्ने यदर्थोऽन्वेति; तादृशधात्वर्थताऽवच्छेदकावच्छिन्नानुयोगिकान्वयप्रतियोगितद्धर्मावच्छिन्नानुयोग्यन्वयप्रतियोगित्वमेव साजात्यं वक्तव्यं, तेन फलमेकं भुञ्जानेन स्थीयत इत्यादौ नानुपपत्ति:।

अत्रेदमालोचनीयम्–अयं फलमेकं भुङ्क्ते; एकेन रथेन कुमार्यो गच्छन्तीत्यादावेकशब्दस्य स्वार्थान्वयिताऽवच्छेदकावच्छिन्नवन्निष्ठभेदप्रतियोगित्वम्; अभावश्च खण्डशोऽर्थ:, तादृशाकाङ्क्षाज्ञानबलाच्चैतत्कर्तृकभोजनकर्मताऽऽपन्नफलनिष्ठभेदप्रतियोगित्वप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वबहुकुमारीकर्तृकगमनकरणताऽऽपन्ननिष्ठभेदप्रतियोगित्वप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वादिसम्बन्धेनैकपदार्थस्य फलनिष्ठभेदप्रतियोगित्वस्य तदर्थाभावेऽन्वयोभ्युपेयते, एवं रीत्या परिष्कारे न दोषलेशोऽपि; न वोक्तधर्मस्य बहुयत्तत्पदघटितत्वेनानुगमस्य दुष्करत्वेऽपि क्षति:।

मात्रादिपदस्थल इति। यथाऽत्रायं मात्रो भुङ्क्ते इत्यादि, आदिनैकाकिकेवलादिपरिग्रह:। अयं फलं मात्रं केवलं वा भुङ्क्ते इत्यादौ तु मात्रपदमवधारणार्थकत्वेन फलान्याकर्मकभोजनादिकर्मपरं; तस्य चाभेदेन फलादावन्वय:, तथा च फलेतराकर्मकभोजनकर्माभिन्नफलकर्मकभोजनानुकूलकृतिमानित्यन्वयबोध:, अत्र मात्रादिपदार्थताऽवच्छेदकस्य तादृशकर्मत्वस्य पारतन्त्र्येण भोजनादावन्वयोपगमेन यदा चैत्रो घटं पटञ्च पश्यति मैत्रस्तु तद्घटमेव तदा चैत्रो घटमात्रं पश्यतीत्यादयो न प्रयोगा:।

अथ वा भुजादिधातो: फलेतराकर्मकभोजनाद्यर्थकत्वं विवक्ष्यते, मात्रादिपदन्तु तदर्थे तात्पर्यग्राहकमित्यास्तां विस्तर:।

इति शक्तिवादविवृतौ विशेषकाण्ड:

अथ सविवृतिके शक्तिवादे

परिशिष्टकाण्डः

[१]गवादिशब्दात् संस्थानरूपाकृतेरपि बोधस्यानुभविकतया गोत्वादिजातिवत् साऽपि तद्वाच्ये विशेषणं, तस्याश्च वाच्यविशेषणत्वेऽपि न प्रवृत्तिनिमित्तता; साक्षात्

विशेष्यविशेषणभावेन जातिव्यक्त्योर्गवादिपदानां शक्तिकल्पनेनातिप्रसङ्गादिरूपदोष-विरहादाह-बोधस्यानुभवीति। तथाचानुभूयमानसंस्थानभानान्यथाऽनुपपत्तेरेव तत्र शक्तिः कल्पितेति भावः, साक्षात्सम्बन्धेनेति। यन्निष्टसंसर्गतायां प्रतियोग्यनुयोगिविषयतानिरूपितत्वं स एव साक्षात्सम्बन्धः, तादृशसम्बन्धस्यैव प्रवृत्तिनिमित्ततालक्षणघटकतया प्रवेशः, संस्थानव्यक्त्योः साक्षात्सम्बन्धाभावं दर्शयितुमाह-सामानाधिकरण्येनेति। समवायिसमवेतत्वघटितसामाधिकरण्य-सम्बन्धेनेत्यर्थः, तत्र सामानाधिकरण्यघटकप्रथमाऽधिकरणतानिष्ठसांसर्गिकविषयतायांसंस्थान-निष्ठप्रकारतानिरूपितत्वं, गवादिनिष्ठविशेष्यतानिरूपितत्वञ्च वृत्तित्वनिष्ठसांसर्गिकविषयतायाम-स्तीत्यतो न साक्षादिति भावः।

नन्वेकतरविनिर्मोकेणापरभानविरहस्य परस्परभानसामग्रीसहकारित्वोपगमेनापि निर्वाहाद् न तत्रैकशक्तिकल्पनमत आह-लाघवाच्चेति।

ननु हर्यादिपदेषु शक्यविशेषणभेदेन शक्तेर्भेद एव दृष्टः, अत्र कुत उभयविशिष्ट एका शक्तिरित्यत आह-शक्यविशेषणेति।

नन्वेतेन विशेषणभेदेऽपि यत्र धर्मिभेदस्तत्रैव कथञ्चित् शक्तेरैक्यं भवत्वेतद्धर्मिण ऐक्यात्तत् कुतः? इत्यत आह-धेन्वादिपदवच्चेति। विनिगमनाविरहादिति। शक्तिद्वयापत्तेरिति शेषः। केवलाकृतिविशिष्ट इति। विलक्षणावयवसंयोगविशिष्ट इत्यर्थः। गोत्वजातिविरहसूचनाय-पिष्टकमयइति। लक्षणैवेति। मृण्मयगवादौ गां प्रोक्षय गामानयेत्यादिव्यवहाराभावेन तत्र मुख्यत्वाभावात्। तथा च पारमार्षं सूत्रं "व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः" जातिरिति

---

१. इत आरम्य मीमांसकास्त्वितिपर्य्यन्तो ग्रन्थः सामान्यकाण्डस्यैव परिशिष्ट इति केचित् 'तत्र मनोरमं-तथात्वे तदनन्तरमेवायं संदृम्येत नात्रानवसरे।

विशेषकाण्डीयता त्वस्यासम्बद्धतया नैव सुवचा। तथा हि-वक्ष्यमाणग्रन्थारम्भे मीमांसकास्त्वित्यत्रत्यस्य भेदद्योतकस्य तद्वाचकस्य वा ''तु''शब्दस्योपादानेन पूर्वग्रन्थस्य मीमांसकेतरमतपरत्वस्य सुस्यष्टं प्रतीतेरग्रिमात् पदार्थस्वरूपबोधक-पारमर्शसूत्रोपन्यसनाच्च न्यायमतसिद्धस्य सामान्यत एव पदार्थस्वरूपस्य प्रदर्शकोऽयं ग्रन्थो न तु विशेषत इति स्फुटैव विशेषकाण्डानङ्गतैतस्य।

वस्तुतस्तु-यद्यप्यस्य न्यायमतत्वे म वैमत्यं, तथाऽपि कतिपयपाङ्क्तिभिरेव न्यायमतप्रदर्शनालभ्वुद्धेः प्रकृतग्रन्थ-कृदुपपादनप्रौढिमाननुरूपतया नास्य गोतमीयसिद्धन्तप्रतिपादनातात्पर्यकत्वं किन्तु प्रदिदर्शयितव्येषु मीमांसकमतेषु तदुत्थानावसरत्यानिनीषयोपोद्घातविधयैतद्ग्रन्थस्यावतारणेति त्वस्मभ्यं रोचमाना सरणिः।

सम्बन्धेन वाच्यवृत्तित्वाभावाद्, अवयवसंयोगरूपायास्तस्याः सामानाधिकरण्येनैव गवादौ सत्त्वाद्, अत्र शक्त्या जात्याकृत्योरेकतरविनिर्मोकेणापरभानविरहाल्लाघवाच्चोभयविशिष्टे गवादिपदस्यैकैव शक्तिः स्वीक्रियते, शक्यविशेषणभेदेऽपि पुष्पवन्तादिपदवद् धेन्वादिपदवच्च शक्त्यैक्यस्य दुरपवादत्वाद्।

एकविशिष्टापरावच्छिन्ने शक्तिरिति तु न सद्; विशेष्यविशेषणभावे विनिगमनाविरहाद् गवाद्यंशे साक्षादुभयप्रकारकबोधस्यानुभवसिद्धस्य दुरुपपादत्वाच्च, यत्र केवलाकृतिविशिष्टे गवादिपदतात्पर्य्यं यथा पिष्टकमयो गाव इत्यादौ; तत्र शुद्धगोत्वाद्यवच्छिन्नपरे धेन्वादिपद इव लक्षणैव, जात्याकृतिविशिष्टायां व्यक्तौ शक्तेरैक्यं "जात्याकृतिव्यक्तयस्तु पदार्थ" इति न्यायसूत्रे बहुवचनमुपेक्ष्य पदार्थ इत्येकवचनान्तं निर्द्दिष्टवतो महर्षेरप्यनुमतम्।

मीमांसकास्तु गवादिपदानां जातिरेव वाच्या, न तु व्यक्तिराकृतिर्वा।

व्यक्तिशक्तिमतेऽपि स्वरूपतस्तस्या ग्रहासम्भवेन शक्तिज्ञानप्रकारीभूतायां जातौ शक्तेस्तदवच्छेदकताया वाऽवश्यकल्पनीयतया व्यक्त्यादौ तत्कल्पनायां गौरवात्;

पदार्थ इत्यनुषक्तत्वेनान्वितम्। अप्रसङ्गात्=प्रयोगविरहाद्।

इत्येकवचनान्तमिति। अयमाशयः—सूत्रस्थपदार्थशब्दोत्तरैकवचनेन विवक्षितैकत्वस्य पदशक्यत्वरूपे पदार्थत्वेऽन्वयः पदार्थे तद्बाधात्; तथा च जात्याकृतिव्यक्तयः पदशक्यतैकवन्त इत्यर्थः। तत्र व्यक्तय इत्यन्तविशेष्यबोधकशब्दगतबहुवचनस्य विवक्षितबहुत्वसंख्याविरुद्धैकत्वसंख्यायाः पदार्थ इति विशेषणपदगतैकवचनैकत्वविवक्षणात्तत्रैकवचनोपपत्तिरिति तादृशसंख्याया अविवक्षास्थल एव समानवचनकत्वनियमाद्, अन्यथैकवचनानुपपत्तिरिति। तुशब्दस्तु जात्याकृत्योर्विशेषणत्वस्य व्यक्तेश्च विशेष्यत्वस्य सूचनायेति भाष्यकारादयः।

मीमांसकमतविशेषमुपन्यस्यति—मीमांसकास्त्विति। वाच्येति। शक्येत्यर्थः। स्वरूपतः=किञ्चिदप्रकारेण। तस्या इति। व्यक्तेरित्यर्थः, व्यक्त्यादाविति। व्यक्तौ संस्थाने च न्यायमते शक्तेराधिक्येन गौरवमिति भावः।

सप्रयोजनगौरवस्यादोषत्वादाह—प्रयोजनेति।

ननु जातिशक्तिमत इव व्यक्तिशक्तिमतेऽपि गोत्वादिजातयः शक्तौ तज्ज्ञाने चोपलक्षणतया भासमानाः शाब्दबोधे भासन्त इति न तत्र शक्यत्वं, न वा तदेकत्वं कुतो गौरवमित्यत आह—जातेरुपलक्षणेति। दर्शित इति। घटादिपदानां घटत्वाद्युपलक्षिते शक्तत्वे द्रव्यत्वाद्युपलक्षितेऽपि शक्तत्वेन घटादिपदेभ्यो द्रव्यत्वाद्यवच्छिन्नस्याभ्रान्तानामपि शाब्दबोधापत्त्यादिदत्तमिति, सा=शक्तिः।

प्रयोजनविरहाच्च।

व्यक्तिशक्तिमते च जातेरुपलक्षणत्वासम्भवः प्रागेव दर्शितः, यथा व्यक्तिशक्तिमते जात्यंशे शक्तिस्तदवच्छेदकता वा तद्विशेषणानवच्छिन्नैव तथा जातिशक्तिमतेऽपि सा तथैवेति न गोत्वत्वादिप्रवेशाद् गौरवशङ्काऽपि।

न हि जातिशक्तिमतेऽपि शाब्दबोधे सा किञ्चिद्धर्मप्रकारेण भासते; येन प्रकारलाभार्थं प्रकारविशेषमन्तर्भाव्य शक्तिः कल्पनीया, अपि तु स्वरूपत एव।

अथानुमानादिना गोत्वादौ शक्तिग्रहो भवन् धर्मिताऽवच्छेदकज्ञानस्यानुमानादिनाऽजननात्तादृशज्ञानस्य विपरीतज्ञानाविरोधितयाऽनुपयुक्तत्वाच्च।

एवञ्च तादृशधर्मस्य शक्यताऽवच्छेदकत्वं दुर्वारमेव, शक्तिग्राहकमानेन धर्मिताऽवच्छेदकांशे तदवच्छेदकताग्रहे बाधकाभावाद्।

यदि चावच्छेदकताग्रहेऽपि शक्तिधियस्तदंशे भ्रमत्वं कल्प्यते विषयबाधेनावच्छेदकत्वमेव शक्तिग्राहकमानेन न गृह्यत इत्येव वा स्वीक्रियते; तदा प्रतियोगित्वकारणत्वादीनामपि तुल्ययुक्त्याऽवच्छेदकत्वविलयप्रसङ्गः, तत्राप्येवं सुवचत्वात्।

तथैवेति। निरवच्छिन्नैवेत्यर्थः। अनुमानादिनेति। अनुमानञ्च गोत्वादि; शाब्दबोधे कादाचित्कभानप्रयोजकज्ञानविषयगोपदनिरूपितसम्बन्धवद्, गोत्वत्वाद्, यन्नैवं तन्नैवमित्यादिरूपम्, आदिना मनःशब्दादिपरिग्रहः।

अनुमानशब्दाभ्यां निर्धर्मिताऽवच्छेदककज्ञानाजननेऽपि मनसा कथञ्चित् तज्जननादाह–तादृशज्ञानस्येति। विपरीतज्ञानाविरोधितया तद्विरहज्ञानाप्रतिबन्धकतयाऽनुपयुक्तत्वाद् निर्धर्मिताऽवच्छेदककज्ञानस्य कारणत्वे गोत्वं गोपदशक्यत्वाभाववदित्यादिनिश्चयकालेऽपि गोपदशक्यत्ववदित्यादिज्ञानोदयेन शाब्दबोधापत्तिरिति भावः।

एवञ्चेति। गोत्वत्वादिना गोत्वादेः शक्तिज्ञानविषयत्वे चेत्यर्थः। शक्तिग्राहकमानेनेति। शक्तिविषयकज्ञानेनेत्यर्थः। तदवच्छेदकताग्रहे=शक्त्यवच्छेदकताभाने, अथ वा शक्तिग्राहकमानेनेत्यनन्तरं शक्तिग्रह इति पूरणीयम्। अत्र तृतीयाऽर्थो जन्यत्वं, तस्य च शक्तिग्रह इत्यत्रान्वयः। एतेन तृतीयाया अनुपपत्तिरित्यपि निरस्तं, बाधकाभावादिति। विषयबाधादिनिश्चायकाभावादित्यर्थः। यद्धर्मं धर्मिताऽवच्छेदकीकृत्य यदवगाहतेऽसति बाधके तत्र तदवच्छेदकत्वमपीति नियमाद्।

अथ वा यद्धर्मावच्छिन्ने यदवगाहयति यत्; तत् तत्रासति बाधकेतदवच्छेदकत्वं

प्रतियोगित्वादिबुद्धेरवच्छेदकत्वावगाहित्वमनुभवसिद्धं यदि; तदा शक्तिधिय-स्तदवगाहिता न तथेति वचसि को वा श्रद्दधाति? विशेषाभावाद्, मा भूद् वा गोत्वत्वादिकमवच्छेदकं शक्तेस्तथाऽपि शक्तिज्ञानकारणतायां गुरुशरीरगोत्वत्वादे-र्धर्मिताऽवच्छेदकताऽऽत्मकविषयतानिवेशाद् गौरवं दुर्वारमेव।

व्यक्तिशक्तिवादिनान्तु—स्वरूपतो गोत्वादिनिष्ठधर्मिताऽवच्छेदकत्वस्यैव निवे-शादिति चेद्?

न—पदविशेषणताऽऽपन्नशक्तौ निरूपितत्वसम्बन्धेन शक्तिसम्बन्धेन पदे वा स्वरूपतो गोत्वादिप्रकारिकाया एव शक्तिधियः स्वीकाराद्, न हि समवायेनैव जातेः स्वरूपत प्रकारतेति नियमः प्रामाणिकः, घटं जानामीत्यादौ प्रकारितासम्बन्धेन स्वरूपतो घटत्वादीनां ज्ञानाद्यंशे प्रकारत्वोपगमात्, समवायेन धर्मिविशेषणताऽऽपन्नस्यैव सम्बन्धान्तरेणाप्यत्र स्वरूपतो भानमित्यपि न नियमः, प्रामाण्यस्य परतो ग्राह्यतामतेऽयं

ग्राहयति, अधिकरणताग्राहकमानवदिति नियमादिति भावः। अवच्छेदकताग्रहेऽपीति। अवच्छेद-कताभानेऽपीत्यर्थः। भ्रमत्वमिति। गुरुभिन्नमीमांसकमते तैर्भ्रमत्वानङ्गीकारात्। तन्मतेऽप्याह—विषयबोधेनेति। अवच्छेदकतायां शक्तिनिरूपितत्वबाधेनेत्यर्थः। तदवगाहितेति। अवच्छेद-कत्वावगाहितेत्यर्थः। न तथा=अनुभवसिद्धा। श्रद्दधातीति। प्रामाण्यं स्वीकरोतीत्यर्थः। तुष्यतु दुर्जनन्यायेनाह—मा भूदिति। निवेशादिति। कारणीभूते गोत्वं गोपदशक्यमिति ज्ञाने गोत्वत्वस्य धर्मिताऽवच्छेदकत्वेन प्रवेशादिति भावः। गौरवमिति। गोत्वापेक्षया गवेतरावृत्तित्वादिघटितस्य गोत्वत्वस्य गुरुशरीरत्वादिति।

पदविशेषणताऽऽपन्नेति। गोपदं गोत्वे शक्तमित्याद्याकारिका निरूपितत्वसम्बन्धाव-च्छिन्नगोत्वनिष्ठप्रकारताकशक्तिनिष्ठप्रकारताकपदनिष्ठविशेष्यताका शक्तिधीरित्यर्थः। पदे वेति। पदविशेष्यकशक्तिसम्बन्धावच्छिन्नगोत्वप्रकारिका पदं गौरित्याद्याकारिकेत्यर्थः। स्वीकारादिति। तथा च तादृशज्ञानस्यैव शाब्दबोधजनकतया तदवच्छेदककोटौ गोत्वत्वाद्यप्रवेशेन लाघवमेवेति भावः।

ननु स्वरूपतो जातिनिष्ठप्रकारतायाः समवायातिरिक्तसम्बन्धानवच्छिन्नत्वनियमश्चेत् कुतस्तादृशज्ञानस्वीकारसम्भव? इत्यत आह—न हीति। तादृशनियमे व्यभिचारं दर्शयति—घटं जानामीत्यादि प्रकारित्वसम्बन्धावच्छिन्नघटत्वनिष्ठप्रकारतानिरूपितज्ञाननिष्ठविशेष्यत्वावच्छिन्नप्रका-रतानिरूपितात्मनिष्ठविशेष्यताकप्रत्यक्षमित्यर्थः। प्रकारत्वोपगमादिति। अन्यथा द्रव्यत्वादिमात्रेण घटविषयकज्ञानमादाय घटं जानामीत्यनुव्यवसायापत्तेरिति भावः।

प्रामाण्यस्य स्वतो ग्राह्यत्वमतेऽयं घट इत्याकारकज्ञानस्यैव प्रामाण्यावगाहितया तदुत्तरं

घट इत्याकारकस्य स्वरूपतो घटत्वादिज्ञानस्यानुव्यवसाये प्रकारितायां तत्सम्बन्धेन ज्ञाने वा धर्मिविशेषणताऽपन्नस्य घटत्वादेर्भानात्।

अस्तु वा प्रकृतेऽपि गवादिविशेषणताऽऽपन्नस्यैव गोत्वादेः शक्तौ निरूपितत्व-सम्बन्धेन; पदे वा शक्तिसम्बन्धेन स्वरूपतः प्रकारता, गवादेश्च शक्तौ पदे वा स्वसमवेतनिरूपितत्वस्वसमवेतवाचकत्वरूपपरम्परासम्बन्धेन प्रकारता; तादृशी च गवादिविषयता न शाब्दबोधजनकताऽवच्छेदिकेति परम्परासम्बन्धेन प्रकारताया जनकताऽवच्छेदकत्वापेक्षया साक्षात्सम्बन्धावच्छिन्नप्रकारतायास्तथात्वे लाघवेन व्यक्तिशक्तिसिद्धेर्नावकाशः।

अथ जातिशक्तिमतेऽपि शाब्दबोधे व्यक्तिभानमावश्यकं गौर्नष्टा, गौर्जाता, गामानयेत्यादौ समभिव्याहृतपदार्थान्वयस्य जातौ बाधात् परम्परासम्बन्धेन तदन्वयोपगमेऽप्यन्वयिताऽवच्छेदकतया गोत्वत्वादिभानापत्तेः, शक्तौ गोत्वत्वाद्यन्तर्भावापत्तेश्च,

---

तैः प्रामाण्यसंशयानङ्गीकारेणानुव्यवसाये घटत्वादिविशिष्टघटादिरेव भासते, तदाकारोऽपि घटं जानामीत्यादि। अतः=समवायेन धर्मिविशेषणताऽऽपन्नघटत्वादेः प्रकारितया भानं तत्रेत्यतः। परत इति। संवादिप्रवृत्तिजनकत्वहेतुकानुमानादित इत्यर्थः।

एतन्मतेऽयं घट इत्यादिज्ञानस्यानुव्यवसाये प्रकारितायां निरूपितत्वसम्बन्धेन प्रकारितासम्बन्धेन वा ज्ञाने घटत्वादेर्भानमावश्यकं न तु घटत्वविशिष्टघटादेः। अन्यथा तदुत्तरम् इदं ज्ञानं घटे घटत्वप्रकारकं घटत्वाभाववति घटत्वप्रकारकं न वेति संशयानुपपत्तेरिति भावः।

नन्वेतावताऽपि प्रामाण्यस्य स्वतो ग्राह्यत्वमते धर्मिविशेषणताऽऽपन्नस्यैवेत्यादिनियमे व्यभिचाराभावेन कुतस्तादृशशक्तिधीस्वीकारसम्भवः? इत्यत आह—अस्तु वेति। अस्य च प्रकारताद्वयेनान्वयः। गोत्वादेरिति। अस्य च तादृशप्रकारता तु पारतन्त्रीया। गवादेश्चेति। अस्य च तादृशप्रकारता स्वातन्त्रीया, तथा च शक्तिज्ञानन्तु स्वसमवेतनिरूपितत्वसम्बन्धेन गोमच्छक्ति-मत्पदमित्याकारकं स्वसमवेतनिरूपितशक्तिसम्बन्धेन गोमत्पदमित्याकारकं वेति। समभिव्याहृतपदार्थेति। नाशप्रतियोगित्वाद्यन्वयस्येत्यर्थः। गोत्वत्वादिभानापत्तेरिति। तादृशवाक्यात् शाब्दान्यथाऽनुपपत्त्या गोत्वत्वादिभानस्वीकारापत्तेरित्यर्थः। शक्ताविति। गोत्वत्वस्य शक्तावप्रवेशे शक्तिज्ञानेन तदनुपस्थितौ तद्रूपेण शाब्दबोधानुपपत्तेः, प्रकारान्तरेण गोत्वत्वाद्युपस्थितेः शाब्दबोधहेतुत्वे जातित्वादिना गोत्वत्वाद्युपस्थितिकालेऽपि तादृशवाक्याज्जातिर्नष्टेत्यादिशाब्दबोधापत्तेरिति भावः।

ननु स्वरूपतः पदार्थस्य प्रकारता पदार्थान्तरान्वये न किञ्चिद्बाधकं तादृशज्ञानस्य विपरीतज्ञानविरोधित्वात् प्रवर्त्तकत्वाच्चेत्यत आह—स्वीकुरु वेति। ध्रुवैवेति। अत्याज्यैवेत्यर्थः।

न हि स्वरूपेण पदार्थस्य पदार्थान्तरान्वयान्वयितया भानं कैश्चित् स्वीक्रियते, स्वीकुरु वा प्रकारतया स्वरूपेणोपस्थितजातेर्भानं; विशेष्यतया तद्भानन्तु न सम्भवत्येव, निर्धर्मिताऽवच्छेदककस्य शाब्दबोधस्य प्रवृत्त्याद्यनुपयोगितया तत्स्वीकारासम्भवाद्।

एवञ्च जातिमात्रवाचकत्वेनाभ्युपगतपदस्यापि व्यक्तिबोधजनकतायामविवादाद् व्यक्तिशक्तिर्ध्रुवैव शक्तिभ्रमाजन्यलक्षणाग्रहाजन्यतद्बोधकजनकताया एव तच्छक्ति-साधकत्वाद्; अन्यथा जातावपि शक्त्यसिद्धिप्रसङ्गाद्।

एवं शक्तेरीश्वरसङ्केतरूपत्वे व्यक्तिबोधकतायाः पदेऽबाधितत्वेनेश्वरेच्छा-विषयतया तस्या अपि शक्यत्वं दुरपह्नवं, न हि मीमांसकैर्भगवान्नानुमन्यत इत्येतावतैव तादृशक्त्यनवकाशस्तत्साधकबहुतरमानसत्त्वेन तदुपन्यासस्यापि निरुत्तरत्वापाताद्।

एवं ज्ञाने पदानां शक्तिरित्येतादृशमतेऽपि व्यक्तिज्ञानजननसमर्थपदस्य जाताविव व्यक्तावपि वाच्यत्वं दुरपह्नवमेव, शक्तिनिरूपकज्ञानविषयत्वरूपस्य तस्याप्यविशेषेण जातिव्यक्त्योः सत्त्वादिति चेद्?

न—व्यक्तिशक्तावस्माकं न वैमत्यम्; अपि तु व्यक्तिशक्तिज्ञानत्वेन हेतुतायामेव, अत एव व्यक्त्यंशे कुब्जा शक्तिरिति गीयते, तदंशे तज्ज्ञानानपेक्षणाद्, अत एव

शक्तिसाधकत्वादिति। यत्पदं शक्तिभ्रमं लक्षणाग्रहञ्च विनेतरपदानुपस्थाप्ययदर्थान्वयबोधजनकं तत् तदर्थशक्तमिति व्याप्तेः, अन्यथा=तादृशव्याप्त्यनभ्युपगमे। शक्त्यसिद्धीति। साधकान्तराभावा-दित्यर्थः। ईश्वरेच्छाविषयतयेति। तत्तत्पदजन्यबोधविषयत्वेनेश्वरेच्छाविषत्वेनेत्यर्थः। तस्या अपि=व्यक्तेरपि। दुरपह्नवमिति। वारयितुमशक्यमित्यर्थः। तत्साधकबहुतरेति। क्षितिः सकर्तृका कार्यत्वादित्याद्यनुमानं, "द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्त्ता भुवनस्य गोप्ते"त्या-दिश्रुतिश्च, ईश्वरसाधकमानमिति भावः। तदुपन्यासस्यापि=ईश्वरानङ्गीकारेण तादृशयुक्त्यनवका-शोद्भावनस्यापीत्यर्थः। शक्तिनिरूपकज्ञानेति। शक्तिनिरूपकताविशिष्टज्ञानविषयेत्यर्थः, तथा च शक्तिनिरूपकविषयत्वेति लाभः, तेन स्वात्मादौ नातिव्याप्तिः, जन्य इव प्रयोज्येऽपि निरूपकत्वस्वीकारादिति भावः।

कुब्जशक्तिवादिमतं दूषयितुं सिद्धान्तच्छलेनाह—व्यक्तीति। तथा च गामानयेत्यादौ सामानाधिकरण्यसम्बन्धेन कर्मत्वादौ गोत्वादेरन्वय आस्तामित्यर्थः। वैमत्यमिति। अनभिप्रायमित्यर्थः। व्यक्तिशक्तिज्ञानत्वेन हेतुतायामिति। अस्य वैमत्यमित्यनेनान्वयः। कुब्जेति। वाच्यत्वव्यवहाराजनिकेत्यर्थः। तदंश इति। व्यक्त्यंश इत्यर्थः। तज्ज्ञानानपेक्षणादिति। शक्तिज्ञानानपेक्षणात्। तथा च पदं गोत्वज्ञानशक्तमित्याकारकज्ञानमेव हेतुरिति भावः। अत एवेति। जनकताऽवच्छेदकोटौ

व्यक्तेर्न वाच्यता, न हि शक्तिधीविषयतामात्रेण वाच्यता, तादृशविषयताया अन्वयसाधारण्याद्; अपि तु यद्विषयकत्वेन शक्तिज्ञानस्य तद्विषयकशाब्दधीजनकत्वं तत्त्वमेव वाच्यताव्यवहारनियामकम्, अन्वयांशे कुब्जशक्तिसत्त्वेऽपि यथा तद्विषयकत्वं शक्तिज्ञानजनकतायां नावच्छेदकं; तथा व्यक्त्यंशे तत्सत्त्वेऽपि तद्विषयकत्वस्य शक्तिज्ञानजनकतायामनवच्छेदकत्वान्न व्यक्तौ तद्व्यवहारः, तद्विषयकत्वस्य शाब्दधीविशेष-

---

व्यक्तित्वाप्रवेशादेवेत्यर्थः। शक्तिधीविषयतेति। शक्तिनिरूपकज्ञाननियतविषयतामात्रेणेत्यर्थः। अन्वयसाधारण्यात्=सम्बन्धसाधारण्यात्। शाब्दबोधे जातिव्यक्ती इव पदार्थसम्बन्धोऽपि नियमतो भासते, अतस्तस्यापि वाच्यत्वापत्तिरिति भावः। यद्विषयकत्वेनेति। अत्र तृतीयाऽर्थोऽवच्छेद्यत्वं तस्य च शाब्दधीजनकत्वेऽन्वयः, तथा यद्विषयकशाब्दधीजनकत्वं यन्निष्ठावच्छेदकताकविषयित्वनिष्ठावच्छेदकताकमित्यर्थः।

एतन्मते गोत्वज्ञानशक्तिमत्पदविशिष्टज्ञानत्वेनैव कारणात्, तत्त्वज्ञाने गोत्वस्य विषयतया शक्तौ तादृशज्ञानस्य निरूपितत्वसम्बन्धेन विशेषणत्वं, तथा च गोत्वनिष्ठविषयतानिष्ठावच्छेदकताकज्ञाननिष्ठविषयतानिष्ठावच्छेदकताकशक्तिनिष्ठविषयतानिष्ठावच्छेदकताकपदनिष्ठविषयतानिष्ठावच्छेदकताकं जनकत्वमिति।

एतच्चान्तरा भासमानप्रकारताविशेष्यतयोरभेदमते। वाच्यत्वव्यवहारनियामकं=वाच्यपदेन तत्प्रतिपादनप्रवृत्तिनियामकं। जन्यतावत्त्वमेव व्यवहारनियामकमिति तु पर्यवसितार्थः। तद्वत्त्वञ्च–स्वनिरूपितशाब्दत्वावच्छिन्नावच्छेदकतानिरूपितविषयत्वनिष्ठावच्छेदकताकावच्छेदकतावत्त्वस्वनिरूपितजनकतानिरूपितविषयित्वनिष्ठावच्छेदकतावत्त्वोभयसम्बन्धेन। व्यवहारप्रयोजकधर्मशरीरनिविष्टतद्विषयकत्वेत्यस्य फलमाह–तद्विषयकत्वस्येति। गोत्वादिज्ञानवाचकत्वापत्तिरिति।

ननु गोत्वविषयकशाब्दबोधस्य मितिमातृविषयकतया समूहालम्बनात्मकतया वा गोत्वज्ञानविषयकत्वसत्त्वेन यद्विषयकत्वनिवेशेऽपि कुतो गोत्वज्ञानवाचकत्वापत्तिवारणम्?

न च ज्ञानस्य त्रितयविषयकत्वस्वीकाराद् मुख्यविशेष्यताद्वयशून्यत्वनिवेशाच्च न तथाऽऽपत्तिरिति वाच्यम्?

गौर्गोत्वज्ञानवत्पुरुषेणानीयत इति शाब्दधीमादाय तद्दोषतादवस्थ्याद्।

न च यद्विषयकशाब्दधीजनकत्वमित्यत्र यद्विषयकत्वावच्छिन्नशाब्दधीनिष्ठजन्यताकजनकत्वमिति निवेश्य वारणीयमिति वाच्यम्?

तथा सति यद्विषयकत्वावच्छिन्नं शाब्दधीनिष्ठजन्यत्वं तत्त्वमेव वाच्यत्वमिति निवेशेनैव दोषाभावात् शेषवैयर्थ्यापत्तेरिति चेद्?

णत्वाद् गवादिपदशक्तिज्ञानस्य गोत्वादिज्ञानविषयकत्वेन गोत्वादिशाब्दधीहेतुत्वेऽपि न गवादिपदस्य गोत्वादिज्ञानवाचकत्वापत्तिः।

वस्तुतो यद्विषयकत्वविशिष्टज्ञानविषयकत्वेन शक्तिज्ञानस्य शाब्दधीजनकता; यद्विषयकत्वेन वा शाब्दधियः शक्तिज्ञानजन्यता तत्त्वमेव तथा।

एतेन ज्ञानत्वज्ञानस्यापि ज्ञानपदवाच्यताऽऽपत्तिः, शक्यज्ञानविषयत्वेनैव ज्ञानपद-शक्तिज्ञानस्य ज्ञानत्वेन ज्ञानत्वज्ञानविषयकशाब्दधीजनकत्वादिति पराऽस्तम्।

कारणत्वस्य कार्यत्वस्यावच्छेदकगर्भे गोत्वादिविषयकत्वस्य निवेशाद् गोत्वादेर्वाच्यतोपपत्तिः, एवञ्च गौर्गोपदशक्येत्याकारिकाऽपि शाब्दबोधोपयोगिशक्तिधीः सम्भवति व्यक्त्यंशे शक्तेरबाधेनान्यथाख्यात्यापत्तिविरहात्, तादृशज्ञानस्य शाब्दधी-

न–शाब्दबोधे मुख्यविशेष्यताद्वयशून्यत्वस्य निवेशाद् यन्निष्ठविषयतायाश्च मुख्यविशेष्यता-तदवच्छेदकताऽन्यतरात्मकत्वस्य च निवेशात्।

तद्विषयकत्वमनिवेश्य लघुनिवेशेन वारयति–वस्तुत इति। यद्विषयकत्वनिविष्टेति। विषयतया यद्विशिष्टज्ञानविषयकत्वेनेत्यर्थः।

अथ वा यद्विषयकत्वविशिष्टं यज्ज्ञानविषयकत्वं तेनेत्यर्थः, तथा च यन्निष्ठावच्छेद-कताकविषयित्वनिष्ठावच्छेदकताकज्ञानत्वावच्छिन्नविषयित्वनिष्ठावच्छेदकताकं शाब्दधीजनकत्वं तत्त्वमेव वाच्यताव्यवहारनियामकमित्यर्थः।

ननु गोत्वविषयकशाब्दत्वावच्छिन्नं प्रति गोत्वज्ञानजनकशक्तिज्ञानत्वेन कारणत्वे कारणत्वग्रहात् पूर्वं शक्तौ तादृशकारणत्वग्रहो दुर्घटः, तद्घटितकारणताऽवच्छेदकाग्रहे कारणत्व-ग्रहोऽपि दुर्घट इत्यन्योन्याश्रय इत्यतो लाघवाच्चाह–

यद्विषयकत्वेनेति। यत्पर्याप्तावच्छेदकताकविषयत्वनिष्ठावच्छेदकताकशाब्दत्वावच्छिन्नं शक्तिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यत्वमित्यर्थः, तेन जातित्वादिना गोत्वादेर्न गवादिप-दवाच्यता। तथेति। वाच्यत्वव्यवहारनियामकमित्यर्थः, तथा च शक्तिज्ञानत्वावछिन्नजनकताक-शाब्दत्वावच्छिन्नजन्यतानिरूपितविषयत्वनिष्ठावच्छेदकताकावच्छेदकतापर्याप्त्यधिकरणत्वं वाच्यताव्यवहारनियामकमिति तु पर्यवसितार्थः। एतेनेति। शाब्दधीजनकतायां यद्विषयकत्व-विशिष्टज्ञानविषयकत्वावच्छिन्नत्वनिवेशेन शाब्दधीनिष्ठशक्तिज्ञानजन्यतायाश्च यद्विषयकत्वा-वच्छिन्नत्वनिवेशेन चेत्यर्थः, अस्य च परास्तमित्यनेनान्वयः। ज्ञानत्वेनेति। ज्ञानाविषयकशाब्दत्वा-वच्छिन्नं प्रति ज्ञानपदशक्तिज्ञानत्वेन कारणतया ज्ञानत्वज्ञानस्य च सामान्यतो ज्ञानविषयकत्वेन तद्विषयकत्वेन तद्विषयकशाब्दधीजनकत्वमित्यत्र तत्पदेन ज्ञानत्वज्ञानस्यापि धर्त्तुंशक्यत्वादिति भावः।

हेतुत्वेऽपि गोत्वधर्मिताऽवच्छेदककशक्तिज्ञानत्वेन व्यक्तिविषयतामनन्तर्भाव्यैव गोत्व-प्रकारकशाब्दबुद्धौ तस्य तथात्वाद् उक्तरीत्या व्यक्तेरवाच्यतोपपत्तेः।

न चैवं व्यक्त्यंशे शक्तिज्ञानस्यापेक्षिततया तदंशे शक्तेः कुब्जत्वानुपपत्तिरिति वाच्यम्?

कार्यकारणभावावच्छेदककोटौ व्यक्त्यनन्तर्भावस्यैव तदंशे कुब्जताव्यव-हारनिर्वाहकत्वाद् अत एव सामान्यलक्षणापूर्वपक्षे मणिकृतां समानप्रकारकत्वेन शक्तिज्ञानशाब्दबोधयोर्हेतुहेतुमद्भावाभिधानमपि न विरुद्ध्यते।

न च शक्त्यंशे गोत्वादिप्रकारकज्ञानस्य गवांशे गोत्वप्रकारकशाब्दबोधहेतुत्वेऽपि कार्यकारणयोः समानप्रकारकत्वस्याक्षतत्वान्नानुभवविरोध इति वाच्यम्?

शक्त्यंशे गोत्वादिप्रकारतामादाय समानप्रकारकत्वस्याभिप्रेतत्वे "ऽपूर्वे वक्ष्यत" इत्यस्यासङ्गत्यापत्तेः।

अपूर्ववादे समानप्रकारकाल्लिङ्पदस्य कार्यत्वेन घटादिरूपकार्ये शक्तिज्ञानात् कार्यत्वेनापूर्वविषयकशाब्दबोध इत्येवाभिधानात् शक्त्यंशे शाब्दधीप्रकारकज्ञानस्य हेतुतायास्तत्रानुक्तेः।

न चैवं जात्यंशे सा ज्ञाता; व्यक्त्यंशे च स्वरूपसती हेतुर्लाघवादिति कुब्जशक्तिवाद इत्यादिचिन्तामणिग्रन्थविरोध इति वाच्यम्?

मतभेदेनोभयसङ्गतेः।

एवञ्च=व्यक्त्यंशे कुब्जशक्तिस्वीकारे। व्यक्तिविषयतामनन्तर्भाव्येति।

न च गोत्वधर्मिताऽवच्छेदककशक्तिज्ञानत्वेन हेतुत्वे धर्मितारूपगवादिविषयताया अपि तदवच्छेदकत्वेन कुतस्तस्य तदनन्तर्भाव इति वाच्यम्?

एतस्य स्वयमेवाग्रे वक्ष्यमाणत्वाद्। अत एवेति। व्यक्त्यंशेऽपि शक्तिज्ञानस्य कारणत्वादेवेत्यर्थः। शक्त्यंश इति। निरूपितत्वसम्बन्धेनेति शेषः। विषयतासम्बन्धेन शक्तिविशेष-णज्ञानांशे वेत्यर्थः। तथा च गोपदं गोत्वशक्तमित्याकारकज्ञानस्यैव हेतुतया तत्तद्व्यक्त्यभानेऽपि न तद्ग्रन्थविरोधः।

मतभेदेनेति। कुब्जशक्तिवादिनां मतभेदेनेत्यर्थः। एवञ्चेति। अवच्छेदकत्वांशे विशेषतया धर्मिताऽऽत्मकव्यक्तिविषयताया अवच्छेदकत्वे चेत्यर्थः। कथञ्चिदुपपादनेऽपि यद्विशेषितविषय-

वस्तुतस्तु—जातिधर्मिताऽवच्छेदककशक्तिज्ञानस्य हेतुत्वे व्यक्तेर्विषयताऽपि कारणताऽवच्छेदककोटौ निविशते, विशेष्यताऽवच्छेदकत्वेनैव धर्मिताऽवच्छेदकीय-विषयताविशेषस्य विशेषणीयत्वाद्, अवच्छेदकतानिरूपकविशेष्यताया व्यक्ति-विषयतारूपत्वाद्।

एवञ्च व्यक्तेरवाच्यताव्यवहारस्य कथञ्चिदुपपादनेऽपि शक्त्यंशे जातिप्रकारक-ज्ञानहेतुतामतापेक्षया गौरवं दुर्वारमेव, कारणताऽवच्छेदकेऽधिकविषयतानिवेशाद्।

एवं द्रव्यत्वादिधर्मिताऽवच्छेदककप्रमाऽऽत्मकगवादिपदप्रकारकशक्तिज्ञानाद् द्रव्यत्वादिप्रकारकशाब्दबोधवारणाय शक्त्यंशे धर्मिताऽवच्छेदकावच्छिन्नत्वावगा-हित्वस्याप्यधिकस्य निवेशनीयतया गौरवमिति व्यक्तौ कुब्जशक्तिवादिनामपि शक्त्यंशे जातिप्रकारकज्ञानहेतुतामतमेव साधीयः।

वस्तुतस्तु—सर्वलाक्षणिकस्थलेऽप्यन्वयबोधस्यानुभविकत्वेन दुरपह्नवतया लाक्षणिकस्याप्यनुभावकत्वं दुर्वारमेति तस्य लक्ष्यार्थे कुब्जिकाशक्तिप्रसङ्ग इति नानुभवजननसामर्थ्यमीश्वरसङ्केतो वा वृत्तिरूपा शक्तिरपि तु पदार्थान्तरमेव।

सा च जातावेव कल्प्यते न तु व्यक्त्यादाविति न तत्र कुब्जशक्तिरपीति तत्त्वम्।

अथ व्यक्तेर्गवादिपदवाच्यत्वे गवादिपदाद्व्यक्तेः स्मरणमनुभवश्च न स्याद्।

न च पदावाच्यस्याप्यन्वयस्येव व्यक्तेर्भानं शाब्दबोधे नानुपपन्नमिति वाच्यम्?

तद्धर्मप्रकारकशाब्दबोधे तद्धर्मप्रकारकपदार्थोपस्थितेर्हेतुतया गोत्वप्रकारक-शाब्दबुद्धौ गोत्वादिप्रकारकस्मरणस्यापेक्षणीयतया सम्बन्धग्रहाविषयतया व्यक्तेरस्मरणे व्यक्तेः शाब्दानुभवविषयतायादुरुपपादत्वाद् अन्वयस्य च संसर्गविधयैव भानात्, शाब्दधियोऽन्वयांशे निष्प्रकारकतया तदुपस्थित्यनपेक्षणेन वाच्यत्वानुपयोगादिति चेद्?

तायाः शाब्दधियः शक्तिधीजन्यत्वं, शक्तिधियः शाब्दधीजनकत्वं वा तत्त्वं शक्यत्वव्यवहार-प्रयोजकमिति प्रकारेणेत्यर्थः। अनुभवजननसामर्थ्यमिति। यथा वह्नौ दाहानुकूलसामर्थ्यरूपा शक्तिस्तद्वत् पदनिष्ठानुभवजनिकाऽतिरिक्ता मीमांसकविशेषाभिमतेत्यर्थः। ईश्वरसङ्केत इति। नैयायिकाभि-प्रेतेश्वरेच्छारूपः।

भट्टमतमुपन्यस्यति—अत्र भट्टा इति। आक्षेपादेव व्यक्तिधीरिति। आक्षिप्तैव व्यक्तिः

अत्र भट्टाः– पदान्न व्यक्तेःस्मरणमनुभवो वा किन्त्वाक्षेपादेव व्यक्तिधीः, आक्षेपिका च जातिरेव, आक्षेपश्चानुमानमर्थापत्तिर्वा।

न च जातिव्यक्त्योर्वैयधिकरण्यादाक्षेपासम्भवः, तादात्म्यसम्बन्धेन जातेराधेयतासम्बन्धेन व्यक्त्याक्षेपकतायामविरोधात्।

वस्तुतस्तु–गामानयेत्यादौ स्वाश्रयवृत्तित्वादिरूपपरम्परासम्बन्धेनानयनकर्मत्वादौ गोत्वादिजातेरन्वयः शाब्दस्तेन सम्बन्धेन गोत्वादिमत्त्वस्य चाधेयतासम्बन्धेन गवादिमत्त्वविरहेऽनुपपद्यमानत्वाच्चानयनकर्मत्वादावाधेयतासम्बन्धेन गवादिव्यक्तिप्रकारिकाधीः, आक्षेपात् पूर्व्वसंसर्गघटकतया शाब्दबोधे व्यक्तिभानेऽपिकर्मत्वांशे गोत्वाद्यवच्छिन्नव्यक्तेः प्रकारतया भानानुरोधेनाक्षेपादरः, गोत्वं गवाश्रितं गोनिष्ठभेदप्रतियोगिताऽनवच्छेदकधर्मत्वात्, किञ्चिदाश्रितं वा; जातित्वादित्यनुमानतो व्यक्तिलाभस्तु न सार्वत्रिकः, तादृशहेतूपस्थितेरसार्वत्रिकत्वाद्, गवादिपदात्तादृशरूपेण गोत्वादेरनुपस्थितेः।

अथ गवादिपदाद् व्यक्तेरस्मरणे गोत्वादिस्मरणमेव कथमुपपद्यते?

गोत्वप्रकारकस्मरणे व्यक्तेर्विशेष्यतया भाननियमात्, तद्विशेष्यकस्मरणे च

शाब्दबोधे भासत इति भावः। आक्षेपिका, आक्षेपप्रयोजिका। अर्थापत्तिरिति। सा चानुपपद्यमानत्वज्ञानं। तच्च तत्र तदभावप्रयोज्यसत्त्वभाववत्त्वम्, अभावप्रतियोगिसत्त्वप्रकारकज्ञानं तत्र तद्धीजनकम्। एतच्च तन्मते प्रमाणान्तरं यथा पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवाऽधिकरणकभोजनकर्तृत्वाभाववान् पीनो देवदत्त इति प्रथमं शाब्दबोधः, पश्चाद् दिवाभोजनाभाववतो देवदत्तस्य रात्रिभोजनं विना पीनत्वमनुपपन्नमित्यर्थापत्तितो रात्रिभोजनवान् पीनो देवदत्त इत्यर्थापत्तिरिति तु भट्टानुयायिनः।

केचित्तु–तादृशशाब्दबोधानन्तरं तादृशदेवदत्तो दिवाभोजनकर्त्तेत्यौपादानिको बोधो जायते, शाब्दसामग्रीसहकारेणानुपपत्तिज्ञानाज्जन्यते यज्ज्ञानं स एव औपादानिक इति वदन्ति।

तादात्म्यसम्बन्धेनेति। तथा च गोत्वं गवाश्रितं व्यक्त्याश्रितं वा गोत्वाद् जातेर्वा यन्नैवं तन्नैवमित्यनुमानं, व्यक्त्याश्रितत्वं विना जात्याऽनुपपन्नमित्याद्यर्थापत्तिरिति भावः।

एतद्ग्रन्थस्तु–अनुमानमात्रपरं वा, एतादृशानुमानस्य वक्ष्यमाणदोषग्रस्तत्वादाह–वस्तुतस्त्विति। तेन सम्बन्धेनेत्यादिग्रन्थस्तु कर्मत्वधर्मिकाधेयतासम्बन्धावच्छिन्नगवाभावव्यापकीभूताभावप्रतियोगिगोत्वकर्मतात्वादित्यनुमानपरस्तादृशार्थापत्तिपरश्च। तद्विशेष्यकस्मरण इति। गोत्वविशेष्य-

व्यक्तिघटितगोत्वत्वादेः प्रकारतया भाननियमाद्, व्यक्त्यघटितप्रकारस्य सम्भवेऽपि स्वरूपत एव जातेः शक्यतया धर्मान्तरविशेष्यतया तत्स्मरणासम्भवाद् धर्मान्तरप्रकारेण स्मरणे गोत्वाद्यंशे निष्प्रकारकशाब्दज्ञानासम्भवेन तादृशस्मृतेरनुपयोगित्वाच्चेति चेद्?

न—पदादालोचनरूपस्यैव स्मरणस्योपगमात् किञ्चिद्धर्मावच्छिन्नसम्बन्ध्युपरक्तसम्बन्धज्ञानाधीनतत्सम्बन्धिस्मृतेः सप्रकारकत्वनियमेऽपि निर्विशेषणकसम्बन्ध्युपरक्तसम्बन्धज्ञानान्निर्विकल्पकांशस्मरणे बाधकाभावाद्, निर्विकल्पकस्य संस्काराजनकत्वेऽपि विशिष्टज्ञानाहितविशिष्टगोचरसंस्काराद्विशेष्यांशानुद्बोधदशायां केवलविशेषणांशस्मरणे न विरोध इति वदन्ति।

तदसद्—गवादिपदात् स्वरूपतो गोत्वादिज्ञानेऽपि व्याप्यताऽवच्छेदकप्रकारेण तद्ग्रहासम्भवात्, ततो व्यक्त्याक्षेपासम्भवाद्।

न च परम्परासम्बन्धेन शाब्दधीविषयेण गोत्वादिविशेषितकर्मत्वादिहेतुनाऽऽनयनादौ गवादिकर्मत्वमनुमेयमिति वाच्यम्?

विशिष्टसाध्यस्य प्रागप्रतीतेः।

कस्मरण इत्यर्थः। व्यक्तिघटितेति। गोत्वत्वघटकगवेतरावृत्तित्वघटकत्वाद् गवादेरिति भावः। व्यक्त्यघटितेति। जातित्वादिप्रकारस्येत्यर्थः। स्वरुपतो गोत्वादिशक्तिज्ञानस्य कथञ्चित् किञ्चित्प्रकारेण स्मरणप्रयोजकत्वकल्पनेऽप्याह—धर्मान्तरेति। आलोचनरूपस्यैवेति। निर्विशेष्यक- निष्प्रकारकस्येत्यर्थः। संस्काराजनकत्वेऽपीति।

ननु निर्विकल्पकस्य संस्कारजनकत्वे का क्षतिरिति चेद्।

न—तस्य संस्कारजनकत्वे संस्कारस्यापि तथात्वेन तज्जन्यस्मृतेरपि निर्विकल्पकत्वेनातीन्द्रियतया तत्कल्पकाभावात्। शाब्दबोधस्थले तु तदनुपपत्त्या कल्पनीयस्य निर्विकल्पकस्मरणस्य निर्विकल्पकस्मरणं विनाऽप्युपपादनादित्याशयः।

व्याप्यताऽवच्छेदकप्रकारेणेति। आधेयतासम्बन्धेन गवादिव्याप्यताऽवच्छेदकागोत्वत्वादिप्रकारेणेत्यर्थः। विशिष्टसाध्यस्य=गोकर्मताकत्वस्य। प्रागप्रतीतेरिति। अनुमितेः पूर्वं तद्ग्राहकाभावेन तद्ग्रहासम्भवादिति भावः।

ननु शब्देन गोत्वेन कर्मत्वज्ञानेऽपि गवाद्युपस्थितिसहकारेण मनसैव गोकर्मत्वग्रहसम्भवादाह—एवमिति।

एवं गौरानीयतामित्यादौ स्वरूपत उपस्थितस्य गोत्वादेरेव विशेष्यतया भानोपगमे निर्धर्मिताऽवच्छेदककशाब्दधीस्वीकारापत्तेः।

एवं गवादावानयनकर्मत्वं सामानाधिकरण्यसम्बन्धेनानयनकर्मत्वविशेषित-गोत्वादिना हेतुनाऽनुमेयं; तच्च न सम्भवति तादृशगोत्वादेरानयनकर्मत्वादि-शून्यगवादिसाधारण्येन व्यभिचारात्, सामानाधिकरण्यसम्बन्धेनानयनकर्मत्वादिवि-शिष्टस्य विशेषणाव्यभिचारित्वेऽपि साध्यस्य पक्षे सन्देहदशायां साध्यहेत्वोः पक्षे दुर्निश्चयत्वाद्; अतो व्यक्तेः शाब्दबोधे विशेष्यविधया भानमावश्यकमित्यपि बोध्यम्।

एतेन जातिवाचकपदाज्जातिबोधः शाब्दः व्यक्तिबोधस्त्वौपादानिक एवेति श्रीकरमतमनुपादेयम्।

उपादानस्यार्थापत्तिरूपत्वेन भट्टमताविशेषाद्।

न च जातिरेव व्यक्तिबोधिका जातिकरणत्वमेवौपादानिकत्वं बोधस्येति वाच्यम्?

जातेः प्रमाणान्तरत्वकल्पनापेक्षया व्यक्तिशक्तिकल्पनाया एवोचितत्वाद्।

एवं जातेर्नित्यतया सर्वदैव तदुपादानकव्यक्तिधीवारणाय जातिहेतुकव्यक्तिबोधे

ननु गौरानीयतामित्यादौ शाब्दिकमते शाब्दस्य धात्वर्थमुख्यविशेष्यकत्वेनानयनादौ स्वरूपतो गोत्वभानसम्भवाल्लक्षणया गोत्वत्वेन गोत्वविशेष्यकत्वसम्भवाद्दोषान्तरमाह—एवं गवादाविति। गौरानीयतामित्यादिवाक्यानन्तरं गवादावानयनकर्मत्वबोध आवश्यकः, अन्यथाऽऽनयनकर्मत्वादिना गवादौ प्रवृत्तिर्न स्यादिति। साध्यहेत्वोरिति। तथा च सामानाधिकरण्यसम्बन्धेन साध्यविशिष्टहेतोरपि निश्चयासम्भव इति भावः।

एतेनेति। अस्यानुपादेयमित्यनेनान्वयः। पूर्वोक्तदोषेणेत्यर्थः।

ननूक्तदोषा भट्टमत एव दत्ताः; ते चौपादानिकबोधाङ्गीकर्तृमते कुतः सम्भवन्तीत्यत आह—उपादानस्येत्यादि। अर्थापत्तिरूपत्वेन=शाब्दसामग्रीसहकृतानुपपत्तिज्ञानरूत्वेनेत्यर्थः। भट्टमता-विशेषादिति। तथा चोक्तदोषा जाग्रत्येवेति भावः।

एवोचितत्वादिति। जातेः प्रमाणान्तरताकल्पने प्रमित्यन्तरमपि कल्पनीयं स्याद् गौरवेणेति भावः।

अनुभवश्चेत् फलानुरोधेन गौरवमपि न दोषावहमित्यत आह—एवं जातेरित्यादि।

शाब्दत्वमावश्यकमिति। ज्ञाने यद्विषयित्वमितरप्रमाणप्रयोज्यत्वे सति शाब्दसामग्रीप्रयोज्यं

जातिशक्तिज्ञानघटिततच्छाब्दसामग्र्याः सहकारित्वमवश्यमभ्युपगन्तव्यमिति; तथा च तादृशसामग्र्या एव व्यक्तिज्ञानप्रयोजकतासम्भवेन जातेः करणत्वकल्पनमनर्थकम्।

न च जातिनिरपेक्षजातिभासकशाब्दसामग्र्या व्यक्तिज्ञानप्रयोजकत्वे व्यक्त्यंशेऽपि शाब्दत्वमावश्यकं; तथा सति च वृत्तिज्ञानजन्यव्यक्तिस्मृतेरप्यपेक्षा स्याद्; जातेः करणत्वे च व्यक्त्यंश औपादानिकत्वमेव न तु शाब्दत्वमिति न तदपेक्षेति वाच्यम्?

व्यक्तिज्ञानांशे जातेः करणत्वे तदंशेऽशाब्दत्वोपगमसम्भवेन तदकरणत्वेऽपि तत्सम्भवाद्, जातेरकरणत्वे व्यक्त्यंशे कीदृशकारणस्य जन्यताऽवच्छेदकधर्मवत्त्वमिति चेद्?

न कस्यापि; तावता क्षतिविरहाद्।

व्यक्तेरपि बोधः शब्दादेव न त्वाक्षेपादितो, व्यक्तिशाब्दबोधे शक्तिविरहो नानुपपत्तिं प्रयोजयति; लक्षणात एव तदुपपत्तेरिति मण्डनाचार्यमतम्–

तदुक्तम्–

"जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति।
नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे" इति

ज्ञाने तच्छाब्दत्वमिति नियमादिति। व्यक्तिस्मृतेरिति। सांसर्गिकविषयताभिन्नशाब्दीयविषयता वृत्तिज्ञानजन्योपस्थितिप्रयोज्यत्वनियमादिति भावः। औपादानिकत्वमेवेति। एतन्मते शाब्दत्वमौपादानिकत्वञ्च द्वे एकज्ञान एव विषयरूपावच्छेदकभेदेन तिष्ठतः। ते च जाती अखण्डोपाधी वेत्यन्यदेतत्। तदपेक्षेतीति। वृत्तिज्ञानजन्यव्यक्तिस्मृत्यपेक्षेतीत्यर्थः।

तत्सम्भवादिति। अशाब्दत्वसम्भवादित्यर्थः। तथा च जातिकरणत्वं कल्पयित्वा तत्र शाब्दत्वाभावप्रयोजकत्वकल्पनाऽपेक्षया वृत्तिज्ञानजन्योपस्थितौ तत्प्रयोजकत्वकल्पनौचित्यादिति भावः।

मण्डनाचार्यमतमुत्थापयति–व्यक्तेरपीति। अस्तित्वनास्तित्वे इति। अस्तिनास्तिशब्दावव्यये ताभ्यां भावे त्वप्रत्ययेऽस्तित्वनास्तित्वे। विशेषणे इति। विवक्षतीत्यनेनान्वयः; अस्तित्वनास्तित्वशब्दयोर्यथाश्रुतसत्तातदभावार्थकत्वे जातावपि विवक्षासम्भवादाह– उत्पादविनाशाविति। गौरुत्पद्यते गौर्नश्यतीत्यादित उत्पत्त्याश्रयत्वेन विनाशप्रतियोगित्वादिना व्यक्तिरेव विवक्ष्यते, गोत्वादौ तद्बाधादतो व्यक्तिबोध आवश्यकः, स च लक्षणयैवेति भावः।

अस्तित्वनास्तित्वे उत्पादविनाशौ, लक्षणा च जातिप्रकारेणैव बोधयति न तु व्यक्तित्वादिनेति नानुभवविरोधः, नीलादिपदस्य शक्यनीलादिगुणपुरस्कारेण लक्षणया बोधकत्ववत् शक्यजातिपुरस्कारेण लक्षणाया गवादिपदस्य व्यक्तिबोधकत्वेऽविरोधात्।

"स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा"–

इत्यत्र स्वार्थपदस्य शक्यताऽवच्छेदकपरत्वाद्।

अत्रेदं चिन्त्यं–गवादिपदाल्लक्षणया गोत्वादिप्रकारकबोधोपगमे जातिशक्तिरन्वयबोधे नापेक्ष्यते; लक्ष्यताऽवच्छेदकताया एव जातिभानप्रयोजकत्वसम्भवाद्।

न च शक्तिं विना व्यक्तौ शक्यसम्बन्धरूपलक्षणैव न निर्वहतीति शक्तेरुपयोगितेति वाच्यम्?

लक्षणानिर्वाहार्थं शक्तिकल्पने गवादिपदस्य द्रव्यत्वादावपि विनिगमनाविरहेण शक्तिकल्पनप्रसङ्गाद्, द्रव्यत्वादिसम्बन्धेनापि गवादौ लक्षणासम्भवात्।

प्रयोगविरहस्य द्रव्यत्वादाविव स्वातन्त्र्येण गोत्वादावप्यविशिष्टत्वाल्लक्षणाघटकतया शक्तेरुपयोगितायां तस्या वृत्तित्वानुपपत्तेः; स्वातन्त्र्येणातथात्वाद्।

अथाकृतिविशिष्टायामेव व्यक्तौ लक्षणा, आकृतिप्रकारेण व्यक्तिबोधस्य नैयायि-

---

"स्वार्थादन्येन रूपेणे"त्यादिकारिकास्थस्वार्थपदस्य शक्यपरत्वे गोत्वादीनां शक्यतया लक्षणया गोत्वादिना व्यक्तिबोधे विरोधः स्यादत आह–स्वार्थपदस्येति।

शक्यसम्बन्धरूपेति। शक्यानुयोगिकसम्बन्धरूपेत्यर्थः। विनिगमनाविरहेण गवि गोत्वसम्बन्धद्रव्यत्वसम्बन्धयोः गोत्वद्रव्यत्वयोश्च तुल्यशरीरत्वादिति भावः।

द्रव्यत्वादिसम्बन्धेनापीति। अत्र तृतीयाऽर्थोऽभेदस्तस्य च लक्षणायामन्वयः।

नन्वस्तु विनिगमनाविरहः किन्तु प्रयोगतद्विरहाभ्यां शक्तितद्विरहौ कल्प्येते इत्यत आह–प्रयोगविरहस्येति। तस्या इति। शक्तेरित्यर्थः। वृत्तित्वानुपपत्तेरिति। उपस्थितिद्वारा यत्सम्बधज्ञानं साक्षात् शाब्दबोधजनकं तस्यैव वृत्तिपदार्थत्वादिति। स्वातन्त्र्येणेति। लक्षणाद्वारैवेत्यर्थः। अतथात्वादिति। शाब्दबोधाजनकत्वादित्यर्थः।

आनुभविकत्वादिति। तथा चावयवसंयोगनिष्ठजातौ शक्तिकल्पन आकृतिप्रकारकबोधानुपपत्तिरेव बाधिकेति हृदयम्। न शक्त्यभावसाधक इति। गोत्वं न गोपदशक्यं वृत्त्यन्तरा-

कानामप्यनुमतत्वात्; तत्र शक्त्युपस्थापितजातेरन्वय उपगम्यते।

न चाकृतावेव शक्तिर्ज्जातिविशिष्टे लक्षणेति वैपरीत्यमेव किन्न स्यादिति वाच्यम्?

आकृतेरवयवसंयोगरूपाया आनन्त्यात् तदपेक्षया लघीयस्यां जातावेव शक्ति-कल्पनौचित्याद्।

न चावयवसंयोगनिष्ठजातिरेव शक्याऽस्तु व्यक्तौ तदन्वयश्च स्वाश्रयघटित-परम्परासम्बन्धेन स्वीक्रियतामिति वाच्यम्?

आकृतिप्रकारकबोधस्यानुभविकत्वाद्, लक्ष्यार्थव्यक्त्यनुपरक्तायां केवलजातौ प्रयोगविरहश्च न शक्त्यभावसाधकोऽप्रयोजकत्वात्।

तत्राप्रयोगमात्रस्यैव तदशक्यत्वबीजत्वात् जातावप्रयोगस्यासिद्धत्वात् तात्पर्यसत्त्वे च वृत्तिद्वयाधीनबोधोपगमे क्षतिविरहः।

न चैवं केवलं मुख्यार्थतात्पर्येण गवि नित्यत्वमिति स्वारसिकप्रयोगापत्तिरिति वाच्यम्?

शक्त्या स्वरूपत उपस्थिताया जातेः समानपदोपात्तधर्मिण्येवाश्रयतासम्बन्धे-नान्वयस्य व्युत्पन्नत्वाद्।

न चान्वयिताऽवच्छेदकरूपेणानुपस्थिताया जातेरन्वयो विरुद्ध्यते; व्युत्पत्तिवै-चित्र्येण प्रकारतया स्वरूपत उपस्थिताया जातेरन्वयस्वीकारे क्षतिविरहादिति रीत्या

प्रयोज्यत्वनियतगोपदजन्यशाब्दबोधविषयत्वाभावाद् घटादिवदित्यनुमानाच्छक्तिविरहसिद्धिरिति। अप्रयोजकत्वादिति। अनुकूलतर्कविरहात् तथा चानुकूलतर्काभावेन तादृशव्याप्तिनिर्णयो न भवतीति भावः।

नन्वेवं गवादिपदस्य घटत्वादौ शक्तिः स्यादित्यत आह—तत्राप्रयोगेति। अनादिप्रयोगवि-रहमात्रस्यैवेत्यर्थः। मात्रपदेन तादृशानुमानव्यवच्छेदः।

समानपदोपात्तेति। एकपदोपस्थितधर्मिण्येवेत्यर्थः।
मतमेतदिति। मण्डनाचार्यमतमित्यर्थः।

गवादाविति। अवयवसंस्थानविशिष्टव्यक्तावित्यर्थः। योग्यताज्ञानादीनामिति। आकृतिविशिष्टो

चेद् मतमेतत् परिष्क्रियते?

तथाऽपि स्वरूपतो गोत्वान्वयबोधस्यापि लक्ष्यार्थे गवादौ स्वीकारे तादृशान्वयबोधं प्रति योग्यताज्ञानादीनां कारणताकल्पनाऽऽधिक्याद् गोत्वादिविशिष्टव्यक्तिशाब्दसामग्रीप्रतिबन्धकतायां जातिव्यक्तिविषयकोपस्थितिद्वयस्य निवेशनीयतया प्रतिबन्धकताऽवच्छेदकशरीरगौरवाच्च जात्याकृतिविशिष्टव्यक्तिशक्तिपक्ष एव साधीयान्।

प्राभाकरास्तु—जातिशक्तिज्ञानादेव जातिप्रकारेण व्यक्तेः स्मरणं शाब्दबोधश्च; न तु निर्विकल्पकरूपं जातिस्मरणं निर्विकल्पकानभ्युपगमाद्।

व्यक्तिसम्बन्धज्ञानविरहेण तदंशानुद्बोधाद्व्यक्तिस्मरणासम्भवइति तु नाशङ्कनीयं, व्यक्तिमविषयीकृत्य स्वरूपतो गोत्वादिज्ञानासम्भवेन गोत्वाद्युद्बोधकस्यैव व्यक्त्युद्बोधकत्वादुद्बोधकस्य फलबलकल्प्यत्वात्।

सम्बन्धिताऽवच्छेदकहस्तित्वादौ सम्बन्धाग्रहेऽपि हस्त्यादिसम्बन्धिहस्तिपकादिज्ञानात्मकोद्बोधकबलाद् हस्त्यादिस्मरणे हस्तित्वादिप्रकारतया भानवद्व्यक्तिसम्बन्धज्ञानमन्तरेणापि जातिसम्बन्धिपदज्ञानाज्जातिस्मरणे व्यक्तेर्विशेष्यतया भाने विरोधविरहात्।

न गौरिति निश्चयाभावः। आकृतिविशिष्टो गौरित्यादिज्ञानं वा योग्यताज्ञानम्। आदिना पृथगुपस्थित्यादिपरिग्रहः।

जातिशक्तिज्ञानादेवेति। गोपदं गोत्वे शक्तं, गोपदं गौरित्यादिज्ञानादेवेत्यर्थः, प्रथमे शक्त्यंशे निरूपितत्वसम्बन्धेन द्वितीये पदांशे शक्तिसम्बन्धेन गोत्वं प्रकारः।

ननु स्मरणे संस्कारस्य सहकारिसम्बन्धज्ञानमेवोद्बोधकं तत्र यदंश उद्बोधकं तस्यैव स्मरणम्। अन्यथोदासीनस्यापि स्मरणापत्तिः।

एवञ्च तादृशशक्तिरूपसम्बन्धज्ञाने व्यक्त्यंशभानात् कुतो व्यक्तेः स्मृतिरित्याशङ्कते—व्यक्तिसम्बन्धेति।

ननु साहचर्ये सादृश्यादिज्ञानस्याप्युद्बोधकतया गोत्वादिसाहचर्ये ज्ञानेन गोत्वादिना गवादिस्मरणानुदयाद् अतः गोत्वादिप्रकारकस्मृतिं प्रति गोत्वाद्यवच्छिन्ननिरूपितसम्बन्धज्ञानत्वेन सर्वसाधारणैकहेतुतायाः कल्पनेन कुतो गोत्त्वशक्तिज्ञानेन गोत्वादिना गवादेः स्मरणसम्भव इत्यत आह—अदृष्टादिरूपेति।

तद्धर्मप्रकारकस्मृतौ तद्धर्मावच्छिन्नसम्बन्धितया गृहीतवस्तुज्ञानस्य हेतुतायामदृष्टादिरूपोद्बोधकजनितस्मृतौ व्यभिचारवारणाय कार्यताऽवच्छेदकसङ्कोचस्यावश्यकतया तत एव प्रकृते व्यभिचारानवकाशाद्।

जातिशक्तिज्ञाने नियमतो जातिप्रकारेण व्यक्त्यभानात् तज्जन्यसंस्कारान्नियमतो व्यक्तिस्मरणासम्भव इति चेत्?

का क्षति; व्यक्तिविषयकज्ञानान्तरस्यावश्यकतया तज्जनितसंस्कारादेव व्यक्तिस्मरणसम्भवाद्।

अथ भवतु जातिशक्तपदज्ञानाज्जातिप्रकारेण व्यक्तिस्मरणं तथाऽपि तत्प्रकारकशाब्दबोधो न सम्भवति; तद्धर्मप्रकारकधर्मिविषयकशाब्दबोधे तद्धर्मप्रकारेण धर्मिगृहीतवृत्तिकपदज्ञानजन्यतद्धर्मप्रकारकोपस्थितेर्हेतुत्वात् पदे गृहीतवृत्तिकत्वमात्रनिवेशे घटत्वादिगृहीतवृत्तिकपदाद् गोत्वाद्यवच्छिन्ननिरूपितसम्बन्धान्तरावगाहिज्ञानजन्यगोत्वादिप्रकारकस्मरणाद् गोत्वादिप्रकारकशाब्दबोधापत्तेः, तद्धर्मगृहीतवृत्तिकत्वनिवेशे पशुत्वादिधर्मगृहीतशक्तिकविशिष्टवाचकपश्वादिपदात् पशुत्वादिविशिष्टविषयकशाब्दबोधस्य गुरूणामप्यननुमतस्यापत्तेः।

अथ जातमात्रबालकस्य स्तनपानादाविष्टसाधनताज्ञानस्य प्रत्यक्षादिनोत्पत्त्यसम्भवात् स्मृत्यात्मकताया आवश्यकत्वेनागत्या तत्रैव क्वचित् स्वप्नादौ चादृष्टस्योद्बोधकत्वं कल्प्यते; न गवादिस्मरण इत्यत–आदीति। साहचर्यादीनां सम्बन्धत्वेनाभाने साहचर्यत्वादिना ज्ञानेन स्मरणजननात् तादृशतादृशविशेषधर्मेण ज्ञानस्य हेतुताया वक्तव्यतया; आदिना तत्तद्विशेषधर्मावच्छिन्नस्य परिग्रहः। कार्यताऽवच्छेदकसङ्कोचस्येति। तादृशतादृशकारणाव्यवहितोत्तरत्वघटितत्वेन कार्यताऽवच्छेदकस्यासमग्रकार्यावृत्तित्वस्येत्यर्थः।

ज्ञानान्तरस्येति। प्रत्यक्षाद्यात्मकस्येत्यर्थः। आवश्यकतयेति। अन्यथा व्यवहारादिना शक्तिग्रह एव नोत्पत्तुमर्हतीति भावः।

पदे गृहीतेति। पदविशेष्यकवृत्तिप्रकारकज्ञानत्वेन गोत्वेन गोविषयकशाब्दं प्रति हेतुत्व इत्यर्थः। गोत्वाद्यवच्छिन्नेति। घटत्ववृत्तिमत्पदं गोत्वत्वावच्छिन्नसमानकालीनमित्यादिजन्यगोस्मरणादित्यर्थः। तद्धर्मगृहीतेति। तद्धर्मनिष्ठनिरूपितत्वसम्बन्धावच्छिन्नवृत्तिनिष्ठप्रकारताकपदत्वावच्छिन्नविशेष्यताशालिज्ञानत्वेन तद्धर्मप्रकारेण धर्मिविषयकशाब्दं प्रति हेतुत्व इति यावत्।

जातिमल्लाक्षणिकेति। द्रव्यपदं सुवर्णत्वावच्छिन्नसम्बन्धिनि शक्तमित्यादिज्ञानादित्यर्थः। एतच्च शाब्दबोधौपयिकसम्बन्धत्वरूपवृत्तित्वेन शक्तिलक्षणाज्ञानसाधारणैकहेतुत्वाभिमानेनाभिहितम्।

न च प्रकारीभूतधर्मभेदेन कार्यकारणभावभेदस्य यत्त्वतत्त्वाननुगमेनावश्यकत्वाज्जातिविशिष्टविषयकशाब्दबोध एव जातिरूपधर्ममात्रगृहीतवृत्तिकपदज्ञानजन्यस्मरणस्य हेतुत्वमङ्गीकार्यम्, उपाधिविशिष्टविषयकशाब्दबोधे तु विशिष्टगृहीतवृत्तिकपदज्ञानजन्यस्मृतेरेवेति वाच्यम्?

एवमपि जातिमल्लाक्षणिकपदज्ञानाज्जातिप्रकारकशाब्दबोधानुपपत्तेर्दुर्वारत्वाद् लक्षणाज्ञानाधीनपदार्थोपस्थितेर्हेतुत्वान्तरकल्पने गौरवाद्।

न च तन्मतेऽध्याहृतार्थस्याप्यन्वयबोधविषयतया पदजन्यपदार्थोपस्थितित्वेन हेतुतैव नास्ति कथमुक्तानुपपत्त्यवकाशइति वाच्यम्?

सर्वार्थाध्याहारस्थलेऽन्वयबोधवारणाय तन्मतेऽपि तादृशहेतुताया व्यवस्थापितत्वाद्।

न च तथाऽपि पदज्ञानजन्यपदार्थोपस्थितित्वघटितकारणताऽवच्छेदकेन व्यक्तिलाक्षणिकपदजन्यव्यक्त्युपस्थितेरसंग्रहो न दोषाय, अध्याहाररूपार्थोपस्थितेर्येन रूपेण हेतुता व्यवस्थापिता; लक्षणार्थोपस्थितेरपि तद्रूपाक्रान्ततयोपपत्तेः; शक्तपदस्यैवानुभावकतेति सिद्धान्तात् सर्वलाक्षणिकस्थलेऽन्वयबोधानुपगमात् तत्स्थलीयसामग्रीबलात् सर्वार्थाध्याहारस्थलेऽप्यन्वयबोधापत्तिरिति शङ्काऽनवकाशादिति वाच्यम्?

अध्याहृतार्थस्येति। द्वारम् आनयेत्याद्युक्ते द्वारकर्मकत्वानयनकार्यत्वाद्युपस्थितौ तत्सम्बन्धज्ञानेन पिधानकार्यत्वगोकर्मत्वादिरूपार्थाः स्म्रियन्ते तदनन्तरं तेनैव पिधेहीत्यादिपदज्ञानं विनाऽप्युपस्थितानामर्थानामन्वयबोधो भवतीति प्राभाकराणामाशयः।

नैयायिकानान्तु–द्वारम् आनयेत्यादिपदज्ञानानन्तरं पिधेहीत्यादिपदान्येव स्मर्यन्ते, ततस्तेभ्यः पदेभ्यस्तावत्पदार्थोपस्थितौ वाक्यार्थबोधः, "शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते" इति न्यायादिति हृदयम्।

एवञ्च प्राभाकरमते पदवृत्तिज्ञानजन्यपदार्थोपस्थितेः शाब्दबोधहेतुत्वमसम्भवीति भावः।

सर्वार्थाध्याहारस्थल इति। पदज्ञानं विना यत्र सम्बन्धान्तरज्ञानाद् निराकाङ्क्षाणां घटः कर्मत्वम् आनयनमित्यादिपदानां ज्ञानाद्वा पदार्थानामुपस्थित्या शाब्दबोधवारणायेत्यर्थः। लक्षणार्थोपस्थितेरपीति। शक्तपदज्ञानस्यैव तादृशार्थोपस्थितिसहकारेण लक्ष्यार्थान्वितस्वार्थानुभावकत्वादिति भावः। शाब्दबोध इति। तथा च पशुमिति गोपरपशुपदघटितवाक्यात् कर्मत्वं

यत्र लाक्षणिकपश्वादिपदाद् गोत्वादिप्रकारकोपस्थितिस्तदव्यवहितोत्तरद्वितीयाऽऽदिविभक्तितः शक्त्या कर्मत्वाद्युपस्थितिस्ततः कर्मत्वादिविशेष्यको गोत्वाद्यवच्छिन्नप्रकारकः शाब्दबोधस्तत्स्थलीयसामग्रीलक्षणाऽधीनपदार्थोपस्थितेरध्याहारात्मकोपस्थितिसाधारणरूपमात्रेण हेतुतामते कर्मत्वाद्युपस्थापकविभक्तिप्रकृतिभूतपश्वादिपदाद्यत्र न गोत्वाद्यवच्छिन्नोपस्थितिरपितु निराकाङ्क्षपदान्तरादनुमानादितो वा तत्राप्यक्षतैवेति तादृशशाब्दबोधस्य तत्रापत्तेर्दुर्वारत्वाद्।

अर्थाध्याहारमतेऽपि यत्र साकाङ्क्षपदद्वयान्न प्रकृतवाक्यार्थघटकस्याप्यर्थद्वयस्योपस्थितिस्तत्र शाब्दबोधापत्तेरनिष्टत्वादिति चेद्?

न शक्तिलक्षणासाधारणस्यानतिप्रसक्तवृत्तित्वस्य दुर्वचतया शक्तित्वशक्यसम्बन्धत्वाभ्यामेव तयोर्निवेशनीयतया शक्तिलक्षणाऽधीनपदार्थोपस्थित्याः कारणताभेदस्य व्यक्तिशक्तिवादिनामप्यावश्यकतया शक्त्यधीनपदार्थोपस्थितेस्तद्धर्मगृहीतशक्तिकपदज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेनैव तद्धर्मप्रकारकशाब्दबोधहेतुतायाः कल्पयितुमुचितत्वाद्।

न च तद्धर्मावच्छिन्नविषयतानिरूपितशक्तिविषयतानिरूपितविषयताशालिज्ञानत्वेन व्यक्तौ शक्तिलक्षणाग्रहाय व्यक्तिशक्तिवादिमतेऽनुगमः सम्भवति गोसम्बन्धिशक्तं पदमित्याकारके पदशक्त्यसम्बन्धिनी गौरित्याकारके वा लक्षणाग्रहेऽपि गोत्वाद्यवच्छिन्नविषयताया निरूप्यनिरूपकभावसत्त्वादिति वाच्यम्? साक्षान्निरूपितत्वपरम्परानिरूपितत्वयोरनुगमकरूपाभावाद्। यत्तु वृत्तिसंसर्गकपदप्रकारकज्ञानमेव शाब्दबोधोपयोगि, एवञ्च शक्तिसंसर्गतानिरूपकपदप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिज्ञानत्वेन तद्धर्मावच्छिन्नविशेष्यकशक्तिलक्षणाज्ञानयोरनुगमः सम्भवत्येव शक्तसम्बन्धेनार्थांशे पदप्रकारग्रहस्यापि तथात्वात् संसर्गताऽवच्छेदकीयविषयतायामपि

गवीयमित्यादिबोधोत्पत्तये गोत्वेन गोस्मरणसहकृतद्वितीयाजन्यकर्मत्वोपस्थितेरेव कारणत्वं वक्तव्यमिति भावः। तादृशशाब्दबोधस्येति। कर्मत्वं गवीयमित्यादिशाब्दबोधस्येत्यर्थः। साकाङ्क्षपदद्वयेति। यथा द्वारमित्यादिवाक्याद् द्वारकर्मत्वादेरनुपस्थितिरपि च प्रकारान्तरेण द्वारकर्मत्वपिधानादेरुपस्थितिस्तत्रार्थाध्याहारवादिनाऽपि शाब्दबोधो नाङ्गीक्रियते किञ्चित् साकाङ्क्षपदजन्यपदार्थोपस्थितिसहकारेणैवेति भावः। दुर्वचतयेति।

ननु शाब्दबोधप्रयोजकसम्बन्धत्वं शाब्दबोधजनकोपस्थितिजनकज्ञानविषयसम्बन्धत्वं वृत्तित्त्वं सुवचमिति चेद्?

संसर्गतात्वसत्त्वादिति–

तदसत्–शक्तिकालीनत्वादिसम्बन्धावगाहिज्ञानवारणाय पदप्रकारत्वार्थ-विशेष्यत्वोभयनिरूपितशक्तिनिष्ठसांसर्गिकविषयताया निवेशस्यावश्यकतया शक्ति-संसर्गज्ञानसङ्ग्राहकेण रूपेण लक्षणाग्रहासम्भवाद्।

अथ धर्मशक्तपदस्य धर्मिस्मरणशाब्दबोधजनकत्वे लोमाद्यात्मकोपाध्यव-च्छिन्नबोधकपश्वादिपदस्यापि धर्मिशक्तिर्विलीयतां युक्तेः साम्याद्।

न च निर्विकल्पकरूपस्य स्मरणस्य शाब्दबोधस्य चानभ्युपगमाज्जातिवा-चकपदाद्व्यक्त्यविषयकस्मरणाद्यसम्भवेन तस्य व्यक्तिस्मरणादिजनकत्वं धर्मविषय-कस्यापि लोमत्वाद्यवच्छिन्नविषयकस्मरणादेः सम्भवात्, पश्वादिपदस्य लोमत्वाद्य-वच्छिन्नमात्रवाचकत्वोपगमे न धर्मिधीः सम्भवतीति न तस्य धर्मवाचकतेति वाच्यम्?

उपाधेर्धर्मिविनिर्मोकेण भानसम्भवरूपस्य जात्यपेक्षया विशेषस्य सत्त्वेऽपि जातिशक्तपदज्ञानस्य जातिप्रकारिकायामिवोपाधिशक्तिज्ञानस्याप्युपाधिप्रकारकध-र्मिविषयकबुद्धौ कारणताकल्पने बाधकाभावादुपाधिमात्रशक्तादपि धर्मिग्रहसम्भ-वादिति चेद्?

न–लोमत्वाद्यवच्छिन्नसम्बन्धान्तरवत्तया गृहीतात् पश्वादिपदाल्लोमत्वादिना लोमादिमुख्यविशेष्यकस्यैव स्मरणस्य बाधकान्तरविरहदशायामुत्पादवत् तत्तद्रूपाव-च्छिन्नशक्तत्वेन गृहीतात् पदादपि तत्तद्रूपावच्छिन्नमुख्यविशेष्यकस्मरणोत्पादस्यानुभ-विकत्वात्, ततस्तद्धर्मावच्छिन्नप्रकारकस्मरणस्य नियमतः स्वीकारासम्भवाल्लोमा-दिमात्रशक्तत्वेन गृहीतपदान्नियमतस्तत्प्रकारकशाब्दबोधस्यानिर्वाहाद् अविशेषि-

---

न–शक्तिग्रहे लक्षणाग्रहे च प्रत्येकं शाब्दबोधजनकत्वं विना तादृशधर्मस्य दुर्ग्रहतया प्रत्येकजनकतयैवोपपत्तौ तादृशजनकत्वे मानाभावात्। संसर्गतात्वसत्त्वादिति। संसर्गानवच्छिन्नविषय-तामात्रवृत्तिसंसर्गत्वमतिरिक्तपदार्थ इति, तथा चैतन्मते शक्तिसम्बन्धेन स्वशक्यसम्बन्धेन च गोर्गोपवान् इत्याकारकं ज्ञानं हेतुस्तदुभयत्रापि पदत्वावच्छिन्नप्रकारतायां शक्तिनिष्ठसांसर्गिक-विषयतानिरूपितत्वमस्ति, अत उभयज्ञानमेकरूपेण तत्र हेतुरिति। प्रथमे संसर्गताऽवच्छेदक-तानिरूपितत्वं, द्वितीये तदवच्छेदकताऽऽत्मकसांसर्गिकविषयतानिरूपितत्वमिति विशेषः। प्रकारत्वार्थेति। पदनिष्ठप्रकारतानिरूपितशक्तिनिष्ठसांसर्गिकविषयतानिरूपितार्थनिष्ठविशेष्यता-शालिज्ञानत्वेन तद्धर्मप्रकारकशाब्दत्वेन कार्यकारणभाव इति। लक्षणाग्रहासम्भवादिति। लक्षणाग्रहे

तगोत्वादेः सम्बन्धान्तरज्ञानादपि तत्प्रकारकधर्मिस्मरणस्यैवोपगमादेतादृशशक्ति-सम्बन्धज्ञानान्नियमतस्तत्प्रकारकधर्मिस्मरणोपगमेऽनुभवविरोधविरहात्।

अथ गवादिपदस्य समवायेन गोत्वादिविशिष्टावाचकत्वोपगमे तज्जन्यबोधे गोत्वादेः समवाय एव संसर्गतया भासते न तु सम्बन्धान्तरमित्यत्र किं नियामकम्?

वाच्यानन्तर्भावस्य समवायसाधारण्येन सम्बन्धान्तराभानप्रयोजकत्वासम्भवाद्, न हि जातिर्व्यक्तिं विना न भासत इतिवत्, समवायं विनाऽपि न भासत इत्यपि नियमो; येन जातिशक्तिज्ञानजन्यबोधे समवायभानस्याप्यावश्यकता न तु सम्बन्धान्त-रभानस्येति स्यात्; तदादिपदात् समवायमविषयीकृत्यापि सम्बन्धान्तरेण गोत्वा-दिविषयकबोधोदयादिति चेद्?

एवं सति ज्ञानशक्तिरेवादरणीया; तथा च गवादिपदस्य समवायेन गोत्वा-दिप्रकारकज्ञान एव शक्तेरुपगमात्, ततो नाभ्रान्तानां सम्बन्धान्तरेण तत्प्रकारक-धीस्तत्सम्बन्धेन तत्प्रकारकशक्तिग्रहस्यैव तादृशबोधहेतुत्वादिति।

इति श्रीमहामहोपाध्यायगदाधरभट्टाचार्यविरचितः
शक्तिवादः सम्पूर्णः

तादृशरूपाभावादित्यर्थः। सम्बन्धान्तरवत्तयेति। समानकालीनत्वादिसम्बन्धवत्तयेति भावः। जातिवाच-कगवादिपदे वैलक्षण्यं दर्शयति—अविशेषितेति। किञ्चिद्धर्मप्रकारताऽनापन्नेत्यर्थः। एतादृशशक्ति-सम्बन्धेति। गोत्वादिशक्तिसम्बन्धज्ञानादित्यर्थः। तदादिपदादिति। काले गौः स ज्ञायत इत्यादौ तच्छब्देन कालिकसम्बन्धेन गोत्वविशिष्टकालपरामर्शादित्यलं विस्तरेण।

इति
श्रीमहामहोपाध्यायगोलोकनाथन्यायरत्नभट्टाचार्यात्मजश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचिता
शक्तिवादविवृत्तिः परिपूर्णा
शुभमस्तु

BVP-192

BVP-192
भारतवाणी परियोजना / BHARATAVANI
भारतीय भाषा संस्थान
CENTRAL INSTITUTE OF INDIAN LANGUAGES
मैसूरु / MYSURU - 570 006



श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-११००१६